ओम् । प्राणभृत उपदधाति । प्राणा वै प्राणभृतः प्राणानेवैतदुपदधाति ताः प्रथमायां चिताऽउपदधाति पूर्वार्ध एषोऽग्नेर्यत्प्रथमा चितिः पुरस्तात्तत्प्राणान्दधाति तस्मादिमे पुरस्तात्प्राणाः ॥१॥ ता दश-दशोपदधाति । दश वै प्राणा यदु वाऽअपि बह्वृचो दश-दश दशैव तत्पञ्च कृत्वो दश-दशोपदधाति पञ्च वाऽऋतान्पशूनुपदधाति दश-दश वाऽएकैकस्मिन्पशौ प्राणास्तद्देषु सर्वेषु प्राणान्दधात्यनन्तर्हिताः पशुभ्य उपदधात्यनन्तर्हितास्तत्पशुभ्यः प्राणान्दधाति सर्वत उपदधाति सर्वत एवैषैतत्प्राणान्दधाति ॥२॥ यद्वेव प्राणभृत उपदधाति । प्रजापतेर्विस्रस्तात्प्राणा उदक्रामन्देवता भूत्वा तानब्रवीदुप मेत प्रति मऽएतद्ब्रूत येन मे यूयमुदक्रमिष्टेति स वै तदन्नꣳ सृज्ञस्व यत्ते वयं पश्यन्त उपवसामेति ते वाऽअभ्ये सृज्ञामहाऽइति तथेति ते प्राणाश्च प्रजापतिश्चैतदन्नमसृज्ञतैताः प्राणभृतः ॥३॥ स पुरस्तादुपदधाति । अयं पुरो भुव इत्यग्निर्वै पुरस्तद्यत्तमाह पुर इति प्राञ्चꣳ क्यग्निमुद्धरन्ति प्राञ्चमुपचरन्त्यथ यद्भुव इत्याहाग्निर्वै भुवोऽग्नेर्ह्येदꣳ सर्वं भवति प्राणो ह्याग्निर्भूत्वा पुरस्तात्तस्थौ तदेव तद्रूपमुपदधाति ॥४॥ तस्य प्राणो भौवायन इति । प्राणं तस्माद्रूपादग्नेर्निरमिमीत वसन्तः प्राणायन इति वसन्तमृतुं प्राणान्निरमिमीत गायत्री वासन्तीति गायत्रीं छन्दो वसन्तादृतोर्निरमिमीत गायत्र्यै गायत्रमिति गायत्र्यै छन्दसो गायत्रꣳ साम निरमिमीत गायत्राडुपाꣳशुरिति गायत्रात्साम्न उपाꣳशुं यꣳ हं निरमिमीतोपाꣳशोस्त्रिवृदित्युपाꣳशोर्ह्यात्त्रिवृतꣳ स्तोमं निरमिमीत त्रिवृतो रथन्तरमिति त्रिवृत स्तोमाद्रथन्तरं पृष्ठं निरमिमीत ॥५॥

वसिष्ठ ऋषिरिति । प्राणो वै वसिष्ठ ऋषिर्यद्वै नु श्रेष्ठस्तेन वसिष्ठोऽथो यद्वस्तृतमो वसति तेनोऽएव वसिष्ठः प्रजापतिगृहीतया त्वयेति प्रजापतिसृष्टया त्वयेत्येतत्प्राणं गृह्णामि प्रजाभ्य इति प्राणं पुरस्तात्प्रापादयत नानोपदधाति ये नानाकामाः प्राणे तांस्तद्दधाति सकृत्सादयत्येकं तत्प्राणं करोत्यथ यन्नाना सादयेत्प्राणꣳ हꣳ विच्छिन्द्यात्सैषा त्रिवृदिष्टका यजुः सादनꣳ सूद्दोहास्तत्त्रिवृत्त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तत्कृत्वोपदधाति ॥ ६ ॥ अथ दक्षिणतः । अयं दक्षिणा विश्वकर्मेत्ययं वै वायुर्विश्वकर्मा योऽयं पवतऽएष हीदꣳ सर्वं करोति तद्यत्तमाहु दक्षिणेति तस्मादेष दक्षिणेव भूयिष्ठं वाति मनो हꣳ वायुर्भूत्वा दक्षिणतस्तस्थौ तदेव तद्रूपमुपदधाति ॥ ७ ॥ ॥ शतम् ४३०० ॥ ॥ तस्य मनो वैश्वकर्मणमिति । मनस्तस्माद्रूपाद्वायोर्निरमिमीत ग्रीष्मो मानस इति ग्रीष्ममृतुं मनसो निरमिमीत त्रिष्टुब्ग्रैष्मीति त्रिष्टुभं छन्दो ग्रीष्मादृतोर्निरमिमीत त्रिष्टुभः स्वारमिति त्रिष्टुभश्छन्दसः स्वारꣳ साम निरमिमीत स्वारादर्त्वयाम इति स्वारात्साम्नोऽर्त्वयामं ग्रहं निरमिमीतार्त्वयामात्पञ्चदश इत्यर्त्वयामाद्ग्रहात्पञ्चदशꣳ स्तोमं निरमिमीत पञ्चदशाद्बृहदिति पञ्चदशात्स्तोमाद्बृहत्पृष्ठं निरमिमीत ॥ ८ ॥ भरद्वाज ऋषिरिति । मनो वै भरद्वाज ऋषिरन्नं वाजो यो वै मनो बिभर्ति सोऽन्नं वाजं भरति तस्मान्मनो भरद्वाज ऋषिः प्रजापतिगृहीतया त्वयेति प्रजापतिसृष्टया त्वयेत्येतन्मनो गृह्णामि प्रजाभ्य इति मनो दक्षिणतः प्रापादयत नानोपदधाति ये नानाकामा मनसि तांस्तद्दधाति सकृत्सादयत्येकं तन्मनः करोत्यथ यन्नाना सादयेन्मनो हꣳ विच्छिन्द्यात्सैषा त्रिवृदिष्टका तस्योक्तो बन्धुः ॥ १ ॥ ब्राह्मणम् ॥ १ ॥

अथ पश्चात् । अयं पश्चाद्विश्वव्यचा इत्यसौ वाऽआदित्यो विश्वव्यचा यदा ह्येवैष उदेत्यथेदꣳ सर्वं व्यचो भवति तद्यत्तमाहु पश्चादिति तस्मादेतं प्रत्यञ्चमेव यन्तं पश्यन्ति चक्षुर्ह्यादित्यो भूत्वा पश्चात्तस्थौ तदेव तद्रूपमुपदधाति ॥ १ ॥ तस्य

चक्षुर्वैश्वव्यचसमिति । चक्षुस्तस्माद्रूपादादित्यान्निरमिमीत वर्षाश्चाक्षुष्य इति वर्षा ऋतुं चक्षुषो निरमिमीत जगती वार्षीति जगतीं छन्दो वर्षाभ्य ऋतोर्निरमिमीत जगत्याऽऋक्समिति जगत्यै छन्दस ऋक्सम साम निरमिमीताऽर्कसमाक्रुक्र इत्यृक्समात्साम्नः शुक्रं ग्रहं निरमिमीत शुक्रात्सप्तदश इति शुक्राद्ग्रहात्सप्तदश स्तोमं निरमिमीत सप्तदशाद्विरूपमिति सप्तदशात्स्तोमाद्विरूपं पृष्ठं निरमिमीत ॥२॥ जमदग्निर्ऋषिरिति । चक्षुर्वै जमदग्निर्ऋषिर्यदेनेन जगत्पश्यत्यथो मनुते तस्माच्चक्षुर्जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वयेति प्रजापतिसृष्टया त्वयेत्येतच्चक्षुर्गृह्णामि प्रजाभ्य इति चक्षुः पश्चात्प्रापादयत नानोपदधाति ये नानाकामाश्चक्षुषि तांस्तद्दधाति सकृत्सादयत्येकं तच्चक्षुः करोत्यथ यन्नाना सादयेच्चक्षुर्हृ विच्छिन्द्यात्सैषा त्रिवृदिष्टका तस्योक्तो बन्धुः ॥३॥ अथात्तरतः । इदमुत्तरात्स्वरिति दिशो वाऽउत्तरात्तच्चत्ता आहोत्तरादित्युत्तरा च्यस्मात्सर्वस्माद्दिशोऽथ यत्स्वरित्याह स्वर्गो हि लोको दिशः श्रोत्रꣳ हृ दिशो भूत्वोत्तरतस्तस्थौ तदेव तद्रूपमुपदधाति ॥४॥ तस्य श्रोत्रꣳ सौवमिति । श्रोत्रं तस्माद्रूपाद्दिग्भ्यो निरमिमीत शरत्क्रौञ्चीति शरदमृतुꣳ श्रोत्रान्निरमिमीतानुष्टुप्शारदीत्यनुष्टुभं छन्दः शरद ऋतोर्निरमिमीतानुष्टुभ ऐडमित्यनुष्टुभश्छन्दस ऐडꣳ साम निरमिमीतैडान्मन्थीत्यैडात्साम्नो मन्थिनं ग्रहं निरमिमीत मन्थिन एकविꣳश इति मन्थिनो ग्रहादेकविꣳशꣳ स्तोमं निरमिमीतैकविꣳशाद्विराजमित्येकविꣳशात्स्तोमाद्विराजं पृष्ठं निरमिमीत ॥५॥ विश्वामित्र ऋषिरिति । श्रोत्रं वै विश्वामित्र ऋषिर्यदेनेन सर्वतः शृणोत्यथो यदस्मै सर्वतो मित्रं भवति तस्माच्छ्रोत्रं विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वयेति प्रजापतिसृष्टया त्वयेत्येतच्छ्रोत्रं गृह्णामि प्रजाभ्य इति श्रोत्रमुत्तरतः प्रापादयत नानोपदधाति ये नानाकामाः श्रोत्रे तांस्तद्दधाति सकृत्सादयत्येकं तच्छ्रोत्रं करोत्यथ यन्नाना सादयेच्छ्रोत्रꣳ हृ विच्छिन्द्यात्सैषा त्रिवृदिष्टका तस्योक्तो बन्धुः ॥६॥ अथ मध्ये । इ-

यमुपरि मतिरिति चन्द्रमा वाऽउपरि तच्चत्तमाहोपरीत्युपरि हि चन्द्रमा अथ यन्मतिरित्याह वाग्वै मतिर्वाचा ह्येदꣳ सर्वं मनुते वाग्घ चन्द्रमा भूत्वोपरिष्टात्तस्थौ तदेव तद्रूपमुपदधाति ॥७॥ तस्यै वाञ्जात्येति । वाचं तस्मादूपाच्चन्द्रमसो निरमिमीत हेमन्तो वाच्य इति हेमन्तमृतुं वाचो निरमिमीत पङ्क्तिर्हैमन्तीति पङ्क्तिं छन्दो हेमन्तादृतोर्निरमिमीत पङ्क्त्यै निधनवदिति पङ्क्त्यै छन्दसो निधनवत्साम निरमिमीत निधनवत आग्रयण इति निधनवतः साम्न आग्रयणं ग्रहं निरमिमीताग्रयणात्त्रिणवत्रयस्त्रिꣳशावित्याग्रयणाद्ध्येत्त्रिणवत्रयस्त्रिꣳशौ स्तोमौ निरमिमीत त्रिणवत्रयस्त्रिꣳशाभ्याꣳ शाक्वररैवतेऽइति त्रिणवत्रयस्त्रिꣳशाभ्याꣳ स्तोमाभ्याꣳ शाक्वररैवते पृष्ठे निरमिमीत ॥८॥ विश्वकर्मऽऋषिरिति । वाग्वै विश्वकर्मऽर्षिर्वाचा ह्येदꣳ सर्वं कृतं तस्माद्वाग्विश्वकर्मऽर्षिः प्रजापतिगृहीतया त्वयेति प्रजापतिसृष्टया त्वयेत्येतद्वाचं गृह्णामि प्रजाभ्य इति वाचमुपरिष्टात्प्रापादयत नानोपदधाति ये नानाकामा वाचि तांस्तद्दधाति सकृत्सादयत्येकां तद्वाचं करोत्यथ यन्नाना सादयेद्वाचꣳ ह्य विच्छिन्द्यात्सैषा त्रिवृदिष्टका तस्योक्तो बन्धुः ॥९॥ एतद्वै तदन्नम् । यत्तत्प्राणाश्च प्रजापतिश्चासृज्यतैतावान्वै सर्वो यज्ञो यज्ञ ꣳ देवानामन्नम् ॥१०॥ ता दश-दशोपदधाति । दशाक्षरा विराड्विराडु कृत्स्नमन्नꣳ सर्वमेवास्मिन्नेतत्कृत्स्नमन्नं दधाति सर्वत ऽउपदधाति सर्वत एवास्मिन्नेतत्कृत्स्नमन्नं दधाति ता वै ता विराज एतान्प्राणान्बिभ्रति यत्प्राणान्बिभ्रति तस्मात्प्राणभृतः ॥११॥ ब्राह्मणम् ॥२॥

तदाहुः । किं प्राणाः किं प्राणभृत इति प्राणा एव प्राणा अङ्गानि प्राणभृत्यङ्गानि हि प्राणान्बिभ्रति प्राणास्त्वेव प्राणा अन्नं प्राणभृदन्नꣳ हि प्राणान्बिभर्ति ॥१॥ तदाहुः । कथमस्यैताः सर्वाः प्राजापत्या भवन्तीति यदेव सर्वास्वाह प्रजापतिगृहीतया त्वयेत्येवमु ह्यस्यैताः सर्वाः प्राजापत्या भवन्ति ॥२॥ तदाहुः ।

यद्ब्रह्म गृहीताय स्तुवतेऽथ शꣳसत्यथ कस्मात्पुरस्ताद्ब्रह्माणामृचश्च सामानि चोपदधातीति सꣳस्था वै कर्मणोऽन्वोक्षितव्यऽर्चा वै प्रतिपदा ग्रहो गृह्यतऽऋचि साम गीयते तदस्यैतत्पुरस्ताद्ब्रह्माणामृचश्च सामानि चोपदधात्यथ यदुपरिष्टाद्ब्रह्माणाꣳ स्तुतशस्त्रे भवतस्तद्ब्रह्मस्यैतत्पुरस्ताद्ब्रह्माणाꣳ स्तोमांश्च पृष्ठानि चोपदधाति ॥३॥ तदाहुः । यदेतत्त्रयꣳ सत्रꣳ क्रियते ग्रहꣳ स्तोत्रꣳ शस्त्रमथात्र ग्रहꣳ चैव स्तोत्रं चोपदधाति कथमस्यात्रापि शस्त्रमुपक्षितं भवतीति यद्वाव स्तोत्रं तच्छस्त्रं यासु क्वैव स्तुवते ता उऽएवानुशꣳसत्येवमु ह्यस्यात्रापि शस्त्रमुपक्षितं भवति ॥४॥ तदाहुः । यथा यथा पितुः पुत्रमेवं त्रीणि प्रथमान्याह कस्मादृक्सामयोः संक्रामतीति साम वाऽऋचः पतिस्तद्यत्तत्रापि यथा पितुः पुत्रमेवं ब्रूयाद्यथा पतिꣳ सन्तं पुत्रं ब्रूयात्तादृक्तत्तस्मादृक्सामयोः संक्रामति कस्माउ त्रिः संतनोतीति पितरं पुत्रं पौत्रं तांस्तत्संतनोति तस्माउ तेभ्य एक एव ददाति ॥५॥ तद्याः पुरस्ताउपदधाति । ताः प्राणभृतोऽथ याः पश्चात्ताश्चक्षुर्भृतस्ता अपानभृतोऽथ या दक्षिणतस्ता मनोभृतस्ता उ व्यानभृतोऽथ या उत्तरतस्ताः श्रोत्रभृतस्ता उदानभृतोऽथ या मध्ये ता वाग्भृतस्ता उ समानभृतः ॥६॥ तदु ह चरकाधर्यवः । अन्या एवापानभृतो व्यानभृत उदानभृतः समानभृतश्चक्षुर्भृतो मनोभृतः श्रोत्रभृतो वाग्भृत इत्युपदधति न तथा कुर्यादित्यहैव रेचयत्यत्रोऽएवैतानि सर्वाणि रूपाण्युपधीयन्ते ॥७॥ स वै पुरस्ताउपधाय पश्चाउपदधाति । प्राणो ह्यपानो भूत्वाङ्गुल्यग्रेभ्य इति संचरत्यपान उ ह प्राणो भूत्वाङ्गुल्यग्रेभ्य इति संचरति तद्यत्पुरस्ताउपधाय पश्चाउपदधात्येतावेवैतत्प्राणौ संतनोति संदधाति तस्मादेतौ प्राणौ संततौ सꣳहितौ ॥८॥ अथ दक्षिणत उपधायोत्तरत उपदधाति । व्यानो ह्युदानो भूत्वाङ्गुल्यग्रेभ्य इति संचरत्युदान उ ह व्यानो भूत्वाङ्गुल्यग्रेभ्य इति संचरति तद्यद्दक्षिणत उपधायोत्तरत उपदधात्येतावेवैतत्प्राणौ संतनोति संदधाति तस्मादेतौ प्रा-

णौ संततौ सꣳहितौ ॥ १ ॥ अथ या मध्यऽउपदधाति । स प्राणस्ता रेतःसिचोर्वेलयोपदधाति पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत एवास्मिन्नेतत्प्राणं दधाति सर्वत उपदधाति सर्वत एवास्मिन्नेतत्प्राणं दधात्यथोऽएवꣳ ह्येष गुदः प्राणः समन्तं नाभिं पर्यक्रोऽनूचीश्च तिरश्चीश्चोपदधाति तस्मादिमेऽन्वञ्चश्च तिर्यञ्चश्चात्मन्प्राणाः सꣳस्पृष्टा उपदधाति प्राणानेवैतत्संतनोति संदधाति तस्मादिमे प्राणाः संतताः सꣳहिताः ॥ १० ॥ ब्राह्मणम् ॥ ३ ॥ ॥

ता ह्येके पुरुषमुपार्ष्योपदधति । एष वै प्राणस्तमेता बिभ्रति यत्प्राणं बिभ्रति तस्मात्प्राणभृत इति न तथा कुर्यादेषोऽह्येव प्राणो य एष ह्रिण्मयः पुरुषस्तस्य त्रयमात्मा यावदिदमभ्ययमग्निर्विकितस्तत्यद्वास्यैता अङ्गं नाभिप्राप्नुयुः प्राणो ह्यस्य तदङ्गं नाभिप्राप्नुयाद्यद्धु वै प्राणोऽङ्गं नाभिप्राप्नोति शुष्यति वा वै तन्म्लायति वा तस्मादेनाः परिश्रित्स्वेवोपार्ष्योपदध्यादथ या मध्यऽउपदधाति ताभिरस्यैष आत्मा पूर्णास्ता ऽएवैतस्मादनन्तर्हिताः ॥ १ ॥ तदाहुः । यदयं पुरो भुवोऽयं दक्षिणा विश्वकर्मायं पश्चाद्विश्वव्यचा इदमुत्तरात्स्वरियमुपरि मतिरिति सम्प्रति दिशोऽभ्यनूच्यन्तेऽथ कस्मादेना अरत्नयादेशेषूपदधातीति प्राणा वै प्राणभृतस्ता यत्सम्प्रति दिश उपदध्यात्प्रागपꣳ ह्येवायं प्राणः संचरेदथ यदेना एवमभ्यनूक्ताः सतीररत्नयादेशेषूपदधाति तस्मादयं प्रागपं प्राणः सन्नरत्नया सर्वाण्यङ्गानि सर्वमात्मानमनुसंचरति ॥ २ ॥ स एष पशुर्यदग्निः । सोऽत्रैव सर्वः कृत्स्नः संस्कृतस्तस्य याः पुरस्तादुपदधाति तौ बाहूऽअथ याः पश्चात्ते सक्थ्यावथ या मध्यऽउपदधाति स आत्मा ता रेतःसिचोर्वेलयोपदधाति पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यतो ह्ययमात्मा सर्वत उपदधाति सर्वतो ह्ययमात्मा ॥ ३ ॥ तदाहुः । यत्पूर्वेषु गणेष्वेकैकꣳ स्तोममेकैकं पृष्ठमुपदधात्यथ कस्मादत्र द्वौ स्तोमौ द्वे पृष्ठेऽउपदधातीत्यात्मा वाऽअस्यैष आत्मानं तदङ्गानां ज्येष्ठं वरिष्ठं वीर्यवत्तमं करोति तस्मा-

दयमात्माङ्गानां ज्येष्ठो वरिष्ठो वीर्यवत्तमः ॥ ४ ॥ तदाहुः । कथमस्यैषोऽग्निः सर्वः कृत्स्न इष्टकायामिष्टकायाꣳ संस्कृतो भवतीति मञ्ज्ञा यज्ञुरस्थीष्टका माꣳसꣳ सादनं वक्नूद्दोह्या लोम पुरीषस्य यज्ञुरन्नं पुरीषमेवमु ह्यस्यैषोऽग्निः सर्वः कृत्स्न इष्टकायामिष्टकायाꣳ संस्कृतो भवति ॥ ५ ॥ स एष सार्वायुषोऽग्निः । स यो हैतमेवꣳ सार्वायुषमग्निं वेद सर्वꣳ हैवायुरेति ॥ ६ ॥ अथातः समञ्चनप्रसारणस्यैव । संचितꣳ हैके समञ्चनप्रसारणेनेत्यभिमृशन्ति पशुरेष यदग्निर्यदा वै पशुरङ्गानि सं चाञ्चति प्र च सारयत्यथ स तैर्वीर्यं करोति ॥ ७ ॥ संवत्सरोऽसि परिवत्सरोऽसि । इदावत्सरोऽसीद्वत्सरोऽसि वत्सरोऽसि उषसस्ते कल्पन्तामहोरात्रास्ते कल्पन्तामर्धमासास्ते कल्पन्तां मासास्ते कल्पन्तामृतवस्ते कल्पन्ताꣳ संवत्सरस्ते कल्पताम् । प्रेत्याऽएत्यै सं चाञ्च प्र च सारय सुपर्णचिदसि तया देवतयाङ्गिरस्वद्ध्रुवः सीदेति ॥ ८ ॥ अपि ह स्माह शाळ्यायनिः । स्फोटतोर्हैकः पक्षयोरुपशुश्रावैतेनाभिमृष्टस्य तस्मादेनमेतेनाभ्येव मृशेदिति ॥ ९ ॥ अथ ह स्माह स्वर्ज्जिन्नाग्नज्जितः । नग्नज्जिद्वा गान्धारः प्राणो वै समञ्चनप्रसारणं यस्मिन्वाऽअङ्गे प्राणो भवति तत्सं चाञ्चति प्र च सारयति संचितमेवैनं बर्हिष्टाद्भ्यन्यात्तदस्मिन्प्राणꣳ समञ्चनप्रसारणं दधाति तथा सं चाञ्चति प्र च सारयतीति तद्धैव समञ्चनप्रसारणं यत्स तदुवाच राजन्यबन्धुरिव वेव तदुवाच यन्नु शतं कृत्वोऽथो सकृत्सं बर्हिष्टाद्भ्यन्युर्न वै तस्मिंस्ते प्राणं दध्युर्यो वाऽआत्मन्प्राणः स एव प्राणास्तद्यत्प्राणभृत उपदधाति तदस्मिन्प्राणꣳ समञ्चनप्रसारणं दधाति तथा सं चाञ्चति प्र च सारयत्यथ लोकम्पृणेऽउपदधात्यस्याꣳ सक्त्यां तयोरुपरि बन्धुः पुरीषं निवपति तस्योपरि बन्धुः ॥ १० ॥ ब्राह्मणम् ॥ ४ ॥ प्रथमोऽध्यायः [४१] ॥ ॥

द्वितीयां चितिमुपदधाति । एतद्वै देवाः प्रथमां चितिं चित्वा समारोहन्नयं वै लोकः प्रथमा चितिरिममेव तल्लोकꣳ संस्कृत्य समारोहन् ॥ १ ॥ तेऽब्रुवन् । चे-

तयधमिति चितिमिह्वेति वाव तद्ब्रुवन्नित ऊर्ध्वमिह्वेति ते चेतयमाना एतां द्वितीयां चितिमपश्यन्यद्ऊर्ध्वं पृथिव्या अर्वाचीनमन्तरिक्षात्तेषामेष लोकोऽध्रुव इ-वाप्रतिष्ठित-इव मनस्यासीत् ॥२॥ तेऽश्विनावब्रुवन् । युवं वै ब्रह्माणौ भिष-ज्तौ स्थो युवं न इमां द्वितीयां चितिमुपधत्तमिति किं नौ ततो भविष्यतीति यु-वमेव नोऽस्याऽग्निचित्यायाऽअधर्यू भविष्यथ इति तथेति तेभ्य एतामश्विनौ द्वितीयां चितिमुपाधत्तां तस्मादाकुरश्विनावेव देवानामधर्यूऽइति ॥३॥ स उपद-धाति । ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासीति यद्वै स्थिरं यत्प्रतिष्ठितं तद्ध्रुवमथ वाऽए-षामेष लोकोऽध्रुव-इवाप्रतिष्ठित-इव मनस्यासीत्तमेवैतत्स्थिरं ध्रुवं कृत्वा प्रत्य-धत्तां ध्रुवं योनिमासीद साधुयेति स्थिरं योनिमासीद साधुयेत्येतदुख्यस्य केतुं प्र-थमं जुषाणेत्ययं वाऽअग्निरुख्यस्तस्यैष प्रथमः केतुर्यत्प्रथमा चितिस्तं जुषाणेत्येत-दश्विनाधर्यू सादयतामिह्व वेत्यश्विनौ ह्यधर्यूऽउपाधत्ताम् ॥४॥ कुलायिनी घृत-वती पुरंधिरिति । कुलायमिव वै द्वितीया चितिः स्योने सीद सदने पृथिव्या इति पृथिवी वै प्रथमा चितिस्तस्यै शिवे स्योने सीद सदनऽइत्येतदभि त्वा रुद्रा वसवो गृणन्वित्येतास्त्वां देवता अभिगृणन्वित्येतदिमा ब्रह्म पीपिहि सौभगा-येतीमा ब्रह्मात्व सौभगायेत्येतदश्विनाधर्यू सादयतामिह्व वेत्यश्विनौ ह्यधर्यूऽउपा-धत्ताम् ॥५॥ स्वैर्दक्षैर्दक्षपितेह्व सीदेति । स्वेन वीर्येणेह्व सीदित्येतद्देवानाꣳ सुम्ने बृहते रणायेति देवानाꣳ सुम्नाय महते रणायेत्येतत्पितेवैधि सूनवऽआ सु-शेवेति यथा पिता पुत्राय स्योनः सुशेव एवꣳ सुशेवैधीत्येतत्स्वावेशा तन्वा सं-विशस्वेत्यात्मा वै तनूः स्वावेशेनात्मना संविशस्वेत्येतदश्विनाधर्यू सादयतामिह्व वेत्यश्विनौ ह्यधर्यूऽउपाधत्ताम् ॥६॥ पृथिव्याः पुरीषमसीति । पृथिवी वै प्रथमा चितिस्तस्या एतत्पुरीषमिव यद्द्वितीयाप्सो नामेति रसो नामेत्येतत्तां त्वा विश्वेऽअभिगृणन्तु देवा इति तां त्वा सर्वेऽभिगृणन्तु देवा इत्येतत्स्तोमपृष्ठा घृतवतीह्व

सीदिति यान्स्तोमानस्यां तऽस्यमानो भवति तैरेषा स्तोमपृष्ठा प्रज्ञावदस्मे द्रविणायन्नस्वेति प्रज्ञावदस्मे द्रविणमायन्नस्वेत्येतदश्विनाधर्यू सादयतामिह वेत्यश्विनौ क्यधर्यूऽउपाधत्ताम् ॥७॥ ता एता दिशः । ता रेतःसिचोर्विलयोपदधातीमे वै रेतःसिचावनयोस्तद्दिशो दधाति तस्मादनयोर्दिशः सर्वत उपदधाति सर्वतस्तद्दिशो दधाति तस्मात्सर्वतो दिशः सर्वतः समीचीः सर्वतस्तत्समीचीर्दिशो दधाति तस्मात्सर्वतः समीच्यो दिशस्ता नानोपदधाति नाना सादयति नाना सूद्दोहसाऽधिवदति नाना हि दिशः ॥८॥ अथ पञ्चमीं दिश्यामुपदधाति । ऊर्धा ह सा दिक्सा या सोर्धा दिगसौ स आदित्योऽमुमेवैतदादित्यमुपदधाति तामन्तरेण दक्षिणां दिश्यामुपदधात्यमुं तदादित्यमन्तरेण दक्षिणां दिशं दधाति तस्मादेषोऽन्तरेण दक्षिणां दिशमेति ॥९॥ अदित्यास्त्वा पृष्ठे सादयामीति । इयं वाऽअदितिरस्यामेवैनमेतत्प्रतिष्ठायां प्रतिष्ठापयत्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशामधिपत्नीं भुवनानामित्यन्तरिक्षस्य क्वेष धर्ता विष्टम्भनो दिशामधिपतिर्भुवनानामूर्मिर्द्रप्सोऽअपामसीति रसो वाऽऊर्मिर्विश्वकर्मा तऽऋषिरिति प्रजापतिर्वै विश्वकर्मा प्रजापतिसृष्टासीत्येतदश्विनाधर्यू सादयतामिह वेत्यश्विनौ क्यधर्यूऽउपाधत्ताम् ॥१०॥ यद्वैवैता आश्विनीरुपदधाति । प्रजापतिं विस्रस्तं देवता आदाय व्युदक्रामंस्तस्य यदूर्ध्वं प्रतिष्ठायाऽअवाचीनं मध्यात्तदस्याश्विनावादायोत्क्रम्यातिष्ठताम् ॥११॥ तावब्रवीत् । उप मेतं प्रति मऽएतद्धत्तं येन मे युवमुदक्रमिष्टमिति किं नौ ततो भविष्यतीति युवद्देवत्यमेव मऽएतदात्मनो भविष्यतीति तथेति तदस्मिन्नेतदश्विनौ प्रत्यधत्ताम् ॥१२॥ तग्वा एताः पञ्चाश्विन्यः । एतदस्य तदात्मनस्तग्यदेता अत्रोपदधाति यद्देवास्यैता आत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेता अत्रोपदधाति ॥१३॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासीति । यद्वै स्थिरं यत्प्रतिष्ठितं तद्ध्रुवमथ वाऽअस्यैतदस्थिरमिवाध्रुवमिवात्मन आसीत्तद्वैवैतत्स्थिरं ध्रुवं कृत्वा प्रत्यधत्ताम् ॥१४॥

कुलायिनी घृतवती पुरंधिरिति । कुलायमिव वाऽअस्यैतदात्मनः स्वैर्दृन्दैर्दृन्दापि-
तेऽह सीदित्यदृन्दयतामेवास्यैतदात्मनः पृथिव्याः पुरीषमसीति पुरीषसऽहितमिव
वाऽअस्यैतदात्मनो रेतःसिचोर्वलया पृष्टयो वै रेतःसिचौ पृष्टिसाचयमिव वा
ऽअस्यैतदात्मनः सर्वत उपदधाति सर्वतो ह्यस्यैतदश्विनावात्मनः प्रत्यधत्ताम्
॥ १५ ॥ अथऽर्तव्येऽउपदधाति । ऋतव एते यदृतव्येऽऋतूनेवैतदुपदधाति शुक्रश्च
शुचिश्च ग्रैष्मावृतूऽइति नामनीऽएनयोरेते नामभ्यामेवैनेऽएतदुपदधाति द्वेऽइष्ट-
के भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोति ॥ १६ ॥ तद्यदेतेऽअ-
त्रोपदधाति । संवत्सर एषोऽग्निरिमऽउ लोकाः संवत्सरस्तस्य यदूर्ध्वं पृथिव्या अ-
र्वाचीनमन्तरिक्षात्तदस्यैषा द्वितीया चितिस्तद्वस्य ग्रीष्म ऋतुस्तद्यदेतेऽअत्रोपदधा-
ति यदेवास्यैतेऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥ १७ ॥
यद्वैवैतेऽअत्रोपदधाति । प्रजापतिरेषोऽग्निः संवत्सर उ प्रजापतिस्तस्य यदूर्ध्वं प्र-
तिष्ठाया अवाचीनं मध्यात्तदस्यैषा द्वितीया चितिस्तद्वस्य ग्रीष्म ऋतुस्तद्यदेतेऽअ-
त्रोपदधाति यदेवास्यैतेऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति
॥ १८ ॥ ब्राह्मणम् ॥ ५ [२. १.] ॥ ॥

अथ वैश्वदेवीरुपदधाति । एषा वै सा द्वितीया चितिर्यामेभ्यस्तदश्विनाऽउपा-
धत्तां तामुपधायेदꣳ सर्वमभवतां यदिदं किं च ॥ १ ॥ ते देवा अब्रुवन् । अश्विनौ
वाऽइदꣳ सर्वमभूतामुप तज्जानीत यथा वयमिदꣳप्यसामेति तेऽब्रुवंश्चेतयधमिति
चितिमिहतेति वाव तदब्रुवंस्तदिहत यथा वयमिदꣳप्यसामेति ते चेतयमाना ए-
ता इष्टका अपश्यन्वैश्वदेवीः ॥ २ ॥ तेऽब्रुवन् । अश्विनौ वाऽइदꣳ सर्वमभूताम-
श्विभ्यामेवाश्विनोश्चितिमनूपदधामहाऽइति तेऽश्विभ्यामेवाश्विनोश्चितिमनूपादधत
तस्मादेतामाश्विनी चितिरित्याचक्षते तस्माद्यथैव पूर्वासामुदर्क एवमेतासामश्वि-
भ्याꣳ ह्येवाश्विनोश्चितिमनूपादधत ॥ ३ ॥ यद्वै वैश्वदेवीरुपदधाति । ये वै ते विश्वे

देवा एतां द्वितीयां चितिमपश्यन्ये तऽएतेन रसेनोपायंस्तऽएते तानेवैतदुपदधाति ता एताः सर्वाः प्रजास्ता रेतःसिचोर्वेलयोपदधातीमे वै रेतःसिचावनयोस्तत्प्रजा दधाति तस्मादनयोः प्रजाः सर्वत उपदधाति सर्वतस्तत्प्रजा दधाति तस्मात्सर्वतः प्रजा दिश्या अनूपदधाति दिक्षु तत्प्रजा दधाति तस्मात्सर्वासु दिक्षु प्रजाः ॥४॥ यद्वेव वैश्वदेवीरुपदधाति । प्रजापतेर्विस्रस्तात्सर्वाः प्रजा मध्यत उद्क्रामन्नेतस्या अधि योनेस्ता एनमेतस्मिन्नात्मनः प्रतिष्ठिते प्रापद्यन्त ॥५॥ स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयतेऽथ या अस्मात्ताः प्रजा मध्यत उद्क्रामन्नेतास्ता वैश्वदेव्य इष्टकास्तद्यदेता उपदधाति या एवास्मात्ताः प्रजा मध्यत उद्क्रामंस्ता अस्मिन्नेतत्प्रपादयति रेतःसिचोर्वेलया पृष्ठयो वै रेतःसिचौ मध्यमु पृष्ठयो मध्यत एवास्मिन्नेताः प्रजाः प्रपादयति सर्वत उपदधाति सर्वत एवास्मिन्नेताः प्रजाः प्रपादयति ॥६॥ यद्वेव वैश्वदेवीरुपदधाति । एतद्वै प्रजापतिरेतस्मिन्नात्मनः प्रतिष्ठितेऽकामयत प्रजाः सृजेय प्रजायेयेति स ऋतुभिरद्भिः प्राणैः संवत्सरेणाश्विभ्याꣳ सयुग्भूवैताः प्रजाः प्राजनयत्तथैवैतद्यजमान एताभिर्देवताभिः सयुग्भूवैताः प्रजाः प्रजनयति तस्माद्व सर्वास्वेव सजूः-सजूरित्यनुवर्तते ॥७॥ सजूर्ऋतुभिरिति । तद्वतून्प्राजनयदृतुभिर्वै सयुग्भूवा प्राजनयत्सजूर्विधाभिरित्यापो वै विधा अद्भिर्हीदꣳ सर्वं विष्टितमद्भिर्वै सयुग्भूवा प्राजनयत्सजूर्देवैरिति तद्देवान्प्राजनयद्यद्देवा इत्याचक्षते सजूर्देवैर्वयोनाधैरिति प्राणा वै देवा वयोनाधाः प्राणैर्हीदꣳ सर्वं वयुनं नद्धमथो छन्दाꣳसि वै देवा वयोनाधाश्छन्दोभिर्हीदꣳ सर्वं वयुनं नद्धं प्राणैर्वै सयुग्भूवा प्राजनयदग्नये वा वैश्वानरायेति संवत्सरो वाऽअग्निर्वैश्वानरः संवत्सरेण वै सयुग्भूवा प्राजनयदश्विनाधर्यू साद्यतामिह वेत्यश्विभ्यां वै सयुग्भूवा प्राजनयत् ॥८॥ सजूर्वसुभिरिति दक्षिणतः । तद्वसून्प्राजनयत्सजू रुद्रैरिति पश्चात्तद्रुद्रान्प्राजनयत्सजूरादित्यैरित्युत्तरतस्तदादित्यान्प्राजनयत्सजूर्विश्वैर्देवैरित्युप-

रिष्टात्तद्विश्वान्देवान्प्राजनयत्ता वै समानप्रभृतयः समानोदर्का नाना मध्यतस्ता यत्समानप्रभृतयः समानोदर्काः समानीभिर्हि देवताभिः पुरस्ताच्चोपरिष्टाच्च सयुग्भूत्वा प्राजनयद्यद्य यन्नाना मध्यतोऽन्या-अन्या हि प्रजा मध्यतः प्राजनयत् ॥ १ ॥ ब्राह्मणम् ॥ ६ [२. २.] ॥ ॥

अथ प्राणभृत उपदधाति । एतद्वै देवा अब्रुवंश्चेतयधमिति चितिमिङ्क्तेति वाव तदब्रुवंस्ते चेतयमाना वायुमेव चितिमपश्यंस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥ १ ॥ प्राणभृत उपदधाति । प्राणो वै वायुर्वायुमेवास्मिन्नेतद्दधाति रेतःसिचोर्विलयेमे वै रेतःसिचावनयोस्तद्वायुं दधाति तस्मादनयोर्वायुः सर्वत उदपधाति सर्वतस्तद्वायुं दधाति तस्मात्सर्वतो वायुः सर्वतः समीचीः सर्वतस्तत्सम्यञ्चं वायुं दधाति तस्मात्सर्वतः सम्यङ्भूत्वा सर्वाभ्यो दिग्भ्यो वाति दिश्या अनूपदधाति दिक्षु तद्वायुं दधाति तस्मात्सर्वासु दिक्षु वायुः ॥ २ ॥ यद्वेव प्राणभृत उपदधाति । आस्वेवैतत्प्रजासु प्राणान्दधाति ता अनन्तर्हिता वैश्वदेवीभ्य उपदधात्यनन्तर्हितांस्तत्प्रजाभ्यः प्राणान्दधाति प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मऽउर्व्या विभाहि श्रोत्रं मे श्लोकयेत्येतानेवास्वेतत्कल्पान्प्राणान्दधाति ॥ ३ ॥ अथापस्या उपदधाति । एतद्वै देवा अब्रुवंश्चेतयधमिति चितिमिङ्क्तेति वाव तदब्रुवंस्ते चेतयमाना वृष्टिमेव चितिमपश्यंस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतद्दधाति ॥ ४ ॥ अपस्या उपदधाति । आपो वै वृष्टिर्वृष्टिमेवास्मिन्नेतद्दधाति रेतःसिचोर्विलयेमे वै रेतःसिचावनयोस्तद्वृष्टिं दधाति तस्मादनयोर्वर्षति सर्वत उपदधाति सर्वतस्तद्वृष्टिं दधाति तस्मात्सर्वतो वर्षति सर्वतः समीचीः सर्वतस्तत्समीचीं वृष्टिं दधाति तस्मात्सर्वतः सम्यङ्भूत्वा सर्वाभ्यो दिग्भ्यो वर्षति वायव्या अनूपदधाति वायौ तद्वृष्टिं दधाति तस्माद्यां दिशं वायुरेति तां दिशं वृष्टिरन्वेति ॥ ५ ॥ यद्वेवापस्या उपदधाति । एष्वेवैतत्प्राणेष्वपो दधाति ता अनन्तर्हिताः प्राणभृद्भ्य उपदधात्यन-

त्तर्हितास्तत्प्राणेभ्योऽपो दधात्यथोऽअन्नं वाऽआपोऽनन्तर्हितं तत्प्राणेभ्योऽन्नं दधात्यपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात्पाहि दिवो वृष्टिमेरयेत्येता एवैषे-तत्कृता अपो दधाति ॥ ६ ॥ अथ छन्दस्या उपदधाति । एतद्वै दवा अब्रुवंश्चेतयधमिति चितिमिछतेति वाव तदब्रुवंस्ते चेतयमानाः पशूनेव चितिमपश्यंस्तामस्मिन्नदधुस्तथैवास्मिन्नयमेतदधाति ॥ ७ ॥ छन्दस्या उपदधाति । पशवो वै छन्दाꣳसि पशूनेवास्मिन्नेतदधाति सर्वत उपदधाति सर्वतस्तत्पशून्दधाति तस्मात्सर्वतः पशवोऽपस्या अनूपदधात्यप्सु तत्पशून्प्रतिष्ठापयति तस्माद्यदा वर्षत्यथ पशवः प्रतितिष्ठन्ति ॥ ८ ॥ यद्वै व छन्दस्या उपदधाति । प्रजापतेर्विस्रस्तात्पशव उदक्रामꣳश्छन्दाꣳसि भूत्वा तान्गायत्री छन्दो भूत्वा वयसाप्रोत्तद्यद्गायत्र्याप्रोदेतद्वि छन्द आशिष्ट सा तद्भूत्वा प्रजापतिरेतान्पशून्वयसाप्रोत् ॥ ९ ॥ मूर्धा वय इति । प्रजापतिर्वै मूर्धा स वयोऽभवत्प्रजापतिश्छन्द इति प्रजापतिरेव छन्दोऽभवत् ॥ १० ॥ क्षत्रं वय इति । प्रजापतिर्वै क्षत्रꣳ स वयोऽभवन्मयंदं छन्द इति यद्वाऽअनिरुक्तं तन्मयंदमनिरुक्तो वै प्रजापतिः प्रजापतिरेव छन्दोऽभवत् ॥ ११ ॥ विष्टम्भो वय इति । प्रजापतिर्वै विष्टम्भः स वयोऽभवदधिपतिश्छन्द इति प्रजापतिर्वाऽअधिपतिः प्रजापतिरेव छन्दोऽभवत् ॥ १२ ॥ विश्वकर्मा वय इति । प्रजापतिर्वै विश्वकर्मा स वयोऽभवत्परमेष्ठी छन्द इत्यापो वै प्रजापतिः परमेष्ठी ता हि परमे स्थानि तिष्ठन्ति प्रजापतिरेव परमेष्ठी छन्दोऽभवत् ॥ १३ ॥ तानि वाऽएतानि । चत्वारि वयाꣳसि चत्वारि छन्दाꣳसि तदष्टावष्टाक्षरा गायत्र्येषा वै सा गायत्री या तद्भूत्वा प्रजापतिरेतान्पशून्वयसाप्रोत्तस्माज्जीर्णं पशुं वयसाप्त इत्याचक्षते तस्माद्व सर्वास्विव वयो वय इत्यनुवर्ततेऽथ येऽस्मात्ते पशव उदक्रामन्नेते ते पञ्चदशोत्तरे वज्रो वै पशवो वज्रः पञ्चदशस्तस्माद्यस्य पशवो भवन्त्यपैव स पाप्मानꣳ हते वज्रो व्यैव तस्य पाप्मानमपहन्ति तस्माद्यां कां च दिशं पशुमानेति

वज्रविकृताꣳ ह्येव तामन्वेति ॥ १४ ॥ ब्राह्मणम् ॥ ७ [२. ३.] ॥ ॥

बस्तो वय इति बस्तं वयसाप्नोद्विवलं छन्द इत्येकपदा वै विवलं छन्द एकपदा ह्य भूत्वाज्ञा उच्चक्रमुः ॥ १ ॥ वृष्णिर्वय इति । वृष्णिं वयसाप्नोद्विशालं छन्द इति द्विपदा वै विशालं छन्दो द्विपदा ह्य भूत्वावय उच्चक्रमुः ॥ २ ॥ पुरुषो वय इति । पुरुषं वयसाप्नोत्तन्द्रं छन्द इति पङ्क्तिर्वै तन्द्रं छन्दः पङ्क्तिर्ह्य भूत्वा पुरुषा उच्चक्रमुः ॥ ३ ॥ व्याघ्रो वय इति । व्याघ्रं वयसाप्नोदनाधृष्टं छन्द इति विराड्वा अनाधृष्टं छन्दोऽन्नं वै विराडन्नमनाधृष्टं विराट् भूत्वा व्याघ्रा उच्चक्रमुः ॥ ४ ॥ सिꣳहो वय इति । सिꣳहं वयसाप्नोच्छदिश्छन्द इत्यतिछन्दा वै छदिश्छन्दः सा हि सर्वाणि छन्दाꣳसि छादयत्यतिछन्दा ह्य भूत्वा सिꣳहा उच्चक्रमुरथातो निरुक्तानेव पशून्निरुक्तानि छन्दाꣳस्युपदधाति ॥ ५ ॥ पष्ठवाड्वय इति । पष्ठवाहं वयसाप्नोद्बृहती छन्द इति बृहती ह्य भूत्वा पष्ठवाह उच्चक्रमुः ॥ ६ ॥ उक्षा वय इति । उक्षाणं वयसाप्नोत्ककुप्छन्द इति ककुब्भ भूत्वोक्षाण उच्चक्रमुः ॥ ७ ॥ ऋषभो वय इति । ऋषभं वयसाप्नोत्सतोबृहती छन्द इति सतोबृहती ह्य भूत्वर्षभा उच्चक्रमुः ॥ ८ ॥ अनड्वान्वय इति । अनड्वाहं वयसाप्नोत्पङ्क्तिश्छन्द इति पङ्क्तिर्ह्य भूत्वानड्वाह उच्चक्रमुः ॥ ९ ॥ धेनुर्वय इति । धेनुं वयसाप्नोज्जगती छन्द इति जगती ह्य भूत्वा धेनव उच्चक्रमुः ॥ १० ॥ अविर्वय इति । अविं वयसाप्नोत्त्रिष्टुप्छन्द इति त्रिष्टुब्भ भूत्वा अवय उच्चक्रमुः ॥ ११ ॥ दित्यवाड्वय इति । दित्यवाहं वयसाप्नोद्विराट् छन्द इति विराड भूत्वा दित्यवाह उच्चक्रमुः ॥ १२ ॥ पश्चाविर्वय इति । पश्चाविं वयसाप्नोद्गायत्री छन्द इति गायत्री ह्य भूत्वा पश्चावय उच्चक्रमुः ॥ १३ ॥ त्रिवत्सो वय इति । त्रिवत्सं वयसाप्नोदुष्णिक्छन्द इत्युष्णिग्घ भूत्वा त्रिवत्सा उच्चक्रमुः ॥ १४ ॥ तुर्यवाड्वय इति । तुर्यवाहं वयसाप्नोदनुष्टुप्छन्द इत्यनुष्टुब्भ भूत्वा तुर्यवाह उच्चक्रमुः ॥ १५ ॥ एते वै ते पशवः । यांस्तत्प्रजापतिर्वयसाप्नोत्स वै पशुं प्रथममाहाथ

वयोऽथ छन्दो वयसा च क्षेनांश्छन्दसा च परिगृत्यात्मन्नधत्तात्मन्नकुरुत तथैवैनानयमेतद्वयसा चैव छन्दसा च परिगृत्यात्मन्धत्तेऽआत्मन्कुरुते ॥ १६ ॥ स एष पशुर्यदग्निः । सोऽत्रैव सर्वः कृत्स्नः संस्कृतस्तस्य याः पुरस्ताडुपदधाति शिरोऽस्य ता अथ या दक्षिणतश्चोत्तरतश्च स आत्माथ याः पश्चात्तत्पुरुषम् ॥ १७ ॥ स वै पुरस्तादेवाग्रेऽउपदधाति । शिरो हि प्रथमं जायमानस्य जायतेऽथ दक्षिणत उपधायोत्तरत उपदधाति सार्धमयमात्मा जायाताऽइत्यथ पश्चात्पुरुषꣳ क्षत्ततो जायमानस्य जायते ॥ १८ ॥ तद्यानि वर्षिष्ठानि छन्दाꣳसि । ये स्थविष्ठाः पशवस्तान्मध्येऽउपदधाति मध्यं तत्प्रति पशुं वरिष्ठं करोति तस्मान्मध्यं प्रति पशुर्वरिष्ठोऽथ ये वीर्यवत्तमाः पशवस्तान्दक्षिणत उपदधाति दक्षिणं तदर्धं पशोर्वीर्यवत्तरं करोति तस्माद्दक्षिणोऽर्धः पशोर्वीर्यवत्तरः ॥ १९ ॥ पूर्वार्धं च जघनार्धं चाणिष्ठौ करोति । यद्ह्यमूश्चतस्रस्तेनैना अणिष्ठा अथ यदिह क्रूसिष्ठान्पशूनुपदधाति तेनोऽएता अणिष्ठाः पूर्वार्धं च तज्जघनार्धं च पशोरणिष्ठौ करोति तस्मात्पूर्वार्धश्च जघनार्धश्च पशोरणिष्ठौ तस्मात्पूर्वार्धेन च जघनार्धेन च पशुरुच्च तिष्ठति सं च विशत्यथ लोकम्पृणोऽउपदधात्यस्याꣳ स्वक्त्यां तयोरुपरि बन्धुः पुरीषं निवपति तस्योपरि बन्धुः ॥ २० ॥ ब्राह्मणम् ॥ ८ [२. ४.] ॥ द्वितीयोऽध्यायः [५०.] ॥ ॥

तृतीयां चितिमुपदधाति । एतद्वै देवा द्वितीयां चितिं चित्वा समारोहन्यद्ऊर्ध्वं पृथिव्या अर्वाचीनमन्तरिक्षात्तदेव तत्संस्कृत्य समारोहन् ॥ १ ॥ तेऽब्रुवन् । चेतयधमिति चितिमिङ्खेति वाव तदब्रुवन्नित ऊर्ध्वमिङ्खेति ते चेतयमाना अन्तरिक्षमेव बृहतीं तृतीयां चितिमपश्यंस्तेभ्य एष लोकोऽक्रन्दयत् ॥ २ ॥ तऽइन्द्राग्नीऽअब्रुवन् । युवं न इमां तृतीयां चितिमुपधत्तमिति किं नौ ततो भविष्यतीति युवमेव नः श्रेष्ठौ भविष्यथ इति तथेति तेभ्य एतामिन्द्राग्नी तृतीयां चितिमुपाधत्तां तस्मादाङ्गिरेन्द्राग्नीऽएव देवानाꣳ श्रेष्ठाविति ॥ ३ ॥ स वाऽइन्द्राग्निभ्यामुप-

दधाति । विश्वकर्मणा सादयतीन्द्राग्नी च वै विश्वकर्मा चैतां तृतीयां चितिमपश्यं-स्तस्मादिन्द्राग्निभ्यामुपदधाति विश्वकर्मणा सादयति ॥४॥ यद्वै वेन्द्राग्निभ्यामुपदधाति । विश्वकर्मणा सादयति प्रजापतिं विस्रस्तं देवता आदाय व्युद्क्रामंस्तस्येन्द्राग्नी च विश्वकर्मा च मध्यमादायोत्क्रम्यातिष्ठन् ॥५॥ तानब्रवीत् । उप मेत प्रति मऽएतद्धत्त येन मे यूयमुदक्रमिष्टेति किं नस्ततो भविष्यतीति युष्मद्वित्यमेव म ऽएतदात्मनो भविष्यतीति तथेति तदस्मिन्नेतदिन्द्राग्नी च विश्वकर्मा च प्रत्यदधुः ॥६॥ ॥ शतम्४४०० ॥ ॥ तद्यैषा मध्यमा स्वयमातृण्णा । एतदस्य तदात्मनस्तथ-दैतामत्रोपदधाति यदेवास्यैषात्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादैतामत्रोपदधाति ॥७॥ इन्द्राग्नीऽअव्यथमानाम् । इष्टकां दृꣳहतं युवमिति यथैव यजुस्तथा बन्धुः पृष्ठेन द्यावापृथिवीऽअन्तरिक्षं च विबाधसऽइति पृष्ठेन ह्येषा द्यावापृथिवीऽअ-न्तरिक्षं च विबाधते ॥८॥ विश्वकर्मा त्वा सादयविति । विश्वकर्मा ह्येतां तृतीयां चितिमपश्यदन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीमित्यन्तरिक्षस्य ह्येतत्पृष्ठं व्यच-स्वत्प्रथस्वदन्तरिक्षं यन्नान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीरित्यात्मानं यन्नात्मानं दृꣳहात्मानं मा हिꣳसीरित्येतत् ॥९॥ विश्वस्मै प्राणायापानाय । व्यानायोदाना-येति प्राणो वै स्वयमातृण्णा सर्वस्माऽउ वाऽएतस्मै प्राणः प्रतिष्ठायै चरित्रायै-तीमे वै लोकाः स्वयमातृण्णा इमऽउ लोकाः प्रतिष्ठा चरित्रं वायुष्ट्वाभिपाविति वायुष्ट्वाभिगोपायवित्येतन्मह्या स्वस्त्येति महत्या स्वस्त्येत्येतच्छर्दिषा शंतमेने-ति यच्छर्दिः शंतमं तेनेत्येतत्सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुरथ साम गायति तस्योपरि बन्धुः ॥१०॥ अथ दिश्या उपदधाति । दिशो वै दिश्या दिश एवैतदुपदधाति तयाभिरदो वायुर्दिग्भिरनन्तर्हिताभिरुपैत्ता एतास्ता एवै-तदुपदधाति ता ऽएवामूः पुरस्ताद्धर्मस्तम्बं च लोगेष्टकाश्चोपदधात्यसौ वाऽआ-दित्य एता अमुं तदादित्यं दिवध्यूहति दिवु चिनोति ता यत्तत्रैव स्युर्बर्हिर्धा

तत्स्युर्बर्हिर्धा वाऽएतद्योनेरग्निकर्म यत्पुरा पुष्करपर्णात्ता यद्दिक्षाकृत्योपदधाति तदेना योनौ पुष्करपर्णे प्रतिष्ठापयति तथो कैता अबर्हिर्धा भवन्ति ता अनन्तर्हिताः स्वयमातृण्णाया उपदधात्यन्तरिक्षं वै मध्यमा स्वयमातृण्णानन्तर्हितास्तदन्तरिक्षाद्दिशो दधात्युत्तरा उत्तरास्तदन्तरिक्षाद्दिशो दधाति रेतःसिचोर्वेलयेमे वै रेतःसिचावनयोस्तद्दिशो दधाति तस्मादनयोर्दिशः सर्वत उपदधाति सर्वतस्तद्दिशो दधाति तस्मात्सर्वतो दिशः सर्वतः समीचीः सर्वतस्तत्समीचीर्दिशो दधाति तस्मात्सर्वतः समीच्यो दिशः ॥ ११ ॥ यद्वेव दिश्या उपदधाति । छन्दाꣳसि वै दिशो गायत्री वै प्राची दिक्त्रिष्टुब्दक्षिणा जगती प्रतीच्यनुष्टुबुदीची पङ्क्तिरूर्धा पशवो वै छन्दाꣳस्यन्तरिक्षं मध्यमा चितिरन्तरिक्षे तत्पशून्दधाति तस्मादन्तरिक्षायतनाः पशवः ॥ १२ ॥ यद्वेव दिश्या उपदधाति । छन्दाꣳसि वै दिशः पशवो वै छन्दाꣳस्यन्नं पशवो मध्यं मध्यमा चितिर्मध्यतस्तदन्नं दधाति ता अनन्तर्हिताः स्वयमातृण्णायाऽउपदधाति प्राणो वै स्वयमातृण्णानन्तर्हितं तत्प्राणादन्नं दधात्युत्तरा उत्तरं तत्प्राणादन्नं दधाति रेतःसिचोर्वेलया पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत एवास्मिन्नेतदन्नं दधाति सर्वत उपदधाति सर्वत एवास्मिन्नतदन्नं दधाति ॥ १३ ॥ राज्ञ्यसि प्राची दिक् । विराडसि दक्षिणा दिक्सम्राडसि प्रतीची दिक्स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिगिति नामान्यासामेतानि नामग्राहमेवैना एतदुपदधाति ता नानोपदधाति नाना सादयति नाना सूददोहसाधिवदति नाना हि दिशः ॥ १४ ॥ ब्राह्मणम् ॥ १ [३. १.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या ११५ ॥ ॥

अथ विश्वज्योतिषमुपदधाति । वायुर्वै मध्यमा विश्वज्योतिर्वायुर्वेवान्तरिक्षलोके विश्वं ज्योतिर्वायुमेवैतदुपदधाति तामनन्तर्हितां दिश्याभ्य उपदधाति दिक्षु तद्वायुं दधाति तस्मात्सर्वासु दिक्षु वायुः ॥ १ ॥ यद्वेव विश्वज्योतिषमुपदधाति । प्रज्ञा वै विश्वज्योतिः प्रज्ञा खेव विश्वं ज्योतिः प्रज्ञाननमेवैतदुपदधाति तामनन्त-

र्हितां दिश्याभ्य उपदधाति दिक्षु तत्प्रजा दधाति तस्मात्सर्वासु दिक्षु प्रजाः ॥२॥ विश्वकर्मा त्वा सादयत्विति । विश्वकर्मा ह्येतां तृतीयां चितिमपश्यदन्तरिक्षस्य पृष्ठे ज्योतिष्मतीमित्यन्तरिक्षस्य ह्ययं पृष्ठे ज्योतिष्मान्वायुः ॥३॥ विश्वस्मै प्राणायापानाय । व्यानायेति प्राणो वै विश्वज्योतिः सर्वस्माऽउ वाऽएतस्मै प्राणो विश्वं ज्योतिर्यच्छेति सर्वं ज्योतिर्यच्छत्येतद्वायुष्टेऽधिपतिरिति वायुमेवास्या अधिपतिं करोति सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥४॥ अथऽर्तव्या उपदधाति । ऋतव एते यदृतव्या ऋतूनेवैतदुपदधाति नभश्च नभस्यश्च वार्षिकावृतूऽइति नामनीऽएनयोरेते नामभ्यामेवैनेऽएतदुपदधाति द्वेऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोत्यवकासूपदधात्यवकाभिः प्रह्लादयत्यापो वाऽअवका अपस्तदेतस्मिन्नृतौ दधाति तस्मादेतस्मिन्नृतौ भूयिष्ठं वर्षति ॥५॥ अथोत्तरे । इषश्चोर्जश्च शारदावृतूऽइति नामनीऽएनयोरेते नामभ्यामेवैनेऽएतदुपदधाति द्वेऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्सादयत्येकं तदृतुं करोत्यवकासूपदधात्यापो वाऽअवका अपस्तदेतस्यऽर्तोः पुरस्ताद्दधाति तस्मादेतस्यऽर्तोः पुरस्ताद्वर्षति नोपरिष्टात्प्रह्लादयति तस्मान्न तथेवोपरिष्टाद्वर्षति ॥६॥ तद्यदेता अत्रोपदधाति । संवत्सर एषोऽग्निरिमऽउ लोकाः संवत्सरस्तस्यान्तरिक्षमेव मध्यमा चितिरन्तरिक्षमस्य वर्षाशरदावृतू तद्यदेता अत्रोपदधाति यदेवास्यैता आत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेता अत्रोपदधाति ॥७॥ यद्वै वैता अत्रोपदधाति । प्रजापतिरेषोऽग्निः संवत्सर उ प्रजापतिस्तस्य मध्यमेव मध्यमा चितिर्मध्यमस्य वर्षाशरदावृतू तद्यदेता अत्रोपदधाति यदेवास्यैता आत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेता अत्रोपदधाति ॥८॥ ता वाऽएताः । चतस्र ऋतव्या मध्यमायां चिताऽउपदधाति द्वे-द्वेऽइतरासु चितिषु चतुष्पादा वै पशवोऽन्तरिक्षं मध्यमा चितिरन्तरिक्षे तत्पशून्दधाति तस्मादन्तरिक्षायतनाः पशवः ॥९॥ यद्वै चतस्रः ।

चतुष्पादा वै पशवोऽन्नं पशवो मध्यं मध्यमा चितिर्मध्यतस्तदन्नं दधाति ॥१०॥ यद्वेव चतस्रः । चतुरक्षरं वाऽअत्तरिक्षं द्व्यक्षरा इतराश्चितयस्तस्मादवत्तरिक्षं तावत्तत्कृत्वोपदधाति ॥११॥ यद्वेव चतस्रः । पशुरेष यदग्निर्मध्यं तत्प्रति पशुं वरिष्ठं करोति तस्मान्मध्यं प्रति पशुर्वरिष्ठः ॥१२॥ ता वाऽएताः । चतस्र ऋतव्यास्तासां विश्वज्योतिः पञ्चमी पञ्च दिश्यास्तद्दश दशाक्षरा विराडन्नं विराण्मध्यं मध्यमा चितिर्मध्यतस्तदन्नं दधाति ता अनन्तर्हिताः स्वयमातृण्णाया उपदधाति प्राणो वै स्वयमातृण्णानन्तर्हितं तत्प्राणादन्नं दधात्युत्तरा उत्तरं तत्प्राणादन्नं दधाति ॥१३॥ अथ प्राणभृत उपदधाति । प्राणा वै प्राणभृतः प्राणानेवैतदुपदधाति ता दश भवन्ति दश वै प्राणाः पूर्वार्धऽउपदधाति पुरस्ताद्धोमे प्राणा आयुर्मे पाहि ज्योतिर्मे यछेति प्राणो वै ज्योतिः प्राणं मे यछेत्येवैतदाह ता अनन्तर्हिता ऋतव्याभ्य उपदधाति प्राणो वै वायुर्ऋतुषु तद्वायुं प्रतिष्ठापयति ॥१४॥ ब्राह्मणम् ॥ १ [३. २.] ॥ ॥

अथ छन्दस्या उपदधाति । पशवो वै छन्दाꣳस्यत्तरिक्षं मध्यमा चितिरत्तरिक्षे तत्पशुं दधाति तस्मादत्तरिक्षायतनाः पशवः ॥१॥ यद्वेव छन्दस्या उपदधाति । पशवो वै छन्दाꣳस्यन्नं पशवो मध्यं मध्यमा चितिर्मध्यतस्तदन्नं दधाति ॥२॥ ता द्वादश-द्वादशोपदधाति । द्वादशाक्षरा वै जगती पशवो जगत्यत्तरिक्षं मध्यमा चितिरत्तरिक्षे तत्पशून्दधाति तस्मादत्तरिक्षायतनाः पशवः ॥३॥ यद्वेव द्वादश-द्वादश । द्वादशाक्षरा वै जगती पशवो वै जगत्यन्नं पशवो मध्यं मध्यमा चितिर्मध्यतस्तदन्न दधाति ता अनन्तर्हिताः प्राणभृद्भ्य उपदधात्यनन्तर्हितं तत्प्राणेभ्योऽन्नं दधात्युत्तरा उत्तरं तत्प्राणेभ्योऽन्नं दधाति ॥४॥ मा छन्द इति । अयं वै लोको मागꣳ हि लोको मित-इव प्रमा छन्द इत्यत्तरिक्षलोको वै प्रमात्तरिक्षलोको ह्यस्माल्लोकात्प्रमित-इव प्रतिमा छन्द इत्यसौ वै लोकः प्रतिमैष ह्यत्तरिक्षलो-

के प्रतिमित-इवास्रीवयश्छन्द इत्यन्नमस्रीवयस्तद्यदेषु लोकेष्वन्नं तदस्रीवयोऽथो यदेभ्यो लोकेभ्योऽन्नꣳ स्रवति तदस्रीवयोऽथातो निरुक्तान्येव छन्दाꣳस्युपदधाति ॥५॥ पङ्क्तिश्छन्दः । उष्णिक्छन्दो बृहती छन्दोऽनुष्टुप्छन्दो विराट् छन्दो गायत्री छन्दस्त्रिष्टुप्छन्दो जगती छन्द इत्येतानि निरुक्तानि विराडष्टमानि छन्दाꣳस्युपदधाति पृथिवी छन्दोऽन्तरिक्षं छन्द इति यान्येतद्देवत्यानि छन्दाꣳसि तान्येवैतदुपदधात्यग्निर्देवता वातो देवतेत्येता वै देवताश्छन्दाꣳसि तान्येवैतदुपदधाति ॥६॥ स वै निरुक्तानि चानिरुक्तानि चोपदधाति । स यत्सर्वाणि निरुक्तान्युपाधास्यदन्नवद्धान्नमभविष्यदत्तेष्यत क्राथ यत्सर्वाण्यनिरुक्तानि परोऽक्षꣳ क्रान्नमभविष्यन्न कैनद्भक्ष्यंश्चन निरुक्तानि चानिरुक्तानि चोपदधाति तस्मान्निरुक्तमन्नमद्यमानं न क्षीयते ॥७॥ तानि वाऽएतानि । त्रीणि द्वादशान्युपदधाति तत्षट्त्रिꣳशत्षट्त्रिꣳशदक्षरा बृहत्येषा वै सा बृहती यां तद्वा अत्तरिक्षं बृहतीं तृतीयां चितिमपश्यंस्तस्याऽएतस्यै देवा उत्तमाः ॥८॥ यद्वैवैता इष्टका उपदधाति । प्रजापतेर्विस्रस्तात्सर्वाणि भूतानि सर्वा दिशोऽनु व्युद्क्रामन् ॥९॥ स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयतेऽथ यान्यस्मात्तानि भूतानि व्युद्क्रामन्नेतास्ता इष्टकास्तद्यदेता उपदधाति यान्येवास्मात्तानि भूतानि व्युद्क्रामंस्तान्यस्मिन्नेतत्प्रतिदधाति ॥१०॥ तद्या दश प्रथमा उपदधाति । स चन्द्रमास्ता दश भवन्ति दशाक्षरा विराडन्नं विराडन्नमु चन्द्रमा अथ या उत्तराः षट्त्रिꣳशदर्धमासाश्च ते मासाश्च चतुर्विꣳशतिरर्धमासा द्वादश मासाश्चन्द्रमा वै संवत्सरः सर्वाणि भूतानि ॥११॥ तं यत्र देवाः समस्कुर्वन् । तदस्मिन्नेतानि सर्वाणि भूतानि मध्यतोऽद्धुस्तथैवास्मिन्नयमेतद्दधाति ता अनत्तर्हिता ऋतव्याभ्य उपदधात्यृतुषु तत्सर्वाणि भूतानि प्रतिष्ठापयति ॥१२॥ ब्राह्मणम् ॥२ [३. ३.] ॥ ॥

अथ वालखिल्या उपदधाति । प्राणा वै वालखिल्याः प्राणानेवैतदुपदधाति

ता यद्वालखिल्या नाम यद्धाऽऽर्ब्वरयोरसम्भिन्नं भवति खिल इति वै तदाचक्षते वालमात्राद्धि केमे प्राणा असम्भिन्नास्ते यद्वालमात्रादसम्भिन्नास्तस्माद्वालखिल्याः ॥१॥ स वै सप्त पुरस्तादुपदधाति । सप्त पश्चात्तद्याः सप्त पुरस्तादुपदधाति यऽएवेमे सप्त पुरस्तात्प्राणास्तानस्मिन्नेतद्दधाति ॥२॥ अथ याः सप्त पश्चात् । एषामेवैतत्प्राणानामेतान्प्राणान्प्रतिप्रतीन्करोति तस्माद्यदेभिरन्नमत्ति तदेतैरत्येति ॥३॥ यद्वेव सप्त पुरस्तादुपदधाति । सप्त वाऽइमे पुरस्तात्प्राणाश्चत्वारि दोर्बाह्वाणि शिरो ग्रीवा यदूर्ध्वं नाभेस्तत्सप्तममङ्गेऽङ्गे हि प्राण एते वै सप्त पुरस्तात्प्राणास्तानस्मिन्नेतद्दधाति ॥४॥ अथ याः सप्त पश्चात् । सप्त वाऽइमे पश्चात्प्राणाश्चत्वार्यूर्वष्ठीवानि द्वे प्रतिष्ठे यद्वाङ्नाभेस्तत्सप्तममङ्गेऽङ्गे हि प्राण एते वै सप्त पश्चात्प्राणास्तानस्मिन्नेतद्दधाति ॥५॥ मूर्धासि राट् । ध्रुवासि धरुणा धर्त्र्यसि धरणी यत्नी राड्यत्न्यसि यमनी ध्रुवासि धरित्रीत्येतानेवास्मिन्नेतद्ध्रुवान्प्राणान्यच्छति ॥६॥ यद्वेव वालखिल्या उपदधाति । एतद्वै देवा वालखिल्याभिरेवेमांल्लोकान्त्समयुरितश्चोर्धानमुतश्चार्वाचस्तथैवैतद्यजमानो वालखिल्याभिरेवेमांल्लोकान्त्संयातीतश्चोर्धानमुतश्चार्वाचः ॥७॥ मूर्धासि राडितीमं लोकमरोहन् । ध्रुवासि धरुणेत्यन्तरिक्षलोकं धर्त्र्यसि धरणीत्यमुं लोकमायुषे वा वर्चसे वा कृष्यै वा क्षेमाय वेति चत्वारश्चतुष्पादाः पशवोऽन्नं पशवस्तऽएतैश्चतुर्भिश्चतुष्पादिः पशुभिरेतेनान्नेनामुष्मिंल्लोके प्रत्यतिष्ठंस्तथैवैतद्यजमान एतैश्चतुर्भिश्चतुष्पादिः पशुभिरेतेनान्नेनामुष्मिंल्लोके प्रतितिष्ठति ॥८॥ स स पराङिव रोहः । इयमु वै प्रतिष्ठा ते देवा इमां प्रतिष्ठामभिप्रत्यायंस्तथैवैतद्यजमान इमां प्रतिष्ठामभिप्रत्येति ॥९॥ यत्नी राडित्यमुं लोकमरोहन् । यत्न्यसि यमनीत्यन्तरिक्षलोकं ध्रुवासि धरित्रीतीमं लोकमिषे त्वोर्जे त्वा रय्यै त्वा पोषाय वेति चत्वारश्चतुष्पादाः पशवोऽन्नं पशवस्तऽएतैश्चतुर्भिश्चतुष्पादिः पशुभिरेतेनान्नेनास्मिंल्लोके प्रत्यतिष्ठंस्तथैवैतद्यजमान ए-

तैश्चतुर्भिश्चतुष्पादैः पशुभिरेतेनान्नेनास्मिंल्लोके प्रतितिष्ठति ॥१०॥ अथातः संस्कृतिरेव । या अमूरेकादशेष्टका उपदधाति योऽसौ प्रथमोऽनुवाकस्तदन्तरिक्षꣳ स आत्मा तथ्यत्ता एकादश भवन्त्येकादशाक्षरा वै त्रिष्टुप्त्रैष्टुभमन्तरिक्षमथ या उत्तराः षष्टिः स वायुः स प्रजापतिः सोऽग्निः स यज्ञमानः ॥११॥ तथ्याः पुरस्तादुपदधाति । शिरोऽस्य तास्ता दश भवन्ति दश वै प्राणाः प्राणा उ वै शिरः पूर्वार्धऽउपदधाति पुरस्ताद्धीदꣳ शिरः ॥१२॥ अथ या दक्षिणातः । यदूर्ध्वं मध्यादवाचीनꣳ शीर्ष्णस्तदस्य ता अथ याः पश्चाद्यदूर्ध्वं प्रतिष्ठायाऽअवाचीनं मध्यात्तदस्य ताः प्रतिष्ठैवोत्तरतः ॥१३॥ तथ्याः सप्त पुरस्ताद्वालखिल्या उपदधाति । यऽएवेमे सप्त पुरस्तात्प्राणास्तानस्मिन्नेतद्दधाति ता अनन्तर्हिता एताभ्यो दशभ्य उपदधात्यनन्तर्हितांस्तद्दीर्ष्णः प्राणान्दधाति ॥१४॥ अथ याः सप्त पश्चात् । यऽएवेमे सप्त पश्चात्प्राणास्तानस्मिन्नेतद्दधाति ता अनन्तर्हिता एताभ्यो द्वादशभ्य उपदधात्यनन्तर्हितांस्तदात्मनः प्राणान्दधाति स एष वायुः प्रजापतिरस्मिंस्त्रैष्टुभेऽन्तरिक्षे समन्तं पर्यक्रस्तथ्यतृतीयां चितिमुपदधाति वायुं चैव तदन्तरिक्षं च संस्कृत्योपधत्तेऽथ लोकम्पृणेऽउपदधात्यस्याꣳ स्रक्त्यां तयोरुपरि बन्धुः पुरीषं निवपति तस्योपरि बन्धुः ॥१५॥ ब्राह्मणम् ॥३ [३. ४.] ॥ तृतीयोऽध्यायः [५१.] ॥ ॥

चतुर्थीं चितिमुपदधाति । एतद्वै देवास्तृतीयां चितिं चित्वा समारोहन्नन्तरिक्षं वै तृतीया चितिरन्तरिक्षमेव तत्संस्कृत्य समारोहन् ॥१॥ तेऽब्रुवन् । चेतयध्वमिति चितिमिङ्खतेति वाव तदब्रुवन्नित ऊर्ध्वमिङ्खतेति ते चेतयमाना एतां चतुर्थीं चितिमपश्यन्यदूर्ध्वमन्तरिक्षादर्वाचीनं दिवस्तेषामेष लोकोऽध्रुव-इवाप्रतिष्ठित-इव मनस्यासीत् ॥२॥ ते ब्रह्माब्रुवन् । त्वामिङ्खोपदधामह्याऽइति किं मे ततो भविष्यतीति त्वमेव नः श्रेष्ठं भविष्यसीति तथेति तेऽब्रह्मोपादधत तस्मादाहुर्ब्रह्मैव देवानाꣳ श्रेष्ठमिति तदेतया वै चतुर्थ्या चित्येमे द्यावापृथिवी विष्टब्धे ब्रह्म

वै चतुर्थी चितिस्तस्माद्ब्रह्मणा द्यावापृथिवी विष्टब्धेऽइति स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा उ वै ब्रह्म ब्रह्मैवैतदुपदधाति ॥३॥ यद्वेव स्तोमानुपदधाति । एतद्वै देवाः प्रजापतिमब्रुवंस्त्वामिहोपदधामहाऽइति तथेति स वै नाब्रवीत्किं मे ततो भविष्यतीति यदु ह किं च प्रजापतिर्देवेषीषे किमस्माकं ततो भविष्यतीत्येवोचुस्तस्मादु ह्येतद्यत्पिता पुत्रेष्विह्यते किमस्माकं ततो भविष्यतीत्येवाब्रुवथ यत्पुत्राः पितरि तथेत्येवाह्येव ह्यु हि तदग्रे प्रजापतिश्च देवाश्च समवदन्त स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा उ वै प्रजापतिः प्रजापतिमेवैतदुपदधाति ॥४॥ यद्वेव स्तोमानुपदधाति । ये वै ते प्राणा ऋषय एतां चतुर्थीं चितिमपश्यन्ये तऽएतेन रसेनोपायंस्तऽएते तानेवैतदुपदधाति स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा उ वाऽऋषय ऋषीनेवैतदुपदधाति ॥५॥ यद्वेव स्तोमानुपदधाति । प्रजापतिं विस्रस्तं देवता आदाय व्युदक्रामंस्तस्य यदूर्ध्वं मध्यादवाचीनꣳ शीर्ष्णस्तदस्य वायुरादायोत्क्रम्यातिष्ठद्देवताश्च भूत्वा संवत्सररूपाणि च ॥६॥ तमब्रवीत् । उप मेहि प्रति मऽएतद्धेहि येन मे त्वमुदक्रमीरिति किं मे ततो भविष्यतीति त्वद्देवत्यमेव मऽएतदात्मनो भविष्यतीति तथेति तदस्मिन्नेतद्वायुः प्रत्यदधात् ॥७॥ तद्या एता अष्टादश प्रथमाः । एतदस्य तदात्मनस्तद्यदेता अत्रोपदधाति यद्देवास्यैता आत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेता अत्रोपदधाति स्तोमानुपदधाति प्राणा वै स्तोमाः प्राणा उ वै वायुर्वायुमेवैतदुपदधाति ॥८॥ स पुरस्तादुपदधाति । आशुस्त्रिवृदिति य एव त्रिवृत्स्तोमस्तं तदुपदधाति तद्यत्तन्माहाशुरित्येष ह्येतेषां स्तोमानामाशिष्ठोऽथो वायुर्वाऽआशुस्त्रिवृत्स्वेषु त्रिषु लोकेषु वर्तते तद्यत्तन्माहाशुरित्येष ह्येषां सर्वेषां भूतानामाशिष्ठो वायुर्ह्येव भूत्वा पुरस्तात्तस्थौ तदेव तद्रूपमुपदधाति ॥९॥ भान्तः पञ्चदश इति । य एव पञ्चदश स्तोमस्तं तदुपदधाति तद्यत्तन्माह भान्त इति वज्रो वै भान्तो वज्रः पञ्चदशोऽथो

चन्द्रमा वै भान्तः पञ्चदशः स च पञ्चदशाद्धान्यापूर्यते पञ्चदशापक्षीयते तद्यत्तमाह भान्त इति भाति हि चन्द्रमाश्चन्द्रमा ह्य भूत्वा दक्षिणतस्तस्थौ तदेव तद्रूपमुपदधाति ॥ १०॥ व्योमा सप्तदश इति । य एव सप्तदश स्तोमस्तं तदुपदधाति तद्यत्तमाह व्योमेति प्रजापतिर्वै व्योमा प्रजापतिः सप्तदशोऽथो संवत्सरो वाव व्योमा सप्तदशस्तस्य द्वादश मासाः पञ्चर्तवस्तद्यत्तमाह व्योमेति व्योमा हि संवत्सरः संवत्सरो ह्य भूत्वोत्तरतस्तस्थौ तदेव तद्रूपमुपदधाति ॥ ११॥ धरुण एकविꣳश इति । य एवैकविꣳश स्तोमस्तं तदुपदधाति तद्यत्तमाह धरुण इति प्रतिष्ठा वै धरुणः प्रतिष्ठैकविꣳशोऽथोऽसौ वाऽआदित्यो धरुण एकविꣳशस्तस्य द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावेवादित्यो धरुण एकविꣳशस्तद्यत्तमाह धरुण इति यदा ह्येवैषोऽस्तमेत्यथेदꣳ सर्वं ध्रियतऽआदित्यो ह्य भूत्वा पश्चात्तस्थौ तदेव तद्रूपमुपदधात्यथ संवत्सरद्रूपाण्युपदधाति ॥ १२॥ प्रतूर्तिरष्टादश इति । य एवाष्टादश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव प्रतूर्तिरष्टादशस्तस्य द्वादश मासाः पञ्चर्तवः संवत्सर एव प्रतूर्तिरष्टादशस्तद्यत्तमाह प्रतूर्तिरिति संवत्सरो हि सर्वाणि भूतानि प्रतिरति तदेव तद्रूपमुपदधाति ॥ १३॥ तपो नवदश इति । य एव नवदश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव तपो नवदशस्तस्य द्वादश मासाः षड्ऋतवः संवत्सर एव तपो नवदशस्तद्यत्तमाह तप इति संवत्सरो हि सर्वाणि भूतानि तपति तदेव तद्रूपमुपदधाति ॥ १४॥ अभीवर्तः सविꣳश इति । य एव सविꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाऽअभीवर्तः सविꣳशस्तस्य द्वादश मासाः सप्तर्तवः संवत्सर एवाभीवर्तः सविꣳशस्तद्यत्तमाहाभीवर्त इति संवत्सरो हि सर्वाणि भूतान्यभिवर्तते तदेव तद्रूपमुपदधाति ॥ १५॥ वर्चो द्वाविꣳश इति । य एव द्वाविꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव वर्चो द्वाविꣳशस्तस्य द्वादश मासाः सप्तर्तवो द्वेऽअहोरात्रे

संवत्सर एव वर्चो द्वाविंशस्तत्यत्तमाह वर्च इति संवत्सरो हि सर्वेषां भूतानां वर्चस्वितमस्तदेव तद्रूपमुपदधाति ॥१६॥ सम्भरणस्त्रयोविंश इति य एव त्रयोविंश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव सम्भरणस्त्रयोविंशस्तस्य त्रयोदश मासा सप्तर्तवो द्वेऽअहोरात्रे संवत्सर एव सम्भरणस्त्रयोविंशस्तत्यत्तमाह सम्भरणा इति संवत्सरो हि सर्वाणि भूतानि सम्भृतस्तदेव तद्रूपमुपदधाति ॥१७॥ योनिश्चतुर्विंश इति । य एव चतुर्विंश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव योनिश्चतुर्विंशस्तस्य चतुर्विंशतिरर्धमासास्तत्यत्तमाह योनिरिति संवत्सरो हि सर्वेषां भूतानां योनिस्तदेव तद्रूपमुपदधाति ॥१८॥ गर्भाः पञ्चविंश इति । य एव पञ्चविंश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव गर्भाः पञ्चविंशस्तस्य चतुर्विंशतिरर्धमासाः संवत्सर एव गर्भाः पञ्चविंशस्तत्यत्तमाह गर्भा इति संवत्सरो ह त्रयोदशो मासो गर्भो भूत्वर्तून्प्रविशति तदेव तद्रूपमुपदधाति ॥१९॥ ओजस्त्रिणव इति । य एव त्रिणव स्तोमस्तं तदुपदधाति तत्यत्तमाहौज इति वज्रो वाऽओजो वज्रस्त्रिणवोऽथो संवत्सरो वाऽओजस्त्रिणवस्तस्य चतुर्विंशतिरर्धमासा द्वेऽअहोरात्रे संवत्सर एवौजस्त्रिणवस्तत्यत्तमाहौज इति संवत्सरो हि सर्वेषां भूतानामोजस्वितमस्तदेव तद्रूपमुपदधाति ॥२०॥ क्रतुरेकत्रिंश इति । य एवैकत्रिंश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव क्रतुरेकत्रिंशस्तस्य चतुर्विंशतिरर्धमासाः षडृतवः संवत्सर एव क्रतुरेकत्रिंशस्तत्यत्तमाह क्रतुरिति संवत्सरो हि सर्वाणि भूतानि करोति तदेव तद्रूपमुपदधाति ॥२१॥ प्रतिष्ठा त्रयस्त्रिंश इति । य एव त्रयस्त्रिंश स्तोमस्तं तदुपदधाति तत्यत्तमाह प्रतिष्ठेति प्रतिष्ठा हि त्रयस्त्रिंशोऽथो संवत्सरो वाव प्रतिष्ठा त्रयस्त्रिंशस्तस्य चतुर्विंशतिरर्धमासाः षडृतवो द्वेऽअहोरात्रे संवत्सर एव प्रतिष्ठा त्रयस्त्रिंशस्तत्यत्तमाह प्रतिष्ठेति संवत्सरो हि सर्वेषां भूतानां प्रतिष्ठा तदेव तद्रूपमुपदधाति ॥२२॥

ब्रध्नस्य विष्टपं चतुस्त्रिꣳश इति । य एत चतुस्त्रिꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव ब्रध्नस्य विष्टपं चतुस्त्रिꣳशस्तस्य चतुर्विꣳशतिरर्धमासाः सप्तर्तवो द्वेऽअहोरात्रे संवत्सर एव ब्रध्नस्य विष्टपं चतुस्त्रिꣳशस्तत्यत्तमाह ब्रध्नस्य विष्टपमिति स्वाराज्यं वै ब्रध्नस्य विष्टपꣳ स्वाराज्य चतुस्त्रिꣳशस्तदेव तद्रूपमुपदधाति ॥२३॥ नाकः षट्त्रिꣳश इति । य एव षट्त्रिꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव नाकः षट्त्रिꣳशस्तस्य चतुर्विꣳशतिरर्धमासा द्वादश मासास्तत्यत्तमाह नाक इति न हि तत्र गताय कस्मै चनाकं भवत्यथो संवत्सरो वाव नाकः संवत्सरः स्वर्गो लोकस्तदेव तद्रूपमुपदधाति ॥२४॥ विवर्तोऽष्टाचत्वारिꣳश इति । य एवाष्टाचत्वारिꣳश स्तोमस्तं तदुपदधात्यथो संवत्सरो वाव विवर्तोऽष्टाचत्वारिꣳशस्तस्य षड्विꣳशतिरर्धमासास्त्रयोदश मासाः सप्तर्तवो द्वेऽअहोरात्रे तत्यत्तमाह विवर्त इति संवत्सराद्धि सर्वाणि भूतानि विवर्तन्ते तदेव तद्रूपमुपदधाति ॥२५॥ धर्त्र चतुष्टोम इति । य एव चतुष्टोम स्तोमस्तं तदुपदधाति तत्यत्तमाह धर्त्रमिति प्रतिष्ठा वै धर्त्र प्रतिष्ठा चतुष्टोमोऽथो वायुर्वाव धर्त्र चतुष्टोमः स आभिश्चतसृभिर्दिग्भि स्तुते तत्यत्तमाह धर्त्रमिति प्रतिष्ठा वै धर्त्र वायुरु सर्वेषां भूतानां प्रतिष्ठा तदेव तद्रूपमुपदधाति स वै वायुमेव प्रथममुपदधाति वायुमुत्तमं वायुनैव तदेतानि सर्वाणि भूतान्युभयतः परिगृह्णाति ॥२६॥ ता वाऽएताः । अष्टादशेष्टका उपदधाति । तौ द्वौ त्रिवृतौ प्राणो वै त्रिवृद्वायुरु प्राणो वायुरेषा चितिः ॥२७॥ यद्वेवाष्टादश । अष्टादशो वै संवत्सरो द्वादश मासाः पञ्चर्तवः संवत्सर एव प्रजापतिरष्टादशः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावत्तत्कृत्वोपदधाति ॥२८॥ ब्राह्मणम् ॥ ४ [४. १.] ॥ ॥

अथ स्यूत उपदधाति । एतद्वै प्रजापतिरेतस्मिन्नात्मनः प्रतिरिते सर्वाणि भूतानि गर्भ्यभवत्तान्यस्य गर्भऽएव सन्ति पाप्मा मृत्युरगृह्णात् ॥१॥ स देवानब्रवीत्

। युष्माभिः सहेमानि सर्वाणि भूतानि पाप्मनो मृत्यो स्पृणवानीति किं नस्ततो भविष्यतीति वृणीधमित्यब्रवीत्तं भागो नोऽस्त्वित्येकेऽब्रुवन्नाधिपत्यं नोऽस्त्वित्येके स भागमेकेभ्यः कृत्वाधिपत्यमेकेभ्यः सर्वाणि भूतानि पाप्मनो मृत्योरस्पृणोद्यदस्पृणोत्तस्मात्स्पृतस्तथैवैतद्यज्ञमानो भागमेकेभ्यः कृत्वाधिपत्यमेकेभ्यः सर्वाणि भूतानि पाप्मनो मृत्यो स्पृणोति तस्माद्व सर्वास्वेव स्पृतꣳ-स्पृतमित्यनुवर्तते ॥२॥ अग्नेर्भागोऽसि । दीक्षाया आधिपत्यमिति वाग्वै दीक्षाग्नये भागं कृत्वा वाचऽआधिपत्यमकरोद्ब्रह्म स्पृतं त्रिवृत्स्तोम इति ब्रह्म प्रजानां त्रिवृता स्तोमेन पाप्मना मृत्योरस्पृणोत् ॥३॥ इन्द्रस्य भागोऽसि । विष्णोराधिपत्यमितीन्द्राय भागं कृत्वा विष्णवऽआधिपत्यमकरोत्क्षत्रꣳ स्पृतं पञ्चदश स्तोम इति क्षत्रं प्रजानां पञ्चदशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥४॥ नृचक्षसां भागोऽसि । धातुराधिपत्यमिति देवा वै नृचक्षसो देवेभ्यो भागं कृत्वा धात्रऽआधिपत्यमकरोज्जनित्रꣳ स्पृतꣳ सप्तदश स्तोम इति विड्वै जनित्रं विशं प्रजानाꣳ सप्तदशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥५॥ मित्रस्य भागोऽसि । वरुणस्याधिपत्यमिति प्राणो वै मित्रोऽपानो वरुणः प्राणाय भागं कृत्वापानायाधिपत्यमकरोद्दिवो वृष्टिर्वात स्पृत एकविꣳश स्तोम इति वृष्टिं च वातं च प्रजानामेकविꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥६॥ वसूनां भागोऽसि । रुद्राणामाधिपत्यमिति वसुभ्यो भागं कृत्वा रुद्रेभ्य आधिपत्यमकरोच्चतुष्पात्स्पृतं चतुर्विꣳश स्तोम इति चतुष्पात्प्रजानां चतुर्विꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥७॥ आदित्यानां भागोऽसि । मरुतामाधिपत्यमित्यादित्येभ्यो भागं कृत्वा मरुद्भ्य आधिपत्यमकरोद्गर्भा स्पृताः पञ्चविꣳश स्तोम इति गर्भान्प्रजानां पञ्चविꣳशेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥८॥ अदित्यै भागोऽसि । पूष्ण आधिपत्यमितीयं वाऽअदितिरस्यै भागं कृत्वा पूष्णऽआधिपत्यमकरोदोज स्पृतं त्रिणव स्तोम इत्योजः प्रजानां त्रि-

णवेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥९॥ देवस्य सवितुर्भागोऽसि । बृहस्पतेराधिपत्यमिति देवाय सवित्रे भागं कृत्वा बृहस्पतयऽआधिपत्यमकरोत्समीचीर्दिश स्पृताश्चतुष्टोम स्तोम इति सर्वा दिशः प्रज्ञानां चतुष्टोमेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥१०॥ यवानां भागोऽसि । अयवानामाधिपत्यमिति पूर्वपक्षा वै यवा अपरपक्षा अयवास्ते ह्येद७ सर्वं युवते चायुवते च पूर्वपक्षेभ्यो भागं कृत्वापरपक्षेभ्य आधिपत्यमकरोत्प्रज्ञा स्पृताश्चतुश्चत्वारि७श स्तोम इति सर्वाः प्रज्ञाश्चतुश्चत्वारि७शेन स्तोमेन पाप्मनो मृत्योरस्पृणोत् ॥११॥ ऋभूणां भागोऽसि । विश्वेषां देवानामाधिपत्यमित्यृभुभ्यो भागं कृत्वा विश्वेभ्यो देवेभ्य आधिपत्यमकरोद्भूत७ स्पृतं त्रयस्त्रि७श स्तोम इति सर्वाणि भूतानि त्रयस्त्रि७शेन स्तोमेन पाप्मनो मृत्योरस्पृणोत्तथैवैतद्यजमानः सर्वाणि भूतानि त्रयस्त्रि७शेन स्तोमेन पाप्मनो मृत्यो स्पृणोति ॥१२॥ ता वाऽएता दशेष्टका उपदधाति । दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैव तदेतानि सर्वाणि भूतानि पाप्मनो मृत्यो स्पृणोति ॥१३॥ अथऽर्तव्ये ऽउपदधाति । ऋतव एते यदृतव्ये ऋतूनेवैतदुपदधाति सहश्च सहस्यश्च हैमन्तिकावृतूऽइति नामनीऽएनयोरेते नामभ्यामेवैनेऽएतदुपदधाति द्वेऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्साद्यत्येकं तदृतुं करोति ॥१४॥ तद्यदेतेऽअत्रोपदधाति । संवत्सर एषोऽग्निरिमऽउ लोकाः संवत्सरस्तस्य यदूर्ध्वमन्तरिक्षादर्वाचीनं दिवस्तदस्यैषा चतुर्थी चितिस्तद्वस्य हेमन्त ऋतुस्तद्यदेतेऽअत्रोपदधाति यदेवास्यैतेऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥१५॥ यद्वैवैतेऽअत्रोपदधाति । प्रजापतिरेषोऽग्निः संवत्सर उ प्रजापतिस्तस्य यदूर्ध्वं मध्यादर्वाचीन७ शीर्ष्णस्तदस्यैषा चतुर्थी चितिस्तद्वस्य हेमन्त ऋतुस्तद्यदेतेऽअत्रोपदधाति यदेवास्यैतेऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥१६॥ ब्राह्मणम् ॥ ५ [४. २.] ॥ ॥

अथ सृष्टीरुपदधाति । एतद्वै प्रजापतिः सर्वाणि भूतानि पाप्मनो मृत्योर्मुक्ता-कामयत प्रजाः सृजेय प्रजायेयेति ॥ १ ॥ स प्राणानब्रवीत् । युष्माभिः सृष्टेमाः प्रजाः प्रजनयानीति ते वै केन स्तोष्यामहऽइति मया चैव युष्माभिश्चेति तथेति ते प्राणैश्चैव प्रजापतिना चास्तुवत यद्वै किं च देवाः कुर्वते स्तोमेनैव तत्कुर्वते यज्ञो वै स्तोमो यज्ञेनैव तत्कुर्वते तस्माद्वै सर्वास्वेवास्तुवतास्तुवतेत्यनुवर्तते ॥ २ ॥ एकयास्तुवतेति । वाग्वाऽएका वाचैव तदस्तुवत प्रजा अधीयन्तेति प्रजा अत्राधीयन्त प्रजापतिरधिपतिरासीदिति प्रजापतिरत्राधिपतिरासीत् ॥ ३ ॥ तिसृभिरस्तुवतेति । त्रयो वै प्राणाः प्राण उदानो व्यानस्तैरेव तदस्तुवत ब्रह्मासृज्यतेति ब्रह्मात्रासृज्यत ब्रह्मणस्पतिरधिपतिरासीदिति ब्रह्मणस्पतिरत्राधिपतिरासीत् ॥ ४ ॥ पञ्चभिरस्तुवतेति । यऽएवेमे मनःपञ्चमाः प्राणास्तैरेव तदस्तुवत भूतान्यसृज्यन्तेति भूतान्यत्रासृज्यन्त भूतानां पतिरधिपतिरासीदिति भूतानां पतिरत्राधिपतिरासीत् ॥ ५ ॥ सप्तभिरस्तुवतेति । यऽएवेमे सप्त शीर्षन्प्राणास्तैरेव तदस्तुवत सप्तऽऋषयोऽसृज्यन्तेति सप्तऽर्षयोऽत्रासृज्यन्त धाताधिपतिरासीदिति धातात्राधिपतिरासीत् ॥ ६ ॥ नवभिरस्तुवतेति । नव वै प्राणाः सप्त शीर्षन्नवाञ्चौ द्वौ तैरेव तदस्तुवत पितरोऽसृज्यन्तेति पितरोऽत्रासृज्यन्तादितिरधिपत्न्यासीदित्यदितिरत्राधिपत्न्यासीत् ॥ ७ ॥ ॥ शतम् ४५०० ॥ ॥ एकादशभिरस्तुवतेति । दश प्राणा आत्मैकादशस्तैनैव तदस्तुवतऽऋतवोऽसृज्यन्तेत्यृतवोऽत्रासृज्यन्तार्तवा अधिपतय आसन्नित्यार्तवा अत्राधिपतय आसन् ॥ ८ ॥ त्रयोदशभिरस्तुवतेति । दश प्राणा द्वे प्रतिष्ठेऽआत्मा त्रयोदशस्तैनैव तदस्तुवत मासा असृज्यन्तेति मासा अत्रासृज्यन्त संवत्सरोऽधिपतिरासीदिति संवत्सरोऽत्राधिपतिरासीत् ॥ ९ ॥ पञ्चदशभिरस्तुवतेति । दश कृत्या अङ्गुलयश्चत्वारि दोर्बाह्वाणि यदूर्ध्वं नाभेस्तत्पञ्चदशं तेनैव तदस्तुवत क्षत्रमसृज्यतेति क्षत्रमत्रासृज्यतेन्द्रोऽधिपतिरासीदितीन्द्रोऽत्रा-

धिपतिरासीत् ॥ १० ॥ सप्तदशभिरस्तुवतेति । दश पाद्या अङ्गुलयश्चत्वार्यूर्वष्ठीवानि द्वे प्रतिष्ठे यद्वाङ्गभिस्तत्सप्तदशं तेनैव तदस्तुवत ग्राम्याः पशवोऽसृज्यन्तेति ग्राम्याः पशवोऽत्रासृज्यन्त बृहस्पतिरधिपतिरासीदिति बृहस्पतिरत्राधिपतिरासीत् ॥ ११ ॥ नवदशभिरस्तुवतेति । दश हस्त्या अङ्गुलयो नव प्राणास्तैरेव तदस्तुवत शूद्रार्यावसृज्येतामिति शूद्रार्यावत्रासृज्येतामहोरात्रेऽअधिपत्नीऽआस्तामित्यहोरात्रेऽअत्राधिपत्नीऽआस्ताम् ॥ १२ ॥ एकविꣳशत्यास्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविꣳशस्तेनैव तदस्तुवतैकशफाः पशवोऽसृज्यन्तेत्येकशफाः पशवोऽत्रासृज्यन्त वरुणोऽधिपतिरासीदिति वरुणोऽत्राधिपतिरासीत् ॥ १३ ॥ त्रयोविꣳशत्यास्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्या द्वे प्रतिष्ठेऽआत्मा त्रयोविꣳशस्तेनैव तदस्तुवत नुद्राः पशवोऽसृज्यन्तेति नुद्राः पशवोऽत्रासृज्यन्त पूषाधिपतिरासीदिति पूषात्राधिपतिरासीत् ॥ १४ ॥ पञ्चविꣳशत्यास्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्याश्चत्वार्यङ्गान्यात्मा पञ्चविꣳशस्तेनैव तदस्तुवतारण्याः पशवोऽसृज्यन्तेत्यारण्याः पशवोऽत्रासृज्यन्त वायुरधिपतिरासीदिति वायुरत्राधिपतिरासीत् ॥ १५ ॥ सप्तविꣳशत्यास्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्याश्चत्वार्यङ्गानि द्वे प्रतिष्ठेऽआत्मा सप्तविꣳशस्तेनैव तदस्तुवत द्यावापृथिवी व्यैतामिति द्यावापृथिवीऽअत्र व्यैतां वसवो रुद्रा आदित्या अनूव्यायन्निति वसवो रुद्रा आदित्या अत्रानूव्यायंस्तऽएवाधिपतय आसन्निति तऽउऽएवात्राधिपतय आसन् ॥ १६ ॥ नवविꣳशत्यास्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्या नव प्राणास्तैरेव तदस्तुवत वनस्पतयोऽसृज्यन्तेति वनस्पतयोऽत्रासृज्यन्त सोमोऽधिपतिरासीदिति सोमोऽत्राधिपतिरासीत् ॥ १७ ॥ एकत्रिꣳशतास्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्या दश प्राणा आत्मैकत्रिꣳशस्तेनैव तदस्तुवत प्रजा असृज्यन्तेति प्रजा अत्रासृज्यन्त यवाश्चायवाश्चाधिपतय आसन्निति पूर्वपक्षापरपक्षा एवात्राधि-

पतय आसन् ॥१८॥ त्रयस्त्रिꣳशतास्तुवतेति । दश हस्त्या अङ्गुलयो दश पाद्या दश प्राणा द्वे प्रतिष्ठेऽआत्मा त्रयस्त्रिꣳशस्तेनैव तदस्तुवत भूतान्यशाम्यन्निति सर्वाणि भूतान्यत्राशाम्यन्प्रजापतिः परमेष्ठ्यधिपतिरासीदिति प्रजापतिः परमेष्ठ्यत्राधिपतिरासीत् ॥१९॥ ता वाऽएताः । सप्तदशेष्टका उपदधाति सप्तदशो वै संवत्सरः प्रजापतिः स प्रजननयिता तदेतेन वै सप्तदशेन संवत्सरेण प्रजापतिना प्रजननयित्रेताः प्रजाः प्राजनयत्यत्प्राजनयदसृजत तत्यदसृजत तस्मात्सृष्टयस्ताः सृष्ट्वात्मन्प्रापादयत तथैवैतत्यजमान एतेन सप्तदशेन संवत्सरेण प्रजापतिना प्रजननयित्रेताः प्रजाः प्रजनयति ताः सृष्ट्वात्मन्प्रपादयते रेतःसिचोर्वेलया पृष्टयो वै रेतःसिचौ मध्यमु पृष्टयो मध्यत एवास्मिन्नेताः प्रजाः प्रपादयति सर्वत उपदधाति सर्वत एवास्मिन्नेताः प्रजाः प्रपादयति ॥२०॥ ब्राह्मणम् ॥ ६ [४. ३.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या१०५ ॥ ॥

अथातोऽन्वावृतम् । त्रिवृद्वतीं पुरस्ताडुपदधात्येकविꣳशवर्तीं पश्चात्पञ्चदशवर्तीं दक्षिणतः सप्तदशवतीमुत्तरतः ॥१॥ एतद्वै प्रजापतिम् । त्रिवृद्वत्यामुपक्षितायां पञ्चदशवत्यां मृत्युरसीदिमामत उपधास्यते तमत्र ग्रहीष्यामीति तं प्रापश्यत्तं प्रह्याय परिक्रम्यैकविꣳशवतीमुपाधत्तैकविꣳशवतीं मृत्युरागच्छत्पञ्चदशवतीमुपाधत्त पञ्चदशवतीं मृत्युरागच्छत्सप्तदशवतीमुपाधत्त सोऽत्रैव मृत्युं न्यकरोदत्रामोक्ष्यत्तथैवैतद्यजमानोऽत्रैव सर्वान्पाप्मनो निकरोत्यत्र मोक्ष्यति ॥२॥ अथोत्तराः । त्रिवृद्वत्यामेव त्रिवृद्वतीमनूपदधात्येकविꣳशवत्यामेकविꣳशवतीं पञ्चदशवत्याꣳ सप्तदशवतीꣳ सप्तदशवत्यां पञ्चदशवतीं ता यदेवं व्यतिहारमुपदधाति तस्मादृक्षायास्तोमीया अथो यदेते स्तोमा अतोऽन्यथानुपूर्वं तस्माद्वेवाक्षायास्तोमीया अथोऽएवं देवा उपादधतेतरथासुरास्ततो देवा अभवन्परासुरा भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य एवं वेद ॥३॥ स एष पशुर्यदग्निः । सोऽत्रैव

सर्वः कृत्स्नः संस्कृतस्तस्य त्रिवृद्वत्यावेव शिरस्ते यत्त्रिवृद्वत्यौ भवतस्त्रिवृद्धि शिरो द्वे भवतो द्विकपालꣳ हि शिरः पूर्वार्धꣳ उपदधाति पुरस्ताद्धीदꣳ शिरः ॥४॥ प्रतिष्ठैकविꣳशवत्यौ । ते यदेकविꣳशवत्यौ भवतः प्रतिष्ठा ह्येकविꣳशो द्वे भवतो द्वन्द्वꣳ हि प्रतिष्ठा पश्चादुपदधाति पश्चाद्धीयं प्रतिष्ठा ॥५॥ बाहू पञ्चदशवत्यौ । ते यत्पञ्चदशवत्यौ भवतः पञ्चदशौ हि बाहू द्वे भवतो द्वौ ह्रीमौ बाहू पार्श्वत उपदधाति पार्श्वतो ह्रीमौ बाहू ॥६॥ अन्नꣳ सप्तदशवत्यौ । ते यत्सप्तदशवत्यौ भवतः सप्तदशꣳ ह्यन्नं द्वे भवतो द्वयक्षरꣳ ह्यन्नं तेऽअनक्तर्हितं पञ्चदशवतीभ्यामुपदधात्यनक्तर्हितं तद्बाहुभ्यामन्नं दधाति बाह्वे पञ्चदशवत्यौ भवतोऽन्तरे सप्तदशवत्यौ बाहुभ्यां तदुभयतोऽन्नं परिगृह्णाति ॥७॥ अथ या मध्यऽउपदधाति । स आत्मा ता रेतःसिचोर्वेलयोपदधाति पृष्ट्यो वै रेतःसिचौ मध्यमु पृष्ट्यो मध्यतो ह्ययमात्मा सर्वत उपदधाति सर्वतो ह्ययमात्माथ यदतोऽन्यदतिरिक्तं तथद्वै देवानामतिरिक्तं छन्दाꣳसि तानि तथानि तानि छन्दाꣳसि पशवस्ते तथे ते पशवः पुण्यास्ता लक्ष्म्यस्तथास्ताः पुण्या लक्ष्म्योऽसौ स आदित्यः स आसामेष दक्षिणातः ॥८॥ ता ह्येकेऽनक्तर्हितास्त्रिवृद्वतीभ्यामुपदधति । जिह्वाकूनूऽइति ब्रह्मतो याश्चतुर्दश ते कूनू याः षट् सा जिह्वेति न तथा कुर्यादिति ते रेचयन्ति यथा पूर्वयोर्हन्वोरुपरे कूनूऽअनूपदध्याद्यथा पूर्वस्यां जिह्वायामपरां जिह्वामनूपदध्यात्तादृक्तद्यत्रैवैव शिरस्तदेव कूनू तज्जिह्वा ॥९॥ अस्मिन्नु ह्येकेऽवान्तरदेशऽउपदधति । असौ वाऽआदित्य एता अमुं तदादित्यमेतस्यां दिशि दध्म इति न तथा कुर्यादन्यानि वाव तानि कर्माणि यैरेतमत्र दधाति ॥१०॥ दक्षिणात उ ह्येकऽउपदधति । तदेताः पुण्या लक्ष्मीर्दक्षिणातो दध्महऽइति तस्माद्यस्य दक्षिणातो लक्ष्म भवति तं पुण्यलक्ष्मीक इत्याचक्षतऽउत्तरत स्त्रिया उत्तरतआयतना हि स्त्री तत्तत्कृतमेव पुरस्ताद्वैवैनाऽउपदध्याद्यत्रैवैव शिरस्तदेव कूनू तज्जिह्वा-

यैताः पुण्या लक्ष्मीर्मुखतो धत्ते तस्माद्यस्य मुखे लक्ष्म भवति तं पुण्यलक्ष्मीक इत्याचक्षते ॥११॥ सैषा ब्रह्मचितिः । यद्ब्रह्मोपादधत तस्माद्ब्रह्मचितिः सा प्रजापतिचितिर्यत्प्रजापतिमुपादधत तस्मात्प्रजापतिचितिः सऽर्षिचितिर्यदृषीनुपादधत तस्मादृषिचितिः सा वायुचितिर्यद्वायुमुपादधत तस्माद्वायुचितिः सा स्तोमचितिर्यत्स्तोमानुपादधत तस्मात्स्तोमचितिः सा प्राणचितिर्यत्प्राणानुपादधत तस्मात्प्राणचितिरुतो यतमदेव कतमच्च विद्यात्तेन ह्येवास्यैषार्षेयवती बन्धुमती चितिर्भवत्यथ लोकम्पृणेऽउपदधात्यस्याꣳ स्रक्त्यां तयोरुपरि बन्धुः पुरीषं निवपति तस्योपरि बन्धुः ॥१२॥ ब्राह्मणम् ॥१ [४. ४.] । चतुर्थीऽध्यायः [५२.] ॥ ॥

पञ्चमीं चितिमुपदधाति । एतद्वै देवाश्चतुर्थीं चितिं चित्वा समारोहन्यद्ऊर्ध्वमन्तरिक्षादर्वाचीनं दिवस्तदेव तत्संस्कृत्य समारोहन् ॥१॥ तेऽब्रुवन् । चेतयधमिति चितिमिहतेति वाव तदब्रुवन्नित ऊर्ध्वमिहतेति ते चेतयमाना दिवमेव विराजं पञ्चमीं चितिमपश्यंस्तेभ्य एष लोकोऽह्रन्दयत् ॥२॥ तेऽकामयन्त । असपत्नमिमं लोकमनुपबाधं कुर्वीमहीति तेऽब्रुवन्नुप तज्जानीत यथेमं लोकमसपत्नमनुपबाधं करवामहाऽइति तेऽब्रुवंश्चेतयधमिति चितिमिहतेति वाव तदब्रुवंस्तदिहत यथेमं लोकमसपत्नमनुपबाधं करवामहाऽइति ॥३॥ ते चेतयमानाः । एता इष्टका अपश्यन्नसपत्नास्ता उपादधत ताभिरेतं लोकमसपत्नमनुपबाधमकुर्वत तद्यदेताभिरिमं लोकमसपत्नमनुपबाधमकुर्वत तस्मादेता असपत्नास्तथैवैतद्यजमानो यदेता उपदधात्येतमेवैतल्लोकमसपत्नमनुपबाधं कुरुते सर्वत उपदधाति सर्वत एवैतदेतं लोकमसपत्नमनुपबाधं कुरुते परार्धऽउपदधाति सर्वमेवैतदेतं लोकमसपत्नमनुपबाधं कुरुते ॥४॥ अथ विराज उपदधाति । एषा वै सा विराड्यां तद्देवा विराजं पञ्चमीं चितिमपश्यंस्ता दश-दशोपदधाति दशाक्षरा विराड्विराडेषा चितिः सर्वत उपदधाति यो वाऽएकस्यां दिशि विराजति न वै स विराजति यो वाव

सर्वासु दिक्षु विराजति स एव विराजति ॥५॥ यद्वैवैता असपत्ना उपदधाति । एतद्वै प्रजापतिमेतस्मिन्नात्मनः प्रतिरिक्ते सर्वतः पाप्मोपायतत स एता इष्टका अपश्यदसपत्नास्ता उपाधत्त ताभिस्तं पाप्मानमपाकृत पाप्मा वै सपत्नस्तद्यदेताभिः पाप्मानꣳ सपत्नमपाकृत तस्मादेता असपत्नाः ॥६॥ तद्वाऽएतत्क्रियते । यदेवा अकुर्वन्निदं न्विमꣳ स पाप्मा नोपयतते यत्त्वेतत्करोति यदेवा अकुर्वंस्तत्करवाणीत्यथो य एव पाप्मा यः सपत्नस्तमेताभिरुपकृते तद्यदेताभिः पाप्मानꣳ सपत्नमपकृते तस्मादेता असपत्नाः सर्वत उपदधाति सर्वत एवैतत्पाप्मानꣳ सपत्नमपकृते परार्धऽउपदधाति सर्वस्मादेवैतदात्मनः पाप्मानꣳ सपत्नमपकृते ॥७॥ स पुरस्तादुपदधाति । अग्ने ज्ञातान्प्रणुदा नः सपत्नानिति यथैव यजुस्तथा बन्धुरथ पश्चात्सकृसा ज्ञातान्प्रणुदा नः सपत्नानिति यथैव यजुस्तथा बन्धुः ॥८॥ सा या पुरस्ताद्ग्निः सा । या पश्चाद्ग्निः साग्निनैव तत्पुरस्तात्पाप्मानमपाकृताग्निना पश्चात्तथैवैतद्यजमानोऽग्निनैव पुरस्तात्पाप्मानमपकृतेऽग्निना पश्चात् ॥९॥ अथ दक्षिणतः । षोडशी स्तोम ओजो द्रविणमित्येकादशाक्षरा वै त्रिष्टुप्त्रैष्टुभमत्तरिक्षं चतस्रो दिश एष एव वज्रः पञ्चदशस्तस्यासावेवादित्यः षोडशी वज्रस्य भर्ता स एतेन पञ्चदशेन वज्रेणैतया त्रिष्टुभा दक्षिणतः पाप्मानमपाकृत तथैवैतद्यजमान एतेन पञ्चदशेन वज्रेणैतया त्रिष्टुभा दक्षिणतः पाप्मानमपकृते ॥१०॥ अथोत्तरतः । चतुश्चत्वारिꣳश स्तोमो वर्चो द्रविणमिति चतुश्चत्वारिꣳशदक्षरा वै त्रिष्टुप्त्रैष्टुभो वज्रः स एतेन चतुश्चत्वारिꣳशेन वज्रेणैतया त्रिष्टुभोत्तरतः पाप्मानमपाकृत तथैवैतद्यजमान एतेन चतुश्चत्वारिꣳशेन वज्रेणैतया त्रिष्टुभोत्तरतः पाप्मानमपकृते ॥११॥ अथ मध्ये । अग्नेः पुरीषमसीति ब्रह्म वै चतुर्थी चितिरग्निः ब्रह्म वै ब्रह्म तस्या एतत्पुरीषमिव यत्पञ्चम्यप्सो नामेति तस्योक्तो बन्धुः ॥१२॥ तां प्राचीं तिरश्चीमुपदधाति । एतद्वैतया प्रजापतिः पाप्मनो मूलमवृश्चत्तथैवैनयायमेतत्पाप्मनो

मूलं वृश्चति दक्षिणतो दक्षिणतऽश्यामो हि वज्रोऽन्तरेण दक्षिणां दिश्यामुश्यामाय ह तमवकाशं करोति ॥ १३ ॥ सा या पुरस्तात्प्राणः सा । या पश्चादपानः सा प्राणेनैव तत्पुरस्तात्पाप्मानमपाकृतापानेन पश्चात्तथैवैतच्छ्यन्नमानः प्राणेनैव पुरस्तात्पाप्मानमपकृतेऽपानेन पश्चात् ॥ १४ ॥ अथ येऽभितः । तौ बाहू स यो ऽस्याभितः पाप्मासीद्बाहुभ्यां तमपाकृत तथैवैतच्छ्यन्नमानो योऽस्याभितः पाप्मा भवति बाहुभ्यामेव तमपकृते ॥ १५ ॥ अन्नं पुरीषवती । स योऽस्योपरिष्टात्पाप्मासीदन्नेन तमपाकृत तथैवैतच्छ्यन्नमानो योऽस्योपरिष्टात्पाप्मा भवत्यन्नेनैव तमपकृते ॥ १६ ॥ स यद्ध वाऽएवंवित्प्राणिति । योऽस्य पुरस्तात्पाप्मा भवति तं तेनापकृतेऽथ यदपानिति तेन तं यः पश्चादथ यद्बाहुभ्यां कर्म कुरुते तेन तं यो ऽभितोऽथ यदन्नमत्ति तेन तं य उपरिष्टात्सर्वदा ह वाऽएवंवित्पाप्मानमपकृते ऽपि स्वपंस्तस्मादेवं विदुषः पापं न कीर्तयेन्नेदस्य पाप्मासानीति ॥ १७ ॥ ब्राह्मणम् ॥ २ [५. १.] ॥ ॥

अथ छन्दस्या उपदधाति । एतद्वै प्रजापतिः पाप्मनो मृत्योर्मुक्तान्नमैक्षत्तस्माद्व ऐतदुपतापी वसीयान्भूत्वान्नमिक्षति तस्मिन्नाशꣳसन्तेऽन्नमिक्षति जीविष्यतीति तस्मै देवा एतदन्नं प्रायच्छन्नेताश्छन्दस्याः पशवो वै छन्दाꣳस्यन्नं पशवस्तान्यस्मा ऽअछदयंस्तानि यदस्माऽअछदयंस्तस्माच्छन्दाꣳसि ॥ १ ॥ ता दश-दशोपदधाति । दशाक्षरा विराड्विराडु कृत्स्नमन्नꣳ सर्वमेवास्मिन्नेतत्कृत्स्नमन्नं दधाति सर्वत उपदधाति सर्वत एवास्मिन्नेतत्कृत्स्नमन्नं दधाति ॥ २ ॥ एवश्छन्द इति । अयं वै लोक एवश्छन्दो वरिवश्छन्द इत्यन्तरिक्षं वै वरिवश्छन्दः शम्भूश्छन्द इति द्यौर्वै शम्भूश्छन्दः परिभूश्छन्द इति दिशो वै परिभूश्छन्द आछच्छन्द इत्यन्नं वाऽआछच्छन्दो मनश्छन्द इति प्रजापतिर्वै मनश्छन्दो व्यचश्छन्द इत्यसौ वाऽआदित्यो व्यचश्छन्दः ॥ ३ ॥ सिन्धुश्छन्द इति । प्राणो वै सिन्धुश्छन्दः समुद्रश्छन्द इति मनो

वै समुद्रश्छन्दः सरिरं छन्द इति वाग्वै सरिरं छन्दः ककुप्छन्द इति प्राणो वै ककुप्छन्दस्त्रिककुप्छन्द इत्युदानो वै त्रिककुप्छन्दः काव्यं छन्द इति त्रयी वै विद्या काव्यं छन्दोऽङ्कुपं छन्द इत्यापो वाऽअङ्कुपं छन्दोऽक्षरपङ्क्तिश्छन्द इत्यसौ वै लोकोऽक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्द इत्ययं वै लोकः पदपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्द इति दिशो वै विष्टारपङ्क्तिश्छन्दः क्षुरो भ्रज्ञश्छन्द इत्यसौ वाऽआदित्यः क्षुरो भ्रज्ञश्छन्द आहच्छन्दः प्रहच्छन्द इत्यन्नं वाऽआहच्छन्दोऽन्नं प्रहच्छन्दः ॥४॥ संयच्छन्द इति । रात्रिर्वै संयच्छन्दो वियच्छन्द इत्यह्वर्वै वियच्छन्दो बृहच्छन्द इत्यसौ वै लोको बृहच्छन्दो रथन्तरं छन्द इत्ययं वै लोको रथन्तरं छन्दो निकायश्छन्द इति वायुर्वै निकायश्छन्दो विवधश्छन्द इत्यन्तरिक्षं वै विवधश्छन्दो गिरश्छन्द इत्यन्नं वै गिरश्छन्दो भ्रज्ञश्छन्द इत्यग्निर्वै भ्रज्ञश्छन्दः सप्तस्तुप्छन्दोऽनुष्टुप्छन्द इति वागेव सप्तस्तुप्छन्दो वागनुष्टुप्छन्द एवश्छन्दो वरिवश्छन्द इति तस्योक्तो बन्धुः ॥५॥ वयश्छन्द इति । अन्नं वै वयश्छन्दो वयस्कृच्छन्द इत्यग्निर्वै वयस्कृच्छन्दो विष्पर्धाश्छन्द इत्यसौ वै लोको विष्पर्धाश्छन्दो विशालं छन्द इत्ययं वै लोको विशालं छन्दश्छदिश्छन्द इत्यन्तरिक्षं वै छदिश्छन्दो दूरोहणं छन्द इत्यसौ वाऽआदित्यो दूरोहणं छन्दस्तन्द्रं छन्द इति पङ्क्तिर्वै तन्द्रं छन्दोऽङ्काङ्कं छन्द इत्यापो वाऽअङ्काङ्कं छन्दः ॥६॥ तयाः पुरस्ताडुपदधाति । प्राणास्तासां प्रथमा व्यानो द्वितीयोदानस्तृतीयोदानश्चतुर्थी व्यानः पञ्चमी प्राणः षष्ठी प्राणः सप्तमी व्यानोऽष्टम्युदानो नवमी यजमान एवात्र दशमी स एष यजमान एतस्यां विराज्यध्यूढः प्रतिष्ठितः प्राणमष्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादिमे प्राणा अर्वाञ्चश्च पराञ्चश्च ॥७॥ अथ या दक्षिणातो । ऽग्निस्तासां प्रथमा वायुर्द्वितीयादित्यस्तृतीयादित्यश्चतुर्थी वायुः पञ्चम्यग्निः षष्ठ्यग्निः सप्तमी वायुरष्टम्यादित्यो नवमी यजमान एवात्र दशमी स एष यजमान एतस्यां विराज्यध्यूढः प्रतिष्ठितो देवता-

मय्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादेते देवा अर्वाञ्चश्च पराञ्चश्च ॥८॥ अथ याः पश्चात् । अयं लोकस्तासां प्रथमान्तरिक्षं द्वितीया द्यौस्तृतीया द्यौश्चतुर्थ्यन्तरिक्षं पञ्चम्ययं लोकः षष्ठ्ययं लोकः सप्तम्यन्तरिक्षमष्टमी द्यौर्नवमी यजमान एवात्र दशमी स एष यजमान एतस्यां विराज्यध्यूढः प्रतिष्ठितो लोकमय्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादिमे लोका अर्वाञ्चश्च पराञ्चश्च ॥९॥ अथ या उत्तरतः । ग्रीष्मस्तासां प्रथमा वर्षा द्वितीया हेमन्तस्तृतीया हेमन्तश्चतुर्थी वर्षाः पञ्चमी ग्रीष्मः षष्ठी ग्रीष्मः सप्तमी वर्षा अष्टमी हेमन्तो नवमी यजमान एवात्र दशमी स एष यजमान एतस्यां विराज्यध्यूढः प्रतिष्ठित ऋतुमय्यामर्वाचीश्च पराचीश्चोपदधाति तस्मादेतऽऋतवोऽर्वाञ्चश्च पराञ्चश्च ॥१०॥ अथ पुनरेव । याः पुरस्तादुपदधाति प्राणास्ते ता दश भवन्ति दश वै प्राणाः पूर्वार्धऽउपदधाति पुरस्ताद्वीमे प्राणाः ॥११॥ अथ या दक्षिणतः । एतास्ता देवता अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चान्नं चापश्च ॥१२॥ अथ याः पश्चात् । दिशस्ताश्चतस्रो दिशश्चतस्रोऽवान्तरदिश ऊर्ध्या चेयं च ॥१३॥ अथ या उत्तरतः । मासास्ते वासन्तिकौ द्वौ ग्रैष्मौ द्वौ वार्षिकौ द्वौ शारदौ द्वौ हैमन्तिकौ द्वौ ॥१४॥ अथ पुनरेव । या प्रथमा दशदयꣳ स लोको या द्वितीयान्तरिक्षं तया तृतीया द्यौः सेममेव लोकं प्रथमया दशतारोहन्नन्तरिक्षं द्वितीयया दिवं तृतीयया तथैवैतद्यजमान इममेव लोकं प्रथमया दशता रोहत्यन्तरिक्षं द्वितीयया दिवं तृतीयया ॥१५॥ स स पराङिव रोहः । इयमु वै प्रतिष्ठा ते देवा इमां प्रतिष्ठामभिप्रत्यायंस्तथैवैतद्यजमान इमां प्रतिष्ठामभिप्रत्येत्यथ योत्तमा दशदयꣳ स लोकस्तस्माद्यथैव प्रथमायै दशतः प्रभृतिरेवमुत्तमायै समानꣳ स्यैतद्यदेते दशतावयमेव लोकः ॥१६॥ ता वाऽएताः । चत्वारिꣳशदिष्टकाश्चत्वारिꣳशद्यजूꣳषि तदशीतिरन्नमशीतिस्तद्यद्येतदाह तदस्माऽअन्नमशीतिं कृत्वा प्रयच्छति

तेनैनं प्रीणाति ॥१७॥ ब्राह्मणम् ॥ ३ [५. २.] ॥ ॥

अथ स्तोमभागा उपदधाति । एतद्वै प्रजापतेरेतद्वन्नमिन्द्रोऽभ्यध्यायत्सोऽस्मादुदचिक्रमिषत्तमब्रवीत्कथोत्क्रामसि कथा मा जहासीति स वै मेऽस्यान्नस्य रसं प्रयच्छेति तेन वै मा सह प्रपद्यस्वेति तथेति तस्माऽएतस्यान्नस्य रसं प्रायच्छत्तेनैनꣳ सह प्रापद्यत ॥१॥ स यः स प्रजापतिः । अयमेव स योऽयमग्निश्चीयतेऽथ यत्तद्वन्नमेतास्ताश्छन्दस्या अथ यः सोऽन्नस्य रस एतास्ता स्तोमभागा अथ यः स इन्द्रोऽसौ स आदित्यः स एष एव स्तोमो यद्वि किं च स्तुवतऽएतमेव तेन स्तुवन्ति तस्माऽएतस्मै स्तोमायैतं भागं प्रायच्छत्यदेतस्मै स्तोमायैतं भागं प्रायच्छत्तस्मात्स्तोमभागाः ॥२॥ रश्मिना सत्याय सत्यं जिन्वेति । एष वै रश्मिरन्नꣳ रश्मिरेतं च तद्रसं च संधायात्मन्प्रपादयते प्रेतिना धर्मणा धर्मं जिन्वेत्येष वै प्रेतिरन्नं प्रेतिरेतं च तद्रसं च संधायात्मन्प्रपादयतेऽन्वित्या दिवा दिवं जिन्वेत्येष वाऽअन्वितिरन्नमन्वितिरेतं च तद्रसं च संधायात्मन्प्रपादयते तद्यदेतदाह तच्च तद्रसं च संधायात्मन्प्रपादयतेऽमुनादो जिन्वादोऽस्यमुष्मै वाधिपतिनोर्ज्जार्ज्जं जिन्वेति त्रेधाविहितास्त्रेधाविहितꣳ ह्यन्नम् ॥३॥ यद्वेव स्तोमभागा उपदधाति । एतद्वै देवा विराजं चितिं चित्वा समारोहꣳस्तेऽब्रुवंश्चेतयध्वमिति चितिमिहतेति वाव तदब्रुवंस्ते चेतयमाना नाकमेव स्वर्गं लोकमपश्यंस्तमुपादधत स यः स नाकः स्वर्गो लोक एतास्ता स्तोमभागास्तद्यदेता उपदधाति नाकमेवैतत्स्वर्गं लोकमुपधत्ते ॥४॥ तद्यास्तिस्रः प्रथमाः । अयꣳ स लोको या द्वितीया अन्तरिक्षं तद्यास्तृतीया द्यौः सा याश्चतुर्थ्यः प्राची सा दिग्याः पञ्चम्यो दक्षिणा सा याः षष्ठ्यः प्रतीची सा याः सप्तम्य उदीची सा ॥५॥ ता वाऽएताः । एकविꣳशतिरिष्टका इमे च लोका दिशश्चेमे च वै लोका दिशश्च प्रतिष्ठेमे च लोका दिशश्चैकविꣳशस्तस्मादाहुः प्रतिष्ठैकविꣳश इति ॥६॥ अथ या अष्टाविष्टका अतियन्ति । सा-

ष्टाक्षरा गायत्री ब्रह्म गायत्री तच्चतुर्ब्रह्मैतत्तच्चदेतन्मण्डलं तपति तदेतस्मिन्नेक-विꣳशे प्रतिष्ठायां प्रतिष्ठितं तपति तस्मान्नावपद्यते ॥७॥ तद्वै के । वेषश्रीः क्षत्राय क्षत्रं जिन्वेति त्रिꣳशत्तमीमुपदधति त्रिꣳशदक्षरा विराड्विराडेषा चितिरिति न तथा कुर्यादिति ते रेचयन्त्येकविꣳशसम्पदमथो गायत्रीसम्पदमथोऽइन्द्रलोको वै षैषान्यूना विराडिन्द्राय क्रꣳ तऽइन्द्रलोके द्विषन्तं भ्रातृव्यं प्रत्युद्यामिनं कुर्वन्तीन्द्रमिन्द्रलोकान्नुदन्ते यज्ञमानो वै स्वे यज्ञऽइन्द्रो यज्ञमानाय क्रꣳ ते यज्ञमानलोके द्विषन्तं भ्रातृव्यं प्रत्युद्यामिनं कुर्वन्ति यज्ञमानं यज्ञमानलोकान्नुदन्ते यं वाऽएतमग्निमाक्रम्येष एव यज्ञमान आयतनेनैष ऽएवात्र त्रिꣳशत्तमी ॥८॥ ब्राह्मणम् ॥४ [५. ३.] ॥ ॥

ता अषाढायै वेलयोपदधाति । वाग्वाऽअषाढा रसः एष वाचि तद्रसं दधाति तस्मात्सर्वेषामङ्गानां वाचैवान्नस्य रसं विजानाति ॥१॥ यद्वैवाषाढायै । इयं वाऽअषाढासावादित्य स्तोमभागा अमुं तदादित्यमस्यां प्रतिष्ठायां प्रतिष्ठापयति ॥२॥ यद्वैवाषाढायै । इयं वाऽअषाढा हृदयꣳ स्तोमभागा अस्यां तद्धृदयं मनो दधाति तस्मादस्याꣳ हृदयेन मनसा चेतयते सर्वत उपदधाति सर्वतस्तद्धृदयं मनो दधाति तस्मादस्याꣳ सर्वतो हृदयेन मनसा चेतयतेऽथो पुण्या वैता लक्ष्म्यस्ता एतत्सर्वतो धत्ते तस्माद्यस्य सर्वतो लक्ष्म भवति तं पुण्यलक्ष्मीक इत्याचक्षते ॥३॥ अथैनाः पुरीषेण प्रह्लादयति । अन्नं वै पुरीषꣳ रसः एष तमेतत्तिरः करोति तस्मात्तिर-श्चान्नस्य रसः ॥४॥ यद्वैव पुरीषेण । अन्नं वै पुरीषꣳ रसः एषोऽन्नं च तद्रसं च संतनोति संदधाति ॥५॥ यद्वैव पुरीषेण । हृदयं वै स्तोमभागाः पुरीतत्पुरीषꣳ हृदयं तत्पुरीतता प्रह्लादयति ॥६॥ यद्वैव पुरीषेण । संवत्सरः एषोऽग्निस्तमेतच्चितिपुरीषैर्व्यावर्तयति तद्याश्चतस्रः प्रथमाश्चितयस्ते चत्वार ऋतवोऽथ स्तोमभागा उपधाय पुरीषं निवपति सा पञ्चमी चितिः स पञ्चम ऋतुः ॥७॥

तदाहुः । यल्लोकम्पृणाल्ला अन्याश्चितयो भवन्ति नात्र लोकम्पृणामुपदधाति कात्र लोकम्पृणेत्यसौ वाऽआदित्यो लोकम्पृणैष ऽएषा चितिः सैषा स्वयं लोकम्पृणा चितिरथ यदत ऊर्ध्वमा पुरीषात्सा षष्ठी चितिः स षष्ठ ऋतुः ॥८॥ अथ पुरीषं निवपति । तत्र विकर्णीं च स्वयमातृण्णां चोपदधाति क्षिरण्यशकलैः प्रोक्षत्यग्निमभ्यादधाति सा सप्तमी चितिः स सप्तम ऋतुः ॥९॥ ता उ वै षडेव । यद्धि विकर्णी च स्वयमातृण्णा च षष्ठ्या एव तच्चितेः ॥१०॥ ता उ वै पञ्चैव । यदुषान्यासु पुरीषं निवपति तूष्णीमत्र तेनैषा न चितिरथो लोकम्पृणाल्ला अन्याश्चितयो भवन्ति नात्र लोकम्पृणामुपदधाति तेनोऽएवैषा न चितिः ॥११॥ ता उ वै तिस्र एव । अयमेव लोकः प्रथमा चितिर्द्यौरुत्तमाथ या एतास्तिस्रस्तदुत्तरिक्षं तद्वाऽइदमेकमिवैवान्तरिक्षं ता एवं तिस्र एवं पञ्चैवꣳ षडेवꣳ सप्त ॥१२॥ ब्राह्मणम् ॥५ [५. ४.] ॥ ॥ पञ्चमोऽध्यायः [५३.] ॥ ॥

नाकसद् उपदधाति । देवा वै नाकसदोऽत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र नाकः स्वर्गो लोकस्तस्मिन्देवा असीदंस्तद्यदेतस्मिन्नाके स्वर्गे लोके देवा असीदंस्तस्मादेवा नाकसदस्तथैवैतद्यजमानो यदेता उपदधात्येतस्मिन्नेवैतन्नाके स्वर्गे लोके सीदति ॥१॥ यद्वव नाकसद् उपदधाति । एतद्वै देवा एतं नाकꣳ स्वर्गं लोकमपश्यन्नेता स्तोमभागास्तेऽब्रुवन्नुप तज्ञानीत यथास्मिन्नाके स्वर्गे लोके सीदामेति तेऽब्रुवंश्चितयधमिति चितिमिङ्कतेति वाव तदब्रुवंस्तदिङ्कत यथास्मिन्नाके स्वर्गे लोके सीदामेति ॥२॥ ते चेतयमानाः । एता इष्टका अपश्यन्नाकसदस्ता उपादधत ताभिरेतस्मिन्नाके स्वर्गे लोकेऽसीदंस्तद्यदेताभिरेतस्मिन्नाके स्वर्गे लोकेऽसीदंस्तस्मादेता नाकसदस्तथैवैतद्यजमानो यदेता उपदधात्येतस्मिन्नेवैतन्नाके स्वर्गे लोके सीदति ॥३॥ दिक्षूपदधाति । दिशो वै स नाकः स्वर्गो लोकः स्वर्गऽएवैना एतल्लोके सादयत्यृतव्यानां वेलया संवत्सरो वाऽऋतव्याः संवत्स-

रः स्वर्गो लोकः स्वर्गऽएवैना एतल्लोके सादयत्यत्तस्तोमभागमेष वै स नाकः स्वर्गो लोकस्तस्मिन्नेवैना एतत्प्रतिष्ठापयति ॥४॥ स पुरस्तादुपदधाति । राज्ञ्यसि प्राची दिगिति राज्ञी ह नामैषा प्राची दिग्वसवस्ते देवा अधिपतय इति वसवो हैतस्यै दिशो देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्तेत्यग्निर्हैवात्र हेतीनां प्रतिधर्ता त्रिवृत्त्वा स्तोमः पृथिव्याꣳ श्रयत्विति त्रिवृता हैषा स्तोमेन पृथिव्याꣳ श्रिताऽयमुक्थमव्यथायै स्तभ्नात्वित्याऽयेन हैषोक्थेनाव्यथायै पृथिव्याꣳ स्तब्धा रथन्तरꣳ साम प्रतिष्ठित्याऽअन्तरिक्षऽइति रथन्तरेण हैषा साम्ना प्रतिष्ठितान्तरिक्षऽऋषयस्त्वा प्रथमजा देवेष्विति प्राणा वाऽऋषयः प्रथमजास्तद्धि ब्रह्म प्रथमजं दिवो मात्रया वरिम्णा प्रथन्त्विति यावती द्यौस्तावतीं वरिम्णा प्रथन्त्वित्येतद्धिर्धर्ता चायमधिपतिश्चेति वाक्च तौ मनश्च तौ हीदꣳ सर्वं विधारयतस्ते वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्त्विति यथैव यजुस्तथा बन्धुः ॥५॥ अथ दक्षिणतः । विराडसि दक्षिणा दिगिति विराड् नामैषा दक्षिणा दिग्युद्गास्ते देवा अधिपतय इति रुद्रा हैतस्यै दिशो देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्तेतीन्द्रो हैवात्र हेतीनां प्रतिधर्ता पञ्चदशस्त्वा स्तोमः पृथिव्याꣳ श्रयत्विति पञ्चदशेन हैषा स्तोमेन पृथिव्याꣳ श्रिता प्रउगमुक्थमव्यथायै स्तभ्नात्विति प्रउगेण हैषोक्थेनाव्यथायै पृथिव्याꣳ स्तब्धा बृहत्साम प्रतिष्ठित्याऽअन्तरिक्षऽइति बृहता हैषा साम्ना प्रतिष्ठितान्तरिक्षऽऋषयस्त्वा प्रथमजा देवेष्विति तस्योक्तो बन्धुः ॥६॥ अथ पश्चात् । सम्राडसि प्रतीची दिगिति सम्राड् नामैषा प्रतीची दिगादित्यास्ते देवा अधिपतय इत्यादित्या हैतस्यै दिशो देवा अधिपतयो वरुणो हेतीनां प्रतिधर्तेति वरुणो हैवात्र हेतीनां प्रतिधर्ता सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रयत्विति सप्तदशेन हैषा स्तोमेन पृथिव्याꣳ श्रिता मरुत्वतीयमुक्थमव्यथायै स्तभ्नात्विति मरुत्वतीयेन हैषोक्थेनाव्यथायै पृथिव्याꣳ स्तब्धा वैरूपꣳ साम प्रति-

ष्टित्याऽअन्तरिक्षऽइति वैरूपेण हैषा साम्ना प्रतिष्ठितान्तरिक्षऽऋषयस्त्वा प्रथमजा देवेषितेति तस्योक्तो बन्धुः ॥७॥ अथोत्तरतः स्वराडस्युदीची दिगिति स्वराड् नामैषोदीची दिक्श्रुतस्ते देवा अधिपतय इति मरुतो हैतस्यै दिशो देवा अधिपतयः सोमो हेतीनां प्रतिधर्तेति सोमो हैवात्र हेतीनां प्रतिधर्तैकविꣳशस्त्वा स्तोमः पृथिव्याꣳ श्रयत्वित्येकविꣳशेन हैषा स्तोमेन पृथिव्याꣳ श्रिता निष्केवल्यमुक्थमव्यथायै स्तभ्नात्विति निष्केवल्येन हैषोक्थेनाव्यथायै पृथिव्याꣳ स्तब्धा वैराजꣳ साम प्रतिष्ठित्याऽअन्तरिक्षऽइति वैराजेन हैषा साम्ना प्रतिष्ठितान्तरिक्षऽऋषयस्त्वा प्रथमजा देवेषितेति तस्योक्तो बन्धुः ॥८॥ अथ मध्ये । अधिपत्न्यसि बृहती दिगित्यधिपत्नी ह नामैषा बृहती दिग्विश्वे त्वा देवा अधिपतय इति विश्वे हैतस्यै दिशो देवा अधिपतयो बृहस्पतिर्हेतीना प्रतिधर्तेति बृहस्पतिर्हैवात्र हेतीनां प्रतिधर्ता त्रिणवत्रयस्त्रिꣳशौ त्वा स्तोमौ पृथिव्याꣳ श्रयतामिति त्रिणवत्रयस्त्रिꣳशाभ्याꣳ हैषा स्तोमाभ्यां पृथिव्याꣳ श्रिता वैश्वदेवाग्निमारुतेऽउक्थेऽअव्यथायै स्तभ्नीतामिति वैश्वदेवाग्निमारुताभ्याꣳ हैषोक्थाभ्यामव्यथायै पृथिव्याꣳ स्तब्धा शाक्कररैवते सामनी प्रतिष्ठित्याऽअन्तरिक्षऽइति शाक्कररैवताभ्याꣳ हैषा सामभ्यां प्रतिष्ठितान्तरिक्षऽऋषयस्त्वा प्रथमजा देवेषितेति तस्योक्तो बन्धुः ॥९॥ एतावान्वै सर्वो यज्ञः । यज्ञ उ देवानामात्मा यज्ञमेव तद्देवा आत्मानं कृत्वैतस्मिन्नाके स्वर्गे लोकेऽसीदंस्तथैवैतद्यजमानो यज्ञमेवात्मानं कृत्वैतस्मिन्नाके स्वर्गे लोके सीदति ॥१०॥ अथ पञ्चचूडा उपदधाति । यज्ञो वै नाकसद्यो यज्ञ उऽएव पञ्चचूडास्तद्यऽइमे चत्वार ऋत्विजो वृक्षपतिपञ्चमास्ते नाकसदो क्षोत्राः पञ्चचूडा अतिरिक्तं वै तद्यद्क्षोत्रा यदु वाऽअतिरिक्तं चूडः स तद्यत्पञ्चातिरिक्ता तस्मात्पञ्चचूडाः ॥११॥ यद्वेव नाकसत्पञ्चचूडा उपदधाति । आत्मा वै नाकसद्यो मिथुनं पञ्चचूडा अर्धमु हैतदात्मनो यन्मिथुनं यदा वै सह मिथुनेनाथ सर्वोऽथ कृत्स्नः

कृत्स्नतायै ॥ १२ ॥ यद्वेव नाकसत्पञ्चचूडा उपदधाति । आत्मा वै नाकसदः प्रज्ञा पञ्चचूडा अतिरिक्तं वै तदात्मनो यत्प्रज्ञा यदु वाऽअतिरिक्तं चूडः स तद्यत्पञ्चातिरिक्तास्तस्मात्पञ्चचूडाः ॥ १३ ॥ यद्वेव नाकसत्पञ्चचूडा उपदधाति । दिशो वै नाकसदो दिश उऽएव पञ्चचूडास्ताभ्या अमुष्मादादित्यादर्वाच्यः पञ्च दिशस्ता नाकसदो याः पराच्यस्ताः पञ्चचूडा अतिरिक्ता वै ता दिशो या अमुष्मादादित्यात्पराच्यो यदु वाऽअतिरिक्तं चूडः स तद्यत्पञ्चातिरिक्तास्तस्मात्पञ्चचूडाः ॥ १४ ॥ यद्वेव पञ्चचूडा उपदधाति । एतद्वै देवा अबिभयुर्यद्वै न इमांल्लोकानुपरिष्टाद्वज्राᳬसि नाष्ट्रा न हन्युरिति तऽएतानेषां लोकानामुपरिष्टाद्गोप्तॄनकुर्वत यऽएते केतयश्च प्रकेतयश्च तथैवैतद्यजमान एतानेषां लोकानामुपरिष्टाद्गोप्तॄन्कुरुते यऽएते केतयश्च प्रकेतयश्च ॥ १५ ॥ स पुरस्तादुपदधाति । अयं पुरो हरिकेश इत्यग्निर्वै पुरस्तद्यत्तमाह पुर इति प्राᳬष्क्यग्निमुद्धरन्ति प्राᳬसमुपचरन्त्यथ यद्धरिकेश इत्याह हरिरिव ह्यग्निः सूर्यरश्मिरिति सूर्यस्येव ह्यग्ने रश्मयस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्याविति वासन्तिकौ तावृतू पुञ्जिकस्थला च क्रतुस्थला चाप्सरसाविति दिक्चोपदिशा चेति ह स्माह माहित्थिः सेना च तु ते समितिश्च दङ्क्षणवः पशवो हेतिः पौरुषेयो वधः प्रहेतिरिति यद्वै सेनायां च समितौ चऽर्तीयन्ते ते दङ्क्षणवः पशवो हेतिः पौरुषेयो वधः प्रहेतिरिति यदन्योऽन्यं घ्नन्ति स पौरुषेयो वधः प्रहेतिस्तेभ्यो नमोऽस्त्विति तेभ्य एव नमस्करोति ते नो मृडयन्त्विति तऽएवास्मै मृडयन्ति ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्म इति यमेव द्वेष्टि यश्चैनं द्वेष्टि तमेषां जम्भे दधात्यमुमेषां जम्भे दधामीति ह ब्रूयाद्यं द्विष्यात्ततोऽह नास्मिन्न पुनरस्त्यपि तन्नाद्रियेत स्वयंनिर्दिष्टो ह्येव स यमेवंविद्वेष्टि ॥ १६ ॥ अथ दक्षिणतः । अयं दक्षिणा विश्वकर्मेत्ययं वै वायुर्विश्वकर्मा योऽयं पवतऽएष ह्येदᳬ सर्वं करोति तद्यत्तमाह दक्षिणेति तस्मादेष दक्षिणैव भूयिष्ठं

वाति तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्याविति ग्रैष्मौ तावृतू मेनका च सहजन्या चाप्सरसाविति दिक्चोपदिशा चेति ह स्माह माहित्थिरिमे तु ते द्यावापृथिवी यातुधाना हेती रक्षाꣳसि प्रहेतिरिति यातुधाना हैवात्र हेती रक्षाꣳसि प्रहेतिस्तेभ्यो नमोऽअस्त्विति तस्योक्तो बन्धुः ॥१७॥ अथ पश्चात्। अयं पश्चाद्विश्वव्यचा इत्यसौ वाऽआदित्यो विश्वव्यचा यदा ह्येवैष उदेत्यथेदꣳ सर्वं व्यचो भवति तद्यत्तमाह पश्चादिति तस्मादेतं प्रत्यञ्चमेव यन्तं पश्यन्ति तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्याविति वार्षिकौ तावृतू प्रह्लोचन्ती चानुह्लोचन्ती चाप्सरसाविति दिक्चोपदिशा चेति ह स्माह माहित्थिरहोरात्रे तु ते ते हि प्र च ह्लोचतोऽनु च ह्लोचतो व्याघ्रा हेतिः सर्पाः प्रहेतिरिति व्याघ्रा हैवात्र हेतिः सर्पाः प्रहेतिस्तेभ्यो नमोऽअस्त्विति तस्योक्तो बन्धुः ॥१८॥ अथोत्तरतः। अयमुत्तरात्संयद्वसुरिति यज्ञो वाऽउत्तरात्तद्यत्तमाहोत्तरादित्युत्तरतऽउपचारो हि यज्ञोऽथ यत्संयद्वसुरित्याह यज्ञꣳ हि संयन्तीतीदं वस्विति तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्याविति शारदौ तावृतू विश्वाची च घृताची चाप्सरसाविति दिक्चोपदिशा चेति ह स्माह माहित्थिर्वेदिश्च तु ते स्रुक्च वेदिरेव विश्वाची स्रुग्घृताच्यापो हेतिर्वातः प्रहेतिरित्यापो हैवात्र हेतिर्वातः प्रहेतिरतो ह्येवोग्रो वात्यतः शीतस्तेभ्यो नमोऽअस्त्विति तस्योक्तो बन्धुः ॥१९॥ अथ मध्ये। अयमुपर्यर्वाग्वसुरिति पर्जन्यो वाऽउपरि तद्यत्तमाहोपरीत्युपरि हि पर्जन्योऽथ यदर्वाग्वसुरित्याहातो ह्यर्वाग्वसु वृष्टिरन्नं प्रजाभ्यः प्रदीयते तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्याविति हैमन्तिकौ तावृतूऽउर्वशी च पूर्वचित्तिश्चाप्सरसाविति दिक्चोपदिशा चेति ह स्माह माहित्थिराकूतिश्च तु ते दक्षिणा चावस्फूर्जन्हेतिर्विद्युत्प्रहेतिरित्यवस्फूर्जन्हैवात्र हेतिर्विद्युत्प्रहेतिस्तेभ्यो नमोऽअस्त्विति तस्योक्तो बन्धुः ॥२०॥ एते वै ते हेतयश्च प्रहेतयश्च। यांस्तद्देवा एषां लोकानामुप-

रिष्टाद्गोप्तॄनकुर्वताथ यास्ताः प्रजा एते ते सेनानीग्रामण्योऽथ यत्तन्मिथुनमेतास्ता अप्सरसः सर्वऽएव तद्देवाः कृत्स्ना भूत्वा सकृ प्रजया सकृ मिथुनेनैतस्मिन्नाके स्वर्गे लोकेऽसीदंस्तथैवैतद्यजमानः सर्व एव कृत्स्नो भूत्वा सकृ प्रजया सकृ मिथुनेनैतस्मिन्नाके स्वर्गे लोके सीदति ॥२१॥ ॥शतम्४६००॥॥ ता वाऽएताः । दशेष्टका उपदधाति दशाक्षरा विराड्विराडेषा चितिस्ता उ वै पञ्चैव द्वे-द्वे क्युपदधाति ता कैता अग्नेराशिषस्ता उत्तमायां चिताऽउपदधात्यन्त एषोऽग्नेर्यदुत्तमा चितिरन्ततस्तदग्नेराशिषो निराह पञ्च भवन्ति पञ्च हि यज्ञऽआशिषोऽथैनेऽअन्तरा पुरीषं निवपत्यग्नी कैतौ यदेतेऽइष्टके नेदिमावग्नी सꣳशोचात इत्यथोऽअन्नं वै पुरीषमन्नेनैवाभ्यामितत्संज्ञां करोति ॥२२॥ अथातोऽन्वावृतम् । पुरस्तादुपधाय दक्षिणतः पश्चादुत्तरतो मध्यऽउपदधात्यथोत्तराः पुरस्तादेवाग्रयऽउपधाय दक्षिणत उत्तरतो मध्ये पश्चादुपदधात्यवस्तात्प्रपदनो ह स्वर्गो लोक एतद्वै देवा इमांल्लोकान्त्सर्वतः समपिधायावस्तात्स्वर्गं लोकं प्रापयꣳस तथैवैतद्यजमान इमांल्लोकान्त्सर्वतः समपिधायावस्तात्स्वर्गं लोकं प्रपद्यते ॥२३॥ ब्राह्मणम् ॥ ६ [६. १.] ॥॥

इन्द्रस्या उपदधाति । अत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र श्रियमैच्छन्नो कैषोऽतः पुरा तस्माऽअलमास यच्छ्रियमधारयिष्यत्तस्मादिदमप्येतर्ह्याकुर्न वाऽएषोऽलꣳश्रियै धारणाय राज्याय वा ग्रामणीथ्याय वेति तस्मै देवा एताꣳ श्रियं प्रायच्छन्नेताश्चन्द्रस्याः पशवो वै इन्द्राऽअन्नं पशवोऽन्नमु श्रीः ॥१॥ त्रिचान्युपदधाति । त्रिवृद्वै पशुः पिता माता पुत्रोऽथो गर्भ उल्बं जराय्वथो त्रिवृद्धाऽअन्नं कृषिर्वृष्टिर्वीर्न्नमेकैवातिछन्दा भवत्येका ह्येव सा सर्वाणि छन्दाꣳस्यति सा या सा श्रीर्मरुत्तडुक्थं तद्यत्तन्मरुडुक्थमेतास्ताश्चन्द्रस्याः ॥२॥ तस्य शिरो गायत्र्यः । आत्मा त्रिष्टुभोऽनूकं जगत्यः पक्षौ पङ्क्तयोऽथैतासां ककुभां चत्वारि-चत्वार्यक्षराण्या-

दायातिछन्दस्युपदधाति सा सातिछन्दा एव भवति गायत्र्य इतराः सम्पद्यन्ते सैव गायत्र्यशीतिर्या बृहत्यः सा बार्हती या उष्णिहः सौष्णिक्यथ यद्वशो यदर्धर्चो यदैन्द्राग्नं यदावपनं तदतिछन्दा अथ यन्नदो यत्सूददोहा यत्पदनुषङ्गा यत्किंचात्रानुष्टुप्कर्मणिं तदनुष्टुभः ॥३॥ प्रतिष्ठा द्विपदाः । एतावद्वै मरुद्भ्यं मरुद्भ्यꣳ श्रीः सर्वामिवास्माऽएतां देवाः श्रियं प्रायङ्स्तथैवास्माऽअयमेताꣳ सर्वाꣳ श्रियं प्रयच्छति ॥४॥ यद्वेव छन्दस्या उपदधाति । एतद्वै देवा एतं नाकꣳ स्वर्गं लोकमपश्यन्नेता स्तोमभागास्तस्मिन्नविशंस्तेषां विशतां प्रजापतिरुत्तमोऽविशत्स यः स प्रजापतिरेतास्ताश्छन्दस्याः ॥५॥ तस्य शिरो गायत्र्यः । ता यद्गायत्र्यो भवन्ति गायत्रꣳ हि शिरस्तिस्रो भवन्ति त्रिवृद्धि शिरः पूर्वार्धऽउपदधाति पुरस्ताद्धीदꣳ शिरः ॥६॥ उरस्त्रिष्टुभः । ता रेतःसिचोर्वलयोपदधाति पृष्टयो वै रेतःसिचाऽउरो वै प्रति पृष्टयः ॥७॥ श्रोणी जगत्यः । स यावति पुरस्तात्स्वयमातृण्णायै त्रिष्टुभ उपदधाति तावति पश्चाज्जगतीर्यो वाऽअयं मध्ये प्राणास्तदेषा स्वयमातृण्णा यावत्यु वाऽएतस्मात्प्राणात्पुरस्ताद्उरस्तावति पश्चाच्छ्रोणी ॥८॥ सक्थ्यावनुष्टुभः । ता अनन्तर्हिता जगतीभ्य उपदधात्यनन्तर्हिते तच्छ्रोणिभ्यꣳ सक्थ्यौ दधाति ॥९॥ पर्शवो बृहत्यः । कीकसाः ककुभः सोऽन्तरेण त्रिष्टुभश्च ककुभश्च बृहतीरुपदधाति तस्मादिमा उभयत्र पर्शवो बद्धाः कीकसासु च जत्रुषु च ॥१०॥ ग्रीवा उष्णिहः । ता अनन्तर्हिता गायत्रीभ्य उपदधात्यनन्तर्हितास्तद्ग्रीवा ग्रीवा दधाति ॥११॥ पक्षौ पङ्क्तयः । ता यत्पङ्क्तयो भवन्ति पाङ्क्तौ हि पक्षौ पार्श्वत उपदधाति पार्श्वतो हीमौ पक्षौ यद्वर्षीयश्छन्दस्तद्दक्षिणात उपदधाति दक्षिणं तदर्धं पशोर्वीर्यवत्तरं करोति तस्माद्दक्षिणोऽर्धः पशोर्वीर्यवत्तरः ॥१२॥ उदरमतिछन्दाः । पशवो वै छन्दाꣳस्यन्नं पशव उदरं वाऽअन्नमत्त्युदरꣳ हि वाऽअन्नमत्ति तस्माद्यदोदरमन्नं प्राप्नोत्यथ तज्जग्धं यातयामरूपं भवति तद्यदेषा पशूꣳश्छन्दाꣳस्यत्ति तस्मादत्तिछन्दा

अतिहन्दा ह वै तामतिहन्दा इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवाः ॥ १३ ॥ योनिः पुरीषवती । ते सꣳस्पृष्टेऽउपदधाति सꣳस्पृष्टे क्षुद्रं च योनिश्च पुरीषसꣳहिते भवतो माꣳसं वै पुरीषं माꣳसेन वाऽउद्रं च योनिश्च सꣳहिते पूर्वातिहन्दा भवत्यपरा पुरीषवत्युत्तरꣳ क्षुद्रमधरा योनिः ॥ १४ ॥ ते प्राच्याऽउपदधाति । प्राङ् क्षेषोऽग्निश्चीयतेऽथो प्राग्वै प्राच उद्रं प्राची योनिर्बर्हिस्तोमभागꣳ हृदयं वै स्तोमभागा हृदयमु वाऽउत्तममथोद्रमथ योनिः ॥ १५ ॥ ते दक्षिणातः स्वयमातृण्णायाऽउपदधाति । अथ प्रथमायां चिताऽउत्तरतः स्वयमातृण्णाया ऽउद्रं च योनिं चोपदधाति यो वाऽअयं मध्ये प्राणास्तदेषा स्वयमातृण्णैतस्य तत्प्राणस्योभयत उद्रं च योनिं च दधाति तस्मादेतस्य प्राणस्योभयत उद्रं च योनिश्च ॥ १६ ॥ प्रतिष्ठा द्विपदाः । ता यद्द्विपदा भवन्ति द्वन्द्वꣳ हि प्रतिष्ठा तिस्रो भवन्ति त्रिवृद्धि प्रतिष्ठा पश्चादुपदधाति पश्चाद्धीयं प्रतिष्ठा ॥ १७ ॥ सोऽस्यैष सुकृत आत्मा । तस्यास्य हैतमेवꣳ सुकृतमात्मानं कुर्वन्त्येतꣳ ह स सुकृतमात्मानमभिसम्भवत्यथ यस्य हैतमतोऽन्यथा कुर्वन्ति दुष्कृतꣳ ह तस्यात्मानं कुर्वन्ति स ह स दुष्कृतमेवात्मानमभिसम्भवति ॥ १८ ॥ तदेते सामनिधनेऽभ्युक्ते । अर्को देवानां परमे व्योमन्नर्कस्य देवाः परमे व्योमन्नित्येतद्वै देवानां विशतां प्रजापतिरुत्तमोऽविशत्तस्मादाहार्को देवानां परमे व्योमन्नित्यथ यदाहार्कस्य देवाः परमे व्योमन्नित्ययं वाऽअग्निरर्कस्तस्यैतदुत्तमायां चितौ सर्वे देवा विष्टास्तस्मादाहार्कस्य देवाः परमे व्योमन्निति ॥ १९ ॥ ब्राह्मणम् ॥ ७ [६. २.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या १०८ ॥ ॥

गार्हपत्यमुपदधाति । एतद्वै देवाः प्राप्य राद्धिवामन्यन्त तेऽब्रुवन्केनेदमरात्स्मेति गार्हपत्येनैवेत्यब्रुवन्गार्हपत्यं वै चित्वा समारुह्य प्रथमां चितिमपश्याम प्रथमायै द्वितीयां द्वितीयायै तृतीयां तृतीयायै चतुर्थीं चतुर्थ्यै पञ्चमीं पञ्चम्या इदमिति

॥ १ ॥ तऽब्रुवन् । उप तज्जानीत यथेयमस्मास्वेव राद्धिरसदिति तेऽब्रुवंश्चेतयध्वमिति चितिमिक्षतेति वाव तदब्रुवंस्तदिक्षत यथेयमस्मास्वेव राद्धिरसदिति ॥ २ ॥ ते चेतयमानाः । एतदपश्यन्निकेममाकृत्योपदधामक्षाऽइति तमिकाकृत्योपादधत तस्मिन्व्यवदन्त वसवः पुरस्ताद्रुद्रा दक्षिणत आदित्याः पश्चान्मरुत उत्तरतो विश्वे देवा उपरिष्टादिकोपदधामेकोपदधामेति ॥ ३ ॥ तेऽब्रुवन् । मध्यऽएवोपदधामकै स नो मध्यऽउपक्षितः सर्वेषां भविष्यतीति तं मध्यऽउपादधत तदेताꣳ राद्धिमात्मन्नदधत मध्यतो मध्यत एवैतदेताꣳ राद्धिमात्मन्नदधत तथैवैतद्यजमानो यद्गार्हपत्यमुपदधात्येतामेवैतद्राद्धिमात्मन्धत्ते मध्यतो मध्यत एवैतदेताꣳ राद्धिमात्मन्धत्ते ॥ ४ ॥ यद्वेव गार्हपत्यमुपदधाति । अन्नं वै गार्हपत्योऽन्नायमग्निश्चितोऽन्नऽएवैतदन्नमपिदधाति मध्यतो मध्यत एवास्मिन्नेतदन्नं दधाति ॥ ५ ॥ यद्वेव गार्हपत्यमुपदधाति । वेदिर्वै देवलोकोऽथ वाऽएष बहिर्वेदि चितो भवति तं यदिकाकृत्योपदधाति तदेनं वेदौ देवलोके प्रतिष्ठापयति ॥ ६ ॥ यद्वेव गार्हपत्यमुपदधाति । योनिर्वै पुष्करपर्णमथ वाऽएष बहिर्योनि चितो भवति बहिर्धा वाऽएतस्योनेरग्निकर्म यत्पुरा पुष्करपर्णात्तं यदिकाकृत्योपदधाति तदेनं योनौ पुष्करपर्णे प्रतिष्ठापयति तथो खेषोऽबहिर्धा भवत्यष्टाविष्टका उपदधाति तस्योक्तो बन्धुस्तं वाऽएतैरेव यजुर्भिरेतयावृता चिनोति यो खेवासौ स एवायं तनेवैतदाकृत्येकोपदधाति ॥ ७ ॥ अथ पुनश्चितिमुपदधाति । एतद्वै देवा गार्हपत्यं चित्वा तस्मिन्राद्धिं नापश्यन्योनिर्वै गार्हपत्या चितिरेषो वै योनेः राद्धिर्यद्रेतः प्रजातिस्तस्यामेतस्यां योनौ रेतः प्रजातिं नापश्यन् ॥ ८ ॥ तेऽब्रुवन् । उप तज्जानीत यथास्यां योनौ रेतः प्रजातिं दधामेति तेऽब्रुवंश्चेतयध्वमिति चितिमिक्षतेति वाव तदब्रुवंस्तदिक्षत यथास्यां योनौ रेतः प्रजातिं दधामेति ॥ ९ ॥ ते चेतयमानाः । एतां पुनश्चितिमपश्यंस्तामुपादधत तदेतस्यां योनौ रेतः प्रजातिमदधुर्मध्यतो मध्यत एवै-

तदेतस्यां योनौ रेतः प्रजातिमदधुस्तथैवैतद्यजमानो यत्पुनश्चितिमुपदधात्येतस्यामेवैतद्योनौ रेतः प्रजातिं दधाति मध्यतो मध्यत एवैतदेतस्यां योनौ रेतः प्रजातिं दधाति ॥१०॥ ताꣳ केके जघनार्धऽउपदधति । जघनार्धाद्धि रेतः सिच्यते पुरुषसंधौ पुरुषाद्धि रेतः सिच्यतऽइति न तथा कुर्याद्बहिर्धा ह्य ते योने रेतः प्रजातिं दधति ये तथा कुर्वन्ति मध्यऽएवोपदध्यात्तत्सम्प्रति योनौ रेतः प्रजातिं दधाति ॥११॥ अष्टाविष्टका उपदधाति । अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चति पञ्च कृत्वः सादयति पञ्चचितिको ऽग्निः पञ्चर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रेतो भूतꣳ सिञ्चत्यष्टाविष्टकाः पञ्च कृत्वः सादयति तत्त्रयोदश त्रयोदश मासाः संवत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥१२॥ यद्वेव पुनश्चितिमुपदधाति । एतद्वाऽएतद्यथायथं करोति यदाहवनीयाद्गार्हपत्यमुत्तरं चिनोति तद्यत्पुनश्चितिमुपदधाति य एवायमग्निश्चितस्तमेवैतदाहृत्यास्योपरिष्टात्पुनश्चिनोति तद्यच्चितꣳ सन्तं पुनश्चिनोति तस्मात्पुनश्चितिः ॥१३॥ तद्केके । जघनार्धे गार्हपत्यमुपदधति पूर्वार्धे पुनश्चितिमाहवनीयश्च वाऽएतौ गार्हपत्यश्चैवं वाऽएतावग्नीऽइति न तथा कुर्यादयं वै लोको गार्हपत्यो द्यौराहवनीय उत्तरो वाऽअसावस्यै तस्मादिमामुत्तरामेवोपदध्यात् ॥१४॥ यद्वेव गार्हपत्यं च पुनश्चितिं चोपदधाति । वेदिश्च ह्येतेऽग्नेरुत्तरवेदिश्चाथ येऽमू पूर्वे निवपत्यधरस्य तेऽथ ह्येतेऽग्नेस्तद्यदेतेऽउपधायाग्निं निदधाति वेदौ चैवैनमेतदुत्तरवेदौ च प्रतिष्ठापयति ॥१५॥ यद्वेव पुनश्चितिमुपदधाति । पुनर्यज्ञो ह्येष उत्तरा ह्येषा देवयज्या पुनर्यज्ञमेवैतदुपधत्तऽउत्तरामेव देवयज्यामुप ह्येनं पुनर्यज्ञो नमति ॥१६॥ यद्वेव पुनश्चितिमुपदधाति । यं वै तं प्राणा ऋषयोऽग्नेऽग्निꣳ समस्कुर्वन्त्स एष तमेवैतत्पुनश्चिनोति तद्यच्चितꣳ सन्तं पुनश्चिनोति तस्माद्वेव पुनश्चितिः ॥१७॥

येनऽऋषयस्तपसा सत्त्रमायन्निति । अमूनेतदृषीनाहेन्धाना अग्निꣳ स्वराभरत्त इतीन्धाना अग्निꣳ स्वर्गं लोकमाहरत्त इत्येतत्तस्मिन्नकं निदधे नाकेऽग्निमिति स्वर्गो वै लोको नाको यमाङ्कर्मनव स्तीर्णबर्हिषमिति ये विद्वाꣳसस्ते मनव स्तीर्णबर्हिषमिति सर्वदा हैव स स्तीर्णबर्हिः ॥१८॥ तं पत्नीभिरनुगच्छेम देवाः । पुत्रैर्भ्रातृभिरुत वा हिरण्यैरित्येतेनैनꣳ सर्वेणानुगच्छेमेत्येतन्नाकं गृभ्णानाः सुकृतस्य लोकऽइति स्वर्गो वै लोको नाकः स्वर्गं लोकं गृह्णानाः सुकृतस्य लोकऽइत्येतत्तृतीये पृष्ठेऽधि रोचने दिव इत्येतद्ध तृतीयं पृष्ठं रोचनं दिवो यत्रैष एतत्तपति ॥१९॥ आ वाचो मध्यमरुहद्धरण्युरिति । एतद्ध वाचो मध्यं यत्रैष एतच्चीयते भुरण्युरिनि भर्तेत्येतद्यमग्निः सत्पतिश्चेकितान इत्ययमग्निः सतां पतिश्चेतयमान इत्येतत्पृष्ठे पृथिव्या निहितो दविद्युतदिति पृष्ठे पृथिव्या निहितो दीप्यमान इत्येतदधस्पदं कृणुतां ये पृतन्यव इत्यधस्पदं कुरुताꣳ सर्वान्पाप्मन इत्येतत् ॥२०॥ अयमग्निर्वीरितमो वयोधा इति । अयमग्निर्वीर्यवत्तमो वयोधा इत्येतत्सहस्रियो द्योततामप्रयुछन्निति सहस्रियो दीप्यतामप्रमत्त इत्येतद्विभ्राजमानः सरिरस्य मध्यऽइतीमे वै लोकाः सरिरं दीप्यमान एषु लोकेष्वित्येतदुप प्रयाहि दिव्यानि धामेत्युप प्रयाहि स्वर्गं लोकमित्येतत् ॥२१॥ सम्प्रच्यवधमुप सम्प्रयातेति । अमूनेतदृषीनाह समेनं प्रच्यवधमुप चैनꣳ सम्प्रयातेत्यग्ने पथो देवयानान्कृणुधमिति यथैव यज्ञुस्तथा बन्धुः पुनः कृण्वाना पितरा युवानेति वाक्च वै मनश्च पितरा युवाना वाक्च मनश्चैतावग्नीऽअन्वाताꣳसीन्नयि तन्तुमेतमिति योऽसावृषिभिस्तन्तुस्ततस्तमेतदाह ॥२२॥ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिति । इमामेत्तदग्निमाहोच्चैनं बुध्यस्व प्रति चैनं जागृहीतीष्टापूर्ते सꣳसृजेथामयं चेति यथैव यज्ञुस्तथा बन्धुरस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्निति द्यौर्वाऽउत्तरꣳ सधस्थं विश्वे देवा यजमानश्च सीदतेति तद्विश्वैर्देवैः सह यजमानꣳ सादयति ॥२३॥ येन व-

क्षसि सकृत्स्वम् । येनाग्ने सर्ववेदसमित्येतद्वास्य प्रतिज्ञाततमं धाम येन सकृत्स्वं वक्षति येन सर्ववेदसं तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवऽइति तेन न इमं यज्ञं नय स्वर्गं लोकं देवेषु गन्तवऽइत्येतदयं ते योनिर्ऋत्विय इति तस्योक्तो बन्धुरष्टाविष्टका उपदधाति तस्योऽएवोक्तः ॥२४॥ ब्राह्मणम् ॥ १ [६. ३.] ॥ षष्ठोऽध्यायः [५४.] ॥ ॥

ऋतव्या उपदधाति । ऋतव एते यदृतव्या ऋतूनेवैतदुपदधाति तदेतत्सर्वं यदृतव्याः संवत्सरो वाऽऋतव्याः संवत्सर इदꣳ सर्वमिदमेवैतत्सर्वमुपदधात्यथो प्रजननमेतत्संवत्सरो वाऽऋतव्याः संवत्सरः प्रजननं प्रजननमेवैतदुपदधाति ॥१॥ यद्वेवऽर्तव्या उपदधाति । क्षत्र वाऽऋतव्या विश इमा इतरा इष्टकाः क्षत्रं तद्विश्यत्तारं दधाति ताः सर्वासु चितिषूपदधाति सर्वस्यां तद्विशि क्षत्रमत्तारं दधाति ॥२॥ यद्वेवऽर्तव्या उपदधाति । संवत्सर एषोऽग्निः स ऋतव्याभिः सꣳहितः संवत्सरमेवैतदृतुभिः संतनोति संदधाति ता वै नानाप्रभृतयः समानोदर्का ऋतवो वाऽअसृज्यन्त ते सृष्टा नानैवासन् ॥३॥ तेऽब्रुवन् । न वाऽइत्थꣳ सन्तः शक्ष्यामः प्रजनयितुꣳ रूपैः समायामेति तऽएकैकमृतुꣳ रूपैः समायंस्तस्मादेकैकस्मिन्नृतौ सर्वेषामृतूनाꣳ रूपं ता यन्नानाप्रभृतयो नाना क्यसृज्यन्ताथ यत्समानोदर्का रूपैर्हि समायन् ॥४॥ स उपदधाति । तपश्च तपस्यश्च शैशिरावृतूऽइति नामनीऽएनयोरेते नामभ्यामेवैनेऽएतदुपदधात्यसौ वाऽआदित्यस्तपस्तस्मादेतावृतूऽअनन्तर्हितौ तद्यदेतस्मादेतावृतूऽअनन्तर्हितौ तस्मादेतौ तपश्च तपस्यश्च ॥५॥ अग्नेरन्तःश्लेषोऽसीति । संवत्सर एषोऽग्निः स ऋतव्याभिः सꣳहितः संवत्सरमेवैतदृतुभिः संतनोति संदधाति कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधय इतीदमेवैतत्सर्वमृतुभिः कल्पयति कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रता इत्यग्नयो ह्येते पृथग्यदेता इष्टकास्ते यथानयोर्ऋत्वोर्ज्यैष्ठ्याय कल्पेरन्नेवमेतदाह येऽअग्नयः समन-

सोऽन्तरा द्यावापृथिवीऽइमेऽइति यथैव यजुस्तथा बन्धुः शैशिरावृतूऽअभिकल्प-माना इन्द्रमिव देवा अभिसंविशन्त्विति यथेन्द्रं देवा अभिसंविष्टा एवमिमावृतू ज्येष्ठायाभिसंविशन्त्वित्येतद्वैऽइष्टके भवतो द्वौ हि मासावृतुः सकृत्साद्यत्येकं तदृतुं करोति ॥ ६ ॥ तद्यदेतेऽअत्रोपदधाति । संवत्सर एषोऽग्निरिमऽउ लोकाः संवत्सरस्तस्य द्यौरेव पञ्चमी चितिर्द्यौरस्य शिशिर ऋतुस्तद्यदेतेऽअत्रोपदधाति यदेवास्यैतेऽआत्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥ ७ ॥ यद्वै-वैतेऽअत्रोपदधाति । प्रजापतिरेषोऽग्निः संवत्सर उ प्रजापतिस्तस्य शिर एव प-ञ्चमी चितिः शिरोऽस्य शिशिर ऋतुस्तद्यदेतेऽअत्रोपदधाति यदेवास्यैतेऽआत्म-नस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतेऽअत्रोपदधाति ॥ ८ ॥ स पुरस्तात्स्वयमातृण्णा-यै च विश्वज्योतिषश्चर्तव्येऽउपदधाति । द्यौर्वाऽउत्तमा स्वयमातृण्णादित्य उत्त-मा विश्वज्योतिरर्वाचीनं तद्दिवश्चादित्याच्चर्तून्दधाति तस्मादर्वाचीनमेवात ऋत-वोऽथो प्रजननमेतदर्वाचीनं तद्दिवश्चादित्याच्च प्रजननं दधाति तस्मादर्वाचीनमे-वातः प्रजायते स्थितꣳ हैवातः पराक्प्रजननं यावन्तो ह्येव सनाग्ने देवास्तावन्तो देवाः ॥ ९ ॥ अथ प्रथमायै स्वयमातृण्णायै प्रथमायै च विश्वज्योतिष उपरिष्टादृतव्ये ऽउपदधाति । इयं वै प्रथमा स्वयमातृण्णाग्निः प्रथमा विश्वज्योतिस्तद्यूर्ध्वानृतून्दधा-ति तस्मादित ऊर्ध्वा ऋतवोऽथो प्रजननमेतदितस्तद्यूर्ध्वं प्रजननं दधाति तस्मादित ऊर्ध्वमेव प्रजायते ॥ १० ॥ ता न व्यूहेत् । नेदृतून्व्यूहानीति यो वै म्रियतऽऋ-तवो ह तस्मै व्युह्यन्ते तस्माद्यत्रैव प्रथमेऽउपदधाति तत्सर्वा उपदध्यात् ॥ ११ ॥ अथोऽइमे वै लोका ऋतव्याः । इमांस्तल्लोकानूर्ध्वाश्चितिभिश्चिनोत्यथो क्षत्रं वा ऋतव्याः क्षत्रं तद्यूर्ध्वं चितिभिश्चिनोत्यथो संवत्सरो वाऽऋतव्याः संवत्सरं तद्यूर्ध्वं चितिभिश्चिनोति ता नान्यया यजुष्मत्येष्टकयोपरिष्टादभ्युपदध्यान्नेत्क्षत्रं विशाभ्यु-पदधानीति ॥ १२ ॥ ता हैता एव संयान्यः । एतद्वै देवा ऋतव्याभिरिमांलो-

कात्समयुरितश्चोर्ध्वानमुतश्चार्वाचस्तथैवैतद्यज्ञमान ऋतव्याभिरेवेमांल्लोकात्संयातीतश्चोर्ध्वानमुतश्चार्वाचः ॥१३॥ तदु ह चरकाधर्यवः । अन्या एव संयानीरित्युपदधति न तथा कुर्यादत्यह्नैव रेचयत्येता उ एव संयान्यः ॥१४॥ अथ विश्वज्योतिषमुपदधाति । आदित्यो वाऽउत्तमा विश्वज्योतिरादित्यो ह्येवामुष्मिंल्लोके विश्वज्योतिरादित्यमेवैतदुपदधाति ॥१५॥ यद्वै विश्वज्योतिषमुपदधाति । प्रज्ञा वै विश्वज्योतिः प्रज्ञा ह्येव विश्वं ज्योतिः प्रज्ञाननमेवैतदुपदधाति ॥१६॥ स पुरस्तात्स्वयमातृण्णायै विश्वज्योतिषमुपदधाति । द्यौर्वाऽउत्तमा स्वयमातृण्णादित्य उत्तमा विश्वज्योतिरर्वाचीनं तद्दिव आदित्यं दधाति तस्मादेषोऽर्वाचीनमेवातस्तपत्यथो प्रज्ञाननमेतदर्वाचीनं तद्दिवः प्रज्ञाननं दधाति तस्मादर्वाचीनमेवातः प्रज्ञायते ॥१७॥ अथ प्रथमायै स्वयमातृण्णायै । उपरिष्टाद्विश्वज्योतिषमुपदधातीयं वै प्रथमा स्वयमातृण्णाग्निः प्रथमा विश्वज्योतिरितस्तद्दूर्ध्वमग्निं दधाति तस्मादित ऊर्ध्वोऽग्निर्दीप्यतेऽथो प्रज्ञाननमेतदितस्तद्दूर्ध्वं प्रज्ञाननं दधाति तस्मादित ऊर्ध्वमेव प्रज्ञायते ॥१८॥ अथ मध्यमायै स्वयमातृण्णायै । उपरिष्टाद्विश्वज्योतिषमुपदधात्यन्तरिक्षं वै मध्यमा स्वयमातृण्णा वायुर्मध्यमा विश्वज्योतिरन्तरिक्षे तद्वायुं दधाति तस्मादयमन्तरिक्षे वायुः ॥१९॥ तान्येतानि ज्योतींषि । तद्यदेता एवमुपदधात्येतान्येवैतज्ज्योतींषि सम्यञ्चि दधाति तस्मादित ऊर्ध्वोऽग्निर्दीप्यतेऽर्वाङसावादित्यस्तपत्यन्तरिक्षेऽयं तिर्यङ् वायुः पवते ॥२०॥ परमेष्ठी वा सादयतीति । परमेष्ठी ह्येतां पञ्चमीं चितिमपश्यद्दिवस्पृष्ठे ज्योतिष्मतीमिति दिवो ह्यसौ पृष्ठे ज्योतिष्मानादित्यः ॥२१॥ विश्वस्मै प्राणायापानाय । व्यानायेति प्राणो वै विश्वज्योतिः सर्वस्माऽउ वाऽएतस्मै प्राणो विश्वं ज्योतिर्यच्छति सर्वं ज्योतिर्यच्छत्येतत्सूर्यस्तेऽधिपतिरिति सूर्यमेवास्या अधिपतिं करोति सादयित्वा सूददोहसाधिवदति तस्योक्तो बन्धुः ॥२२॥ ता वै ता एव संयान्यः । एतद्वै देवा विश्वज्योतिर्भिरिषे-

मांलोकात्समयुरितश्चोर्धानमुतश्चार्वाचस्तथैवैतद्यजमानो विश्वज्योतिर्भिरेवमां-
लोकात्संयातीतश्चोर्धानमुतश्चार्वाचः ॥२३॥ तद्वै ह चरकाध्वर्यवो । ऽन्या एव
संयानीरित्युपदधति न तथा कुर्यादत्यह्नैव रेचयत्येता ऽएव संयान्यः ॥२४॥
ब्राह्मणम् ॥२ [७. १.] ॥ ॥

अथ लोकम्पृणामुपदधाति । असौ वाऽआदित्यो लोकम्पृणैष ह्येमांल्लोकान्पू-
रयत्यमुमेवैतदादित्यमुपदधाति ताꣳ सर्वासु चितिषूपदधात्येमे वै लोका एताश्चि-
तयोऽमुं तदादित्यमेषु लोकेषु दधाति तस्मादेष सर्वेभ्य एवैभ्यो लोकेभ्यस्तपति
॥१॥ यद्वेव लोकम्पृणामुपदधाति । क्षत्रं वै लोकम्पृणा विश इमा इतरा इष्ट-
काः क्षत्रं तद्विश्यत्तारं दधाति ताꣳ सर्वासु चितिषूपदधाति सर्वस्यां तद्विशि क्ष-
त्रमत्तारं दधाति ॥२॥ सैषैकैव भवति । एकस्थं तत्क्षत्रमेकस्थाꣳ श्रियं करोत्यथ
या द्वितीया मिथुनं तदर्धमु ह्येतदात्मनो यन्मिथुनं यदा वै सह मिथुनेनाथ सर्वो
ऽथ कृत्स्नः कृत्स्नतायाऽएकेन यजुषा बह्वीरिष्टका ऽउपदधाति क्षत्रं तद्वीर्येणात्मा-
दधाति क्षत्रं विशो वीर्यवत्तरं करोत्यथेतराः पृथङ्नाना यजुर्भिरुपदधाति विशं
तत्क्षत्राद्वीर्यतरां करोति पृथग्वादिनीं नानाचितसम् ॥३॥ स वाऽअस्याꣳ स्व-
क्त्यां प्रथमेऽउपदधाति । अमुं तदादित्यमेतस्यां दिशि दधात्यथेतस्तस्मादतोऽनुपर्यै-
त्यथेतस्तस्मादतोऽनुपर्यैत्यथेतस्तस्मादतोऽनुपर्यैत्यथातस्तस्मादतोऽनुपर्यैति ॥४॥
स यत्रैव प्रथमेऽउपदधाति । तदुत्तमे ऽनूपदध्यात्सकृद्ध्येवासावादित्य इमांलो-
कान्पर्येत्य नातिप्रच्यवेतातिकृत्य पूर्वेऽउत्तमेऽअनूपदधात्यमुं तदादित्यमिमांलो-
कानतिप्रच्यावयति तस्मादसावादित्य इमांलोकानसꣳस्थितो दक्षिणावृत्पुनः-पु-
नरनुपर्यैति ॥५॥ लोकं पृण छिद्रं पृणेति । लोकं च पूरय छिद्रं च पूरयेत्येत-
द्यो सीद ध्रुवा त्वमित्यथो सीद स्थिरा त्वं प्रतिष्ठितेत्येतदिन्द्राग्नी त्वा बृहस्पति-
रस्मिन्योनावसीषदन्नितीन्द्राग्नी च त्वा बृहस्पतिश्चास्मिन्योनौ प्रत्यतिष्ठिपन्नित्ये-

तदनुष्टुभा वाग्वाऽअनुष्टुब्वागिन्द्र इन्द्रो लोकम्पृणा न सादयत्यसन्नो क्षेष सू-
ददोहसाि वदति प्राणो वै सूददोहाः प्राणेनैवैनमेतत्संतनोति संदधाति ॥ ६॥
तदाहुः । कथमेषा लोकम्पृणायातयाम्नी भवतीत्यसौ वाऽआदित्यो लोकम्पृणा-
यातयामा वाऽएषोऽथो वाग्वै लोकम्पृणायातयाम्नु वै वाक् ॥ ७॥ स वै यजु-
ष्मतीरुपधाय । लोकम्पृणाया प्रछादयत्यन्नं वै यजुष्मत्य इष्टका आत्मा लोकम्पृ-
णान्नं तदात्मना परिदधाति तस्मादन्नमात्मना परिक्षितमात्मैव भवति ॥ ८॥ स
वाऽआत्मन्नेव । यजुष्मतीरुपदधाति न पक्षपुछेष्वात्मंस्तदन्नं दधाति यदु वाऽआ-
त्मन्नन्नं धीयते तदात्मानमवति तत्पक्षपुछान्यथ यत्पक्षपुछेषु नैव तदात्मानमव-
ति न पक्षपुछानि ॥ ९॥ उभयीर्यजुष्मतीश्च लोकम्पृणाश्चात्मन्नुपदधाति । तस्माद-
यमात्मा द्विगुणो बकुलतर-इव लोकम्पृणा एव पक्षपुछेषु तस्मात्पक्षपुछानि
तनीयाꣳसीवानूचीश्च तिरश्चीश्चात्मन्नुपदधात्यस्थीनि वाऽइष्टकास्तस्मादिमान्यन्व-
ञ्चि च तिर्यञ्चि चात्मन्नस्थीनि पराचीरेव पक्षपुछेषु न हि किं चन पक्षपुछेषु
तिर्यगस्थ्यस्ति तद्वैतदेव चितस्य चाचितस्य च विज्ञानमेवमेव चित इतरथाचितः
॥ १०॥ स वै स्वयमातृण्णां लोकम्पृणाया प्रछादयति । प्राणो वै स्वयमातृण्णादि-
त्यो लोकम्पृणा प्राणं तदादित्येन समिन्द्धे तस्मादयमुष्णः प्राणास्तया सर्वमात्मानं
प्रछादयति सर्वं तदात्मानमादित्येन समिन्द्धे तस्मादयꣳ सर्व एवात्मोष्णस्तद्वैतदेव
जीविष्यतश्च मरिष्यतश्च विज्ञानमुष्ण एव जीविष्यञ्छीतो मरिष्यन् ॥ ११॥ स य-
स्याꣳ स्वक्यां प्रथमेऽउपदधाति । ततो दशभिर्दशभिः संछादयन्नेत्या स्वयमातृण्णायै
स तेनैव दक्षिणावृञ्जघनेन स्वयमातृण्णाꣳ संछादयन्नेत्यानूक्यायाऽअथ पुनरेत्य
तमवधिꣳ संछादयति ॥ १२॥ आत्मानमग्रे संछादयति । आत्मा क्वेवाग्रे सम्भवतः
सम्भवत्यथ दक्षिणं पक्षमथ पुछमथोत्तरं तद्दक्षिणावृत्तद्धि देवत्राथोऽएवं वाऽअ-
सावादित्य इमांल्लोकान्दक्षिणावृदनुपर्येति ॥ १३॥ स एष प्राण एव यल्लोकम्पृ-

णा । तया सर्वमात्मानं प्रच्छादयति सर्वस्मिंस्तदात्मन्प्राणं दधाति तद्यद्वास्यैषाङ्गं नाभिप्राप्नुयात्प्राणो ह्यस्य तदङ्गं नाभिप्राप्नुयाद्यद्वु वै प्राणोऽङ्गं नाभिप्राप्नोति शुष्यति वा वै तन्म्लायति वा तस्मादेनꣳ सर्वमेवैतया प्रच्छादयेत् ॥ १४ ॥ स वा ऽआत्मन एवाधि पक्षपुच्छानि चिनोति । आत्मनो ह्येवाध्यङ्गानि प्रोक्त्यथ यत्पुरस्तादर्वाचीरुपदध्याद्यथान्यत आकृत्याङ्गं प्रतिदध्यात्तादृक्तत् ॥ १५ ॥ न भिन्नां न कृष्णामुपदध्यात् । आर्ष्टिर्वाऽएषा या भिद्यतऽआर्त्मैवैतद्रूपं यत्कृष्णं नेदार्तमात्मानमभिसंस्करवाऽइति नाभिन्नां परास्येन्नेदनार्तमात्मनो बहिर्धा करवाणीति धिष्ण्येभ्यः प्रतिसंख्याय या विराजमतिरिच्येरन्नोत्तरामुद्वेयुस्तद्वै खलु ता आर्ष्टिं ता भित्त्वोत्करऽउत्किरेदुत्करो वाऽअतिरिक्तस्य प्रतिष्ठा तद्यत्रातिरिक्तस्य प्रतिष्ठा तदेवैना एतत्प्रतिष्ठापयति ॥ १६ ॥ अथात इष्टकामात्राणामेव । पादमात्रीः प्रथमायां चोत्तमायां च चित्यो रुपदध्यात्प्रतिष्ठा वै पादो यो वै पादः स ह्यस्त ऊर्वस्थमात्र्यो वर्षिष्ठाः स्युर्न ह्यूर्वस्थात्किं चन वर्षीयोऽस्त्यस्ति त्र्यालिखितवत्यस्तिस्रश्चितयः स्युस्त्रिवृतो ह्येमे लोका अपरिमितालिखिते द्वे ह्यसो ह्येते चितीऽअपरिमित ऽउ वै ह्यसः सर्वास्त्वेव त्र्यालिखितवत्यः स्युः सर्वे ह्येवेमे लोकास्त्रिवृतः ॥ १७ ॥ अथात इष्टकानामेवावपनस्य । यां कां च यजुष्मतीमिष्टकां विद्यात्तां मध्यमायां चिताऽउपदध्यादन्तरिक्षं वै मध्यमा चितिरन्तरिक्षमु वै सर्वेषां भूतानामावपनमथोऽअन्नं वै यजुष्मत्य इष्टका उदरं मध्यमा चितिरुदरे तदन्नं दधाति ॥ १८ ॥ तदाहुः । नोपदध्यान्नेदतिरेचयानीति स वाऽउपैव दध्यात्कामेभ्यो वाऽएता इष्टका उपधीयन्ते न वै कामानामतिरिक्तमस्ति स वै नैवोपदध्यादेतावद्वाऽएतद्देवा अकुर्वन् ॥ १९ ॥ ब्राह्मणम् ॥ ३ [७. २.] ॥ ॥

अथ पुरीषं निवपति । माꣳसं वै पुरीषं माꣳसेनैवैनमेतत्प्रच्छादयतीष्टका उपधायास्योष्टका अस्थि तन्माꣳसैः संच्छादयति ॥ १ ॥ स वै स्वयमातृण्णायामावपति ।

प्राणो वै स्वयमातृण्णान्नं पुरीषं प्राणे तदन्नं दधाति तेन सर्वमात्मानं प्रच्छादयति तस्माद्यत्प्राणेऽन्नं धीयते सर्वमात्मानमवति सर्वमात्मानमनुव्येति ॥२॥ न स्वयमातृण्णायामावपेदित्येकेऽब्राह्मुः । प्राणः स्वयमातृण्णा नेत्प्राणानपिदधानीति स वाऽएव वपेदन्नेन वै प्राणा विष्टब्धा यो वाऽअन्नं नात्ति सं वै तस्य प्राणा रोहन्ति तद्यस्य ह तथा कुर्वन्ति यथा शुष्का सूर्मी सुषिरैव ह सोऽमुष्मिंल्लोके सम्भवति तस्मात्स्वयमातृण्णायामेव वपेत् ॥३॥ स्वयमातृण्णायामोप्य । अनूक्त्या संछादयन्नेत्या परिश्रिद्धः स तेनैव दक्षिणावृज्जघनेन स्वयमातृण्णा संछादयन्नेत्या पुनरनूक्त्यायै ॥४॥ आत्मानमग्रे संछादयति । आत्मा ह्येवाग्रे सम्भवतः सम्भवत्यथ दक्षिणं पक्षमथ पुच्छमथोत्तरं तद्दक्षिणावृत्तद्धि देवत्रा ॥५॥ स एष प्राण एव यत्पुरीषम् । तेन सर्वमात्मानं प्रच्छादयति सर्वस्मिंस्तदात्मन्प्राणं दधाति तद्यद्धास्यैतदङ्गं नाभिप्राप्नुयात्प्राणो ह्यस्य तदङ्गं नाभिप्राप्नुयाद्यदु वै प्राणोऽङ्गं नाभिप्राप्नोति शुष्यति वा वै तन्म्लायति वा तस्मादेनं सर्वमेवैतेन प्रच्छादयेत् ॥६॥ इन्द्रं विश्वा अवीवृधन्निति । इन्द्रं हि सर्वाणि भूतानि वर्धयन्ति समुद्रव्यचसं गिर इति महिमानमस्यैतदाह रथीतमं रथीनामिति रयितमो ह्येष रथिनां वाजानां सत्पतिं पतिमित्यन्नं वै वाजा अन्नानां सत्पतिं पतिमित्येतदैन्द्र्यानुष्टुभा निवपत्यैन्द्रं हि पुरीषं तदेतदर्धमग्नेर्यत्पुरीषमर्धमैष्टकम् ॥७॥ तदाहुः । यत्सर्वैश्छन्दोभिः सर्वाभिर्देवताभिरिष्टका उपदधात्यथैतदेकयैकदेवत्यया निवपति कथमेतदर्धमग्नेरितीन्द्रो वै सर्वान्देवान्प्रतिप्रतिस्तद्यदैन्द्र्या निवपति तेनैतदर्धमग्नेरथ यदनुष्टुभा वाग्वाऽअनुष्टुब्वागु सर्वाणि छन्दाꣳसि तेनोऽएवार्धम् ॥८॥ अथ विकर्णीं च स्वयमातृण्णां चोपदधाति । वायुर्वै विकर्णी द्यौरुत्तमा स्वयमातृण्णा वायुं च तद्दिवं चोपदधात्युत्तमेऽउपदधात्युत्तमे हि वायुश्च द्यौश्च सꣳस्पृष्टे सꣳस्पृष्टे हि वायुश्च द्यौश्च पूर्वी विकर्णीमुपदधात्यर्वाचीनं तद्दिवो वायुं दधाति तस्माद्-

षोऽर्वाचीनमेव वातः पवते ॥९॥ यद्वेव विकर्णीमुपदधाति । यत्र वाऽअदोऽश्वं चितिमवघ्रापयन्ति तदसावादित्य इमांल्लोकान्त्सूत्रे समावयते तद्यत्तत्सूत्रं वायुः स स यः स वायुरेषा सा विकर्णी तद्यदेतामुपदधात्यसावेव तदादित्य इमांल्लोकान्त्सूत्रे समावयते ॥१०॥ यद्वेव विकर्णी च स्वयमातृण्णां चोपदधाति । आयुर्वै विकर्णी प्राणः स्वयमातृण्णायुश्च तत्प्राणं चोपदधात्युत्तमेऽउपदधात्युत्तमे द्यायुश्च प्राणश्च सꣳस्पृष्टे सꣳस्पृष्टे द्यायुश्च प्राणश्च पूर्वामुत्तरां विकर्णीमुपदधात्यायुषा तत्प्राणमुभयतः परिगृह्णाति ॥११॥ प्रोथदश्वो न यवसे । ऽविष्यन्यदा महः संवरणाद्व्यस्थात् आदस्य वातोऽअनुवाति शोचिरध स्म ते व्रजनं कृष्णमस्तीति यदा वाऽएतस्य वातोऽनुवाति शोचिरथैतस्य व्रजनं कृष्णं भवति त्रिष्टुभोपदधाति त्रैष्टुभो हि वायुराग्नेय्याग्निकर्म द्यानिरुक्तयानिरुक्तो हि वायुरथ यद्वात इत्याह वातो हि वायुः ॥१२॥ ॥शतम्४७००॥ ॥ अथ स्वयमातृण्णामुपदधाति । आयोष्टा सदने सादयामीत्येष वाऽआयुस्तस्यैतत्सदनमवत इत्येष ह्येदꣳ सर्वमवति ह्यायायामित्येतस्य ह्येदꣳ सर्वं ह्यायायाꣳ समुद्रस्य हृदयऽइति समुद्रस्य ह्येतद्धृदयꣳ रश्मीवतीं भास्वतीमिति रश्मीवती हि द्यौर्भास्वत्या या द्यां भास्या पृथिवीमोर्वन्तरिक्षमित्येवꣳ ह्येष इमांल्लोकानाभाति ॥१३॥ परमेष्ठी त्वा सादयत्विति । परमेष्ठी ह्येतां पञ्चमीं चितिमपश्यत् ॥१४॥ यद्वेव परमेष्ठिनोपदधाति । प्रजापतिं विस्रस्तं देवता आदाय व्युदक्रामंस्तस्य परमेष्ठी शिर आदायोत्क्रम्यातिष्ठत् ॥१५॥ तमब्रवीत् । उप मेहि प्रति मऽएतद्धेहि येन मे त्वमुदक्रमीरिति किं मे ततो भविष्यतीति ब्रह्मैवत्यमेव मऽएतदात्मनो भविष्यतीति तथेति तदस्मिन्नेतत्परमेष्ठी प्रत्यदधात् ॥१६॥ तद्यैषोत्तमा स्वयमातृण्णा । एतदस्य तदात्मनस्तद्यदेतामत्रोपदधाति यदेवास्यैषात्मनस्तदस्मिन्नेतत्प्रतिदधाति तस्मादेतामत्रोपदधाति ॥१७॥ दिवस्पृष्ठे व्यचस्वतीं प्रथस्वतीमिति । दिवो ह्येतत्पृष्ठं व्यचस्वत्प्रथस्तद्दिवं यद्द

दिवं दृꣳह दिवं मा हिꣳसीरित्यात्मानं यच्छात्मानं दृꣳहात्मानं मा हिꣳसीरित्येतत् ॥१८॥ विश्वस्मै प्राणायापानाय । व्यानायोदानायेति प्राणो वै स्वयमातृण्णा सर्वस्माऽउ वाऽएतस्मै प्राणः प्रतिष्ठायै चरित्रायेतीमे वै लोकाः स्वयमातृण्णा इमऽउ लोकाः प्रतिष्ठा चरित्रꣳ सूर्यस्त्वाभिपात्विति सूर्यस्त्वाभिगोपायत्वित्येतन्मक्ष्या स्वस्त्येति मक्त्या स्वस्त्येत्येतच्छर्दिषा शंतमेनेति यच्छर्दिः शंतमं तेनेत्येतत् ॥११॥ नानोपदधाति । नाना हि वायुश्च द्यौश्च सकृत्सादयति समानं तत्करोति समानꣳ क्ष्यायुश्च प्राणश्च ते वाऽउभेऽएव शर्करे भवत उभे स्वयमातृण्णे समानꣳ क्ष्येवायुश्च प्राणश्चाथैने सूददोहसाधिवदति प्राणो वै सूददोहाः प्राणेनैवैने ऽएतत्संतनोति संदधाति ॥२०॥ ता अस्य सूददोहस इति । आपो वै सूदोऽन्नं दोहः सोमꣳ श्रीणन्ति पुꣳश्चय इत्यन्नं वै पुꣳश्चि जन्मन्देवानामिति संवत्सरो वै देवानां जन्म विश इति यज्ञो वै विशो यज्ञे हि सर्वाणि भूतानि विष्टानि त्रिष्टा रोचने दिव इति सवनानि वै त्रीणि रोचनानि सवनान्येतदाह्यनुष्टुभा वाग्वा ऽअनुष्टुब्वागु सर्वे प्राणा वाचा चैवैनेऽएतत्प्राणैन च संतनोति संदधाति सा वाऽएषैका सती सूददोहाः सर्वा इष्टका अनुसंचरति प्राणो वै सूददोहास्तस्मादयमेक एव प्राणः सन्त्सर्वाण्यङ्गानि सर्वमात्मानमनुसंचरति ॥२१॥ ब्राह्मणम् ॥४ [७. ३.] ॥ ॥

अथ स्वयमातृण्णासु सामानि गायति । इमे वै लोकाः स्वयमातृण्णास्ता एताः शर्करास्ता देवा उपधायैतादृशीरेवापश्यन्यथैताः शुष्काः शर्कराः ॥१॥ तेऽब्रुवन् । उप तज्जानीत यथैषु लोकेषु रसमुपजीवनं दधामेति तेऽब्रुवंश्चेतयधमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथैषु लोकेषु रसमुपजीवनं दधामेति ॥२॥ ते चेतयमानाः । एतानि सामान्यपश्यंस्तान्यगायंस्तैरेषु लोकेषु रसमुपजीवनमदधुस्तथैवैतद्यजमानो यदेतानि सामानि गायत्येष्वेवैतल्लोकेषु रसमुपजीवनं दधा-

ति ॥३॥ स्वयमातृण्णासु गायति । इमे वै लोकाः स्वयमातृण्णा एष्वेवैतल्लोकेषु रसमुपजीवनं दधाति ॥४॥ स वै भूर्भुवः स्वरिति । एतासु व्याहृतिषु गायति भूरिति वाऽअयं लोको भुव इत्यन्तरिक्षलोकः स्वरित्यसौ लोक एष्वेवैतल्लोकेषु रसमुपजीवनं दधाति ॥५॥ तानि वै नानाप्रस्तावानि । समाननिधनानि तानि यन्नानाप्रस्तावानि नाना क्यपश्यन्नथ यत्समाननिधनान्येका क्येव यज्ञस्य प्रतिष्ठैकं निधनꣳ स्वर्ग एव लोकस्तस्मात्स्वर्ग्यातिर्निधनानि ॥६॥ अथैनꣳ हिरण्यशकलैः प्रोक्षति । अत्रैष सर्वोऽग्निः संस्कृतस्तस्मिन्देवा एतद्भूतꣳ रूपमुत्तममदधुस्तथैवास्मिन्नयमेतद्भूतꣳ रूपमुत्तमं दधाति ॥७॥ यद्वैवैनꣳ हिरण्यशकलैः प्रोक्षति । एतद्वाऽअस्मिन्नद्रोऽमूं पुरस्ताद्रूम्यां तनूं मध्यतो दधाति रुक्मं च पुरुषं चाथैनमेतत्सर्वमेवोपरिष्टाद्रूम्यया तन्वा प्रछादयति ॥८॥ द्वाभ्यां-द्वाभ्याꣳ शताभ्याम् । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतद्भूतꣳ रूपमुत्तमं दधाति पञ्च कृत्वः पञ्चचितिकोऽग्निः पञ्चर्तवः संवत्सरः संवत्सरोऽग्निर्यावानाग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतद्भूतꣳ रूपमुत्तमं दधाति सकृत्स्नेण सर्वं वै सकृत्स्नꣳ सर्वेणैवास्मिन्नेतद्भूतꣳ रूपमुत्तमं दधाति ॥९॥ पश्चादग्ने प्राङ् तिष्ठन् । अथोत्तरतो दक्षिणाथ पुरस्तात्प्रत्यङ्थ ꣳघनेन परीत्य दक्षिणत उदङ् तिष्ठंस्तद्दक्षिणावृत्तद्धि देवत्राथानुपरीत्य पश्चात्प्राङ् तिष्ठंस्तथो ह्यस्यैतत्प्रागेव कर्म कृतं भवति ॥१०॥ सकृत्स्नस्य प्रमासि । सकृत्स्नस्य प्रतिमासि सकृत्स्नस्योन्मासि सकृत्स्नोऽसि सकृत्स्नाय त्वेति सर्वं वै सकृत्स्नꣳ सर्वमसि सर्वस्मै त्वेत्येतत् ॥११॥ अथातश्चितिपुरीषाणामेव मीमाꣳसा । अयमेव लोकः प्रथमा चितिः पशवः पुरीषं यत्प्रथमां चितिं पुरीषेण प्रछादयतीमं तल्लोकं पशुभिः प्रछादयति ॥१२॥ अन्तरिक्षमेव द्वितीया चितिः । वयाꣳसि पुरीषं यद्द्वितीयां चितिं पुरीषेण प्रछादयत्यन्तरिक्षं तद्वयोभिः प्रछादयति ॥१३॥ द्यौरेव तृतीया चितिः । नक्षत्राणि पु-

रीषं यत्तृतीयां चितिं पुरीषेण प्रछादयति दिवं तन्नक्षत्रैः प्रछादयति ॥ १४ ॥ यज्ञ एव चतुर्थी चितिः । दक्षिणाः पुरीषं यच्चतुर्थीं चितिं पुरीषेण प्रछादयति यज्ञं तद्दक्षिणाभिः प्रछादयति ॥ १५ ॥ यजमान एव पञ्चमी चितिः । प्रजा पुरीषं यत्पञ्चमीं चितिं पुरीषेण प्रछादयति यजमानं तत्प्रजया प्रछादयति ॥ १६ ॥ स्वर्ग एव लोकः षष्ठी चितिः । देवाः पुरीषं यत्षष्ठीं चितिं पुरीषेण प्रछादयति स्वर्गं तल्लोकं देवैः प्रछादयति ॥ १७ ॥ अमृतमेव सप्तमी चितिः । तामुत्तमामुपदधात्यमृतं तदस्य सर्वस्योत्तमं दधाति तस्मादस्य सर्वस्यामृतमुत्तमं तस्माद्दिवा अनन्तर्हिताः स्तस्माद्धु तेऽमृता इत्यधिदेवतम् ॥ १८ ॥ अथाध्यात्मम् । यैवेयं प्रतिष्ठा यश्चायमवाङ् प्राणास्तत्प्रथमा चितिर्माꣳसं पुरीषं यत्प्रथमां चितिं पुरीषेण प्रछादयत्येतस्य तदात्मनो माꣳसैः संछादयतीष्टका उपधायास्थीष्टका अस्थि तन्माꣳसैः संछादयति नाधस्तात्संछादयति तस्मादिमे प्राणा अधस्तादसंछन्ना उपरिष्टात्तु प्रछादयत्येतदस्य तदात्मन उपरिष्टान्माꣳसैः संछादयति तस्मादस्यैतदात्मन उपरिष्टान्माꣳसैः संछन्नं नावकाशते ॥ १९ ॥ यदूर्ध्वं प्रतिष्ठायाऽऽग्रवाचीनं मध्यात् । तद्द्वितीया चितिर्माꣳसं पुरीषं यद्द्वितीयां चितिं पुरीषेण प्रछादयत्येतदस्य तदात्मनो माꣳसैः संछादयतीष्टका उपधायास्थीष्टका अस्थि तन्माꣳसैः संछादयति पुरीषऽउपदधाति पुरीषेण प्रछादयत्येतदस्य तदात्मन उभयतो माꣳसैः संछादयति तस्मादस्यैतदात्मन उभयतो माꣳसैः संछन्नं नावकाशते ॥ २० ॥ मध्यमेव तृतीया चितिः । यदूर्ध्वं मध्यादवाचीनं ग्रीवाभ्यस्तच्चतुर्थी चितिर्ग्रीवा एव पञ्चमी चितिः शिर एव षष्ठी चितिः प्राणा एव सप्तमी चितिस्तामुत्तमामुपदधाति प्राणांस्तदस्य सर्वस्योत्तमान्दधाति तस्मादस्य सर्वस्य प्राणा उत्तमाः पुरीषऽउपदधाति माꣳसं वै पुरीषं माꣳसेन तत्प्राणान्प्रतिष्ठापयति नोपरिष्टात्प्रछादयति तस्मादिमे प्राणा उपरिष्टादसंछन्नाः ॥ २१ ॥ ब्राह्मणम् ॥ ५ [७. ४.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १०१

॥ सप्तमोऽध्यायः [५५.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या४३७ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे चितिनामाष्टमं काण्डं समाप्तम् ॥ ८॥ ॥

VARIOUS READINGS.

Adhyâya १. २. ४ भूयोत्तरं तस्थौ B. - ६ वाग्वै विश्वकर्म ऋषि° A 1. B. - *Ibid.* तस्माद्वाग्विश्वकर्म ऋषिः A 1. B. - ३. १? प्राणाभृत्यंगानि A. प्राणाभृत्यंगानि B. - ४. १० बर्हिष्ठा° A. बर्हिष्ठा° B in the first instance, बर्हिष्का° in the second. —

Adhyâya २. ४. ४ विराट् A. विराड् B. —

Adhyâya ३. १. २ लोको हृदयत B. - २. २ दिक्षु प्रज्ञा A. - ४. ५ Read: द्वे प्रतिष्ठे. - ६ राज्यस्यसि B. यस्वी is here and १०. (as well as Vâj. S. १४. २२) paroxytonon in the first instance, oxytonon in the second! —

Adhyâya ४. १. ११ तद्यत्तमाहु A2! B. - २३ °र्धमासाः सप्त AB. - २. ११ युवात चायुवात च A. युवान वायुवते च B. - ३. २० °द्यत्प्राजनयदसृजत AB.! —

Adhyâya ५. १. २ लोको हृदयत् A. हृदयत् B. - ७ यवेतत्करोति A. यन्वेतत्करोति B. - २. १ °हृदयंस्त° AB. - ५ Vâj. S. १५. ५ reads विवध°. - ३. ८ thus the Kâṇvâs. —

Adhyâya ६. १. ४ i. e. अन्तःस्तोमभागम् - ५ प्रतिकर्तेत्य° A. - ६-८ °राट् AB. - १५ °ष्टाद्गोप्त्रेनकुर्वत and °प्त्रेन्कुरुते AB. - १६ Vâj. S. १५. १५ adds ते नोऽवन्तु after नमोऽस्तु. - २१ °ष्टाद्गोप्त्रेनकुर्वत A. °प्रेज्ञकुर्वत B. - २. २ °ष्टिर्बीज्ञ° AB. - ३ °ष्टुप्कमीणिं A. - १५ i. e. बर्हिःस्तोमभागम्. - ३. १ राधिवा° AB. —

ओम् । अथातः शतरुद्रियं जुहोति । अत्रेष सर्वोऽग्निः संस्कृतः स एषोऽत्र रुद्रो देवता तस्मिन्देवा एतदमृतꣳ रूपमुत्तममदधुः स एषोऽत्र दीप्यमानोऽतिष्ठद्यन्नमिङ्मानस्तस्मादेवा अबिभयुर्यद्वै नोऽयं न हिꣳस्यादिति ॥ १ ॥ तेऽब्रुवन् । अन्नमस्मै सम्भराम तेनैनꣳ शमयामेति तस्माऽएतद्यन्नꣳ समभरञ्छान्तदेवत्यं तेनैनमशमयंस्तद्यदेतं देवमेतेनाशमयंस्तस्माद्यान्तदेवत्यꣳ शान्तदेवत्यꣳ ह वै तद्यतरुद्रियमित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तथैवास्मिन्नयमेतदमृतꣳ रूपमुत्तमं दधाति स एषोऽत्र दीप्यमानस्तिष्ठत्यन्नमिङ्मानस्तस्माऽएतद्यन्नꣳ सम्भरति शान्तदेवत्यं तेनैनꣳ शमयति ॥ २ ॥ ज्ञर्तिलैर्जुहोति । ज्ञायतऽएष एतद्यच्चीयते स एष सर्वस्माऽअन्नाय ज्ञायतऽउभयम्वेतद्यन्नं यज्ज्ञर्तिला यच्च ग्राम्यं यच्चारण्यं यद्ध तिलास्तेन ग्राम्यं यद्धकृष्टे पच्यन्ते तेनारण्यमुभयेनैवैनमेतद्यन्नेन प्रीणाति ग्राम्येण चारण्येन च ॥ ३ ॥ अर्कपर्णेन जुहोति । अन्नमर्कोऽन्नेनैवैनमेतत्प्रीणाति ॥ ४ ॥ परिश्रित्सु जुहोति । अग्नय एते यत्परिश्रितस्तथो ह्यस्यैता अग्निमत्येवाकृतयो कृता भवन्ति ॥ ५ ॥ यद्वैवैतकृतरुद्रियं जुहोति । प्रजापतेर्विस्रस्ताद्देवता उदक्रामंस्तमेक एव देवो नाजहान्मन्युरेव सोऽर्ण तन्नत्वर्वितोऽतिष्ठत्सोऽरोदीत्तस्य यान्यश्रूणि प्रास्कन्दंस्तान्यस्मिन्मन्यौ प्रत्यतिष्ठन्त्स एव शतशीर्षा रुद्रः समभवत्सहस्राक्षः शतेषुधिरथ या अन्या विप्रुषोऽपतंस्ता असंख्याता सहस्राणीमांल्लोकाननुप्राविशंस्तद्यदुदितात्समभवंस्तस्माद्रुद्राः सोऽयꣳ शतशीर्षा रुद्रः सहस्राक्षः शतेषुधिरधिज्यधन्वा प्रतिहितायी भीषयमाणोऽतिष्ठद्यन्नमिङ्मा-

नस्तस्माद्वा अबिभयुः ॥ ६ ॥ ते प्रजापतिमब्रुवन् । अस्माद्वै बिभीमो यद्वै नोऽयं न क्विꣳस्यादिति सोऽब्रवीद्नमस्मै सम्भरत तेनैनꣳ शमयतेति तस्माऽएतद्नꣳ समभरञ्छतरुद्रियं तेनैनमशमयंस्तद्यदेतꣳ शतशीर्षाणꣳ रुद्रमेतेनाशमयंस्तस्माच्छतशीर्षरुद्रशमनीयꣳ शतशीर्षरुद्रशमनीयꣳ ह वै तच्छतरुद्रियमित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्तथैवास्माऽअयमेतद्नꣳ सम्भरति शतरुद्रियं तेनैनꣳ शमयति ॥ ७ ॥ गवेधुकासक्तुभिर्जुहोति । यत्र वै सा देवता विस्रस्ताशयत्ततो गवेधुकाः समभवन्त्स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति ॥ ८ ॥ अर्कपर्णेन जुहोति । एतस्य वै देवस्याशयादर्कः समभवत्स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति ॥ ९ ॥ परिश्रित्सु जुहोति । लोमानि वै परिश्रितो न वै लोमसु विषं न किं चन हिनस्त्युत्तरार्धेऽग्नेरुदङ् तिष्ठन्जुहोत्येतस्याꣳ ह दिश्येतस्य देवस्य गृहाः स्वायामेवैनमेतद्दिशि प्रीणाति स्वायां दिश्यवयजते ॥ १० ॥ स वै जानुदघ्ने प्रथमꣳ स्वाकाकरोति । अध-इव वै तद्यज्जानुदघ्नमध-इव तद्यदयं लोकस्तद्यऽइमं लोकꣳ रुद्राः प्राविशंस्तांस्तत्प्रीणाति ॥ ११ ॥ अथ नाभिदघ्ने । मध्यमिव वै तद्यन्नाभिदघ्नं मध्यमिवान्तरिक्षलोकस्तद्येऽन्तरिक्षलोकꣳ रुद्राः प्राविशंस्तांस्तत्प्रीणाति ॥ १२ ॥ अथ मुखदघ्न । ऽउपरीव वै तद्यन्मुखदघ्नमुपरीव तद्यदसौ लोकस्तद्येऽमुं लोकꣳ रुद्राः प्राविशंस्तांस्तत्प्रीणाति स्वाकाकारेणान्नं वै स्वाकाकारोऽन्नेनैवैनानेतत्प्रीणाति ॥ १३ ॥ नमस्ते रुद्र मन्यवऽइति । य एवास्मिन्त्सोऽन्तर्मन्युर्विततोऽतिष्ठत्तस्माऽएतन्नमस्करोत्युतो तऽइषवे नमो बाहुभ्यामुत ते नम इतीषा च हि बाहुभ्यां च भीषयमाणोऽतिष्ठत् ॥ १४ ॥ स एष क्षत्रं देवः । यः स शतशीर्षा समभवद्विश इमऽइतरे ये विप्रुड्भ्यः समभवंस्तस्माऽएतस्मै क्षत्रायैता विश एतं पुरस्ताद्धारमुदहरन्य एष प्रथमोऽनुवाकस्तेनैनमप्रीणंस्तथैवास्माऽअयमेतं पुरस्ताद्धारमुद्धरति तेनैनं प्रीणाति तस्मादेष एकदेवत्यो भवति रौद्र

एतꣳ क्षेत्रेन प्रीणाति ॥१५॥ चतुर्दशैतानि यजूꣳषि भवन्ति । त्रयोदश मासाः संवत्सरः प्रजापतिश्चतुर्दशः प्रजापतिरग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति नमो नम इति यज्ञो वै नमो यज्ञेनैवैनमेतन्नमस्कारेण नमस्यति तस्माद्वꣳ नायज्ञियं ब्रूयान्नमस्तऽइति यथा हैनं ब्रूयाद्यज्ञस्तऽइति तादृक्तत् ॥१६॥ अथ द्वन्द्विभ्यो जुहोति । नमोऽमुष्मै चामुष्मै चेति तद्यथा वै ब्रूयादसौ त्वं च न एष च मा क्विꣳसिष्टमित्येवमेतदाह नतराꣳ हि विदित आमन्त्रितो हिनस्ति ॥१७॥ नमो हिरण्यबाहवे । सेनान्ये दिशां च पतये नम इत्येष एव हिरण्यबाहुः सेनानीरेष दिशां पतिस्तद्यत्किं चात्रैकदेवत्यमेतमेव तेन प्रीणाति क्षत्रमेव तद्विश्यपिभागं करोति तस्माद्यद्विशस्तस्मिन्क्षत्रियोऽपिभागोऽथ या असंख्याता सहस्राणीमांल्लोकाननुप्राविशन्नेतास्ता देवता याभ्य एतज्जुहोति ॥१८॥ अथ ज्ञातिभ्यो जुहोति । एतानि ह ज्ञातान्येते रुद्रा अनुप्रविविशुर्यत्र-यत्रैते तदेवैनानेतत्प्रीणात्यथोऽएवꣳ हैतानि रुद्राणां ज्ञातानि देवानां वै विधामनु मनुष्यास्तस्माद्वꣳ हेमानि मनुष्याणां ज्ञातानि यथाज्ञातमेवैनानेतत्प्रीणाति ॥१९॥ तेषां वाऽउभयतोनमस्कारा अन्ये । ऽन्यतरतोनमस्कारा अन्ये ते ह ते घोरतरा अशान्ततरा यऽउभयतोनमस्कारा उभयत एवैनानेतद्यज्ञेन नमस्कारेण शमयति ॥२०॥ स वाऽअशीत्यां च स्वाहाकरोति । प्रथमे चानुवाकेऽथाशीत्यामथाशीत्यां च यानि चोर्धानि यजूꣳष्यावतानिभ्योऽन्नमशीतयोऽन्नेनैवैनानेतत्प्रीणाति ॥२१॥ अथैतानि यजूꣳषि जपति । नमो वः किरिकेभ्य इत्येतद्वास्य प्रतिज्ञाततमं धाम यथा प्रियो वा पुत्रो हृदयं वा तस्माद्यत्रैतस्माद्देवाद्दुङ्क्त तदेताभिर्व्याहृतिभिर्जुहुयादुप हैवैतस्य देवस्य प्रियं धाम गच्छति तथो हैनमेष देवो न हिनस्ति ॥२२॥ नमो वः किरिकेभ्य इति । एते ह्येदꣳ सर्वं कुर्वन्ति देवानाꣳ हृदयेभ्य इत्यग्निर्वायुरादित्य एतानि ह तानि देवानाꣳ हृदयानि नमो विचिन्वत्केभ्य

इत्येते क्रीदꣳ सर्वं विचिन्वन्ति नमो विक्षिणत्केभ्य इत्येते वै तं विक्षिणन्ति यं विचिक्रीषन्ति नम आनिर्ऋतेभ्य इत्येते क्रव्येभ्यो लोकेभ्योऽनिर्ऋताः ॥ २३ ॥ अथोत्तराणि जपति । द्रापेऽन्धसस्पतऽइत्येष वै द्रापिरेष वै तं द्रापयति यं दिद्रापयिषत्यन्धसस्पतऽइति सोमस्य पतऽइत्येतद्रुद्र नीललोहितेति नामानि चास्यैतानि रूपाणि च नामयाक्रमेवैनमेतत्प्रीणात्यासां प्रजानामेषां पशूनां मा भेमा रोङ्मो च नः किं चनाममदिति यथैव यजुस्तथा बन्धुः ॥ २४ ॥ स एष क्षत्रं देवः । तस्माऽएतस्मै क्षत्रायैता विशोऽमुं पुरस्ताद्द्वारमुदक्रन्योऽसौ प्रथमोऽनुवाकोऽथास्माऽएतमुपरिष्टाद्द्वारमुदक्रंस्तेनैनमप्रीणंस्तथैवास्माऽअयमेतमुपरिष्टाद्द्वारमुद्धरति तेनैनं प्रीणाति तस्माद्प्येष एकदेवत्यो भवति रौद्र एवैतꣳ क्रव्यैवैतेन प्रीणाति ॥ २५ ॥ सप्तैतानि यजूꣳषि भवन्ति । सप्तचितिकोऽग्निः सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रूपेण प्रीणाति तान्युभयान्येकविꣳशतिः सम्पद्यन्ते द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳश एतामभिसम्पदम् ॥ २६ ॥ अथावतानान्जुहोति । एतद्वाऽएनान्देवा एतेनान्नेन प्रीत्वाधिषामेतैरवतानैर्धनूꣳष्यवातन्वंस्तथैवैनानयमेतदेतेनान्नेन प्रीत्वाधिषामेतैरवतानैर्धनूꣳष्यवतनोति न क्रव्यवतेन धनुषा कं चन हिनस्ति ॥ २७ ॥ तद्वै सक्रस्नयोजनऽइति । एतद्वै परमं दूरं यत्सक्रस्नयोजनं तद्यदेव परमं दूरं तदेवैषामेतद्धनूꣳष्यवतनोति ॥ २८ ॥ यद्वेवाक्र सक्रस्नयोजनऽइति । अयमग्निः सक्रस्नयोजनं न क्रव्येतस्मादिति नेत्यन्यत्परमस्ति तद्यदग्नौ जुहोति तदेवैषाꣳ सक्रस्नयोजने धनूꣳष्यवतनोति ॥ २९ ॥ असंख्याता सक्रस्राणि । अस्मिन्मक्रत्यर्णवऽइति यत्र-यत्र ते तदेवैषामेतद्धनूꣳष्यवतनोति ॥ ३० ॥ दशैतानवतानान्जुहोति । दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैषामेतद्धनूꣳष्यवतनोति ॥ ३१ ॥ अथ प्रत्यवरो-

क्रान्नुक्रोति । एतद्वाऽएतदिमांल्लोकानित ऊर्ध्वा रोक्रति स स पराङिव रोक्र इ-यमु वै प्रतिष्ठा ते देवा इमां प्रतिष्ठामभिप्रत्यायंस्तथैवैतद्यजमान इमां प्रतिष्ठाम-भिप्रत्येति ॥३२॥ यद्वेव प्रत्यवरोक्रति । एतद्वाऽएनानेतत्प्रीणन्नन्ववैति तत एव-वैतदात्मानमपोद्धरते ज्ञावाव्वै तथा क्रानेनात्मना सर्वमायुरेति ॥३३॥ यद्वेव प्र-त्यवरोक्रति । एतद्वाऽएतदेतान्रुद्रानित ऊर्ध्वान्प्रीणाति तान्पुनरमुतोऽर्वाचः ॥३४॥ नमोऽस्तु रुद्रेभ्यो ये दिवीति । तद्येऽमुष्मिंल्लोके रुद्रास्तेभ्य एतन्नमस्करोति ये-षां वर्षमिषव इति वर्षꣳ क्र तेषामिषवा वर्षेण क्र ते क्रिꣳसन्ति यं ञिक्रिꣳसि-षन्ति ॥३५॥ नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षऽइति । तद्येऽन्तरिक्षलोके रुद्रास्तेभ्य एतन्नमस्करोति येषां वात इषव इति वातो क्र तेषामिषवो वातेन क्र ते क्रिꣳ-सन्ति यं ञिक्रिꣳसिषन्ति ॥३६॥ नमोऽस्तु रुद्रेभ्यो ये पृथिव्यामिति । तद्येऽस्मिं-ल्लोके रुद्रास्तेभ्य एतन्नमस्करोति येषामन्नमिषव इत्यन्नꣳ क्र तेषामिषवोऽन्नेन क्र ते क्रिꣳसन्ति यं ञिक्रिꣳसिषन्ति ॥३७॥ तेभ्यो दश प्राचीः । दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा इति दशाक्षरा विराड्विराडन्नमिर्दश दिशो दिशोऽन्नमिर्दश प्राणाः प्राणा अग्नियावानग्नियावत्यस्य मात्रा तावतैवैनानेतदन्नेन प्रीणाति ॥३८॥ यद्वेवाक्र दश-दशेति । दश वाऽअञ्जलेरङ्गुलयो दिशि-दिश्येवैभ्य एतदञ्जलिं क-रोति तस्माद्धैतद्गीतोऽञ्जलिं करोति तेभ्यो नमोऽस्त्विति तेभ्य एव नमस्क-रोति ते नो मृडयन्त्विति तऽएवास्मै मृडयन्ति ते यं द्विष्मो यश्च नो द्वेष्टि तमे-षां ञम्भे दध्म इति यमेव द्वेष्टि यश्चैनं द्वेष्टि तमेषां ञम्भे दधात्यमुमेषां ञम्भे द-धामीति क्र ब्रूयाद्यं द्विष्यात्ततोऽक्र तस्मिन्न पुनरस्त्यपि तन्नाद्रियेत स्वयंनिर्दिष्टो क्रैव स यमेवंविद्वेष्टि ॥३९॥ त्रिष्कृवः प्रत्यवरोक्रति । त्रिवृदग्नियावानग्नियाव-त्यस्य मात्रा तावतैवैनानेतदन्नेन प्रीणाति स्वाक्राकारेणान्नं वै स्वाक्राकारोऽन्ने-नैवैनानेतत्प्रीणाति त्रिरित ऊर्ध्वा रोक्रति तत्षट् तस्योक्तो बन्धुः ॥४०॥ यद्वेव

त्रिष्कृवः प्रत्यवरोहति । त्रिर्हि कृव ऊर्ध्वो रोहति तथावत्कृव ऊर्ध्वो रोहति तावत्कृवः प्रत्यवरोहति ॥ ४१ ॥ अथ तदर्कपर्णं चावाले प्रास्यति । एतद्वाऽएनेनैतद्रौद्रं कर्म करोति तदेतदशान्तं तदेतत्तिरः करोति नेदिदमशान्तं कश्चिदभितिष्ठात्तन्नेद्धिनसदिति तस्माच्चावाले यद्वेव चावालेऽग्निरेष यच्चावालस्तथो ह्येनदेषोऽग्निः संदहत्यथातः सम्पदेव ॥ ४२ ॥ तदाहुः । कथमस्यैतद्रुतरुद्रियꣳ संवत्सरमग्निमाप्नोति कथꣳ संवत्सरेणाग्निना सम्पद्यतऽइति षष्टिश्च ह वै त्रीणि च शतान्येतद्रुतरुद्रियमथ त्रिꣳशद्यत् पञ्चत्रिꣳशत्ततो यानि षष्टिश्च त्रीणि च शतानि तावन्ति संवत्सरस्याहानि तत्संवत्सरस्याहान्याप्नोत्यथ यानि त्रिꣳशत्त्रिꣳशन्मासस्य रात्रयस्तन्मासस्य रात्रीराप्नोति तदुभयानि संवत्सरस्याहोरात्राण्याप्नोत्यथ यानि पञ्चत्रिꣳशत्स त्रयोदशो मासः स आत्मा त्रिꣳशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव पञ्चत्रिꣳशमेतावान्वै संवत्सर एवमु ह्यस्यैतद्रुतरुद्रियꣳ संवत्सरमग्निमाप्नोत्येवꣳ संवत्सरेणाग्निना सम्पद्यतऽएतावत्य उ वै शाण्डिलेऽग्नौ मध्यतो यजुष्मत्य इष्टका उपधीयन्तेऽग्नयो ह्येते पृथग्यदेता इष्टका एवमु ह्यस्यैतेऽग्नयः पृथक्शतरुद्रियेणाभिद्रुता भवन्ति ॥ ४३ ॥ तदाहुः । कथमस्यैतद्रुतरुद्रियं मरुद्वत्यमाप्नोति कथं मरुतोक्थेन सम्पद्यतऽइति यान्यमूनि पञ्चविꣳशतिर्यज्ञꣳयभितोऽशीतीः स पञ्चविꣳश आत्मा यत्र वाऽआत्मा तदेव शिरस्तत्पक्षपुच्छान्यथ या अशीतयः सैवाशीतीनामाप्तिरशीतिभिर्हि मरुद्वत्यमाप्यायतेऽथ यदूर्ध्वमशीतिभ्यो यदेवादो मरुत उक्थस्योर्ध्वमशीतिभ्य एतदस्य तदेवमु ह्यस्यैतद्रुतरुद्रियं मरुद्वत्यमाप्नोत्येवं मरुतोक्थेन सम्पद्यते ॥ ४४ ॥ ब्राह्मणम् ॥ १ ॥ ॥

अथैनमतः परिषिञ्चति । एतद्वाऽएनं देवाः शतरुद्रियेण शमयित्वाथैनमेतद्रूप एवाशमयंस्तथैवैनमेवमेतद्रुतरुद्रियेण शमयित्वाथैनमेतद्रूप एव शमयति ॥ १ ॥ अद्भिः परिषिञ्चति । शान्तिर्वाऽआपः शमयत्येवैनमेतत्सर्वतः परिषिञ्चति सर्वत

एवैनमेतद्धमयति त्रिष्कृवः परिषिञ्चति त्रिवृद्ग्नेर्यावानग्नेर्यावत्यस्य मात्रा तावतैवैनमेतद्धमयति ॥२॥ यद्वैवैनं परिषिञ्चति । इमे वै लोका एषोऽग्निरिमांस्तल्लोकानद्भिः परितनोति समुद्रेण वैनांस्तत्परितनोति सर्वतस्तस्मादिमांल्लोकान्त्सर्वतः समुद्रः पर्येति दक्षिणावृत्तस्मादिमांल्लोकान्दक्षिणावृत्समुद्रः पर्येति ॥३॥ अग्नीत्परिषिञ्चति । अग्निरेष यदाग्नीध्रो नो वाऽआत्मात्मानꣳ हिनस्त्यक्षꣳसाया ऽअश्मनोऽध्यश्मनो ह्यापः प्रभवन्ति निकद्मान्निकद्माद्यापः प्रभवन्ति दक्षिणान्निकद्मादक्षिणाद्धि निकद्मादापः प्रभवन्ति ॥४॥ अश्मन्नूर्ज्जं पर्वते शिश्रियाणामिति । अश्मनि वाऽएषोर्क्पर्वतेषु श्रिता यदापोऽद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि सम्भृतं पय इत्येतस्माद्धेतत्सर्वस्मादधि सम्भृतं पयस्तां न इषमूर्ज्जं धत्त मरुतः सꣳराणा इति मरुतो वै वर्षस्येशतेऽश्मंस्ते न्युदिति निदधाति तदश्मनि न्युधं दधाति तस्मादश्मानाद्योऽथो स्थिरो वाऽअश्मा स्थिरा न्युस्थिरऽएव तत्स्थिरं दधाति मयि तऽऊर्गित्यपादत्ते तदात्मन्नूर्ज्जं धत्ते तथा द्वितीयं तथा तृतीयम् ॥५॥ निधायोदक्करणं त्रिर्विपल्ययते । एतद्वाऽएनमेतल्लघूयतीव यदेनꣳ समन्तं पर्येति तस्माऽएवैतन्निक्रुतेऽक्षꣳसाये ॥६॥ यद्वैव विपल्ययते । एतद्वाऽएनमेतदन्ववैति तत एवैतदात्मानमपोद्धरते जीवाव्वै तथो ह्यनेनात्मना सर्वमायुरेति ॥७॥ त्रिर्विपल्ययते । त्रिर्हि कृत्वः पर्येति तस्मात्कृत्वः पर्येति तावत्कृत्वो विपल्ययते ॥८॥ अथ तमश्मानमुदक्करणेऽवधाय । एतां दिशꣳ हरन्त्येषा वै नैर्ऋती दिङ्नैर्ऋत्यामेव तद्दिशि शुचं दधाति ॥९॥ एतद्वाऽएनं देवाः । शतरुद्रियेण चाद्भिश्च शमयित्वाथास्यैतेन शुचं पाप्मानमपाघ्नंस्तथैवैनमयमेतद्धतरुद्रियेण चाद्भिश्च शमयित्वाथास्यैतेन शुचं पाप्मानमपहन्ति ॥१०॥ बाह्येनाग्निꣳ हरति । इमे वै लोकाऽएषोऽग्निरेभ्यस्तल्लोकेभ्यो बहिर्धा शुचं दधाति बहिर्वेदीयं वै वेदिरस्यै तद्बहिर्धा शुचं दधाति ॥११॥ स वेदेर्दक्षिणायाꣳ श्रोणी । प्राङ् तिष्ठन्दक्षिणा निरस्यति

यं द्विष्मस्तं ते शुगृच्छतीति यमेव द्वेष्टि तमस्य शुगृच्छत्यमुं ते शुगृच्छतीति ह ब्रूयाद्यं द्विष्यात्ततो ह तस्मिन्न पुनरस्त्यपि तन्नाद्रियेत स्वयंनिर्दिष्टो ह्येव स यमेवंविद्द्वेष्टि यदि न भिद्येत भेत्तवै ब्रूयाद्यदा ह्येव स भिद्यतेऽथ तꣳ शुगृच्छति यं द्वेष्यप्रतीक्षमायत्यप्रतीक्षमेव तꣳशुचं पाप्मानं जहाति ॥१२॥ प्रत्येत्येष्टका धेनूः कुरुते । एतद्वाऽएनं देवाः शतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमपहत्य प्रत्येत्येष्टका धेनूरकुर्वत तथैवैनमयमेतꣳशतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमपहत्य प्रत्येत्येष्टका धेनूः कुरुते ॥१३॥ आसीनः कुर्वीतेत्यु ह्येकेऽआहुः । आसीनो वै धेनुं दोग्धीति तिष्ठꣳस्त्वेव कुर्वीतेमे वै लोका एषोऽग्निस्तिष्ठत्तीव वाऽइमे लोका अथो तिष्ठन्त्वै वीर्यवत्तरः ॥१४॥ उदङ् प्राङ् तिष्ठन् । पुरस्ताद्वाऽएषा प्रतीची यजमानं धेनुरुपतिष्ठते दक्षिणतो वै प्रतीचीं धेनुं तिष्ठत्तीमुपसीदन्ति ॥१५॥ स यत्राभ्याप्नोति । तदभिमृश्यैतयर्चर्जुपतीमा मेऽअग्नऽइष्टका धेनवः सन्त्वित्यग्निर्ह्यैतासां धेनुकरणास्येष्टे तस्मादेतावतीनां देवतानामग्निमेवामन्त्रयतऽएका च दश चान्तश्च परार्धश्चेत्येष ह्यावरार्धो भूमा यदेका च दश चाथ ह्येष परार्धो भूमा यदन्तश्च परार्धश्चावरार्धतश्चैवैना एतत्परार्धतश्च परिगृह्य देवा धेनूरकुर्वत तथैवैना अयमेतदवरार्धतश्चैव परार्धतश्च परिगृह्य धेनूः कुरुते तस्मादपि नाद्रियेत बह्वीः कर्तुममुत्र वाऽएष एता ब्रह्मणा यजुषा बह्वीः कुरुतेऽथ यत्संतनोति कामानेव तत्संतनोति ॥१६॥ यद्वेवेष्टका धेनूः कुरुते । वाग्वा ऽअयमग्निर्वाचा हि चितः स यदाहैका च दश चान्तश्च परार्धश्चेति वाग्वाऽएका वाग्दश वागन्तो वाक्परार्धो वाचमेव तद्देवा धेनुमकुर्वत तथैवैतयजमानो वाचमेव धेनुं कुरुतेऽथ यत्संतनोति वाचमेव तत्संतनोत्येता मेऽअग्नऽइष्टका धेनवः सन्त्वमुत्रामुष्मिंल्लोकऽइत्येतद्वाऽएना अस्मिंल्लोके धेनूः कुरुतेऽथैना एतदमुष्मिंल्लोके धेनूः कुरुते तथो ह्येनमेता उभयोर्लोकयोर्भुञ्जत्यस्मिंश्चामुष्मिंश्च ॥१७॥

ऋतव स्थेति । ऋतवो ह्येता ऋतावृध इति सत्यवृध इत्येतदृतुष्ठा स्थ ऋतावृध इत्यहोरात्राणि वाऽइष्टका ऋतुषु वाऽअहोरात्राणि तिष्ठन्ति घृतश्चुतो मधुश्चुत इति तदेना घृतश्चुतश्च मधुश्चुतश्च कुरुते ॥१८॥ विराजो नामेति । एतद्वै देवा एता इष्टका नामभिरुपाह्वयन्त यथा-यथैना एतदाचक्षते ता एनानभ्युपावर्तन्ताथ लोकम्पृणा एव पराच्यस्तस्थुरक्षितनाम्न्यो निर्मिमीत्यस्ता विराजो नामाकुर्वत ता एनानभ्युपावर्तन्त तस्माद्दश-दशेष्टका उपधाय लोकम्पृणयाभिमन्त्रयते तदेना विराजः कुरुते दशाक्षरा हि विराट् कामदुघा अक्षीयमाणा इति तदेनाः कामदुघा अक्षीयमाणाः कुरुते ॥१९॥ अथैनं विकर्षति । मण्डूकेनावकया वेतसशाखयैतद्वाऽएनं देवाः शतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमपहत्याथैनमेतद्भूय एवाशमयंस्तथैवैनमयमेतद्धतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमहत्याथैनमेतद्भूय एव शमयति सर्वतो विकर्षति सर्वत एवैनमेतद्धमयति ॥२०॥ यद्वैवैनं विकर्षति । एतद्वै यत्रैतं प्राणा ऋषयोऽग्रेऽग्निꣳ समस्कुर्वंस्तमद्भिरवोक्षंस्ता आपः समस्कन्दंस्ते मण्डूका अभवन् ॥२१॥ ताः प्रजापतिमब्रुवन् । यद्वै नः कमभूदवाक्तदगादिति सोऽब्रवीदेष व एतस्य वनस्पतिर्वेत्विति वेत्तु संवेत्तु सोऽह वै तं वेतस इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा अथ यदब्रुवन्नवाङ्गः कमगादिति ता अवाक्का अभवन्नवाक्का ह वै ता अवका इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवास्ता कैतास्त्वष्य आपो यन्मण्डूकोऽवका वेतसशाखैताभिरेवैनमेतत्त्रयीभिरद्भिः शमयति ॥२२॥ यद्वैवैनं विकर्षति । ज्ञायतऽएष एतद्यज्ञीयते स एष सर्वस्माऽअन्नाय ज्ञायते सर्वम्वेतदन्नं यन्मण्डूकोऽवका वेतसशाखा पशवश्च ह्येता आपश्च वनस्पतयश्च सर्वेणैवैनमेतदन्नेन प्रीणाति ॥२३॥ मण्डूकेन पशूनाम् । तस्मान्मण्डूकः पशूनामनुपजीवनीयतमो यातयामा हि सोऽवकाभिरपां तस्माद्वका अपामनुपजीवनीयतमा यातयाम्न्यो हि ता वे-

तसेन वनस्पतीनां तस्माद्वितसो वनस्पतीनामनुपजीवनीयतमो यातयामा हि सः ॥ २४ ॥ तानि वꣳशे प्रबध्य । दक्षिणार्धेनाग्नेरुत्तरेण परिश्रितः प्राग्ग्रे विकर्षति समुद्रस्य त्वावकयाग्ने परिव्ययामसि पावकोऽअस्मभ्यꣳ शिवो भवेति समुद्रियाभिस्त्वाद्भिः शमयाम इत्येतत् ॥ २५ ॥ अथ जघनार्धेनोदक् । क्रिमस्य त्वा जरायुणाग्ने परिव्ययामसि पावकोऽअस्मभ्यꣳ शिवो भवेति यद्वै शीतस्य प्रशीतं तद्क्रिमस्य जरायु शीतस्य त्वा प्रशीतेन शमयाम इत्येतत् ॥ २६ ॥ ॥ शतम्४८०० ॥ ॥ अथोत्तरार्धेन प्राक् । उप ज्मन्नुप वेतसेऽवतर नदीष्णा अग्ने पित्तमपामसि मण्डूक्कि ताभिरागक्कि सेमं नो यज्ञं पावकवर्णꣳ शिवं कृधीति यथैव यजुस्तथा बन्धुः ॥ २७ ॥ अथ पूर्वार्धेन दक्षिणा । अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् अन्यांस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भवेति यथैव यजुस्तथा बन्धुरित्यग्रे विकर्षत्यथेति अथेत्यथेति तद्दक्षिणावृत्तद्भि देवत्रा ॥ २८ ॥ आत्मानमग्रे विकर्षति । आत्मा क्वेवाग्ने सम्भवतः सम्भवत्यथ दक्षिणं पक्षमथ पुच्छमथोत्तरं तद्दक्षिणावृत्तद्भि देवत्रा ॥ २९ ॥ अभ्यात्मं पक्षपुच्छानि विकर्षति । अभ्यात्ममेव तच्छान्तिं धत्ते परस्तादर्वाक्परस्तादेव तदर्वाचीꣳ शान्तिं धत्तेऽग्ने पावक रोचिषेति दक्षिणं पक्षꣳ स नः पावक दीदिव इति पुच्छं पावकया यश्चितयत्क्या कृपेत्युत्तरं पावकं पावकमिति यद्वै शिवꣳ शान्तं तत्पावकꣳ शमयत्येवैनमेतत् ॥ ३० ॥ सप्तभिर्विकर्षति । सप्तचितिकोऽग्निः सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्विकर्षति तं वꣳशमुत्करे न्यस्य ॥ ३१ ॥ अथैनꣳ सामभिः परिगायति । अत्रैष सर्वोऽग्निः संस्कृतस्तस्मिन्देवा एतदमृतꣳ रूपमुत्तममदधुस्तथैवास्मिन्नयमेतदमृतꣳ रूपमुत्तमं दधाति सामानि भवन्ति प्राणा वै सामान्यमृतमु वै प्राणा अमृतमेवास्मिन्नेतद्रूपमुत्तमं दधाति सर्वतः परिगायति सर्वत एवास्मिन्नेतदमृतꣳ रूपमुत्तमं दधाति ॥ ३२ ॥ यद्वैवैनꣳ सामभिः

परिगायति । एतद्वै देवा अकामयन्तानस्थिकमिममृतमात्मानं कुर्वीमहीति तेऽब्रुवन्नुप तञ्जानीत यथेममात्मानमनस्थिकममृतं करवामहाऽइति तेऽब्रुवंश्चेतयध्वमिति चितिमिच्छतेति वाव तदब्रुवंस्तदिच्छत यथेममात्मानमनस्थिकममृतं करवामहाऽइति ॥३३॥ ते चेतयमानाः । एतानि सामान्यपश्यंस्तैरेनं पर्यगायंस्तैरेतमात्मानमनस्थिकममृतमकुर्वत तथैवैतच्चेतयमानो यदेनꣳ सामभिः परिगायत्येतमेवैतदात्मानमनस्थिकममृतं कुरुते सर्वतः परिगायति सर्वत एवैतदेतमात्मानमनस्थिकममृतं कुरुते तिष्ठन्गायति तिष्ठन्तीव वाऽइमे लोका अथो तिष्ठन्वै वीर्यवत्तरो हिङ्कृत्य गायति तत्र हि सर्वं कृत्स्नꣳ साम भवति ॥३४॥ गायत्रं पुरस्ताद्गायति । अग्निर्वै गायत्रमग्निमेवास्यैतच्छिरः करोत्यथो शिर एवास्यैतदनस्थिकममृतं करोति ॥३५॥ रथन्तरं दक्षिणे पक्षे । इयं वै रथन्तरमियमु वाऽएषां लोकानाꣳ रसतमोऽस्याꣳ ह्येमे सर्वे रसा रसंतमꣳ ह वै तद्रथन्तरमित्याचक्षते परोऽक्षं परोऽक्षकामा हि देवा इमामेवास्यैतद्दक्षिणं पक्षं करोत्यथो दक्षिणमेवास्यैतत्पक्षमनस्थिकममृतं करोति ॥३६॥ बृहदुत्तरे पक्षे । द्यौर्वै बृहद्द्यौर्हि बर्हिष्ठा दिवमेवास्यैतदुत्तरं पक्षं करोत्यथोऽउत्तरमेवास्यैतत्पक्षमनस्थिकममृतं करोति ॥३७॥ वामदेव्यमात्मन् । प्राणो वै वामदेव्यं वायुरु प्राणः सर्वेषामु हैष देवानामात्मा यद्वायुर्वायुमेवास्यैतदात्मानं करोत्यथोऽआत्मानमेवास्यैतदनस्थिकममृतं करोति ॥३८॥ यज्ञायज्ञियं पुच्छम् । चन्द्रमा वै यज्ञायज्ञियं यो हि कश्च यज्ञः संतिष्ठतऽएतमेव तस्याकृतीनाꣳ रसोऽप्येति तद्यदेतं यज्ञो-यज्ञोऽप्येति तस्माच्चन्द्रमा यज्ञायज्ञियं चन्द्रमसमेवास्यैतत्पुच्छं करोत्यथो पुच्छमेवास्यैतदनस्थिकममृतं करोति ॥३९॥ अथ प्रजापतेर्हृदयं गायति । असौ वाऽआदित्यो हृदयꣳ श्लक्ष्णा एष श्लक्ष्णꣳ हृदयं परिमण्डल एष परिमण्डलꣳ हृदयमात्मन्गायत्यात्मन्हि हृदयं निकते निकते हि हृदयं दक्षिणे निकतेऽतो हि हृदयं नेदीय आदित्य-

मेवास्यैतद्धृदयं करोत्यथो हृदयमेवास्यैतदनस्थिकममृतं करोति ॥४०॥ प्रज्ञासु च प्रजापतौ च गायति । तद्यत्प्रज्ञासु गायति तत्प्रज्ञासु हृदयं दधात्यथ यत्प्रजापतौ गायति तदग्नौ हृदयं दधाति ॥४१॥ यद्वेव प्रज्ञासु च प्रजापतौ च गायति । अयं वा अग्निः प्रज्ञाश्च प्रजापतिश्च तद्यदग्नौ गायति तदेव प्रज्ञासु च प्रजापतौ च हृदयं दधाति ॥४२॥ ता वैता अमृतेष्टकाः । ता उत्तमा उपदधात्यमृतं तदस्य सर्वस्योत्तमं दधाति तस्मादस्य सर्वस्यामृतमुत्तमं नान्योऽधर्यागायेदिष्टका वाऽएता विचितो ह स्याद्यदन्योऽधर्यागायेत् ॥४३॥ ब्राह्मणम् ॥ २ ॥ प्रथमोऽध्यायः [५६.] ॥ ॥

उपवसथीयेऽहन्प्रातरुदितऽआदित्ये । वाचं विसृज्यते वाचं विसृज्य पञ्चगृहीतमाज्यं गृह्णीते तत्र पञ्च हिरण्यशकलान्प्रास्यत्यथैतत्त्रयꣳ समासिक्तं भवति दधि मधु घृतं पात्र्यां वा स्थाल्यां वोरुबिल्यां तदुपरिष्टाद्भर्मुष्टिं निदधाति ॥१॥ अथाग्निमारोहति । नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषऽइत्यत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र तस्माऽअलं यद्धिꣳस्याद्यं जिघिꣳसिषेद्यमु वाऽएष हिनस्ति हरसा वैनꣳ शोचिषा वार्चिषा वा हिनस्ति तथो हैनमेष एतैर्न हिनस्त्यन्यांस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भवेति यथैव यजुस्तथा बन्धुः ॥२॥ आरुह्याग्निꣳ स्वयमातृण्णां व्याघारयति । आज्येन पञ्चगृहीतेन तस्योक्तो बन्धुः ॥३॥ स्वयमातृण्णां व्याघारयति । प्राणः स्वयमातृण्णा प्राणे तदन्नं दधाति ॥४॥ यद्वेव स्वयमातृण्णां व्याघारयति । उत्तरवेदिर्हैषाग्नेरथ याममूं पूर्वां व्याघारयत्यधरस्य साथ हैषाग्नेस्तामेतद्व्याघारयति ॥५॥ पश्यंस्तत्र हिरण्यं व्याघारयति । प्रत्यक्षं वै तद्यत्पश्यति प्रत्यक्षꣳ सोत्तरवेदिः प्रास्ता एवेह भवन्ति परोऽक्षं वै तद्यत्प्रास्ताः परोऽक्षमियमुत्तरवेदिः ॥६॥ स्वाहाकारेण तां व्याघारयति । प्रत्यक्षं वै तद्यत्स्वाहाकारः प्रत्यक्षꣳ सोत्तरवेदिर्वेट्कारेणेमां परोऽक्षं वै तद्यद्वेट्कारः

परोऽक्षमियमुत्तरवेदिराज्येनाज्येन क्युत्तरवेदिं व्याघारयन्ति पञ्चगृहीतेन पञ्चगृहीतेन क्युत्तरवेदिं व्याघारयन्ति व्यतिहारं व्यतिहारꣳ क्युत्तरवेदिं व्याघारयन्ति ॥७॥ नृषदे वेडिति । प्राणो वै नृषन्मनुष्या नरस्तस्योऽयं मनुष्येषु प्राणोऽग्निस्तमेतत्प्रीणात्यप्सुषदे वेडिति योऽप्स्वग्निस्तमेतत्प्रीणाति बर्हिषदे वेडिति य ओषधिषग्निस्तमेतत्प्रीणाति वनसदे वेडिति यो वनस्पतिषग्निस्तमेतत्प्रीणाति स्वर्विदे वेडित्ययमग्निः स्वर्विदिममेवैतदग्निं प्रीणाति ॥८॥ यद्वै वाक् । नृषदे वेडप्सुषदे वेडित्यस्यैवैतान्यग्नेर्नामानि तान्येतत्प्रीणाति तानि हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यतेऽथोऽएतानेवैतद्ग्रीनस्मिन्नग्नौ नामग्राहं दधाति ॥९॥ पञ्चैता आकृतीर्जुहोति । पञ्चचितिकोऽग्निः पञ्चर्तव संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्भ्रेन प्रीणाति ॥१०॥ अथैनꣳ समुन्दति । दध्ना मधुना घृतेन ज्ञायतऽएष एतच्छ्रीयते स एष सर्वस्माऽअन्नाय ज्ञायते सर्वम्वेतद्भ्रं यद्दधि मधु घृतꣳ सर्वेणैवैनमेतद्भ्रेन प्रीणाति सर्वतः समुन्दति सर्वत एवैनमेतत्सर्वेणान्नेन प्रीणाति ॥११॥ यद्वैवैनꣳ समुन्दति । अत्रैष सर्वोऽग्निः संस्कृतस्तस्मिन्देवा एतद्रूपमुत्तममदधुस्तथैवास्मिन्नयमेतद्रूपमुत्तमं दधात्यन्नं वै रूपमेतदु परममन्नं यद्दधि मधु घृतं तद्यदेव परमꣳ रूपं तदस्मिन्नेतदुत्तमं दधाति सर्वतः समुन्दत्यपि बाह्येन परिश्रितः सर्वत एवास्मिन्नेतद्रूपमुत्तमं दधाति दर्भैस्ते हि शुद्धा मेध्या अग्रेयग्रꣳ हि देवानाम् ॥१२॥ यद्वैवैनꣳ समुन्दति । एतद्वै यत्रैतं प्राणा ऋषयोऽग्रेऽग्निꣳ समस्कुर्वंस्तदस्मिन्नदोऽमुं पुरस्ताद्गमकुर्वतादः सन्नूरब्दीयमथास्मिन्नेतꣳ संचितऽउपरिष्टाद्गमकुर्वत तद्यत्समुन्दति यऽएवास्मिंस्ते प्राणा ऋषयः सचितऽउपरिष्टाद्गमकुर्वत तानेवैतत्प्रीणाति दध्ना मधुना घृतेन तस्योक्तो बन्धुः ॥१३॥ ये देवा देवानाम् । यज्ञिया यज्ञियानामिति देवा ह्येते देवानां यज्ञिया ऽ यज्ञियानाꣳ

संवत्सरीणमुप भागमासतऽइति संवत्सरीणꣳ ह्येतऽएतं भागमुपासतेऽकृतादो ह्विषो यज्ञेऽअस्मिन्नित्यकृतादो हि प्राणाः स्वयं पिबन्तु मधुनो घृतस्येति स्वयमस्य पिबन्तु मधुनश्च घृतस्य चेत्येतत् ॥ १४॥ ये देवा देवेषु । अधि देवत्वमायन्निति देवा ह्येते देवेष्वधि देवत्वमायन्ये ब्रह्मणः पुरएतारोऽअस्येत्ययमग्निर्ब्रह्म तस्यैते पुरएतारो येभ्यो नऽऋते पवते धाम किं चनेति न हि प्राणेभ्य ऋते पवते धाम किं चन न ते दिवो न पृथिव्या अधि स्नुष्टिति नैव ते दिवि न पृथिव्यां यदेव प्राणभृत्तस्मिंस्तऽइत्येतत् ॥ १५॥ द्वाभ्याꣳ समुक्षति । द्विपाद्यजमानो यजमानोऽग्र्यावानग्र्यावत्यस्य मात्रा तावतैवैनमेतत्समुक्षति ॥ १६॥ अथ प्रत्यवरोहति । प्राणदा अपानदा इति सर्वे ह्येते प्राणा योऽयमग्निश्चितः स यदेतामत्रात्मनः परिदां न वदेतात्र ह्येवास्येष प्राणान्वृञ्जीताथ यदेतामत्रात्मनः परिदां वदते तथो ह्यस्येष प्राणान्न वृङ्क्ते प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदा इत्येतद्वा मेऽसीत्येवैतदाह्यान्यांस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भवेति यथैव यजुस्तथा बन्धुः ॥ १७॥ प्रत्येत्य प्रवर्ग्योपसद्यां प्रचरति । प्रवर्ग्योपसद्यां प्रचर्याथास्मै व्रतं वार्धव्रतं वा प्रयच्छत्यथ प्रवर्ग्योपसद्यामथ प्रवर्ग्यमुत्सादयत्याप्त्वा तं कामं यस्मै कामायैनं प्रवृणक्ति ॥ १८॥ तं वै परिष्यन्दऽउत्सादयेत् । तप्तो वाऽएष शुशुचानो भवति तं यदस्यामुत्सादयेदिमामस्य शुगृच्छेद्यदप्सूत्सादयेदपोऽस्य शुगृच्छेद्यत्परिष्यन्दऽउत्सादयति तथो ह्येवापो हिनस्ति नेमां यदृच्छास्यति न प्रास्यति तेनापो न हिनस्त्यथ यत्समक्तमापः परियन्ति शान्तिर्वाऽआपस्तेनोऽइमां न हिनस्ति तस्मात्परिष्यन्दऽउत्सादयेत् ॥ ११॥ अग्नौ वेवोत्सादयेत् । इमे वै लोका एषोऽग्निरापः परिश्रितस्तं यदग्नाऽउत्सादयति तदेवैनं परिष्यन्दऽउत्सादयति ॥ २०॥ यद्वेवाग्नाऽउत्सादयति । इमे वै लोका एषोऽग्निरग्निर्वायुरादित्यस्तदेते प्रवर्ग्याः स यदन्यत्राग्नेरुत्सादयेदेतांस्तद्देवान्बर्हिर्भ्यो

लोकेभ्यो दध्यादथ यदग्नाऽउत्सादयत्येतानेवैतद्देवानेषु लोकेषु दधाति ॥२१॥ यद्वैवाग्नाऽउत्सादयति । शिर एतद्यज्ञस्य यत्प्रवर्ग्य आत्मायमग्निश्चितः स यदन्यत्राग्नेरुत्सादयेद्वर्हिर्धास्माद्धिरो दध्यादथ यदग्नाऽउत्सादयत्यात्मानमेवास्यैतत्संस्कृत्य शिरः प्रतिदधाति ॥२२॥ स्वयमातृण्णया सꣳस्पृष्टं प्रथमं प्रवर्ग्यमुत्सादयति । प्राणः स्वयमातृण्णा शिरः प्रवर्ग्य आत्मायमग्निश्चितः शिरश्च तदात्मानं च प्राणेन संतनोति संदधात्युत्साद्य प्रवर्ग्यं यथा तस्योत्सादनम् ॥२३॥ ब्राह्मणम् ॥ ३ [२. १.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या११० ॥ ॥

प्रत्येत्याग्निं प्रहरिष्यन् । आज्रुतीश्च जुहोति समिधश्चादधात्येतद्वाऽएनं देवा एष्यन्तं पुरस्तादन्नेनाप्रीणन्नाज्रुतिभिश्च समिद्भिश्च तथैवैनमयमेतदेष्यन्तं पुरस्तादन्नेन प्रीणात्याज्रुतिभिश्च समिद्भिश्च स वै पञ्चगृहीतं गृह्णीते तस्योक्तो बन्धुः ॥१॥ अथ षोडशगृहीतं गृह्णीते । षोडशकलः प्रजापतिः प्रजापतिरग्निरात्मसंमितेनैवैनमेतदन्नेन प्रीणाति यदु वाऽआत्मसंमितमन्नं तदवति तन्न क्षिनस्ति यद्भूयो क्षिनस्ति तद्यत्कनीयो न तदवति समान्याꣳ स्रुचि गृह्णीते समानो हि स यमेतत्प्रीणाति वैश्वकर्मणाभ्यां जुहोति विश्वकर्मायमग्निस्तमेवैतत्प्रीणाति तिस्र आज्रुतीर्जुहोति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥२॥ अथ समिध आदधाति । यथा तर्पयित्वा परिवेविष्यात्तादृक्तदौडुम्बर्यो भवत्यूर्ग्वै रस उडुम्बर ऊर्जैवैनमेतद्रसेन प्रीणात्यार्द्रा भवत्येतद्वै वनस्पतीनामनार्तं जीवं यदार्द्रं तद्यदेव वनस्पतीनामनार्तं जीवं तेनैनमेतत्प्रीणाति घृते न्युप्ता भवत्याग्नेयं वै घृतꣳ स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणाति सर्वाꣳ रात्रिं वसन्ति तत्र हि ता रसेन सम्पद्यन्ते तिस्रः समिध आदधाति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥३॥ यद्वैवैता आज्रुतीर्जुहोति । एतद्वाऽएनं देवा एष्यन्तं पुरस्तादन्नेन समस्कुर्वन्नेताभिराज्रुतिभिस्तथैवैनमयमेतदेष्यन्तं पुरस्ता-

दन्नेन संस्करोत्येताभिराकृतिभिः ॥४॥ स वै पञ्चगृहीतं गृह्णीते । पञ्चधाविहितो वाऽअयꣳ शीर्षन्प्राणो मनो वाक् प्राणश्चक्षुः श्रोत्रमेतमेवास्मिन्नेतत्पञ्चधाविहितꣳ शीर्षन्प्राणं दधात्यग्निस्तिग्मेन शोचिषेति तिग्मवत्या शिर एवास्यैतया सꣳश्यति तिग्मतायै ॥५॥ अथ षोडशगृहीतं गृह्णीते । अष्टौ प्राणा अष्टावङ्गान्येतामभिसम्पदꣳ समान्याꣳ सुचि गृह्णीते समाने खेवात्मन्नङ्गानि च प्राणाश्च भवन्ति नाना जुहोत्यङ्गेभ्यश्च तत्प्राणेभ्यश्च विधृतिं करोति वैश्वकर्मणाभ्यां जुहोति विश्वकर्मायमग्निस्तमेवैतत्संस्करोति तिस्र आकृतीर्जुहोति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन संस्करोति सप्तदशभिर्ऋग्भिः सप्तदशः प्रजापतिः प्रजापतिरग्निर्यावानाग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्संस्करोत्येकविꣳशतिगृहीतेन द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳश एतामभिसम्पदम् ॥६॥ यद्वै वैताः समिध आदधाति । एतद्वाएनं देवाः सर्वं कृत्स्नꣳ संस्कृत्याथैनमेतेनान्नेनाप्रीणन्नेताभिः समिद्भिस्तथैवैनमयमेतत्सर्वं कृत्स्नꣳ संस्कृत्याथैनमेतेनान्नेन प्रीणात्येताभिः समिद्भिरौदुम्बर्यो भवत्यार्द्रा घृते न्युप्ता सर्वाꣳ रात्रिं वसन्ति तस्योक्तो बन्धुरुदेनमुत्तरां नयेन्द्रेमं प्रतरां नय यस्य कुर्मो गृहे हविरिति यथा यजुस्तथा बन्धुस्तिस्रः समिध आदधाति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति तिस्र आकृतीर्जुहोति तत्षट् तस्योक्तो बन्धुः ॥७॥ ब्राह्मणम् ॥ १ [२. २.] ॥ ॥

अथातः सम्प्रेष्यति । उप्यक्ष्मुपयक्षोपयमनीरग्नये प्रक्रियमाणायानुब्रूह्यग्नीदेकस्फ्यायानूदेहि ब्रह्मन्नप्रतिरथं जपेति ॥१॥ एतद्वै देवानुपप्रेष्यतः । एतं यज्ञं तꣳस्यमानान्दक्षिणतोऽसुरा रक्षाꣳसि नाष्ट्रा अभिघाꣳसन्न यक्ष्यधे न यज्ञं तꣳस्यध ऽइति ॥२॥ ते देवा इन्द्रमब्रुवन् । त्वं वै नः श्रेष्ठो बलिष्ठो वीर्यवत्तमोऽसि त्वमिमानि रक्षाꣳसि प्रतियतस्वेति तस्य वै मे ब्रह्म द्वितीयमस्त्विति तथेति तस्मै

वै बृहस्पतिं द्वितीयमकुर्वन्ब्रह्म वै बृहस्पतिस्तऽइन्द्रेण चैव बृहस्पतिना च दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतं यज्ञमतन्वत ॥३॥ तद्वाऽएतत्क्रियते । यद्देवा अकुर्वन्निदं नु तानि रक्षाꣳसि देवैरेवापहतानि यत्वेतत्करोति यद्देवा अकुर्वंस्तत्करवाणीत्यथोऽइन्द्रेण चैवैतद्बृहस्पतिना च दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतं यज्ञं तनुते ॥४॥ स यः स इन्द्रः । एष सोऽप्रतिरथोऽथ यः स बृहस्पतिरेष स ब्रह्मा तद्यद्ब्रह्माप्रतिरथं ज्ञपतीन्द्रेण चैवैतद्बृहस्पतिना च दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा अपहत्याभयेऽनाष्ट्रऽएतं यज्ञं तनुते तस्माद्ब्रह्माप्रतिरथं ज्ञपति ॥५॥ आशुः शिशानो वृषभो न भीम इति । ऐन्द्र्योऽभिरूपा द्वादश भवन्ति द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैतद्दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा अपहन्ति त्रिष्टुब्भिर्वज्रो वै त्रिष्टुब्वज्रेणैवैतद्दक्षिणतोऽसुरान्रक्षाꣳसि नाष्ट्रा अपहन्ति ता द्वाविꣳशतिर्गायत्र्यः सम्पद्यन्ते तदाग्नेय्यो भवन्त्यग्निकर्म हि ॥६॥ अथैनमुच्चक्रुति । उद्वा विश्वे देवा अग्ने भरन्तु चित्तिभिरिति तस्योक्तो बन्धुः ॥७॥ अथाभिप्रयन्ति । पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरिति देवाश्चासुराश्चोभये प्राजापत्या दिद्यवस्पर्धन्त ते देवा असुराणां दिशोऽवृञ्जत तथैवैतद्यजमानो द्विषतो भ्रातृव्यस्य दिशो वृङ्क्ते दैवीरिति तदेना दैवीः कुरुते यज्ञमवन्तु देवारिति यज्ञमिमवन्तु देवीरित्येतदपामतिं दुर्मतिं बाधमाना इत्यशनाया वाऽअमतिरशनायामपबाधमाना इत्येतद्रायस्पोषे यज्ञपतिमाभजन्तीरिति रय्यां च पोषे च यज्ञपतिमाभजन्तीरित्येतद्रायस्पोषेऽधि यज्ञोऽस्थादिति रय्यां च पोषे चाधि यज्ञोऽस्थादित्येतत् ॥८॥ समिद्धेऽग्नावधि मामहान इति । यजमानो वै मामहान उक्थपत्र इत्युक्थानि खेतस्य पत्राणीड्य इति यज्ञियं इत्येतदृभीत इति धारित इत्येतत्तप्तं घर्मं परिगृह्यायजन्तेति तप्तꣳ खेतं घर्मं परिगृह्यायजन्तोर्ज्ञा यद्यज्ञमयजन्त देवा इत्यूर्ज्ञा

क्षेतं यज्ञमयजन्त देवाः ॥ १ ॥ दैव्याय धर्त्रे ज्ञोष्ट्र्ऽइति । दैवो क्षेष धर्ता ज्ञोषयितृतमो देवश्रीः श्रीमनाः शतपया इति देवश्रीर्क्षेष श्रीमनाः शतपयाः परिगृह्य देवा यज्ञमायन्निति परिगृह्य क्षेतं देवा यज्ञमायन्देवा देवेभ्योऽअधर्यन्तो अस्थुरित्यधरो वै यज्ञो देवा देवेभ्यो यज्ञियन्तोऽस्थुरित्येतत् ॥ १० ॥ वीतꣳ हविः शमितꣳ शमिता यजध्याऽइति । इष्टꣳ स्विष्टमित्येतत्तुरीयो यज्ञो यत्र हव्यमेतीत्यधर्युः पुरस्ताद्यजूꣳषि ज्ञपति क्षेता पश्चादचोऽन्वाह ब्रह्मा दक्षिणतोऽप्रतिरथं ज्ञपत्येष एव तुरीयो यज्ञस्ततो वाका आशिषो नो ज्ञुषन्तामिति ततो नो वाकाश्चाशिषश्च ज्ञुषन्तामित्येतत् ॥ ११ ॥ सूर्यरश्मिर्हरिकेशः पुरस्तात् । सविता ज्योतिरुदयां अज्ञस्रमित्यसौ वाऽआदित्य एषोऽग्निः स एष सूर्यरश्मिर्हरिकेशः पुरस्तात्सवितैतज्ज्योतिरुद्यन्हव्यं यज्ञस्रं तस्य पूषा प्रसवे याति विद्वानिति पशवो वै पूषा तऽएतस्य प्रसवे प्रेरते सम्पश्यन्विश्वा भुवनानि गोपा इत्येष वाऽइदꣳ सर्वꣳ सम्पश्यत्येष ऽएवास्य सर्वस्य भुवनस्य गोप्ता ॥ १२ ॥ तया अमुष्मादादित्यादर्वाच्यः पञ्च दिशः । ता एतद्देवा असुराणामवृञ्जतायो ता एवैतत्समारोहंस्ता ऽएवैतद्यजमानो द्विषतो भ्रातृव्यस्य वृङ्क्तेऽथो ता एवैतत्समारोहत्यथोऽएतद्वाऽएताभिर्देवा आतः सम्प्राप्नुवंस्तयैवाभिरयमेतदातः सम्प्राप्नोति ॥ १३ ॥ अथाश्मानं पृश्निमुपदधाति । असौ वाऽआदित्योऽश्मा पृश्निरमुमेवैतदादित्यमुपदधाति पृश्निर्भवति रश्मिभिर्हि मण्डलं पृश्नि तमन्तरेणाहवनीयं च गार्हपत्यं चोपदधात्ययं वै लोको गार्हपत्यो द्यौराहवनीय एतं तदिमौ लोकावन्तरेण दधाति तस्मादेष इमौ लोकावन्तरेण तपति ॥ १४ ॥ आग्नीध्रवेलायाम् । अन्तरिक्षं वाऽआग्नीध्रमेतं तदन्तरिक्षे दधाति तस्मादेषोऽन्तरिक्षायतनो व्यधे व्यधे क्षेष इतः ॥ १५ ॥ स एष प्राणः । प्राणमेवैतदात्मन्धत्ते तदेतदायुरायुरेवैतदात्मन्धत्ते तदेतदन्नमायुर्क्षेतदन्नमु वाऽआयुरश्मा भवति स्थिरो वाऽअश्मा स्थिरं तदायुः

कुरुते पृश्निर्भवति पृश्नीव क्षत्रम् ॥ १६ ॥ स उपदधाति । विमान एष दिवो मध्य ऽआस्त ऽइति विमानो ह्येष दिवो मध्यऽआस्त ऽआपप्रिवान्रोदसी अन्तरिक्षमित्युग्वान्वाऽएष इमांल्लोकानापूरयति स विश्वाचीरभिचष्टे घृताचीरिति स्रुचश्चैतद्वेदीश्चाहान्तरा पूर्वमपरं च केतुमित्यन्तरेमं च लोकममुं चेत्येतदथो यच्चैदमेतर्हि चीयते यच्चादः पूर्वमचीयतेति ॥ १७ ॥ उद्ना समुद्रोऽअरुणः सुपर्ण इति । उद्ना ह्येष समुद्रोऽरुणः सुपर्णः पूर्वस्य योनिं पितुराविवेशेति पूर्वस्य ह्येष एतं योनिं पितुराविशति मध्ये दिवो निहितः पृश्निरश्मेति मध्ये ह्येष दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्ताविति विक्रममाणो वाऽएष एषां लोकानामन्तान्याति ॥ १८ ॥ द्वाभ्यामुपदधाति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदुपदधाति त्रिष्टुब्भ्यां त्रैष्टुभो ह्येष न सादयत्यसन्नो ह्येष न सूददोहसाधिवदति प्राणो वै सूददोहाः प्राण एष किं प्राणे प्राणं दध्यामिति तं निधाय यथा न नश्येत् ॥ १९ ॥ अथोपायन्ति । इन्द्रं विश्वा अवीवृधन्निति तस्योक्तो बन्धुर्देवब्रूर्यज्ञ आ च वक्षत्सुम्नब्रूर्यज्ञ आ च वक्षदिति देवब्रूश्चैव यज्ञः सुम्नब्रूश्च यक्षदग्निर्देवो देवाँ२॥ऽआ च वक्षदिति यक्षच्चैवाग्निर्देवो देवाना च वक्षदित्येतत् ॥ २० ॥ वाजस्य मा प्रसवः । उद्नाभेणोद्ग्रभीत् अधा सपत्नानिन्द्रो मे निग्राभेणाधरा२॥ऽअकरिति यथैव यजुस्तथा बन्धुः ॥ २१ ॥ उद्नाभं च निग्राभं च । ब्रह्म देवा अवीवृधन् अधा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यतामिति यथैव यजुस्तथा बन्धुः ॥ २२ ॥ तस्या अमुष्मादादित्यादूर्धाश्चतस्रो दिशः । ता एतदेवा असुराणामवृञ्जतायो ता एवैतत्समारोहंस्ता उ ऽएवैतद्यजमानो द्विषतो भ्रातृव्यस्य वृङ्क्ऽथो ता एवैतत्समारोहत्यथोऽएतद्वाऽएताभिर्देवा आतः सम्प्राप्नुवंस्तथैवाभिरयमेतदातः सम्प्राप्नोति ॥ २३ ॥ अथाग्निमारोहन्ति । क्रमधमग्निना नाकमिति स्वर्गो वै लोको नाकः क्रमधमनेनाग्निनैतꣳ स्वर्गं लोकमित्येतदुक्थꣳ

कृस्तेषु बिभ्रत इत्युष्णꣳ क्षेतऽएतꣳ कृस्तेषु बिभ्रति दिवस्पृष्ठꣳ स्वर्गꣳवा मिश्रा देवेभिराधमिति दिवस्पृष्ठꣳ स्वर्गं लोकं गवा मिश्रा देवेभिराधमित्येतत् ॥२४॥ प्राचीमनु प्रदिशं प्रेहि विद्वानिति । प्राची वै दिगग्नेः स्वामनु प्रदिशं प्रेहि विद्वानित्येतदग्नेरग्ने पुरोऽअग्निर्भवेकेत्यस्य त्वमग्नेरग्ने पुरोऽग्निर्भवेकेत्येतद्विश्वा आशा दीद्यानो विभाहीति सर्वा आशा दीप्यमानो विभाहीत्येतद्दूर्ꣳ नो धेहि द्विपदे चतुष्पदऽइत्याशिषमाशास्ते ॥२५॥ पृथिव्या अरुꣳ । उदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहमिति गार्हपत्याद्याग्नीध्रीयमागरुत्याग्नीध्रीयादाहवनीयं दिवो नाकस्य पृष्ठात्स्वर्ज्योतिरगामरुमिति दिवो नाकस्य पृष्ठात्स्वर्गं लोकमगामरुमित्येतत् ॥२६॥ स्वर्यन्तो नापेक्षन्ते । आ द्याꣳ रोहन्ति रोदसीऽइति न वै तेऽपेक्षन्ते ये स्वर्गं लोकं यन्ति यज्ञं ये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिरऽइत्येष एव यज्ञो विश्वतोधार एतऽउऽएव सुविद्वाꣳसो यऽएतं वितन्वते ॥२७॥ अग्ने प्रेहि प्रथमो देवयतामिति । इममेतदग्निमाह त्वमेषां प्रेहि प्रथमो देवयतामिति चक्षुर्देवानामुत मर्त्यानामित्युभयेषाꣳ रैतद्देवमनुष्याणां चक्षुरियक्षमाणा भृगुभिः सञ्जोषा इति यजमाना भृगुभिः सञ्जोषा इत्येतत्स्वर्यन्तु यजमानाः स्वस्तीति स्वर्गं लोकं यन्तु यजमानाः स्वस्तीत्येतत् ॥२८॥ तया अमुष्मिंल्लोके पञ्च दिशः । ता एतद्देवा असुराणामवृञ्जताथो ता एवैतत्समारोहꣳस्ता उऽएवैतद्यजमानो द्विषतो भ्रातृव्यस्य वृङ्क्तेऽथो ता एवैतत्समारोहत्यथोऽएतद्वाऽएताभिर्देवा आतः सम्प्राप्नुवंस्तथैवाभिरयमेतदातः सम्प्राप्नोति ॥२९॥ अथैनमभिजुहोति । एतद्वाऽएनं देवा ईषिवाꣳसमुपरिष्टाद्व्रेनाप्रीणन्नेतयाऽऊत्या तथैवैनमयमेतदीषिवाꣳसमुपरिष्टाद्व्रेन प्रीणात्येतयाऽऊत्या कृष्णाये शुल्कवत्साये पयसा रात्रिर्वै कृष्णा शुल्कवत्सा तस्या असावादित्यो वत्सः स्वेनैवैनमेतद्भागेन स्वेन रसेन प्रीणात्युपरि धार्यमाण उपरि हि स यमेतत्प्रीणाति दोहनेन दोहनेन हि पयः प्रदीयते ॥३०॥ यद्वैवैनमभि-

नुक्रोति । शिर एतद्यज्ञस्य यदग्निः प्राणाः पयः शीर्षंस्तत्प्राणं दधाति यथा स्वयमातृण्णामभिप्रक्षरेदेवमभिनुक्रयात्प्राणाः स्वयमातृण्णा रस एष शिरश्च तत्प्राणं च रसेन संतनोति संदधाति नक्तोषासा समनसा विरूपेऽइति तस्योक्तो बन्धुः ॥३१॥ अग्ने सहस्रात्नेति । हिरण्यशकलैर्वाऽएष सहस्रात्नः शतमूर्धन्निति यद्दः शतशीर्षा रुद्रोऽसृज्यत शतं ते प्राणाः सहस्रं व्याना इति शतꣳ हैव तस्य प्राणाः सहस्रं व्याना यः शतशीर्षा त्वꣳ साहस्रस्य राय ईशिषऽइति त्वꣳ सर्वस्यै रय्याऽईशिषऽइत्येतत्तस्मै ते विधेम वाजाय स्वाकेत्येष वै वाजस्तमेतत्प्रीणाति ॥३२॥ द्वाभ्यामभिनुक्रोति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदभिनुक्रोति ॥३३॥ अथैनं निदधाति । सुपर्णोऽसि गरुत्मानित्येतद्वाऽएनमदो विकृत्या सुपर्णं गरुत्मन्तं विकरोति तꣳ सुपर्णं गरुत्मन्तं चिनोति तꣳ सुपर्णं गरुत्मन्तं कृत्वात्ततो निदधाति पृष्ठे पृथिव्याः सीद भासान्तरिक्षमापृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दꣳहेत्येवꣳ क्वेष एतत्सर्वं करोति ॥३४॥ आनुक्रानः सुप्रतीकः पुरस्तादिति । आनुक्रानो नः सुप्रतीकः पुरस्तादित्येतदग्ने त्वं योनिमासीद साधुयेत्येष वाऽअस्य स्वो योनिस्तꣳ साधासीदेत्येतदस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्निति द्यौर्वाऽउत्तरꣳ सधस्थं विश्वे देवा यजमानश्च सीदतेति तद्विश्वैर्देवैः सह यजमानꣳ सादयति द्वाभ्यां निदधाति तस्योक्तो बन्धुर्वषट्कारेण तस्योपरि बन्धुः ॥३५॥ अथास्मिन्त्समिध आदधाति । एतद्वाऽएनं देवा ईयिवाꣳसमुपरिष्टादन्नेनाप्रीणान्त्समिद्भिश्चाज्यैतिभिश्च तथैवैनमयमेतदीयिवाꣳसमुपरिष्टादन्नेन प्रीणाति समिद्भिश्चाज्यैतिभिश्च ॥३६॥ स वै शमीमयीं प्रथमामादधाति । एतद्वाऽएष एतस्यामाकृत्याꣳ कृतायां प्रादीप्यतोदञ्वलत्तस्मादेवा अबिभयुर्यद्वै नोऽयं न क्षिꣳस्यादिति तऽएताꣳ शमीमपश्यंस्तयैनमशमयंस्तथ्यदेतꣳ शम्याशमयंस्तस्माच्छमी तथैवैनमयमेतच्छम्या शमयति शान्त्याऽएव न जग्ध्यै ॥३७॥

ताꣳ सवितुर्वरेण्यस्य । चित्रामाहं वृणे सुमतिं विश्वजन्याम् यामस्य कण्वो ऽअदुहत्प्रपीनाꣳ सहस्रधारां पयसा महीं गामिति कण्वो ह्येनां ददर्श सा ह्यस्मै सहस्रधारा सर्वान्कामान्दुदुहे तस्यैवैतद्यजमानाय सहस्रधारा सर्वान्कामान्दुहे ॥३८॥ अथ वैकङ्कतीमादधाति । तस्या उक्तो बन्धुर्विधेम ते परमे जन्मन्नग्ऽइति द्यौर्वाऽअस्य परमं जन्म विधेम स्तोमैरवरे सधस्थ इत्यन्तरिक्षं वाऽअवरꣳ सधस्थं यस्माद्योनेरुदारिथा यजे तमित्येष वाऽअस्य स्वो योनिस्तं यजऽइत्येतत्प्रत्वे हवीꣳषि जुह्वरे समिद्धऽइति यदा वाऽएष समिध्यतेऽथैतस्मिन्हवीꣳषि प्रजुह्वति ॥३९॥ अथौदुम्बरीमादधाति । ऊर्ग्वै रस उदुम्बर ऊर्जैवैनमेतद्रसेन प्रीणाति कर्णकवती भवति पशवो वै कर्णकाः पशुभिरेवैनमेतद्रसेन प्रीणाति यदि कर्णकवतीं न विन्देद्दधिद्रप्समुपकृत्यादध्यात्तस्यैद्दधिद्रप्स उपतिष्ठते तदेव पशूनां प्रेद्धोऽअग्ने दीदिहि पुरो न इति विराजादधात्यन्नं विराडन्नेनैवैनमेतत्प्रीणाति तिस्रः समिध आदधाति त्रिवृद्वाग्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रसेन प्रीणाति ॥४०॥ अथाकूतीर्जुहोति । यथा परिविष्यानुपायय्येत्तादृक्तत्स्रुवेण पूर्वे स्रुचोत्तरामग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् ऋध्यामा तऽओहैरिति यस्ते हृदिस्पृक्स्तोमस्तं तऽऋध्यासमित्येतत्पङ्क्त्या जुहोति पञ्चपदा पङ्क्तिः पञ्चचितिकोऽग्निः पञ्चर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रसेन प्रीणाति ॥४१॥ अथ वैश्वकर्मणीं जुहोति । विश्वकर्मायमग्निस्तमेवैतत्प्रीणाति चित्तिं जुहोमि मनसा घृतेनेति चित्तमेषां जुहोमि मनसा च घृतेन चेत्येतद्यथा देवा इहागमन्निति यथा देवा इहागच्छानित्येतद्धीतिहोत्रा ऋतावृध इति सत्यवृध इत्येतत्पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मण ऽइति योऽस्य सर्वस्य भूतस्य पतिस्तस्मै जुहोमि विश्वकर्मणऽइत्येतद्विश्वाह्यादाभ्यꣳ हविरिति सर्वदेवात्तितꣳ हविरित्येतत् ॥४२॥ अथ पूर्णाहुतिं जुहोति ।

सर्वमेतत्यत्पूर्णꣳ सर्वेणैवैनमेतत्प्रीणाति ॥४३॥ सप्त तेऽग्ने समिध इति । प्राणा वै समिधः प्राणा खेतꣳ समिन्धते सप्त जिह्वा इति यानमूत्सप्त पुरुषानेकं पुरुषमकुर्वंस्तेषामेतदाह सप्तऽऋषय इति सप्त हि तऽऋषय आसत्सप्त धाम प्रियाणीति छन्दाꣳस्येतदाह छन्दाꣳसि वाऽअस्य सप्त धाम प्रियाणि सप्त खोत्राः सप्तधा वा यज्ञस्तीति सप्त खेतꣳ खोत्राः सप्तधा यज्ञन्ति सप्त योनीरिति चितीरेतदाहापृणास्वेत्या प्रजायस्वेत्येतद्घृतेनेति रेतो वै घृतꣳ रेत एवैतदेषु लोकेषु दधाति स्वाखेति यज्ञो वै स्वाहाकारो यज्ञियमेवैतदिदꣳ सकृत्सर्वं करोति ॥४४॥ सप्त सप्तेति । सप्तचितिकोऽग्निः सप्तऽर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्प्रीणाति तिस्र आकुतीर्जुखोति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्रूपेण प्रीणाति तिस्रः समिध आदधाति तत्षट् तस्योक्तो बन्धुः ॥४५॥ तिष्ठन्त्समिध आदधाति । अस्थीनि वै समिधस्तिष्ठन्तीव वाऽअस्थीन्यासीन आकुतीर्जुखोति माꣳसानि वाऽआकुतय आसतऽइव वै माꣳसान्यन्तराः समिधो भवन्ति बाह्या आकुतयोऽन्तराणि खस्थीनि बाह्यानि माꣳसानि ॥४६॥ अथातः सम्पदेव । षट् पुरस्ताज्जुखोति षडुपरिष्टात्षड्विराश्मनः पृश्नेर्यन्ति द्वाभ्यामश्मानं पृश्निमुपदधाति चतुर्भिराग्नेर्यन्ति पञ्चभिरग्निमारोहन्ति तदेकां न त्रिꣳशदाकुतिरेव त्रिꣳशत्तमी द्वाभ्यामग्निं निदधाति तद्द्वात्रिꣳशद्द्वात्रिꣳशदक्षरानुष्टुप्सैषानुष्टुप् ॥४७॥ तस्या अमूस्तिस्रोऽनुष्टुभः । गार्हपत्ये सम्पादयन्ति तासामेतामत्रैकामाहरन्ति तद्यदेतामत्राहरत्यत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र तस्मै नालमासीद्यदन्नमात्स्यत् ॥४८॥ सोऽग्निमब्रवीत् । वयान्नमदानीति तथेति तस्माद्यदेवैतमत्राहरत्यथैषोऽलमन्नायालमाकुतिभ्यो भवति ॥४९॥ अथोऽआहुः । प्रजापतिरेवैतं प्रियं पुत्रमुरस्याधत्तऽइति स यो हैतदेवं वेद हैवं प्रियं पुत्रमुरसि धत्ते ॥५०॥ यद्वैवैतमत्राहरन्ति । यान्वै तात्सप्त पुरुषानेकं पुरुषमकुर्वन्नयमेव स

योऽयमग्निश्चीयतेऽथ यामेषां नामूर्धा॰ श्रियꣳ रसꣳ समुदौक्षन्नेष स यमेतमत्राग्निमाक्षरन्ति तद्यदेतमत्राक्षरन्ति यैवैतेषाꣳ सप्तानां पुरुषाणाꣳ श्रीर्यो रसस्तमेतदूर्धꣳ समुदूक्षन्ति तदस्यैतद्धिर आत्मायमग्निश्चित आत्मानमेवास्यैतत्संस्कृत्य शिरः प्रतिदधाति ॥ ५१ ॥ ब्राह्मणम्॥२ [२. ३.] ॥ द्वितीयोऽध्यायः [५७.] ॥ ॥

अथातो वैश्वानरं जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र वैश्वानरो देवता तस्माऽएतद्धविर्जुहोति तदेनꣳ हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यते द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरो वैश्वानरः ॥ १ ॥ यद्वै वैतं वैश्वानरं जुहोति । वैश्वानरं वाऽएतमग्निं जनयिष्यन्भवति तमदः पुरस्ताद्दक्षणीयायाꣳ रेतो भूतꣳ सिञ्चति यादृग्वै योनौ रेतः सिच्यते तादृग्जायते तद्यत्तत्र वैश्वानरꣳ रेतो भूतꣳ सिञ्चति तस्मादयमिꣳ वैश्वानरो जायतऽउपाꣳशु तत्र भवति रेतो वै तत्र यज्ञ उपाꣳशु वै रेतः सिच्यते निरुक्त इꣳ निरुक्तꣳ हि रेतो जातं भवति ॥ २ ॥ ॥ शतम्४१०० ॥ ॥ स यः स वैश्वानरः । इमे स लोका इयमेव पृथिवी विश्वमग्निर्नरोऽन्तरिक्षमेव विश्वं वायुर्नरो द्यौरेव विश्वमादित्यो नरः ॥ ३ ॥ ते ये तऽइमे लोकाः । इदं तद्धिर इदमेव पृथिव्योषधयः श्मश्रूणि तदेतद्विश्वं वाग्वाग्निः स नरः सोपरिष्टादस्य भवत्युपरिष्टाद्ध्यस्या अग्निः ॥ ४ ॥ इदमेवान्तरिक्षम् । तस्मादेतदलोमकमलोमकमिव ह्यन्तरिक्षं तदेतद्विश्वं प्राण एव वायुः स नरः स मध्येनास्य भवति मध्येन ह्यन्तरिक्षस्य वायुः ॥ ५ ॥ शिर एव द्यौः । नक्षत्राणि केशास्तदेतद्विश्वं चक्षुरेवादित्यः स नरस्तदवस्ताद्धोर्ष्णो भवत्यवस्ताद्धि दिव आदित्यस्तदस्यैतद्धिरो वैश्वानर आत्मायमग्निश्चित आत्मानमेवास्यैतत्संस्कृत्य शिरः प्रतिदधाति ॥ ६ ॥ अथ मारुतान्जुहोति । प्राणा वै मारुताः प्राणानेवास्मिन्नेतद्दधाति वैश्वानरꣳ हुत्वा शिरो वै वैश्वानरः शीर्षंस्तत्प्राणान्दधाति ॥ ७ ॥ एक एष भवति । एकमिव हि शिरः

सप्तेतरे सप्तकपाला यदु वाऽअपि बक्रु कृत्वः सप्त-सप्त सप्तैव तद्दीर्षण्येव तत्सप्त प्राणान्दधाति ॥८॥ निरुक्त एष भवति । निरुक्तमिव हि शिरोऽनिरुक्ता इतरेऽनिरुक्ता-इव हि प्राणास्तिष्ठन्नेतं जुहोति तिष्ठतीव हि शिर आसीन इतरानासत-इव हि प्राणाः ॥९॥ तद्यौ प्रथमौ मारुतौ जुहोति । इमौ तौ प्राणौ तौ मध्ये वैश्वानरस्य जुहोति मध्ये ह्येमौ शीर्ष्णः प्राणौ ॥१०॥ अथ यौ द्वितीयौ । इमौ तौ तौ समन्तिकतरं जुहोति समन्तिकतरमिव ह्येमौ प्राणौ ॥११॥ अथ यौ तृतीयौ । इमौ तौ तौ समन्तिकतरं जुहोति समन्तिकतरमिव ह्येमौ प्राणौ वागेवारण्येऽनूच्यः सोऽरण्येऽनूच्यो भवति बक्रु हि वाचा घोरं निगदति ॥१२॥ यद्वैव वैश्वानरमारुतान्जुहोति । क्षत्रं वै वैश्वानरो विण्मारुताः क्षत्रं च तद्विशं च करोति वैश्वानरं पूर्वं जुहोति क्षत्रं तत्कृत्वा विशं करोति ॥१३॥ एक एष भवति । एकस्यं तत्क्षत्रमेकस्याञ्च श्रियं करोति बक्रुव इतरे विशि तद्भूमानं दधाति ॥१४॥ निरुक्त एष भवति । निरुक्तमिव हि क्षत्रमनिरुक्ता इतरेऽनिरुक्तेव हि विट् तिष्ठन्नेतं जुहोति तिष्ठतीव हि क्षत्रमासीन इतरानास्तऽइव हि विट् ॥१५॥ तं वाऽएतम् । पुरोऽनुवाक्यवन्तं याज्यवन्तं वषट्कृते स्रुचा जुहोति कस्तेनेवेतरानासीनः स्वाहाकारेण क्षत्रायैव तद्विशं कृतानुकरामनुवर्त्मानं करोति ॥१६॥ तदाहुः । कथमस्यैते पुरोऽनुवाक्यवन्तो याज्यवन्तो वषट्कृते स्रुचा हुता भवन्तीत्येतेषां वै सप्तपदानां मारुतानां यानि त्रीणि प्रथमानि पदानि सा त्रिपदा गायत्री पुरोऽनुवाक्याथ यानि चत्वार्युत्तमानि सा चतुष्पदा त्रिष्टुब्याज्येदमेव कपुकलमयं दण्डः स्वाहाकारो वषट्कार एवमु कास्यैते पुरोऽनुवाक्यवन्तो याज्यवन्तो वषट्कृते स्रुचा हुता भवन्ति ॥१७॥ तद्यं प्रथमं दक्षिणतो मारुतं जुहोति । याः सप्त प्राच्यः स्रवन्ति ताः स स सप्तकपालो भवति सप्त हि ता याः प्राच्यः स्रवन्ति ॥१८॥ अथ यं प्रथममुत्तरतो जुहोति । ऋतवः स स स-

सप्तकपालो भवति सप्त ऋतवः ॥ ११ ॥ अथ यं द्वितीयं दक्षिणतो जुहोति । पशवः स सु सप्तकपालो भवति सप्त हि ग्राम्याः पशवस्तमनन्तर्हितं पूर्वस्माज्जुहोत्यप्सु तत्पशून्प्रतिष्ठापयति ॥ २० ॥ अथ यं द्वितीयमुत्तरतो जुहोति । सप्तऽऋषयः स सु सप्तकपालो भवति सप्त हि सप्तऽर्षयस्तमनन्तर्हितं पूर्वस्माज्जुहोत्यृतुषु तदृषीन्प्रतिष्ठापयति ॥ २१ ॥ अथ यं तृतीय दक्षिणतो जुहोति । प्राणाः स सु सप्तकपालो भवति सप्त हि शीर्षन्प्राणास्तमनन्तर्हितं पूर्वस्माज्जुहोत्यनन्तर्हितांस्तच्छीर्षन्प्राणान्दधाति ॥ २२ ॥ अथ यं तृतीयमुत्तरतो जुहोति । छन्दाꣳसि स सु सप्तकपालो भवति सप्त हि चतुरुत्तराणि छन्दाꣳसि तमनन्तर्हितं पूर्वस्माज्जुहोत्यनन्तर्हितानि तदृषिभ्यश्छन्दाꣳसि दधाति ॥ २३ ॥ अथ याः सप्त प्रतीच्यः स्रवन्ति । सोऽरण्येऽनूच्यः सु सप्तकपालो भवति सप्त हि ता याः प्रतीच्यः स्रवन्ति सोऽस्येषोऽवाङ् प्राण एतस्य प्रजापतेः सोऽरण्येऽनूच्यो भवति तिर-इव तद्यदरण्यं तिर-इव तद्यदवाङ् प्राणस्तस्माद्यऽएतासां नदीनां पिबन्ति प्रियतराः शपन्ततरा आरुनस्यवादितरा भवन्ति तद्यद्येतदाहेदं मारुता इति तदस्माऽअन्नं कृत्वापिदधाति तेनैनं प्रीणाति ॥ २४ ॥ स यः सु वैश्वानरो । ऽसौ सु आदित्योऽथ ये ते मारुता रश्मयस्ते ते सप्त सप्तकपाला भवन्ति सप्त-सप्त हि मारुता गणाः ॥ २५ ॥ सु जुहोति । शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्चेति नामान्येषामेतानि मण्डलमेवैतत्संस्कृत्याथास्मिन्नेतान्रश्मीन्नामग्राहं प्रतिदधाति ॥ २६ ॥ ब्राह्मणम् ॥ ३ [३. १.] ॥ ॥

अथातो वसोर्धारां जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः सु एषोऽत्र वसुस्तस्मै देवा एतां धारां प्रागृह्णंस्तयैनमप्रीणांस्तद्यदेतस्मै वसवऽएतां धारां प्रागृह्णंस्तस्मादेनां वसोर्धारेत्याचक्षते तथैवास्माऽअयमेतां धारां प्रगृह्णाति तयैनं प्रीणाति ॥ १ ॥ यद्वैवैतां वसोर्धारां जुहोति । अभिषिक्त एवास्यैष एतद्वाऽएनं देवाः सर्वे

कृत्स्नꣳ संस्कृत्याथैनमेतैः कामैरभ्यषिञ्चन्नेतया वसोर्धारया तथैवैनमयमेतत्सर्वं कृत्स्नꣳ संस्कृत्याथैनमेतैः कामैरभिषिञ्चत्येतया वसोर्धारयाज्येन पञ्चगृहीतेनौदुम्बर्या स्रुचा तस्योक्तो बन्धुः ॥२॥ वैश्वानरꣳ कृत्वा । शिरो वै वैश्वानरः शीर्ष्णो वाऽअन्नमद्यतेऽथो शीर्षतो वाऽअभिषिच्यमानोऽभिषिच्यते मारुतान्कृत्वा प्राणा वै मारुताः प्राणेरु वाऽअन्नमद्यतेऽथो प्राणेषु वाऽअभिषिच्यमानोऽभिषिच्यते ॥३॥ तद्वाऽअरण्येऽनूच्ये । वाग्वाऽअरण्येऽनूच्यो वाचो वाऽअन्नमद्यतेऽथो वाचा वाऽअभिषिच्यमानोऽभिषिच्यते तदेतत्सर्वं वसु सर्वे क्षेते कामाः सैषा वसुमयी धारा यथा क्षीरस्य वा सर्पिषो वैवमारम्भायैवेयमाज्याकृतिर्ह्रियते तद्यदेषा वसुमयी धारा तस्मादेनां वसोर्धारित्याचक्षते ॥४॥ स आह । इदं च मऽइदं च मऽइत्यनेन च त्वा प्रीणाम्यनेन चानेन च त्वाभिषिञ्चाम्यनेन चेत्येतदथोऽइदं च मे देक्षीदं च मऽइति सा यदैवैषा धाराग्निं प्राप्नुयादथैतद्यजुः प्रतिपद्येत ॥५॥ एतद्वाऽएनं देवाः । एतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्धारयाथैनमेतान्कामानयाचन्त तेभ्य इष्टः प्रीतोऽभिषिक्त एतान्कामान्प्रायच्छत्तथैवैनमयमेतदेतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्धारयाथैनमेतान्कामान्याचते तस्माऽइष्टः प्रीतोऽभिषिक्त एतान्कामान्प्रयच्छति द्वौ-द्वौ कामौ संयुनक्त्यव्यवच्छेदाय यथा व्योकसौ संयुञ्ज्यादेवं यज्ञेन कल्पन्तामिति ॥६॥ एतद्वै देवा अब्रुवन् । केनेमान्कामान्प्रतिग्रहीष्याम इत्यात्मनैवेत्यब्रुवन्यज्ञो वै देवानामात्मा यज्ञ ऽएव यजमानस्य स यदाह यज्ञेन कल्पन्तामित्यात्मना मे कल्पन्तामित्येवैतदाह ॥७॥ द्वादशसु कल्पयति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्यज्ञेन प्रीणात्यथो तावतैवैनमेतद्यज्ञेनाभिषिञ्चति चतुर्दशसु कल्पयत्यष्टासु कल्पयति दशसु कल्पयति त्रयोदशसु कल्पयति ॥८॥ अथार्धेन्द्राणि जुहोति । सर्वमेतद्यदर्धेन्द्राणि सर्वेणैवैनमेतत्प्रीणात्यथो सर्वेणैवैनमेतदभि-

षिञ्चति ॥ १ ॥ अथ ग्रहान्जुहोति । यज्ञो वै ग्रहा यज्ञेनैवैनमेतद्यज्ञेन प्रीणात्यथो यज्ञेनैवैनमेतद्यज्ञेनाभिषिञ्चति ॥ १० ॥ ब्राह्मणम् ॥ ४ [३. २.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या १४ ॥ ॥

अथैतान्यज्ञक्रतून्जुहोति । अग्निश्च मे घर्मश्च मऽइत्येतैरेवैनमेतद्यज्ञक्रतुभिः प्रीणात्यथोऽएतैरेवैनमेतद्यज्ञक्रतुभिरभिषिञ्चति ॥ १ ॥ अथायुज स्तोमान्जुहोति । एतद्वै देवाः सर्वान्कामानाप्त्वायुग्भि स्तोमैः स्वर्गं लोकमायंस्तथैवैतद्यज्ञमानः सर्वान्कामानाप्त्वायुग्भि स्तोमैः स्वर्गं लोकमेति ॥ २ ॥ तद्वै त्रयस्त्रिꣳशादिति । अन्तो वै त्रयस्त्रिꣳशोऽयुजाꣳ स्तोमानामन्तत एव तद्देवाः स्वर्गं लोकमायंस्तथैवैतद्यज्ञमानोऽन्तत एव स्वर्गं लोकमेति ॥ ३ ॥ अथ युग्मतो जुहोति । एतद्वै छन्दाꣳस्यब्रुवन्यातयामा वाऽअयुज स्तोमा युग्मभिर्वयꣳ स्तोमैः स्वर्गं लोकमयामेति तानि युग्मभि स्तोमैः स्वर्गं लोकमायंस्तथैवैतद्यज्ञमानो युग्मभि स्तोमैः स्वर्गं लोकमेति ॥ ४ ॥ तद्वाऽअष्टाचत्वारिꣳशादिति । अन्तो वाऽअष्टाचत्वारिꣳशो युग्मताꣳ स्तोमानामन्तत एव तच्छन्दाꣳसि स्वर्गं लोकमायंस्तथैवैतद्यज्ञमानोऽन्तत एव स्वर्गं लोकमेति ॥ ५ ॥ स आह । एका च मे तिस्रश्च मे चतस्रश्च मऽइष्टी च मऽइति यथा वृक्षꣳ रोहन्नुत्तरामुत्तराꣳ शाखाꣳ समालम्भꣳ रोहेत्तादृक्तद्यद्वेव स्तोमान्जुहोत्यन्नं वै स्तोमा अन्नेनैवैनमेतदभिषिञ्चति ॥ ६ ॥ अथ वयाꣳसि जुहोति । पशवो वै वयाꣳसि पशुभिरेवैनमेतद्यज्ञेन प्रीणात्यथो पशुभिरेवैनमेतद्यज्ञेनाभिषिञ्चति ॥ ७ ॥ अथ नामग्राहं जुहोति । एतद्वै देवाः सर्वान्कामानाप्त्वाथैतमेव प्रत्यक्षमप्रीणंस्तथैवैतद्यज्ञमानः सर्वान्कामानाप्त्वाथैतमेव प्रत्यक्षं प्रीणाति वाजाय स्वाहा प्रसवाय स्वाहेति नामान्यस्यैतानि नामग्राहमेवैनमेतत्प्रीणाति ॥ ८ ॥ त्रयोदशैतानि नामानि भवन्ति । त्रयोदश मासाः संवत्सरस्त्रयोदशाग्नेश्चितिपुरीषाणि यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत्प्रीणाति यद्वेव नामग्राहं

नुह्वोति नामग्राह्मनेवैनमेतद्भिषिञ्चति ॥ ९ ॥ अथाह । इयं ते राणिमित्राय यन्तासि यमन ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्यायेत्यन्नं वाऽऊर्गन्नं वृष्टिरन्नेनैवैनमेतत्प्रीणाति ॥ १० ॥ यद्वेवाह । इयं ते राणिमित्राय यन्तासि यमन ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्यायेतीदं ते राज्यमभिषिक्तोऽसीत्येतन्मित्रस्य वं यन्तासि यमन ऊर्जे च नोऽसि वृष्ट्यै च नोऽसि प्रजानां च न आधिपत्यायासीत्युपब्रुवतऽएवैनमेतदेतस्मै नः सर्वस्माऽअस्येतस्मै त्वा सर्वस्माऽअभ्यषिचामह्वोति तस्माद्व हेदं मानुषꣳ राजानमभिषिक्तमुपब्रुवते ॥ ११ ॥ अथ कल्यान्नुह्वोति । प्राणा वै कल्याः प्राणानेवास्मिन्नेतद्दधात्यायुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामित्येतानेवास्मिन्नेतत्कल्पान्प्राणान्दधाति ॥ १२ ॥ द्वादश कल्यान्नुह्वोति । द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतत्कल्पान्प्राणान्दधाति यद्वेव कल्यान्नुह्वोति प्राणा वै कल्या अमृतमु वै प्राणा अमृतेनैवैनमेतदभिषिञ्चति ॥ १३ ॥ अथाह । स्तोमश्च यजुश्चऽऋक्च साम च बृहच्च रथन्तरं चेति त्रयी ह्वैषा विद्यान्नं वै त्रयी विद्यान्नेनैवैनमेतत्प्रीणात्यथोऽअन्नेनैवैनमेतदभिषिञ्चति स्वर्देवा अगन्मामृता अभूमेति स्वर्हि गह्त्यमृतो हि भवति प्रजापतेः प्रजा अभूमेति प्रजापतेर्हि प्रजा भवति वेट् स्वाह्वेति वषट्कारो ह्वैष परोऽक्षं यद्वेट्कारो वषट्कारेण वा वै स्वाह्वाकारेण वा देवेभ्योऽन्नं प्रदीयते तदेनमेताभ्यामुभाभ्यां प्रीणाति वषट्कारेण च स्वाह्वाकारेण चाथोऽएताभ्यामेवैनमेतदुभाभ्यामभिषिञ्चत्यत्र ताꣳ स्रुचमनुप्रास्यति यदत्राज्यलिप्तं तन्नेद्धर्हिर्धाग्नेरसदिति ॥ १४ ॥ तस्यै वाऽएतस्यै वसोर्धारायै । द्यौरेवात्माभ्रमूधो विद्युत्स्तनो धारैव धारा दिवोऽधि गामागह्छति ॥ १५ ॥ तस्यै गौरेवात्मा । ऊध एवोध स्तन स्तनो धारैव धारा गोरधि यज्ञमानम् ॥ १६ ॥ तस्यै यज्ञमान एवात्मा । बाह्वूधः स्रुक्स्तनो धारैव धारा यज्ञमानादधि देवान्देवेभ्योऽधि गां गोरधि यज्ञमानं तदेतदनत्तमह्नय्यं देवा-

नामन्नं परिप्लवते स यो हैतदेवं वेदैवꣳ हैवास्यैतदनन्तमक्षय्यमन्नं भवत्यथातः सम्पदेव ॥ १७ ॥ तदाहुः । कथमस्यैषा वसोर्धारा संवत्सरमग्निमाप्नोति कथꣳ संवत्सरेणाग्निना सम्पद्यतऽइति षष्टिश्च हु वै त्राणि च शतान्येषा वसोर्धाराथ षऽउथ पञ्चत्रिꣳशत्ततो यानि षष्टिश्च त्रीणि च शतानि तावन्ति संवत्सरस्याहानि तत्संवत्सरस्याहान्याप्नोत्यथ यानि षट् षड्ाऽऋतवस्तदृतूनाꣳ रात्रीराप्नोति तदुभयानि संवत्सरस्याहोरात्राण्याप्नोत्यथ यानि पञ्चत्रिꣳशत्स त्रयोदशो मासः स आत्मा त्रिꣳशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव पञ्चत्रिꣳशमेतावान्वै संवत्सर एवमु हास्यैषा वसोर्धारा संवत्सरमग्निमाप्नोत्येवꣳ संवत्सरेणाग्निना सम्पद्यतऽएतावत्य उ वै शाण्डिल्येऽग्नौ मध्यतो यजुष्मत्य इष्टका उपधीयन्तेऽग्नयो हैते पृथग्यदेता इष्टका एवमु हास्यैतेऽग्नयः पृथग्वसोर्धारयाभिकृता भवन्ति ॥ १८ ॥ तदाहुः । कथमस्यैषा वसोर्धारा मरुद्भिरुक्थमाप्नोति कथं मरुतोक्थेन सम्पद्यतऽइत्येतस्याऽएव वसोर्धारायै यानि नव प्रथमानि यजूꣳषि तत्त्रिवृद्विरोऽथ यान्यष्टाचत्वारिꣳशत्तौ चतुर्विꣳशौ पक्षावथ यानि पञ्चविꣳशतिः स पञ्चविꣳश आत्माथ यान्येकविꣳशतिस्तदेकविꣳशं पुच्छमथ यानि त्रयस्त्रिꣳशत्स वशोऽथ या अशीतयः सैवाशीतीनामाप्तिरशीतिभिर्हि मरुद्भिरुक्थमाप्यायतेऽथ यद्ऊर्ध्वमशीतिभ्यो यदेवादो मरुत उक्थस्योर्ध्वमशीतिभ्य एतदस्य तदेवमु हास्यैषा वसोर्धारा मरुद्भिरुक्थमाप्नोत्येवं मरुतोक्थेन सम्पद्यते ॥ १९ ॥ ब्राह्मणम् ॥ १ [३. ३.] ॥ ॥

अथातो वाजप्रसवीयं जुहोति । अन्नं वै वाजोऽन्नप्रसवीयꣳ हास्यैतदन्नमेवास्माऽएतेन प्रसौति ॥ १ ॥ एतद्वाऽएनं देवाः । एतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्धारयाथैनमेतद्भूय एवाप्रीणंस्तथैवैनमयमेतदेतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया वसोर्धारयाथैनमेतद्भूय एव प्रीणाति ॥ २ ॥ यद्वैवैतद्वाजप्रसवीयं जुहोति । अभिषेक एवास्यैष एतद्वाऽएनं देवा एतेनान्नेन प्रीत्वैतैः कामैरभिषिच्यैतया व-

सोर्धार्यायैनमेतद्भूय एवाभ्यषिञ्चंस्तथैवैनमयमेतदेतेनान्नेन प्रीत्वैतैः कामैरभिषिञ्चैतया वसोर्धार्यायैनमेतद्भूय एवाभिषिञ्चति ॥३॥ सर्वौषधं भवति । सर्वमेतदन्नं यत्सर्वौषधꣳ सर्वेणैवैनमेतदन्नेन प्रीणात्यथो सर्वेणैवैनमेतदन्नेनाभिषिञ्चति तेषामेकमन्नमुद्धरेत्तस्य नाश्नीयाद्यावज्जीवमौदुम्बरेण चमसेनौदुम्बरेण स्रुवेण तयोरुक्तो बन्धुश्चतुःस्रक्ती भवतश्चतस्रो वै दिशः सर्वाभ्य एवैनमेतद्दिग्भ्योऽन्नेन प्रीणात्यथो सर्वाभ्य एवैनमेतद्दिग्भ्योऽन्नेनाभिषिञ्चति ॥४॥ यद्वैवैतद्वाजप्रसवीयं जुहोति । एता ह देवताः सुता एतेन सवेन येनैतत्सोष्यमाणो भवति ता एवैतत्प्रीणाति ताऽअस्माऽइष्टाः प्रीता एतꣳ सवमनुमन्यन्ते ताभिरनुमतः सूयते यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति न स यस्मै न तद्यद्ग्नौ जुहोति तदग्निमभिषिञ्चत्यथ यदेताभ्यो देवताभ्यो जुहोति तदु तान्देवान्प्रीणाति यऽएतस्य सवस्येशते ॥५॥ अथ वाऽएतत्पार्थान्यपि जुहोति । एतद्वै देवा अकामयन्तात्रैव सर्वैः सवैः सूयेमहीति तेऽत्रैव सर्वैः सवैरसूयन्त तथैवैतद्यजमानोऽत्रैव सर्वैः सवैः सूयते ॥६॥ तद्यानि पार्थानि । तानि राजसूयस्य वाजप्रसवीयं तद्यत्तानि जुहोति तद्राजसूयेन सूयतेऽथ यानि चतुर्दशोत्तराणि ततो यानि सप्त पूर्वाणि तानि वाजपेयस्य वाजप्रसवीयं तद्यत्तानि जुहोति तद्वाजपेयेन सूयतेऽथ यानि सप्तोत्तराणि तान्यग्नेस्तद्यत्तानि जुहोति तदग्निसवेन सूयते ॥७॥ स वै राजसूयस्य पूर्वाणि जुहोति । अथ वाजपेयस्य राजा वै राजसूयेनेष्ट्वा भवति सम्राड्वाजपेयेन राज्यमु वाऽअग्नेऽथ साम्राज्यं तस्माद्वाजपेयेनेष्ट्वा न राजसूयेन यजेत प्रत्यवरोहः स यथा सम्राट् सन्राजा स्यात्तादृक्तत् ॥८॥ अग्नेरुत्तमानि जुहोति । सर्वे ह्येते सवा यदग्निसवः सर्वꣳ ह्येतदग्निसवेन सुतो भवति राजा च सम्राट् तस्मादग्नेरुत्तमानि जुहोति ॥९॥ अथैनं कृष्णाजिनेऽभिषिञ्चति । यज्ञो वै कृष्णाजिनं यज्ञऽएवैनमेतदभिषिञ्चति लोमतश्छन्दाꣳसि वै लोमानि छन्दःस्वेवैनमेतदभि-

षिञ्चत्युत्तरतस्तस्योपरि बन्धुः प्राचीनग्रीवे तद्धि देवत्रा ॥१०॥ तꣳ हैके दक्षिणतोऽग्नेरभिषिञ्चन्ति । दक्षिणतो वाऽअन्नस्योपचारस्तदेनमन्नस्यार्धादभिषिञ्चाम इति न तथा कुर्यादेषा वै दिक्पितॄणां क्षिप्रे हैतां दिशं प्रैति यं तथाभिषिञ्चन्ति ॥११॥ आहवनीयऽउ हैकेऽभिषिञ्चन्ति । स्वर्गो वै लोक आहवनीयस्तदेनꣳ स्वर्गे लोकेऽभिषिञ्चाम इति न तथा कुर्यादेवो वाऽअस्येष आत्मा मानुषोऽयमनेन ह्यस्य ते मर्त्येनात्मनैतं दैवमात्मानमनुप्रसन्नन्ति यं तथाभिषिञ्चन्ति ॥१२॥ उत्तरत एवैनमभिषिञ्चेत् । एषा ह्येभयेषां देवमनुष्याणां दिग्यदुदीची प्राची स्वायामेवैनमेतद्दिश्यायत्तं प्रतिष्ठितमभिषिञ्चति न वै स्वऽआयतने प्रतिष्ठितो रिष्यति ॥१३॥ आसीनं भूतमभिषिञ्चेत् । आस्तऽइव वै भूतस्तिष्ठन्तं बुभूषन्तं तिष्ठतीव वै बुभूषन्बस्ताजिने पुष्टिकाममभिषिञ्चेत्कृष्णाजिने ब्रह्मवर्चसकाममुभयोरुभयकामं तदुत्तरतः पुरुषस्योत्तरलोम प्राचीनग्रीवमुपस्तृणाति ॥१४॥ आस्पृष्टं परिश्रितः । तद्यत्कृष्णाजिनमास्पृष्टं परिश्रितो भवति तथो ह्यस्येष दैव आत्मा कृष्णाजिनेऽभिषिक्तो भवत्यथ यदेनमन्वारब्धमग्निं तिष्ठन्तमभिषिञ्चति तथा हैतस्माद्दैवादभिषेकान्न व्यवच्छिद्यते ॥१५॥ अग्नौ कुर्वाथेनमभिषिञ्चति । दैवो वाऽअस्येष आत्मा मानुषोऽयं देवा उ वाऽअग्रेऽथ मनुष्यास्तस्मादग्नौ कुर्वाथेनं तस्यैव परिशिष्टेनाभिषिञ्चत्यत्र तꣳ स्रुवमनुप्रास्यति ॥१६॥ अथैनं दक्षिणं बाहुमनुपर्यावृत्याभिषिञ्चति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामीति वाग्वै सरस्वती तस्या इदꣳ सर्वं यत्किꣳ सवितृप्रसूत एवैनमेतदनेन सर्वेण सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चत्यत्र तं चमसमनुप्रास्यति यदत्र विलिप्तं तन्नेद्धर्ष्यग्नेरसदिति ॥१७॥ तं वै मध्ये पार्थानामभिषिञ्चति । संवत्सरो वै पार्थानि संवत्सरस्यैवैनमेतन्मध्यत आदधाति षट् पुरस्ताज्जुहोति षडुपरिष्टात्षड्वाऽऋतव ऋतुभिरेवैन-

मेतत्सुषुवाणमुभयतः परिगृह्णाति बृहस्पतिः पूर्वेषामुत्तमो भवतीन्द्र उत्तरेषां प्रथमो ब्रह्म वै बृहस्पतिः क्षत्रमिन्द्रो ब्रह्मणा चैवैनमेतत्क्षत्रेण च सुषुवाणमुभयतः परिगृह्णाति ॥ १८ ॥ ब्राह्मणम् ॥ २ [३. ४.] ॥ तृतीयोऽध्यायः [५८.] ॥ ॥

अथातो राष्ट्रभृतो जुहोति । राजानो वै राष्ट्रभृतस्ते हि राष्ट्राणि बिभ्रत्येता ह देवताः सुता एतेन सवेन येनैतत्सोष्यमाणो भवति ता एवैतत्प्रीणाति ता ऽअस्माऽइष्टाः प्रीता एतꣳ सवमनुमन्यन्ते ताभिरनुमतः सूयते यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति न स यस्मै न तद्यद्राजानो राष्ट्राणि बिभ्रति राजान ऽएते देवास्तस्मादेता राष्ट्रभृतः ॥ १ ॥ यद्वैवैता राष्ट्रभृतो जुहोति । प्रजापतेर्विस्रस्तान्मिथुनान्युदक्रामन्गन्धर्वाप्सरसो भूत्वा तानि रथो भूत्वा पर्यगच्छत्तानि परिगत्यात्मन्नधत्तात्मन्नकुरुत तथैवैनान्यय्मेतत्परिगत्यात्मन्धत्तऽआत्मन्कुरुते ॥ २ ॥ स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयतेऽथ यान्यस्मात्तानि मिथुनान्युदक्रामन्नेतास्ता देवता याभ्य एतज्जुहोति ॥ ३ ॥ गन्धर्वाप्सरोभ्यो जुहोति । गन्धर्वाप्सरसो हि भूत्वोदक्रामन्नथो गन्धेन च वै रूपेण च गन्धर्वाप्सरसश्चरन्ति तस्माद्यः कश्च मिथुनमुपैति गन्धं चैव स रूपं च कामयते ॥ ४ ॥ मिथुनानि जुहोति । मिथुनाद्वाऽअधि प्रजातिर्यो वै प्रजायते स राष्ट्रं भवत्यराष्ट्रं वै स भवति यो न प्रजायते तद्यन्मिथुनानि राष्ट्रं बिभ्रति मिथुना ऽएते देवास्तस्मादेता राष्ट्रभृत आज्येन द्वादशगृहीतेन ता ऽउ द्वादशैवाकृतयो भवन्ति तस्योक्तो बन्धुः ॥ ५ ॥ पुꣳसे पूर्वस्मै जुहोति । अथ स्त्रीभ्यः पुमाꣳसं तद्वीर्येणात्यादधात्येकस्माऽइव पुꣳसे जुहोति बह्वीभ्य-इव स्त्रीभ्यस्तस्माद्येकस्य पुꣳसो बह्व्यो जाया भवन्त्युभाभ्यां वषट्कारेण च स्वाहाकारेण च पुꣳसे जुहोति स्वाहाकारेणैव स्त्रीभ्यः पुमाꣳसमेव तद्वीर्येणात्यादधाति ॥ ६ ॥ ऋतषाडृतधामेति । सत्यसाट्सत्यधामेत्येतद्यग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस इत्यग्निर्हि गन्धर्व ओषधिभिरप्सरो-

भिर्मिथुनेन सहोच्चक्राम मुदो नामेत्योषधयो वै मुद ओषधिभिर्हीदꣳ सर्वं मोदते स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहेति तस्योक्तो बन्धुः ॥७॥ सꣳहित इति । असौ वाऽआदित्यः सꣳहित एष ह्येतस्मिन्नहोरात्रे संदधाति विश्वसामेत्येष ह्येव सर्वꣳ साम सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस इति सूर्यो ह गन्धर्वो मरीचिभिरप्सरोभिर्मिथुनेन सहोच्चक्रामायुवो नामेत्यायुवाना-इव हि मरीचयः प्लवन्ते स न इदं ब्रह्म क्षत्रं पाविति तस्योक्तो बन्धुः ॥८॥ सुषुम्ण इति । सुयज्ञिय इत्येतत्सूर्यरश्मिरिति सूर्यस्येव हि चन्द्रमसो रश्मयश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरस इति चन्द्रमा ह गन्धर्वो नक्षत्रैरप्सरोभिर्मिथुनेन सहोच्चक्राम भेकुरयो नामेति भाकुरयो ह नामैते भाꣳ हि नक्षत्राणि कुर्वन्ति स न इदं ब्रह्म क्षत्रं पाविति तस्योक्तो बन्धुः ॥९॥ इषिर इति । क्षिप्र इत्येतद्विश्वव्यचा इत्येष ह्येदꣳ सर्वं व्यचः करोति वातो गन्धर्वस्तस्यापोऽअप्सरस इति वातो ह गन्धर्वोऽद्भिरप्सरोभिर्मिथुनेन सहोच्चक्रामोर्ज्जो नामेत्यापो वाऽऊर्ज्जोऽद्भ्यो ह्यूर्ज्जायते स न इदं ब्रह्म क्षत्रं पाविति तस्योक्तो बन्धुः ॥१०॥ भुज्युः सुपर्ण इति । यज्ञो वै भुज्युर्यज्ञो हि सर्वाणि भूतानि भुनक्ति यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरस इति यज्ञो ह गन्धर्वो दक्षिणाभिरप्सरोभिर्मिथुनेन सहोच्चक्राम स्तावा नामेति दक्षिणा वै स्तावा दक्षिणाभिर्हि यज्ञ स्तूयतेऽथो यो वै कꣳ श्च दक्षिणां ददाति स्तूयतऽएव स स न इदं ब्रह्म क्षत्रं पाविति तस्योक्तो बन्धुः ॥११॥ प्रजापतिर्विश्वकर्मेति । प्रजापतिर्वै विश्वकर्मा स ह्येदꣳ सर्वमकरोन्मनो गन्धर्वस्तस्यऽऋक्सामान्यप्सरस इति मनो ह गन्धर्व ऋक्सामैरप्सरोभिर्मिथुनेन सहोच्चक्रामिष्टयो नामेत्यृक्सामानि वाऽइष्टय ऋक्सामैर्ह्याशासतऽइति नोऽस्त्वित्थं नोऽस्त्विति स न इदं ब्रह्म क्षत्रं पाविति तस्योक्तो बन्धुः ॥१२॥ अथ रथशीर्षे जुहोति । एष वै स सव एतद्वै तत्सूयते यमस्मै तमेता देवताः सवम-

नुमन्यन्ते याभिरनुमतः सूयते यस्मै वै राज्ञानो राज्यमनुमन्यन्ते स राज्ञा भवति न स यस्मै नाञ्ज्येन पञ्चगृहीतेन ता उ पञ्चैवाकृतयो कृता भवन्ति तस्योक्तो बन्धुः ॥ १३ ॥ शीर्षतः । शीर्षतो वाऽअभिषिच्यमानोऽभिषिच्यतऽउपरि धार्यमाणाऽउपरि हि स यमेतदभिषिञ्चति समानेन मन्त्रेण समानो हि स यमेतदभिषिञ्चति सर्वतः परिहारꣳ सर्वत एवैनमेतदभिषिञ्चति ॥ १४ ॥ यद्वेव रथशीर्षे जुहोति । असौ वाऽआदित्य एष रथ एतद्वै तद्रूपं कृत्वा प्रजापतिरेतानि मिथुनानि परिगत्यात्मन्नधत्तात्मन्नकुरुत तथैवैनान्यय्यमेतत्परिगत्यात्मन्धत्तऽआत्मन्कुरुतऽउपरि धार्यमाणाऽउपरि हि स य एतानि मिथुनानि परिगत्यात्मन्नधत्तात्मन्नकुरुत समानेन मन्त्रेण समानो हि स य एतानि मिथुनानि परिगत्यात्मन्नधत्तात्मन्नकुरुत सर्वतः परिहारꣳ सर्वतो हि स य एतानि मिथुनानि परिगत्यात्मन्नधत्तात्मन्नकुरुत ॥ १५ ॥ स नो भुवनस्य पते प्रजापतऽइति । भुवनस्य क्वेष पतिः प्रजापतिर्यस्य तऽउपरि गृहा यस्य वेक्वेत्युपरि च क्वेतस्य गृहा इक्व चास्मै ब्रह्मणोऽस्मै क्षत्रायेत्ययं वाऽअग्निर्ब्रह्म च क्षत्रं च मक्वि शर्म यच्छ स्वाक्वेति मक्वर्म यच्छ स्वाक्वेत्येतत् ॥ १६ ॥ ब्राह्मणम् ॥ ३ [४. १.] ॥ ॥

अथ वातक्वोमान्जुक्वोति । इमे वै लोका एषोऽग्निर्वायुर्वातक्वोमा एषु तल्लोकेषु वायुं दधाति तस्मादयमेषु लोकेषु वायुः ॥ १ ॥ बाक्वेनाग्निमाक्वरति । आप्तो वाऽअस्य स वायुर्य एषु लोकेष्वथ य इमांल्लोकान्परेण वायुस्तमस्मिन्नेतद्दधाति ॥ २ ॥ बक्विर्वेदिरियं वै वेदिः । आप्तो वाऽअस्य स वायुर्योऽस्यामथ य इमां परेण वायुस्तमस्मिन्नेतद्दधाति ॥ ३ ॥ अञ्जलिना । न क्वेतस्येतीवाभिपत्तिरस्ति स्वाक्वाकारेण जुक्वोति क्वधोऽधो धुरमसौ वाऽआदित्य एष रथोऽर्वाचीनं तदादित्याद्वायुं दधाति तस्मादेषोऽर्वाचीनमेवातः पवते ॥ ४ ॥ समुद्रोऽसि नभस्वानिति । असौ वै लोकः समुद्रो नभस्वानार्द्रदानुरित्येष क्वार्द्रं ददाति तथोऽमु-

ष्मिंल्लोके वायुस्तमस्मिन्नेतद्दधाति शम्भूर्मयोभूरभि मा वाहि स्वाहेति शिवः स्योनोऽभि मा वाहीत्येतत् ॥५॥ मारुतोऽसि मरुतां गण इति । अन्तरिक्षलोको वै मारुतो मरुतां गणास्त्योऽन्तरिक्षलोके वायुस्तमस्मिन्नेतद्दधाति शम्भूर्मयोभूरभि मा वाहि स्वाहेति शिवः स्योनोऽभि मा वाहीत्येतत् ॥६॥ अवस्यूरसि दुवस्वानिति । अयं वै लोकोऽवस्यूर्दुवस्वांस्त्योऽस्मिंल्लोके वायुस्तमस्मिन्नेतद्दधाति शम्भूर्मयोभूरभि मा वाहि स्वाहेति शिवः स्योनोऽभि मा वाहीत्येतत् ॥७॥ त्रिभिर्नुहोति । त्रय इमे लोका अथो त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा ताघतैव तदेषु लोकेषु वायुं दधाति ॥८॥ यद्वेव वातहोमान्नुहोति । एतमेवैतद्रथं युनक्त्येतद्वै देवा एतꣳ रथꣳ सर्वेभ्यः कामेभ्योऽयुञ्जत युक्तेन समश्नवामहा इति तेन युक्तेन सर्वान्कामान्त्समाप्नुवत तथैवैतद्यजमान एतꣳ रथꣳ सर्वेभ्यः कामेभ्यो युङ्क्ते युक्तेन समश्नवा इति तेन युक्तेन सर्वान्कामान्त्समश्नुते ॥९॥ वातहोमैर्युनक्ति । प्राणा वै वातहोमाः प्राणैरेवैनमेतद्युनक्ति त्रिभिर्युनक्ति त्रयो वै प्राणाः प्राण उदानो व्यानस्तैरेवैनमेतद्युनक्त्यधोऽधो धुरमधोऽधो हि धुरं योग्यं युञ्जन्ति कस्ताभ्याꣳ कस्ताभ्याꣳ हि योग्यं युञ्जन्ति विपरिक्रामं विपरिक्रामꣳ हि योग्यं युञ्जन्ति ॥१०॥ स दक्षिणायुग्यमेवाग्रे युनक्ति । अथ सव्यायुग्यमथ दक्षिणाप्रष्टिमेवं देवत्रेतरथा मानुषे तं नाभियुञ्ज्यान्नेयुक्तमभियुनज्मानीति वाकꣳ तु दद्याद्युक्तेन भुनज्मा इति तमुपर्येव कुरुल्याधर्योरावसथादुपरि क्षेष तमधर्यवे ददाति स हि तेन करोति तं तु दक्षिणानां काले ऽनुदिशेत् ॥११॥ अथ रुक्मतोर्नुहोति । अत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र रुचमैहत्तस्मिन्देवा एताभी रुक्मतीभी रुचमदधुस्तथैवास्मिन्नयमेतद्दधाति ॥१२॥ यद्वेव रुक्मतोर्नुहोति । प्रजापतेर्विस्रस्ताद्रुद्रुद्क्रामत्तं यत्र देवाः समस्कुर्वंस्तदस्मिन्नेताभी रुक्मतीभी रुचमदधुस्तथैवास्मिन्नयमेतद्दधाति ॥१३॥ ॥ शतम्५००० ॥ ॥ यास्तेऽग्ने सूर्ये रुचः । या

वो देवाः सूर्ये रुचो रुचं नो धेहि ब्राह्मणेष्विति रुचꣳ रुचमित्यमृतवं वै रुगमृतत्वमेवास्मिन्नेतद्दधाति तिस्र आहुतीर्जुहोति त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतद्रुचं दधाति ॥१४॥ अथ वारुणीं जुहोति । अत्रैष सर्वोऽग्निः संस्कृतः स एषोऽत्र वरुणो देवता तस्माऽएतद्धविर्जुहोति तदेनꣳ हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यते वारुण्यर्चा स्वेनैवैनमेतदात्मना स्वया देवतया प्रीणाति ॥१५॥ यद्वेव वारुणीं जुहोति । प्रजापतेर्विस्रस्ताद्वीर्यमुदक्रामत्तं यत्र देवाः समस्कुर्वंस्तदस्मिन्नेतया वीर्यमदधुस्तथैवास्मिन्नयमेतद्दधाति वारुण्यर्चा क्षत्रं वै वरुणो वीर्यं वै क्षत्रं वीर्येणैवास्मिन्नेतद्वीर्यं दधाति ॥१६॥ तत्त्वा यामि ब्रह्मणा वन्दमान इति । तत्त्वा याचे ब्रह्मणा वन्दमान इत्येतत्तदाशास्ते यजमानो हविर्भिरिति तदयमाशास्ते गजमानो हविर्भिरित्येतद्हेडमानो वरुणेह बोधीत्यक्रुध्यन्नो वरुणेह बोधीत्येतद्रुशꣳस मा न आयुः प्रमोषीरित्यात्मनः परिदां वदते ॥१७॥ अथार्काश्वमेधयोः संततीर्जुहोति । अयं वाऽअग्निरर्कोऽसावादित्योऽश्वमेधस्तौ सृष्टौ नानैवास्तां तौ देवा एताभिराकृतिभिः समतन्वन्त्समदधुस्तथैवैनावयमेतदेताभिराकृतिभिः संतनोति संदधाति ॥१८॥ स्वर्ण घर्मः स्वाहेति । असौ वाऽआदित्यो घर्मोऽमुं तदादित्यमस्मिन्नग्नौ प्रतिष्ठापयति ॥१९॥ स्वर्णार्कः स्वाहेति । अयमग्निरर्क इमं तदग्निममुष्मिन्नादित्ये प्रतिष्ठापयति ॥२०॥ स्वर्ण शुक्रः स्वाहेति । असौ वाऽआदित्यः शुक्रस्तं पुनरमुत्र दधाति ॥२१॥ स्वर्ण ज्योतिः स्वाहेति । अयमग्निर्ज्योतिस्तं पुनरिह दधाति ॥२२॥ स्वर्ण सूर्यः स्वाहेति । असौ वाऽआदित्यः सूर्योऽमुं तदादित्यमस्य सर्वस्योत्तमं दधाति तस्मादेषोऽस्य सर्वस्योत्तमः ॥२३॥ पञ्चैता आहुतीर्जुहोति । पञ्चचितिकोऽग्निः पञ्चर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनावेतत्संतनोति संदधाति ॥२४॥ यद्वेवाह । स्वर्ण

घर्मः स्वाहा स्वर्णार्कः स्वाहेत्यस्यैवैतान्यग्नेर्नामानि तान्येतत्प्रीणाति तानि हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यतेऽथोऽएतानेवैतद्ग्नौनास्मिन्नग्नौ नामग्राहं दधाति ॥ २५ ॥ पञ्चैता आकुतीर्जुहोति । पञ्चचितिकोऽग्निः पञ्चर्तवः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्भेन प्रीणाति ॥ २६ ॥ अथात आकुतीनामेवावपनस्य । यां कां च ब्राह्मणवतीमाकुतिं विद्यात्तामितस्मिन्काले जुहुयात्कामेभ्यो वाऽएतꣳ रथं युङ्क्ते तस्यां कां चात्राकुतिं जुहोत्यात्तां ताꣳ सतीं जुहोति ॥ २७ ॥ तदाहुः । न जुहुयान्नेदतिरेचयानीति स वै जुहुयादेव कामेभ्यो वाऽएता आकुतयो हूयन्ते न वै कामानामतिरिक्तमस्ति ॥ २८ ॥ ब्राह्मणम् ॥ ४ [४. २.] ॥ ॥

अथ प्रत्येत्य धिष्ण्यानां काले धिष्ण्यान्निवपति । अग्नय एते यद्धिष्ण्या अग्नीनेवैतच्चिनोति ता एता विशः क्षत्रमयमग्निश्चितः क्षत्रं च तद्विशं च करोत्यमुं पूर्वं चिनोत्यथेमान्क्षत्रं तत्कृत्वा विशं करोति ॥ १ ॥ एक एष भवति । एकस्थं तत्क्षत्रमेकस्थाꣳ श्रियं करोति बहव इतरे विशि तद्बहमानं दधाति ॥ २ ॥ पञ्चचितिक एष भवति । एकचितिका इतरे क्षत्रं तद्वीर्येणात्मादधाति क्षत्रं विशो वीर्यवत्तरं करोत्यूर्ध्वमेतं चिनोति क्षत्रं तदूर्ध्वं चितिभिश्चिनोति तिरश्च इतरान्क्षत्राय तद्विशमधस्तादुपनिषादिनीं करोति ॥ ३ ॥ उभाभ्यां यजुष्मत्या च लोकम्पृणया चैतं चिनोति । लोकम्पृणयैवेमान्क्षत्रमेव तद्वीर्येणात्मादधाति क्षत्रं विशो वीर्यवत्तरं करोति विशं क्षत्रादवीर्यतराम् ॥ ४ ॥ स यदिमांल्लोकम्पृणयैव चिनोति क्षत्रं वै लोकम्पृणा क्षत्रं तद्विश्यत्तारं दधात्युभयांश्चिनोत्यधरस्य चाग्नेश्चाधरस्य पूर्वानथाग्नेस्तस्योक्तो बन्धुर्-यमेवाधरधिष्ण्यं निवपति तं-तं चिनोत्याग्नीध्रीयं प्रथमं चिनोति तꣳ हि प्रथमं निवपति दक्षिणत उदङ्मुखीनस्तस्योक्तो बन्धुः ॥ ५ ॥ तस्मिन्नष्टाविष्टका उपदधाति । अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य

मात्रा तावत्तमेवैनमेतच्चिनोति तासामश्मा पृश्निर्नवमो नव वै प्राणाः सप्त शीर्षन्नवाञ्चौ द्वौ तानेवास्मिन्नेतद्दधाति यश्चितेऽग्निर्निधीयते स दशमो दश वै प्राणा मध्यमाग्नीध्रं मध्यतस्तत्प्राणान्दधाति मध्ये ह वाऽएतत्प्राणाः सन्त इति चेति चात्मानमनुव्युच्चरन्ति ॥ ६ ॥ एकविꣳशतिꣳ होत्रीयऽउपदधाति । एकविꣳशतिर्वैव परिश्रितस्तस्योक्तो बन्धुरेकादश ब्राह्मणाछꣳस्यऽएकादशाक्षरा वै त्रिष्टुप्त्रैष्टुभ इन्द्र ऐन्द्रो ब्राह्मणाछꣳस्यष्टावष्टावितरेषु तस्योक्तो बन्धुः ॥ ७ ॥ षण्मार्जालीये । षड्वाऽऋतवः पितरस्तꣳ हैतमृतवः पितरो दक्षिणतः पर्यूहिरे स एषामेष दक्षिणतः स वाऽइतीममुपदधातीतीमानित्यमुं विशं तत्क्षत्रमभिसंमुखां करोति ॥ ८ ॥ अथैनान्परिश्रिद्भिः परिश्रयति । आपो वै परिश्रितोऽद्भिरेवैनांस्तत्परितनोति स वै पर्येव निदधाति क्षत्रꣳ हैता अपां याः खातेन यन्त्यथ हैता विशो यानीमानि वृथोदकानि स यदमुं खातेन परिश्रयति क्षत्रे तत्क्षत्रं दधाति क्षत्रं क्षत्रेण परिश्रयत्यथ यदिमान्पर्येव निदधाति विशि तद्विशं दधाति विशा विशं परिश्रयति तेषां वै यावत्य एव यजुष्मत्यस्तावत्यः परिश्रितो यावत्यो ह्येवामुष्य यजुष्मत्यस्तावत्यः परिश्रितः क्षत्रायैव तद्विशं कृतानुकामनुवर्त्मानं करोति ॥ ९ ॥ अथेषु पुरीषं निवपति । तस्योक्तो बन्धुस्तूष्णीमनिरुक्ता हि विडथाग्नीषोमीयस्य पशुपुरोडाशमनु दिशामवेष्टीर्निर्वपति दिश एषोऽग्निस्ताभ्य एतानि हवीꣳषि निर्वपति तदेना हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यते पञ्च भवन्ति पञ्च हि दिशः ॥ १० ॥ तदाहुः । दशहविषमेवैतामिष्टिं निर्वपेत्सा सर्वस्तोमा सर्वपृष्ठा सर्वाणि छन्दाꣳसि सर्वा दिशः सर्वऽऋतवः सर्वम्वेतद्यमग्निस्तदेनꣳ हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यते दश भवन्ति दशाक्षरा विराड्विराडग्निर्दश दिशो दिशोऽग्निर्दश प्राणाः प्राणा अग्नियावानग्नियावत्यस्य मात्रा तावत-

तैवैनमेतद्भ्रेन प्रीणाति ॥ ११ ॥ तद्वै देवस्वामेव । एतानि हवीꣳषि निर्वपेद्-ता ह देवताः सुता एतेन सवेन येनैतत्सोष्यमाणो भवति ता एवैतत्प्रीणाति ताऽअस्माऽइष्टाः प्रीता एतꣳ सवमनुमन्यन्ते ताभिरनुमतः सूयते यस्मै वै राज्ञा-नो राज्यमनुमन्यन्ते स राज्ञा भवति न स यस्मै न तद्यदेता देवताः सुता एतेन सवेन यद्वैनमेता देवता एतस्मै सवाय सुवते तस्मादेता देवस्वः ॥ १२ ॥ ता वै द्विनाम्न्यो भवन्ति । द्विनामा वै सवेन सुतो भवति यस्मै वै सवाय सूयते येन वा सवेन सूयते तदस्य द्वितीयं नाम ॥ १३ ॥ अष्टौ भवन्ति । अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्भ्रेन प्रीणाति ॥ १४ ॥ तदा-हुः । नैतानि हवीꣳषि निर्वपेन्नेदतिरेचयानीति तानि वै निर्वपेदेव कामेभ्यो वाऽएतानि हवीꣳषि निरुप्यन्ते न वै कामानामतिरिक्तमस्ति यद्वै किं च पशुपु-रोडाशमनु हविर्निरुप्यते पशावेव स मध्यतो मेधो धीयतऽउभयानि निर्वपत्य-धरस्य चाग्नेश्चाधरस्य पूर्वमथाग्नेस्तस्योक्तो बन्धुरुच्चैः पशुपुरोडाशो भवत्युपाꣳशु-तानीष्टिर्ह्यनुब्रूहि प्रेष्येति पशुपुरोडाशस्याहानुब्रूहि यजेत्येतेषामिष्टिर्हि समानः स्विष्टकृत्समानीडेष्टा देवता भवत्यसमवहितꣳ स्विष्टकृते ॥ १५ ॥ अथैनं पूर्वा-भिषेकेणाभिमृशति । सविता त्वा सवानाꣳ सुवतामिष वोऽग्नी राज्ञा सोमोऽस्मा-कं ब्राह्मणानाꣳ राजेति ब्राह्मणानेवापोद्धरत्यनाख्यान्करोति ॥ १६ ॥ ब्राह्मणम् ॥ ५ [४. ३.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या १७ ॥ ॥

अथ प्रातः प्रातरनुवाकमुपाकरिष्यन् । अग्निं युनक्ति युक्तेन समश्नवाऽइति तेन युक्तेन सर्वान्कामान्त्समश्नुते तं वै पुरस्तात्सर्वस्य कर्मणो युनक्ति तद्यत्किं चात्र ऊर्ध्वं क्रियते युक्ते तत्सर्वꣳ समाधीयते ॥ १ ॥ परिधिषु युनक्ति । अग्नय एते यत्परिधयोऽग्निभिरिव तदग्निं युनक्ति ॥ २ ॥ स मध्यमं परिधिमुपस्पृश्य । एतद्य-जुर्जनपत्यग्निं युनज्मि शवसा घृतेनेति बलं वै शवोऽग्निं युनज्मि बलेन च घृतेन

चेत्येतद्दिव्यꣳ सुपर्णं वयसा बृहन्तमिति दिव्यो वाऽएष सुपर्णो वयसो बृहन्धू-
मेन तेन वयं गमेम ब्रध्नस्य विष्टपꣳ स्वो रुहाणा अधि नाकमुत्तममिति स्वर्गो
वै लोको नाकस्तेन वयं गमेम ब्रध्नस्य विष्टपꣳ स्वर्गं लोकꣳ रोहन्तोऽधि ना-
कमुत्तममित्येतत् ॥३॥ अथ दक्षिणे । इमौ ते पक्षावजरौ पतत्रिणौ याभ्याꣳ र-
क्षाꣳस्यपहꣳस्यग्ने ताभ्यां पतेम सुकृतामु लोकं यत्रऽऋषयो जग्मुः प्रथमजाः पु-
राणा इत्यमूनेतदृषीनाह ॥४॥ अथोत्तरे । इन्द्रुर्दक्षः श्येन ऋतावा हिरण्यपक्षः
शकुनो भुरण्युरित्यमृतं वै हिरण्यममृतपक्षः शकुनो भर्तेत्येतन्मह्वात्सधस्थे ध्रुव
आ निषत्तो नमस्तेऽअस्तु मा मा हिꣳसीरित्यात्मनः परिदां वदते ॥५॥ तद्यन्म-
ध्यमं यजुः । स आत्माथ येऽअभितस्तौ पक्षौ तस्मात्ते पक्षवती भवतः पक्षौ हि
तौ ॥६॥ त्रिभिर्युनक्ति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्युनक्ति
॥७॥ अथ राजानमभिषुत्याग्नौ जुहोति । एष वै स सव एतद्वै तत्सूयते यमस्मै
तमेता देवताः सवमनुमन्यन्ते याभिरनुमतः सूयते यस्मै वै राजानो राज्यमनु-
मन्यन्ते स राजा भवति न स यस्मै न तद्यदग्नौ जुहोति तदग्निमभिषिञ्चति सो
ऽस्यैष दैव आत्मा सोमाभिषिक्तो भवत्यमृताभिषिक्तोऽथ भक्षयति तदात्मानम-
भिषिञ्चति सोऽस्यायमात्मा सोमाभिषिक्तो भवत्यमृताभिषिक्तः ॥८॥ अग्नौ जुहो-
थ भक्षयति । दैवो वाऽअस्यैष आत्मा मानुषोऽयं देवा उ वाऽअग्रेऽथ मनुष्या-
स्तस्मादग्नौ जुहोथ भक्षयति ॥९॥ अथैनं विमुञ्चति । आप्त्वा तं कामं यस्मै का-
मयैनं युङ्क्ते यज्ञायज्ञियꣳ स्तोत्रमुपाकरिष्यन्त्स्वर्गो वै लोको यज्ञायज्ञियमेतस्य वै
गत्याऽएनं युङ्क्ते तदाप्त्वा तं कामं यस्मै कामयैनं युङ्क्ते ॥१०॥ तं वै पुरस्तात्स्तो-
त्रस्य विमुञ्चति । स यदुपरिष्टात्स्तोत्रस्य विमुञ्चेत्पराङ् स्वैतꣳ स्वर्गं लोकमतिप्र-
णाश्येद्थ यत्पुरस्तात्स्तोत्रस्य विमुञ्चति तत्सम्प्रति स्वर्गं लोकमाप्त्वा विमुञ्चति
॥११॥ परिधिषु विमुञ्चति । परिधिषु ह्येनं युनक्ति यत्र वाव योग्यं युञ्जन्ति तदेव

तद्विमुञ्चन्ति ॥ १२ ॥ स संध्योरुपस्पृश्य । एने यजुषी जपति तथा द्वे यजुषी त्रीन्प-रिधीन्ननुविभवतो दिवो मूर्धासि पृथिव्या नाभिरिति दक्षिणे विश्वस्य मूर्धन्नधि तिष्ठसि श्रित इत्युत्तरे मूर्धवतीभ्यां मूर्धा ह्यस्यैषोऽप्सुमतीभ्यामग्नेरेतद्वैश्वानरस्य स्तोत्रं यद्यज्ञायज्ञियꣳ शान्तिर्वाऽआपस्तस्माद्प्सुमतीभ्याम् ॥ १३ ॥ द्वाभ्यां विमुञ्च-ति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतद्विमु-ञ्चति त्रिभिर्युनक्ति तत्पञ्च पञ्चचितिकोऽग्निः पञ्चर्तवः संवत्सरः संवत्सरोऽग्नि-र्यावानग्निर्यावत्यस्य मात्रा तावत्तद्भवति ॥ १४ ॥ तꣳ हैके । प्रायणीयऽएवातिरात्रे युञ्जन्त्युदयनीये विमुञ्चन्ति सꣳस्थान्नूपं वाऽएतद्यद्विमोचनं किं पुरा सꣳस्थायै सꣳ-स्थान्नूपं कुर्यामेति न तथा कुर्याद्क्ररक्रर्वाऽएष यज्ञस्तायतेऽक्ररक्रः संतिष्ठतेऽक्र-ररेनꣳ स्वर्गस्य लोकस्य गत्यै युङ्क्तेऽक्ररक्ररेनेन स्वर्गं लोकं गच्छति तस्माद्क्र-ररेव युञ्ज्याद्क्ररक्रर्विमुञ्चेत् ॥ १५ ॥ अथो यथा प्रायणीयेऽतिरात्रे । सामिधेनी-रनूच्य ब्रूयाद्उदयनीयऽएवातोऽनुवक्तास्मीति तादृक्तत्तस्माद्क्ररक्ररेव युञ्ज्याद्क्रर-क्रर्विमुञ्चेत् ॥ १६ ॥ तद्वैतच्छाण्डिल्यः । कङ्कतीयेभ्योऽक्ररक्रःकर्म प्रदिश्य प्रवव्राजा-क्ररक्ररेव वो युनज्मानक्ररक्रर्विमुञ्चानिति तस्माद्क्ररक्ररेव युञ्ज्याद्क्ररक्रर्विमुञ्चेत् ॥ १७ ॥ ब्राह्मणम् ॥ १ [४. ४.] ॥ चतुर्थोऽध्यायः [५१.] ॥ ॥

अथातः पयोव्रततायै । पयोव्रतो दीक्षितः स्याद्देवेभ्यो ह वाऽअमृतमपचक्रा-म ॥ १ ॥ ते होचुः । श्रमेण तपसेदमन्विच्छामेति तक्रमेण तपसान्वैच्छंस्ते दीक्षित्वा पयोव्रता अभवन्नेतद्वै तपो यो दीक्षित्वा पयोव्रतोऽसत्तस्य घोषमाशुश्रुवुः ॥ २ ॥ ते होचुः । नेदीयो वै भवति भूयस्तप उपायामेति ते त्रीँस्तनानुपेयुस्तत्पराद्-दृशुः ॥ ३ ॥ ते होचुः । नेदीयो वै भवति भूयस्तप उपायामेति ते द्वौ स्तनाऽउ-पेयुस्तन्नेदीयसः पराददृशुः ॥ ४ ॥ ते होचुः । नेदीयो वै भवति भूयस्तप उपाया-मेति तऽएकꣳ स्तनमुपेयुस्तदधिजगाम न वभिपत्तुꣳ शेकुः ॥ ५ ॥ ते होचुः ।

अधि वाऽअगन्न्वभिपत्तुꣳ शक्नुमः सर्वं तप उपायामेति तऽउपवसथेऽनाशकमुपेयुरेतद्वै सर्वं तपो यदनाशकस्तस्मादुपवसथे नाश्नीयात् ॥६॥ तत्प्रातरभिपद्य । अभिषुत्याग्नावञ्जुह्वुस्तदग्नावमृतमदधुः सर्वेषामु ह्येष देवानामात्मा यदग्निस्तद्यदग्नावमृतमदधुस्तदात्मन्नमृतमदधत ततो देवा अमृता अभवन् ॥७॥ तद्यत्तदमृतꣳ सोमः स । तदद्यापि यजमानः श्रमेण तपसान्विच्छति स दीक्षित्वा पयोव्रतो भवत्येतद्वै तपो यो दीक्षित्वा पयोव्रतोऽसत्तस्य घोषमाशृणोतीत्यह्वे क्रय इति ॥८॥ स त्रीन्स्तनानुपैति । तत्परापश्यति स द्वौ स्तनाऽउपैति तन्नेदीयसः परापश्यति सऽएकꣳ स्तनमुपैति तदधिगच्छति न वभिपत्तुꣳ शक्नोति स उपवसथेऽनाशकमुपैत्येतद्वै सर्वं तपो यदनाशकस्तस्मादुपवसथे नाश्नीयात् ॥९॥ तत्प्रातरभिपद्य । अभिषुत्याग्नौ जुहोति तदग्नावमृतं दधात्यथ भक्षयति तदात्मन्नमृतं धत्ते सोऽमृतो भवत्येतद्वै मनुष्यस्यामृतत्वं यत्सर्वमायुरेति तथो ह्यनेनात्मना सर्वमायुरेति ॥१०॥ अग्नौ जुह्वाथ भक्षयति । दैवो वाऽअस्यैष आत्मा मानुषोऽयं देवा उ वाऽअग्नेऽथ मनुष्यास्तस्मादग्नौ जुह्वाथ भक्षयति ॥११॥ अथातः समिष्टयजुषामेव मीमाꣳसा । देवाश्चासुराश्चोभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुर्वाचमेव सत्यानृते सत्यं चैवानृतं च तऽउभयऽएव सत्यमवदन्नुभयेऽनृतं ते ह सदृशं वदन्तः सदृशा एवासुः ॥१२॥ ते देवा उत्सृज्यानृतम् । सत्यमन्वालेभिरेऽसुरा उ होत्सृज्य सत्यमनृतमन्वालेभिरे ॥१३॥ तद्वेदꣳ सत्यमीक्षां चक्रे । यदसुरेष्वास देवा वाऽउत्सृज्यानृतꣳ सत्यमन्वालप्सत ह्वत तदयानीति तद्देवानाजगाम ॥१४॥ अनृतमु ह्येक्षां चक्रे । यद्देवेष्वासासुरा वाऽउत्सृज्य सत्यमनृतमन्वालप्सत ह्वत तदयानीति तदसुरानाजगाम ॥१५॥ ते देवाः । सर्वꣳ सत्यमवदन्त्सर्वमसुरा अनृतं ते देवा आसक्ति सत्यं वदन्त ऐषावीरुतरा-इवासुरनाढ्यतरा-इव तस्माद्व ह्येतस्य आसक्ति सत्यं वदत्येषावीरुतर-इवैव भवत्यनाढ्यतर-इव स ह

वेवात्ततो भवति देवा ह्येवात्ततोऽभवन् ॥१६॥ अथ ह्यासुराः । आसत्क्यनृतं वदन्त ऊष-इव पिपिसुराढ्या-इवासुस्तस्माद्व हैतस्य आसत्क्यनृतं वदत्यूषऽइवैव पिस्यत्याढ्य-इव भवति परा ह्व वेवात्ततो भवति परा ह्यसुरा अभवन् ॥१७॥ तस्यत्तत्सत्यम् । त्रयी सा विद्या ते देवा अब्रुवन्यज्ञं कृत्वेदꣳ सत्यं तनवामहा ऽइति ॥१८॥ ते दीक्षणीयां निरवपन् । तद्व ह्यासुरा अनुबुबुधिरे यज्ञं वै कृत्वा तद्देवाः सत्यं तन्वते प्रेत तदाहरिष्यामो यदस्माकं तत्रेति तस्य समिष्टयजुरुक्तमासाथाऽग्मुस्तस्मात्तस्य यज्ञस्य समिष्टयजुर्न जुह्वति ते देवा असुरान्प्रतिदृश्य समुल्लुप्य यज्ञमन्यत्कर्तुं दधिरेऽन्यद्वै कुर्वन्तीति पुनः प्रेयुः ॥१०॥ तेषु प्रेतेषु । प्रायणीयं निरवपंस्तद्व ह्यासुरा अन्वेव बुबुधिरे तस्य शम्योरुक्तमासाथाऽग्मुस्तस्मात्स यज्ञः शम्व्वत्तस्ते देवा असुरान्प्रतिदृश्य समुल्लुप्य यज्ञमन्यदेव कर्तुं दधिरेऽन्यद्वै कुर्वन्तीति पुनरेव प्रेयुः ॥२०॥ तेषु प्रेतेषु । राजानं क्रीत्वा पर्युह्याथास्माऽआतिथ्यꣳ ह्विर्निरवपंस्तद्व ह्यासुरा अन्वेव बुबुधिरे तस्येडोपह्वतासाथाऽग्मुस्तस्मात्स यज्ञ इडात्तस्ते देवा असुरान्प्रतिदृश्य समुल्लुप्य यज्ञमन्यदेव कर्तुं दधिरेऽन्यद्वै कुर्वन्तीति पुनरेव प्रेयुः ॥२१॥ तेषु प्रेतेषु । उपसदोऽतन्वत ते तिस्र एव सामिधेनीरनूच्य देवता एवायजन्न प्रयाज्ञान्नानुयाज्ञानुभयतो यज्ञस्योदसाद्यन्भूयिष्ठꣳ हि तत्राब्रवन्त तस्माद्व उपसत्सु तिस्र एव सामिधेनीरनूच्य देवता एव यजति न प्रयाज्ञान्नानुयाज्ञानुभयतो यज्ञस्योत्सादयति ॥२२॥ तऽउपवसथेऽग्नीषोमीयं पशुमालेभिरे । तद्व ह्यासुरा अन्वेव बुबुधिरे तस्य समिष्टयजूꣳष्यकृतान्यासुरथाऽग्मुस्तस्मात्तस्य पशोः समिष्टयजूꣳषि न जुह्वति ते देवा असुरान्प्र° ॥२३॥ तेषु प्रेतेषु । प्रातः प्रातःसवनमतन्वत तद्व ह्यासुरा अन्वेव बुबुधिरे तस्यैतावत्कृतमास यावत्प्रातःसवनमथाऽग्मुस्ते देवा असुरान्प्र° ॥२४॥ तेषु प्रेतेषु । माध्यन्दिनꣳ सवनमतन्वत तद्व ह्यासुरा अन्वेव बुबुधिरे तस्यैतावत्कृतमास यावन्मा-

ध्यन्दिनमथाऽग्नमुस्ते देवा असुरान्प्र० ॥२५॥ तेषु प्रेतेषु । सवनीयेन पशुनाचरंस्तदु ह्यासुरा अन्वेव बुबुधिरे तस्यैतावत्कृतमास यावदेतस्य पशोः क्रियतेऽथाऽग्नमुस्ते देवा असुरान्प्र० ॥२६॥ तेषु प्रेतेषु । तृतीयसवनमतन्वत तत्समस्थापयन्यत्समस्थापयंस्तत्सर्वꣳ सत्यमाप्नुवंस्ततोऽसुरा अपपुप्रुविरे ततो देवा अभवन्परासुरा भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य एवं वेद ॥२७॥ ते देवा अब्रुवन् । ये न इमे यज्ञाः सामिसꣳस्थिता यानिमान्विज्ञकृतोऽगामोप तज्ज्ञानीत यथेमान्त्सꣳस्थापयामेति तेऽब्रुवंश्चेतयधमिति चितिमिक्तेति वाव तदब्रुवंस्तदिक्त यथेमान्यज्ञान्त्सꣳस्थापयामेति ॥२८॥ ते चेतयमानाः । एतानि समिष्टयजूꣳष्यपश्यंस्तान्यजुरुवुस्तैरेतान्यज्ञान्त्समस्थापयन्यत्समस्थापयंस्तस्मात्सꣳस्थितयजूꣳष्यथ यत्समयजंस्तस्मात्समिष्टयजूꣳषि ॥२९॥ ते वाऽएते नव यज्ञाः । नवैतानि समिष्टयजूꣳषि तद्यदेतानि जुहोत्येतानेवैतद्यज्ञान्त्सꣳस्थापयत्युभयानि जुहोत्यधरस्य चाग्नेश्चाधरस्य पूर्वाण्यथाग्नेस्तस्योक्तो बन्धुः ॥३०॥ द्वेऽग्नेर्जुहोति । द्विपाद्यजमानो यजमानोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैतद्यज्ञꣳ सꣳस्थापयतीष्टो यज्ञो भृगुभिरिष्टोऽग्निराकृतः पिपर्तु न इति ॥३१॥ तान्युभयान्येकादश सम्पद्यन्ते । एकादशाक्षरा त्रिष्टुब्वीर्यं त्रिष्टुब्वीर्यमेवैतद्यज्ञमभिसम्पादयति ॥३२॥ यद्वैवैकादश । एकादशाक्षरा वै त्रिष्टुप्त्रिष्टुभ इन्द्र इन्द्रो यज्ञस्यात्मेन्द्रो देवता तद्य एव यज्ञस्यात्मा या देवता तस्मिन्नेवैतद्यज्ञमन्ततः प्रतिष्ठापयति ॥३३॥ समिष्टयजूꣳषि हुत्वावभृथं यन्ति । अवभृथादुदेत्योदयनीयेन चरित्वानूबन्ध्यस्य पशुपुरोडाशमनु देविकानाꣳ हवीꣳषि निर्वपति ॥३३॥ एतद्वै प्रजापतिः । प्राप्य राड्वै वामन्यत स दिन्नु प्रतिष्ठायेदꣳ सर्वं दुधद्विदुधदतिष्ठद्यदुधद्विदुधदतिष्ठत्तस्माद्धाता तथैवैतद्यज्ञमानो दिन्नु प्रतिष्ठायेदꣳ सर्वं दुधद्विदुधत्तिष्ठति ॥३५॥ यद्वैतानि हवीꣳषि निर्वपति । दिश एषोऽग्निस्ता ऽएवास्मै पुरस्ताद्भर्स्तम्बं च लोगेष्टकाश्चोपदधाति

ताः प्राणभृतः प्रथमायां चितौ सर्वेव द्वितीया सर्वा तृतीया सर्वा चतुर्थ्यथ पञ्चम्यै चितेरसपत्ना नाकसदः पञ्चचूडास्ता ऊर्धा उत्क्रामत्य आयंस्ताभ्यः प्रजापतिरबिभेत्सर्व वाऽइदमिमाः पराच्योऽत्येष्यन्तीति ता धाता भूत्वा पर्यगह्णात्सु प्रत्यतिष्ठत् ॥३६॥ स यः स धातासौ स आदित्यः । अथ यत्तद्दिशां परमं क्रान्तमेतत्तद्यस्मिन्नेष एतत्प्रतिष्ठितस्तपति ॥३७॥ स यः स धातायमेव स धात्रः । द्वादशकपालः पुरोडाशो द्वादशकपालो द्वादश मासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापतिर्धाताथ यत्तद्दिशां परमं क्रान्तमेतानि तानि पूर्वाणि हवीꣳष्यनुमत्यै चरू राकायै चरुः सिनीवाल्यै चरुः कुह्वै चरुस्तद्यदेतानि निर्वपति यदेव तद्दिशां परमं क्रान्तं तस्मिन्नेवैनमेतत्प्रतिष्ठापयति तꣳ सर्वं जुह्वोत्येतस्यैव कृत्स्नतायै ॥३८॥ ता वाऽएता देव्यः । दिशो ह्येताश्छन्दाꣳसि वै दिशश्छन्दाꣳसि देव्योऽथेष कः प्रजापतिस्तद्यद्देव्यश्च कश्च तस्माद्विकाः पञ्च भवन्ति पञ्च हि दिशः ॥३९॥ तद्दाक्षः । नैतानि हवीꣳषि निर्वपेन्नेदतिरिचयानीति तानि वै निर्वपेदेव कामेभ्यो वाऽएतानि हवीꣳषि निरुप्यन्ते न वै कामानामतिरिक्तमस्ति यद्वै किं च पशुपुरोडाशमनु हविर्निरुप्यते पशावेव स मध्यतो मेधो धीयतऽउभयानि निर्वपत्यधरस्य चाग्नेश्चाधरस्य पूर्वमथाग्नेस्तस्योक्तो बन्धुरुच्चैः पशुपुरोडाशो भवत्युपाꣳश्वेतानीष्टिर्ह्यनुब्रूहि प्रेष्येति पशुपुरोडाशस्याह्यनुब्रूहि यज्ञेत्येतेषामिष्टिर्हि समानः स्विष्टकृत्समानोडा ॥४०॥ तस्य वाऽएतस्य पशोः । जुह्वति समिष्टयजूꣳष्यभ्यवयन्ति हृदयशूलेनावभृथꣳ सꣳस्था ह्येष पशुर्हृदयशूलेन चरित्वा ॥४१॥ प्रत्येत्य वैश्वकर्मणानि जुह्वोति । विश्वानि कर्माण्ययमग्निस्तान्यस्यात्र सर्वाणि कर्माणि कृतानि भवन्ति तान्येतत्प्रीणाति तानि हविषा देवतां करोति यस्यै वै देवतायै हविर्गृह्यते सा देवता न सा यस्यै न गृह्यतेऽथो विश्वकर्मायमग्निस्तमेवैतत्प्रीणाति ॥४२॥ यद्वेव वैश्वकर्मणानि जुह्वोति । प्रायणं च ह्याग्नेरुदयनं च

सावित्राणि प्रायणं वैश्वकर्मणान्युदयनꣳ स यत्सावित्राण्येव जुहुयान्न वैश्वकर्मणानि यथा प्रायणमेव कुर्यान्नोदयनं तादृक्तदथ यद्वैश्वकर्मणान्येव जुहुयान्न सावित्राणि यथोदयनमेव कुर्यान्न प्रायणं तादृक्तदुभयानि जुहोति प्रायणं च तदुदयनं च करोति ॥४३॥ अष्टावमूनि भवन्ति । एवमिमानि तद्यथा प्रायणं तथोदयनं करोति स्वाहाकारोऽमीषां नवमो भवत्येवमेषां तद्यथा प्रायणं तथोदयनं करोत्याकूतिरमीषां दशमी भवत्येवमेषां तद्यथा प्रायणं तथोदयनं करोति संततां तत्राकूतिं जुहोति रेतो वै तत्र यज्ञो रेतसोऽविच्छेदाय स्रुवेणोद्गृह्य स्वाहाकारं निरुक्तꣳ हि रेतो ज्ञातं भवति ॥४४॥ यदाकूतात् । समसुस्रोद्भृदो वा मनसो वा सम्भृतं चक्षुषो वेत्येतस्माद्धेतत्सर्वस्मादग्रे कर्म समभवत्तदनु प्रेत सुकृतामु लोकं यत्रऽऋषयो जग्मुः प्रथमजाः पुराणा इत्यमूनेतदृषीनाह ॥४५॥ एतꣳ सधस्थ । परि ते ददामीति स्वर्गो वै लोकः सधस्थस्तदेनꣳ स्वर्गाय लोकाय परिददाति यमावहाद्भिरवधिं ज्ञातवेदाः अन्वागन्ता यज्ञपतिर्वोऽअत्र तꣳ स्म जानीत परमे व्योमन्निति यथैव यजुस्तथा बन्धुः ॥४६॥ एतं जानाथ । परमे व्योमन्देवाः सधस्था विद रूपमस्य यदागच्छात्पथिभिर्देवयानैरिष्टापूर्ते कृणवथाविरस्माऽइति यथैव यजुस्तथा बन्धुरुद्बुध्यस्वाग्ने येन वहसीति तयोरुक्तो बन्धुः ॥४७॥ प्रस्तरेण परिधिना । स्रुचा वेद्या च बर्हिषा ऋचेमं यज्ञं नो नय स्वर्देवेषु गन्तवऽइत्येतैर्नो यज्ञस्य रूपैः स्वर्गं लोकं गमयेत्येतत् ॥४८॥ यद्दत्तं यत्परादानम् । यत्पूर्तं याश्च दक्षिणाः तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधदिति यच्चैव सम्प्रति दग्धो यच्चासम्प्रति तन्नोऽयमग्निर्वैश्वकर्मणः स्वर्गे लोके दधाविति्येतत् ॥४९॥ यत्र धारा अनपेताः । मधोर्घृतस्य च याः तदग्निर्वैश्वकर्मणः स्वर्देवेषु णो दधदिति यथैव यजुस्तथा बन्धुः ॥५०॥ अष्टौ वैश्वकर्मणानि जुहोति । अष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतदन्नेन प्रीणाति ॥५१॥ वैश्व-

कर्मणानि कृत्वा नाम करोति । यदा वै सर्वः कृत्स्नो ज्ञातो भवत्यथ नाम कुर्वन्त्यत्र वाऽएष सर्वः कृत्स्नो ज्ञातो भवति ॥५२॥ ॥ शतम्५१०० ॥ ॥ नाम कृत्वाऽथैनमुपतिष्ठते । सर्वेण वाऽएष एतमात्मना चिनोति स यदेतामत्रात्मनः परिदां न वदेतात्र क्वैवास्यैष आत्मानं वृञ्जीताथ यदेतामत्रात्मनः परिदां वदते तथो ह्यस्यैष आत्मानं न वृङ्क्ते येऽग्नयः पाञ्चजन्या अस्यां पृथिव्यामधि तेषामसि त्वमुत्तमः प्र नो जीवातवे सुवेति ये के चाग्नयः पञ्चचितिका अस्यां पृथिव्यामधि तेषामसि त्वꣳ सत्तमः प्रोऽअस्मान्जीवनाय सुवेत्येतदनुष्टुभा वाग्वाऽअनुष्टुब्वागु सर्वाणि छन्दाꣳसि सर्वैरेवास्माऽएतच्छन्दोभिर्निर्क्रुतऽउपस्थायाग्निꣳ समारोक्य निर्मथ्योद्वसानीयया यजते ॥५३॥ अथ मैत्रावरुण्या पयस्यया यजते । देवत्रा वाऽएष भवति य एतत्कर्म करोति दैव्म्वेतन्मिथुनं यन्मित्रावरुणौ स यदेतयानिष्ट्वा मानुष्यां चरेत्प्रत्यवरोहः स यथा दैवः सन्मानुषः स्यात्तादृक्तद्यथ यदेतया मैत्रावरुण्या पयस्यया यजते दैवमेवैतन्मिथुनमुपैत्येतयेष्ट्वा कामं यथाप्रतिरूपं चरेत् ॥५४॥ यद्वैवैतया मैत्रावरुण्या पयस्यया यजते । प्रजापतेर्विस्रस्ताद्रेतः परापतत्तं यत्र देवाः समस्कुर्वंस्तदस्मिन्नेतया मैत्रावरुण्या पयस्यया रेतोऽदधुस्तथैवास्मिन्नयमेतद्दधाति ॥५५॥ स यः स प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयतेऽथ यदस्मात्तद्रेतः परापतदेषा सा पयस्या मैत्रावरुणी भवति प्राणोदानौ वै मित्रावरुणौ प्राणोदानाऽउ वै रेतः सिक्तं विकुरुतः पयस्या भवति पयो हि रेतो यज्ञो भवति यज्ञो ह्येव यज्ञस्य रेत उपाꣳशु भवत्युपाꣳशु हि रेतः सिच्यतेऽन्ततो भवत्यन्ततो हि रेतो धीयते ॥५६॥ तस्यै वाऽइनेन चरन्ति । तस्मिन्दक्षिणां दधाति तूपरौ मिथुनौ दध्यादित्यभ्याज्ञायैनेव मन्यऽइति ह स्माह माक्षित्थिः स्रवत्यु ह्वैषाग्निचित आकृतिः सोमाकृतिर्यामनिष्टके जुहोति ॥५७॥ स स्वयमातृण्णा एवोपदधीत । इमे वै लोकाः स्वयमातृण्णा इमऽउ लोका एषोऽग्निश्चितः ॥५८॥

ऋतव्या एवोपदधीत । संवत्सरो वाऽऋतव्याः संवत्सर एषोऽग्निश्चितः ॥५१॥ विश्वज्योतिष एवोपदधीत । एता वै देवता विश्वज्योतिष एता उ देवता एषोऽग्निश्चितः ॥६०॥ पुनश्चितिमेवोपदधीत । पुनर्यज्ञो वै षोत्तरा वै षा देवयज्या पुनर्यज्ञमेवैतदुपधत्तऽउत्तरामेव देवयज्यामुप वैनं पुनर्यज्ञो नमतीति न तथा कुर्याद्यो वाव चितेऽग्निर्निधीयते तामेवेष्टकामेष सर्वोऽग्निरभिसम्पद्यते तद्यद्गौ जुहोति तद्वास्य यथा सर्वस्मिञ्छाण्डिल्येऽग्नौ संचिते पद्मपुष्कुवत्याहुतयो हुताः स्युरेवमस्यैता आहुतयो हुता भवन्ति ॥६१॥ सर्वाणि वाऽएष भूतानि । सर्वान्देवान्गर्भी भवति योऽग्निं बिभर्ति स योऽसंवत्सरभृतं चिनुतऽएतानि वै स सर्वाणि भूतानि गर्भं भूतं निर्हते यो न्वेव मानुषं गर्भं निर्हन्ति तन्त्वेव परिचक्षतेऽथ किं य एतं देवो वेष नासंवत्सरभृतस्यऽर्विज्ञा भवितव्यमिति ह स्माह वात्स्यो नेदस्य देवरेतसस्य निर्हणमानस्य मेष्यसानीति ॥६२॥ षण्मास्यमन्तमं चिन्वीतेत्याहुः । षण्मास्या वाऽअन्तमा गर्भा ज्ञाता जीवन्तीति स यद्यसंवत्सरभृते मह्रुक्थꣳ शꣳसेदृगशीतीः शꣳसेद्सर्वं वै तद्यद्संवत्सरभृतोऽसर्वं तद्यदृगशीतयो विकृष्टं ब्रेनꣳ स भूयो विकर्षेद्यदि चैव संवत्सरभृतः स्याद्यदि चासंवत्सरभृतः सर्वमेव मह्रुक्थꣳ शꣳसेत् ॥६३॥ अथ ह शाण्डिल्यायनः प्राच्यां जगाम । तꣳ ह दैयाम्पातिरुवाच शाण्डिल्यायन कथमग्निश्चेतव्यो ग्लायामोऽह संवत्सरभृतायाग्निमु चिकीषामहऽइति ॥६४॥ स होवाच । कामं न्वाऽएनꣳ स चिन्वीत येन पुरा संवत्सरं भूतः स्यात्तꣳ ह्येव तं भूतꣳ सन्तं चिनुतऽइति ॥६५॥ कामम्वैवैनꣳ स चिन्वीत । यः संवत्सरमभिषविष्यन्त्स्यादेष वाऽएनं प्रत्यक्षमन्नेन बिभर्त्येताभिराहुतिभिः ॥६६॥ कामम्वैवैनꣳ स चिन्वीत । यः संवत्सरमग्निहोत्रं जुहुयाद्बिभर्ति वाऽएनमेष योऽग्निहोत्रं जुहोति ॥६७॥ कामम्वैवैनꣳ स चिन्वीत । यः संवत्सरं ज्ञातः स्यात्प्राणो वाऽअग्निस्तमेतद्बिभर्त्यथ ह वै रेतः

सिक्तं प्राणोऽन्ववरोहति तद्विन्दते तथज्ज्ञातं-ज्ञातं विन्दते तस्माज्ज्ञातवेदास्तस्माद्ध्येवंवित्कामꣳ सभ्योभूतं चिन्वीत यदु ह वाऽएवंवित्पिबति वा पाययति वा तदेवास्य यथा सर्वस्मिञ्छाण्डिलेऽग्नौ संचिते पक्षपुच्छवत्याकृतयो कृताः स्युरेवमस्यैता आकृतयो कृता भवन्ति ॥ ६८ ॥ ब्राह्मणम् ॥ २ [५. १.] ॥ ॥

इन्द्र एतत्सप्तर्चमपश्यत् । न्यूनस्यात्याऽअतिरिक्तस्यानतिरिक्त्यै व्यृद्धस्य समृद्ध्याऽअथ ह वाऽईश्वरोऽग्निं चित्वा किंचिद्दौरितमापत्तोर्वि वा क्लृप्तोर्यद्वा यदा ह वा एतक्रूयापर्णाः सायकायनः शुश्रावाथ कैतत्कर्मोपदधर्ष ॥ १ ॥ सैषा त्रयस्य समृद्धिः । अग्नेः समृद्ध्यैऽग्निं चिनुते तस्य समृद्ध्यैऽग्निं चिनोति तस्य समृद्धिः ॥ २ ॥ तथदेतेनोपतिष्ठते । यदेवास्यात्र विद्वान्वाविद्वान्वाति वा रेचयति न वाभ्यापयति तदेवास्यैतेन सर्वमाप्तं भवति यदस्य किं चानाप्तं य उ तस्यामनुष्टुभ्यृचि कामोऽत्रैव तमाप्नोत्यथाऽएतस्मादेवैतत्कर्मणो रक्षाꣳसि नाष्ट्रा अपक्रान्ति नो कैनमनुव्याहारिणा स्तृणवते तस्माद्ध्येवंवित्कामं परस्माऽअग्निं चिनुयादीश्वरो ह श्रेयान्भवितोः ॥ ३ ॥ वार्त्रघ्नाय शवसे । सकृदानुं पुरुहूत क्षियन्तमिति वार्त्रघ्नीभ्यां प्रथमाभ्यामुपतिष्ठतऽएतद्वै देवा वृत्रं पाप्मानꣳ हत्वापहतपाप्मान एतत्कर्माकुर्वत तथैवैतथज्ञमानो वृत्रं पाप्मानꣳ हत्वापहतपाप्मैतत्कर्म कुरुते ॥ ४ ॥ वि न इन्द्र मृधो जहि । मृगो न भीमः कुचरो गिरिष्ठा इति वैमृधीभ्यां द्वितीयाभ्यामेतद्वै देवा मृधः पाप्मानꣳ हत्वापहतपाप्मान एतत्कर्माकुर्वत तथैवैतथज्ञमानो मृधः पाप्मानꣳ हत्वापहतपाप्मैतत्कर्म कुरुते ॥ ५ ॥ वैश्वानरो न ऊतये । पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यामिति वैश्वानरीभ्यां तृतीयाभ्यामेतद्वै देवा वैश्वानरेण पाप्मानं दग्ध्वापहतपाप्मान एतत्कर्माकुर्वत तथैवैतथज्ञमानो वैश्वानरेण पाप्मानं दग्ध्वापहतपाप्मैतत्कर्म कुरुते ॥ ६ ॥ अश्याम त काममग्ने तवोतीति । एकया कामवत्यैतद्वै देवाः षड्भिश्चेन पाप्मानमपहत्यैकया कामवत्यैकधात्ततः

सर्वान्कामानात्मन्नकुर्वत तथैवैतद्यज्ञमानः षड्चेन पाप्मानमपकृत्यैकया कामवत्यैकधात्मतः सर्वान्कामानात्मन्कुरुते ॥ ७ ॥ सप्तर्च्यं भवति । सप्तचितिकोऽग्निः सप्त ऽर्तवः सप्त दिशः सप्त देवलोकाः सप्त स्तोमाः सप्त पृष्ठानि सप्त छन्दाꣳसि सप्त ग्राम्याः पशवः सप्तारण्याः सप्त शीर्षन्प्राणा यत्किं च सप्तविधमधिदैवतमध्यात्मं तदेनेन सर्वमाप्नोति ता अनुष्टुभमभिसम्पद्यन्ते वाग्वाऽअनुष्टुब्वाचैवास्य तदाप्नोति यदस्य किं चानाप्तम् ॥ ८ ॥ अष्टर्चेनोपतिष्ठेतेत्यु ह्येकऽआहुः । वयं तेऽअद्य रारिमा हि काममिति द्वितीयया कामवत्या सप्त पूर्वास्तदष्टावष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्य तदाप्नोति यदस्य किं चानाप्तमथोऽएवꣳ समं देवते भजतेऽइति न तथा कुर्यादेता वाव सप्ताष्टावनुष्टुभो भवन्ति स योऽष्टर्चे कामोऽत्रैव तमाप्नोति ॥ ९ ॥ ऐन्द्राग्नीभिरुपतिष्ठते । ऐन्द्राग्नोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्य तदाप्नोति यदस्य किं चानाप्तमिन्द्राग्नी वै सर्वे देवाः सर्वदेवत्योऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्य तदाप्नोति यदस्य किं चानाप्तम् ॥ १० ॥ तद्ध्येके । कर्मणः-कर्मण एवैतां प्रतिपदं कुर्वतेऽपकृतपाप्मान एतत्कर्म करवामहाऽइति पुरीषवतीं चितिं कृत्वोपतिष्ठेतेत्यु ह्येकऽआहुस्तत्र हि सा सर्वा कृत्स्ना भवतीति स यथा कामयेत तथा कुर्यादिति नु चयनस्याथातोऽचयनस्य ॥ ११ ॥ त्रयो ह वै समुद्राः । अग्निर्यजुषां महाव्रतꣳ साम्नां महदुक्थमृचाꣳ स य एतानि परस्मै करोत्येतान्ह स समुद्राञ्छोषयते ताञ्छुष्यतोऽन्वस्य छन्दाꣳसि शुष्यन्ति छन्दाꣳस्यनु लोको लोकमन्वात्मात्मानमनु प्रजा पशवः स ह श्वः-श्व एव पापीयान्भवति य एतानि परस्मै करोति ॥ १२ ॥ अथ य एतान्यकृत्वा । परस्माऽअपि सर्वैरन्यैर्यज्ञक्रतुभिर्याजयेदेतेभ्यो ह्येवास्य समुद्रेभ्यश्छन्दाꣳसि पुनरापप्यायन्ते छन्दाꣳस्यनु लोको लोकमन्वात्मात्मानमनु प्रजा पशवः स ह श्वः-श्व एव श्रेयान्भवति य एतानि परस्मै न करोत्यथैष

ह वाऽअस्य दैवोऽमृत आत्मा स य एतानि परस्मै करोत्येतꣳ ह स दैवमात्मानं परस्मै प्रयच्छत्यथ शुष्क एव स्थाणुः परिशिष्यते ॥ १३ ॥ तद्धैके । कृत्वा कुर्वते वा प्रति वा कारयन्तऽएषा प्रायश्चित्तिरिति न तथा कुर्याद्यथा शुष्कꣳ स्थाणुमुदकेनाभिषिञ्चेत्तादृक्तत्पूयेद्वा वै स वि वा मित्येवैतस्य प्रायश्चित्तिरस्तीत्येव विद्यात् ॥ १४ ॥ अथ ह स्माह शाण्डिल्यः । तुरो ह कावषेयः कारोत्यां देवेभ्योऽग्निं चिकाय तꣳ ह देवाः पप्रच्छुर्मुने यद्लोक्यामग्निचित्यामाऽऊरथ कस्माद्चैषीरिति ॥ १५ ॥ स होवाच । किं नु लोक्यं किमलोक्यमात्मा वै यज्ञस्य यज्ञमानोऽङ्गान्यृत्विजो यत्र वाऽआत्मा तदङ्गानि यत्रोऽअङ्गानि तदात्मा यदि वाऽऋत्विजोऽलोका भवत्यलोक ऽ तर्हि यजमान ऽभये हि समानलोका भवन्ति दक्षिणासु वेव न संवदितव्यꣳ संवादेनेवऽर्त्विजोऽलोका इति ॥ १६ ॥ ब्राह्मणम् ॥ ३ [५. २.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १०७ ॥ पञ्चमोऽध्यायः [६०] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या ४०२ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे संचितिनाम नवमं काण्डं समाप्तम् ॥ १ ॥ ॥

EXTRACTS FROM THE COMMENTARY OF SÂYANÂCÂRYA.

चितीनामुपधानं हि काण्डेऽष्टमऽउदीरितम् अथास्मिन्नवमे कर्म संचितस्याभिधास्यते ॥ तत्रादौ तावदुक्तरुद्रियहोमं विधत्ते । विहितोऽयं होमो रुद्ररूपतापन्नस्याग्नेरुपशमनार्थः ॥ १ ॥ शान्तदेवत्यं शान्तदेवतार्थं देवताशान्त्यर्थम् ॥ २ ॥ ज्ञर्तिला आरण्यतिलाः ॥ ३ ॥ चितीः परितो निचिक्षिप्ताः क्षुद्रपाषाणाः परिश्रितः ॥ ५ ॥ गवेधुका आरण्या गोधूमाः तेषां पिष्टैः । सा प्रजापतिरूपा देवता ॥ ८ ॥ आशयो हृदयदेशः ॥ १ ॥ लोमसु विषसंस्पृष्टेष्वपि बाधाभावात् । अत एतदुत्तरार्धहोमेन स्वस्यामेव (!) दिशि एनं रुद्रं प्रीणाति स्वस्यामेव तमवयजते पृथक्करोति ॥ १० ॥ स वाऽअशीत्यां च स्वाहाकरोतीत्यादिना (क० २१) तिसृष्वशीतिषु स्वाहाकारः क्रियतऽइत्युपरिष्टाद्वक्ष्यते तत्र कस्मिन्प्रदेशे स्वाहाकार इति तत्राह ज्ञानुदघ्नऽइति ज्ञानुप्रमाणप्रदेशे सोऽध्वर्युः प्रथमं स्वाहाकरोति ॥ ११ ॥ उद्वोरं भागम् ॥ १५ ॥ प्रथमानुवाके षोडश मन्त्राः तत्र चतुर्दश मन्त्रानवयुत्य स्तौति ॥ १६ ॥ नमो हिरण्यबाहवऽइत्यादिषु मन्त्रेषु प्रतिपाद्या देवता द्वन्द्विनः तत्र [द्वयो]र्द्वयोर्देवतयोः प्रतिपादनात् । दिशां च पतये नम इत्येतद्धिरण्य-

ज्ञाहवे सेनान्यऽइत्येतयोर्विशेषणम् ॥ १८ ॥ एतत् मन्त्रचतुष्टयम् ॥ २२ ॥ एतानि देवानां हृद्यानि यथा हृदयं प्रधानं तद्वदेतेऽपि प्रधानानि । विचिन्वन्ति अभ्यवहारार्थम् अतस्तत्परिहाराय तेभ्यो नम इत्याह ॥ २३ ॥ दिद्रापयिषति कुत्सितं कर्तुमिच्छति ॥ २४ ॥ अधिमासापेक्षया संवत्सरे सप्तऽर्तवो भवन्ति । यैषा संख्यासम्पत्तिस्तामभिलक्ष्य भवति तथाविधा संख्यासम्पत्तिरत्र सम्पादिता भवति ॥ २६ ॥ एतस्मिन्काले खलु एतेन होमेन इमान्पृथिव्यादीन्लोकानित ऊर्ध्वो भूत्वा रोहति स यज्ञमानः ॥ ३२ ॥ तमेषां ज्ञम्भे दध्म इत्यत्र तमित्मस्य स्थाने अमुमिति प्रयुञ्ज्यादिति कस्यचिन्मतं पूर्वपक्षयितुमाह अमुमेषामिति । अमुमिति तन्नामनिर्देशः । नामधेयग्रहणं तन्निर्देशसिद्ध्यर्थं भवति स च निर्देशो यं द्विष्मो यश्च नो द्वेष्टि तमेषामित्यभिधानादेव सिद्ध इति तथा न कुर्यात् ॥ ३१ ॥ ज्ञान्वादिमुखान्तेषु त्रिषु प्रमाणेषु होमकरणादित ऊर्ध्वं त्रिः कृत्वो रोहतीति पुनश्च त्रिःकृत्वः प्रत्यवरोहति तथा सति षट्संख्या सम्पद्यते ॥ ४० ॥ एतत्कतरुद्रियं षष्ट्युत्तराणि त्रीणि शतानि यजूंषि पञ्चात्त्रिंशत्ततः पञ्चत्रिंशत् । अथावशिष्टानि यानि पञ्चत्रिंशद्भिर्यन्ते तानि त्रयोदशो मासः स चाधिको मासः संवत्सरस्यात्मा मध्यभागः द्वे यजुषी पादौ प्रतिष्ठाशब्देन पादावुच्येते पुनर्द्वे यजुषो प्राणा इन्द्रियाणि यद्यपि ते प्राणा बहवस्तथापि याभि (!) पञ्चत्रिंशद्भिनाधिकमासवत्संवत्सरान्तःपातित्वमभिदधत् (°मासवसंव° !) तन्मासात्मकेन पञ्चत्रिंशता संवत्सरः व्रणावरणादिविशिष्टपुरुषाकारतया (!) प्रदर्श्यते । शाण्डिलदृष्टेऽस्मिन्नग्नौ (स्मिन) मध्यतो मध्यप्रदेशे एतावत्यः षष्ट्युत्तरशतत्रयसंख्याका इष्टका मन्त्रवत्य उपधीयन्ते ॥ ४३ ॥ महदुक्थमिति प्रयाहाज्ञतंसाहव्यपदेशं (?) शस्त्रान्तेनानुशंसनीयं स्तोत्रं (?शस्त्रन्तेना°) पक्ष्याकारं भवति तत्र पञ्चविंश स्तोम आत्मभागः अतश्चात्रापि अशीतीनामभितो विद्यमानानि यानि (? तानि) पञ्चविंशतिर्यजूंषि तान्येव महदुक्थे पञ्चविंशस्तोमात्मक आत्मभागः । आत्मभागादेव तेषां सर्वेषामुत्पत्तेः आत्मभागे तानि सर्वाण्यन्तर्भूतानि । अद इति महदुक्थात्परं मन्त्रजातं बुद्धिस्थं परामृश्यते ॥ ४४ ॥ ॥ १ ॥ १ ॥

पूर्वस्मिन्ब्राह्मणे शतरुद्रीयहोमोऽभिहितः अथास्मिन्नग्नौ परिषेकधेनुकरणविकर्षणादिकं कर्माभिधास्यते ॥ १ ॥ कस्मादध्वर्युपरित्यागेनाग्नीध्रः परिगृह्यतऽइत्यत्राह अग्नेरेष इति परिषेक्तव्यस्याग्नेरशमनेन क्षयदध्वर्यो (?) परिषेक्तरि नो (!) हिंसा संभाविता स्यात् आग्नीध्रस्य पुनरग्न्यात्मकत्वेन आत्मनैवात्मनो हिंसाया असम्भवादहिंसार्थं तस्य परिग्रहः । निकक्षः कक्षप्रादेशः (!) तत्संधिस्थानम् । सर्वतः स्तेरुस्थस्थाने (?) पाषाणं निधाय तत आरभ्य परिषिञ्चेत् ॥ ४ ॥ परिषेकानन्तरमग्म्मंस्तऽइत्यनेन मन्त्रेण पाषाणे कुम्भं निदध्यात् अग्म्मनि कुम्भस्य निधाने परिषेकेण शान्तस्य रुद्रस्य क्षुधं पाषाणे निहितवान्भवति ॥ ५ ॥ विपल्ययते प्रतिपर्येति । लघूयति लघुमिवाचरति । निह्नुते स्वकृतं तद्विषयमपराधमपमार्ष्टि ॥ ६ ॥ साग्म्मानं कुम्भं नैर्ऋत्यां दिशि प्रक्षिपेत् । एतां दिशमिति नैर्ऋतीं दिशं हस्तेनाभिनीय दर्शयति ॥ १० ॥ प्रक्षेपार्थं हरणावसर अग्नेर्बाह्यभागेन हरेत् ॥ ११ ॥ धेनुकरणं नाम वक्ष्यमाणमन्त्रजपपूर्वकं धेनुरूपेणानुसंधानम् ॥ १३ ॥ अतश्च पृथिव्यादिलोकत्रयात्मकस्याग्नेस्त्रयवयवीभूतानामिष्टकानां धेनुकरणं स्थित्वा सम्पाद्यम् यथा धेनवोऽभिमतं पयो (तं या) दुहन्ति तद्वदेवैता अपीष्टकाः स्वाभिलषितं दुहन्तीति (हंति) बुद्ध्या धेनुरूपेणानुसंधानं क्रियते धेनवश्च वीर्यवत्तरेण दुग्धमा-

ना भूयः पयो दुहन्ति न पुनर्दुर्बलेन ॥१४॥ एष यजमानोऽमुष्मिन्लोके उपलक्षणमेतत् इहलोकेऽपि (? इहाताकेऽपि) ब्रह्मणा बृहता वीर्यवता तेन यजुर्मन्त्रेण एता इष्टका बह्वीः एकादिपरार्धान्तसंख्याकाः कुरुते मन्त्रसामर्थ्यादल्पस्य बह्वचनम् ॥१६॥ भुञ्जन्ति पालयन्ति ॥१७॥ अत्यर्थं मूत्रं विसृजन्त्यः । अन्यासामिष्टकानां स्वयमातृष्णारेतःसिग्विश्वज्योतिरप्स्याप्राणभृदित्यादिकानि नामानि विद्यन्ते लोकम्पृणानां तु तथा प्रातिस्विकनामधेयाभावादिष्टकावत्स्वनामानाह्वानेन विमुखा भूता अवस्थिताः पश्चाद्देवास्ता इष्टका विराजनाम्नीरन्कुर्वत ॥१९॥ एनमग्निमग्निस्थलम् ॥२०॥ संस्कारप्रकारस्तु षष्ठकाण्डस्यादावुक्तः ॥२१॥ पक्षादीनां विकर्षणमात्मभागमभिलक्ष्य कुर्यात् अग्न्यात्मानमभि अभ्यात्मम् ॥३०॥ पञ्च चितयो नित्याः इतरे द्वे चिती नैमित्तिके । अधिमासापेक्षया सप्तऋतवः ॥३१॥ अभि वा शूर नोनुम इत्येतस्यामृच्युत्पन्नं साम रथन्तरम् । अतिशयरसाधारत्वेन रसतमः रसतम एव रसंतमः ॥३६॥ वामिद्धि हवामहऽइत्येतस्यामृच्युत्पन्नं साम बृहत् ॥३७॥ कया नश्चित्र आभुवदित्यस्यामृच्युत्पन्नं साम वामदेव्यम् ॥३८॥ यज्ञा यज्ञा वोऽअग्नय इत्यस्यामृच्युत्पन्नं साम यज्ञायज्ञीयम् क्रस्य ईयादेशः ह्रस्वत्वं छान्दसम् ॥३९॥ प्रजापतेर्हृदयमिति किंचित्साम तदप्यत्र गायेत् । आत्मन् आत्मभागे ॥४०॥ प्रजापतेर्हृदयं गायत्रादिसामवत्कस्यां चिदृचि न गीयते अपि तु केवलं प्रजाशब्दे [प्रजापतिशब्दे] च गीयते अत एवापस्तम्बेन सूत्रितम् प्रजापतेः सामानृचं गायतीति ॥४१॥ एतानि गायत्र्यादीनि सामानीष्टकारूपेण स्तौति ता हैता इति स्त्रीलिङ्गविशेषेयेष्टकापक्षे (!) । वृतस्य (?) गातृत्वे तदुपधानवैधुर्येणार्धुर्युः विज्ञितः पराभूतो भवेत् ॥४३॥ २॥ १॥

औपवसथ्यदिवसात्प्राचीने दिवसे कर्तव्यं प्रयोगमभिधाय तथा तस्मिन्दिवसे कर्तव्यमभिधत्ते । यजमानस्य वाग्विसर्जनमध्वर्योराज्यग्रहणम् । पात्री शरावाकारा स्थाली तु पिठरांकामु[रुवि]ल्यां (!) महामुख्यां व्यत्ययेन ङीप्रत्ययः ॥१॥ व्याघारणं नाम एकस्मात्कोणात्कोणान्तरं प्रत्याज्यधारात्घारणम् ॥३॥ याममूम् बुद्धौ परामर्शः पूर्वामुत्तरवेदिं व्याघारयति सा पुनः सोमयागस्य ॥५॥ व्यतिहारमित्यनेन पूर्वं दक्षिणांसे व्याघारणं तत उत्तरश्रोणौ पश्चाद्दक्षिणश्रोणौ तत उत्तरांसे तत मध्ये इत्ययं क्रमो विवक्षितः ॥७॥ वेडिति सम्प्रदानार्थीयो निपातः । स्वर्गं लभयतीति स्वर्वित् ॥८॥ तदृदः काले अदःशब्दस्तस्य कालस्य विप्रकर्षमभिधत्ते । अमुं भागमिति यदुक्तं तदेवाह अतः (!) सञ्जूरब्दोयमिति सञ्जूरब्दोऽअयवोभिरित्येतेन मन्त्रेण प्रतिपादितं होमरूपमन्त्रम् (? पं अत्रं) ॥१३॥ व्रतं पयः । अथ तदानीमेवापराह्णिकाभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य ॥१८॥ परितः स्यन्दो जलस्रवणं यस्य परिष्यन्दो द्वीपः ॥१९॥ अग्नावुत्सादयतीति लोपः शाकल्यस्येति (पा° ८. ३. १९.) वकारलोपः ॥२१॥ तस्य प्रवर्ग्यस्य यथा येन प्रकारेण प्रवर्ग्यकाण्डोक्तप्रकारेण उत्सादनमुक्तं तेन प्रकारेण प्रवर्ग्यमुत्सादयेत् ॥२३॥ १॥ २॥

प्रवर्ग्योद्वासनानन्तरं संचिते इष्टकासमूहे स्थापनायाग्निं प्रणेतुं तावद्गार्हपत्ये आज्यहोमं समिद्धोमं च विधत्ते । प्रहरिष्यन्प्रणेष्यन् । विहितहोम आहवनीयप्रदेशं समिद्धस्याग्नेः (°मिष्यातग्नेः) प्रणयनाय पुरस्तादन्त्रेन (°दंत्रेन) सम्पाद्यतऽइत्याह एतद्वाऽएनमित्यादिना ॥१॥ अष्टौ प्राणा अष्टावङ्गानोत्येतैः (? °त्येग्नेः) षोडशावयवः प्रजापतिः ॥२॥ पूर्वेद्युरात्रौ सर्वस्या-

मेव घृते वसति ॥३॥ विधृतिं विभेदेन धारणमसंकीर्णताम् । अग्निस्तिग्मेनेत्यनया ऋचा पञ्चगृहीतं हूयते य इमा विश्वेत्यादिभिरष्टाभिर्ऋग्भिः षोडशगृहीतार्धं हूयते अवशिष्टं चत्नुषः पितेत्यादिभिरष्टाभिर्हूयते ॥६॥२॥२॥

इत्थमग्निप्रणयनार्थं यथोक्तं होमं विधायाथ तत्प्रयोगोपायिकीः (? तस्मायाणोपयिकीः) क्रियाः कर्तुं तदुचितं सम्प्रैषमाह । प्रणेष्यमाणाग्निसिद्ध्यर्थं गार्हपत्ये प्रक्षिप्तं काष्ठमिध्मस्तदुद्यच्छ (मिकातंदु°) अग्निधारणार्थमधस्तात्क्रियमाणाः सिकता उपयमन्यः ताश्चोपयच्छेति एतदुभयं प्रतिप्रस्थातारं प्रत्युच्यते । हे होतः प्रणीयमानायाग्नयेऽनुब्रूहि अग्निप्रणयनीया ऋचोऽनुब्रूहि । हे अग्नीत् यच्यंराव्या (एकस्रुयया ?) स्रुग्यरेखया अनुगच्छ । हे ब्रह्मन् आशुः शिशान इत्येतदप्रतिरथाख्यं सूक्तं जपेति एवं तत्र-तत्र व्यापारे तं-तं सम्प्रेष्यति विनियुञ्ज्यात् ॥१॥ चतुश्चत्वारिंशदक्षरा द्वादश त्रिष्टुभः सम्भूयाष्टाविंशतिपञ्चशताक्षराणि सम्पद्यन्ते चतुर्विंशत्यक्षराणां गायत्रीणां द्वाविंशतिस्तावदक्षरा भवन्ति अतो द्वादश त्रिष्टुभो मिलित्वा द्वाविंशतिर्गायत्र्यस्ताश्चाग्नेय्यो (? °गायत्र्यश्चा°) भवन्ति अग्निना सहोत्पन्नत्वात् ॥६॥ उपयमनानन्तरमध्वर्युप्रभृतीनां चित्यं प्रति [आग्नीध्रपर्यन्तं] गमनम् ॥८॥ अग्नेरुक्थानि स्तोत्रशस्त्राणि पत्रवदङ्गानि भवन्ति ॥१॥ आतः सूर्यावस्थानप्रदेशलक्षणान्तरिक्षपर्यन्तं सम्प्राप्नुवन् । आतः अन्तरिक्षात्मकाग्नीध्रमण्ड(प)पर्यन्तं सम्प्राप्नोति ॥१३॥ पृष्निशब्देन श्वैत्यमुच्यते (! श्वैत्य° or चैत्र्य° ?) पृष्नेरश्मन उपधानेनादित्यस्यैवोपधानं भवति ॥१४॥ व्यध्व इत्यर्धमार्ग उच्यते तत्रैतस्याश्मन उपधानं क्रियते तस्मादितः प्रदेशादूर्ध्वे (! °शादूव्यध्वे ?) ऽर्धमार्गे एष सूर्यस्तपति ॥१५॥ एष सूर्यस्त्रैष्टुभोऽन्तरिक्षे वर्तमानत्वात् । एष सूर्यः असन्नः क्वचिदेवावस्थितो न भवति सर्वत्र परिभ्रमणात् ॥१९॥ आहवनीयदेशं प्रति ॥२०॥ चित्याग्निसमीपगमनानन्तरं (गनामंवरं) क्रमध्वमित्यादिभिः पञ्चभिर्मन्त्रैस्तस्यारोहणम् । एतमित्यभिनयेन निर्देशः एतं स्वर्गम् ॥२४॥ चित्याग्निसमारोहणानन्तरमस्मिन्नग्नौ होमं विधत्ते ॥३०॥ प्रोक्षणे विनियुक्तैः (८. ७. ४. ७.) सहस्रसंख्याकैः (हयंख्याकैः) हिरण्यशकलैः ॥३२॥ अभिहोमानन्तरमुख्याग्नेश्चितोनामुपरि निधानम् । विकृत्या विकृतिसाधनभूतेन मन्त्रेण ॥३४॥ निधानानन्तरमस्मिन्नग्नौ समिधामाधानं विधाय ताः समिधश्चित्याग्निं प्राप्तस्याग्नेरुपरिष्टादन्नरूपेण (°ग्नेरूपरितन्नारूपेण) स्तौति ॥३६॥ जग्धिर्भक्षणं भक्षणाभावाय अहिंसायै ॥३७॥ एनां शमीरूपां गाम् ॥३८॥ तस्या वैकङ्कतसमिद्धोमब्राह्मणं प्रागेव षष्ठकाण्डेऽभिहितम् ॥३९॥ कर्णकशब्देनात्र पत्रशाखादिकं विवक्ष्यते । पत्रादीनां पशुपुष्टिसाधनत्वेन (? पशुषुष्टि°) पशुवात्तथाविधायाः समिधो होमेन पशुरूपेणैवैनं प्रीणाति । दधिविन्दुम् ॥४०॥ समिद्धोमानन्तरमाज्याङ्गतीर्विधत्ते । लोके भुञ्जानस्य यथा शाकसूपौदनादिकं परिविष्य पश्चाड्डलादिकं पेपयायत् (पाययेत्) ॥४१॥ पूर्णा चासावाङ्गतिश्चेति पूर्णाङ्गतिः आज्यपूर्णया स्रुचा सम्पाद्यमाना आङ्गतिः ॥४३॥ अथास्याग्निप्रणयनात्मकस्य कर्मणः सम्पत्तिमभिधातुं प्रतिज्ञानीते अथात इति । तामेव दर्शयति षट्र पुरस्तादित्यादिना प्रणयनात्पूर्वं तिस्र आज्याङ्गतीस्तिस्रः समिदाङ्गतीश्च जुहोति अतस्तत्र षण्मन्त्रा भवन्ति यद्यपि द्वितीयाज्याङ्गत्योः (!) षोडश मन्त्राः प्रयुज्यन्ते तथापि आङ्गत्यनुसारेण ते सर्वेऽपि द्वावेव (? द्वाय) मन्त्राविति परिगण्येते (°ण्याते) । उपरिष्टादग्निनिधानात्पश्चात्तिस्रः समिदाङ्गतीस्तिस्र आज्याङ्गतीश्च जुहोतीति तेऽपि षण्मन्त्राः । आग्नीध्रमण्डपेऽपि (? मंड्रेऽपि) पृष्निरश्मोपधी-

यते तात्पर्यं षड्भिर्मन्त्रैर्गर्क्ति अत्र यद्यपि पञ्च दिशो दैवीरित्यादयः पञ्चैव मन्त्रा गमने विनियुक्ताः तथाप्युद्वेत्यादिना मन्त्रेण सहैते षड्भवन्ति इति षण्णामपि मन्त्राणां गमनसाधनत्वाभिधानं गमनमन्त्रब्राह्मल्याभिप्रायम् ॥ ४७॥ सप्तमकाण्डे गार्हपत्यचयनाभिधाना[न]न्तर तत्र तिस्रोऽनुष्टुभः सम्पाद्य तासां मध्ये एकामाहवनीयं प्रत्यन्नंग्रवंत्युक्ताम् (? see ७.१.२.१९.) । अत्रोक्तप्रकारेणानुष्टुभः सम्पादने (°पानने) तासामेकामनुष्टुभमन्त्राहुतवन्तो (°मेका सा अनु°) भवन्तीत्याह तथा अमूरिति । गार्हपत्यात्खल्वग्निराहवनीयस्थानं प्रति प्रणीतोऽतश्चाग्निप्रणयने विद्यमानमन्त्राङ्गतिसंख्याद्वारास्यानुष्टुभः (!) सम्पादनात् गार्हपत्ये सम्पादितानामनुष्टुभामेकामन्त्राहुतवन्तो भवन्तीत्युच्यते ॥ ४८॥ स चित्याग्निः प्रणेष्यमाणमग्निमब्रवीत् । तस्माद्यस्मिन्नवसरे एतमग्निं गार्हपत्यादत्र चित्याग्नावाहरन्ति अथ पश्चादेष आङ्गतिरूपायान्नाय समर्थो भवति अग्निप्रणयनानन्तरमेव चित्याग्नेराङ्गतिसम्बन्धादिति भावः ॥ ४९॥ चित्याग्निरूपः प्रजापतिः ॥ ५०॥ ३॥ २॥

पूर्वस्मिन्नध्याये स्वयमातृण्णाया व्याघारणसमुक्षणादि कर्माभिहितम् अथास्मिन्नध्याये वैश्वानरमारुतवसोर्धारादिहोमलक्षणं कर्माभिधास्यते ॥ १॥ अदःशब्दो दीक्षणीयेष्टिकालं परामृशति । दीक्षणीयायां वैश्वानरं रेतोरूपेण सिक्तवानिति यत् तस्मादयमग्निरिहापि तदनुरोधेन वैश्वानर एव ज्ञायते अतश्च वैश्वानररूपेणोत्पादनाय वैश्वानरदेवत्यं हविर्जुह्वयादिति भावः । निरुक्तमुचैः प्रकाशम् ॥ २॥ इदमिति मुखं श्मश्रुविशिष्टं हस्तेन प्रदर्शने (°र्श्यते ?) ॥ ४॥ इदमिति मुखादुपरितनं दक्षनेत्रनासिकाललाटस्थानं निर्दिश्यते । अलोमकमिव क्षत्तरिक्षमिति तत्र पृथिवीवत् महीधरमहीरुहादीनामभावात् । स प्राणोऽस्य निर्दिष्टप्रदेशस्य मध्येन वर्तते ॥ ५॥ शिर एवेति अत्र शिरःशब्देन ललाटादुपरितनं केशोद्गमस्थानमुच्यते इदं तक्षिर इत्यत्र गलादुपरितनं सर्वमपि शिरसा उसोद्यन (प्रसिद्धेन ?) विवक्षितम् अन्यथा पूर्वोक्तस्यानुपपत्तेः ॥ ६॥ वैश्वानरयागानन्तरं मारुतानां होमं विधाय तान्प्राणात्मना प्रशंसति ॥ ७॥ प्राणयोर्हस्तेन निर्देशः । अनयोः श्रोत्रयोः शिरोमध्येऽवस्थानात् ॥ १०॥ इमाविति चक्षुषोर्निर्देशः ॥ ११॥ इमाविति नासाविवरयोर्निर्देशः । अरण्येऽनूच्यः कश्चिदनुवाकः तेन क्षयमानोऽपि पुरोडाशोऽरण्येऽनूच्यो भवति ॥ १२॥ प्रज्ञायास्तु तदाज्ञाधीनत्वान्नोचैर्वक्तेरनिरुक्तत्वम् ॥ १५॥ पुरोऽनुवाक्यवन्तं याज्यवन्तमिति छान्दसो ह्रस्वः ॥ १६॥ एतेषां वै सप्तपदानामित्यत्र मारुतशब्देन तद्धोमसाधनभूताः शुक्रज्योतिश्चेत्यादयो मन्त्रा विवक्ष्यन्ते ते च सप्तपदा भवन्ति । इयमेव चिति (! इदमेवेति) प्रसृतिरभिनयेन प्रदर्श्यते कपुशलामेव (!) वक्त्रमुखमच्यते (? सुङ्मु° ?) । अयमिति बाह्यदण्डः प्रदर्श्यते एवं बाह्येव क्रमित्युक्तं (? सुगि° ?) भवति ॥ १७॥ अथ होमक्रमेण तान्मारुतान्प्रत्येकं नव्यादिरूपेण प्रशंसति तव्यमिति । प्राच्यः प्राङ्मुखाः पूर्वसमुद्रगामिन्यो गङ्गायमुनादयः सप्त नद्यः ॥ १८॥ रिप्रताः रिप्रमिति पापमुच्यते पापिष्ठाः । शपनमिति व्यत्ययेन पकारस्य फकाश्रुवः (!?) अत्यर्थमुपालम्भनीयाः । आहनमिति प्रीचोक्तिमुच्यते (!?) तस्या अत्यर्थं वादितारो भवन्तीति मूत्ररूपवान्तासां नदीनां पयः पिबन्तो तितरा (!) नीचा भवन्तीत्यर्थः ॥ २४॥ १॥ ३॥

अथ पुनस्तामेव वसोर्धारां संस्कृतस्याग्नेरभिषेकात्मना प्रशंसति ॥ २॥ इदं च मऽइदं च मऽइति वाजश्च मे प्रसवश्च मऽइत्यादिमन्त्राणां निर्देशः ॥ ५॥ व्योकसौ विभिन्नदेशस्था-

वाचार्यौ (°र्या) यथा संयुञ्ज्यात् ॥६॥ ननु सर्वत्र द्वादशस्वेव कल्पयेदिति नेत्याह चतुर्दशसु च (!) कल्पयतीति ॥८॥ वाजश्च मे प्रसवश्च मऽइत्यारभ्याष्टाभिरनुवाकैरेषा वसोर्धारा क्रियते तत्रैकस्मिन्ननुवाके अग्निश्च मऽइन्दुश्च मे सोमश्च मऽइन्दुश्च मऽइत्यादिमन्त्राः समाम्नाताः तत्र द्वौ-द्वौ संयुनक्तीति वचनेन द्वयोर्द्वयोरवसानविधानान्मन्त्रद्वयस्येन्दुश्च मऽइत्येतदर्धं (त्ये इ र्धे) भवति अतस्ते मन्त्रा अर्धेन्दुशब्देनोच्यन्ते ॥१॥ अंशुश्च मे रश्मिश्च मऽइत्यादयो मन्त्रा ग्रहप्रतिपादकत्वाद्ग्रहाः तत्साध्यमपि होममनूद्य प्रशंसति ॥१॥२॥३॥

अथ पूर्ववद्यज्ञकर्मक्रतुमन्त्रसाध्यहोमं (°तुर्मन्त्र°) प्रशंसति ॥१॥ एका च मे तिस्रश्च मऽइत्यादयो मन्त्रा अयुज स्तोमाः तत्साध्यं होमं प्रशंसति अथायुज इति । स्तोमशब्द स्तोत्रीया आचष्टे ॥२॥ चतस्रश्च मेऽष्टौ च मऽइत्यादयो मन्त्राः युग्मतः (!) ॥४॥ सप्त चितयः सप्तमचितौ पुरीषाभावात्षडेव पुरीषाणीति मिलित्वा चितिपुरीषाणि त्रयोदश भवन्ति ॥१॥ वाजाय स्वाहेत्यादिमन्त्रहोमानन्तरमियं ते राडिति मन्त्रस्य प्रयोगं विधत्ते ॥१०॥ अथ कल्पहोमं शंसति । क्लृपिधातुसाहित्येन मन्त्राणां कल्पशब्देनाभिधानम् ॥१२॥ अन्तिमं मन्त्रं व्याचष्टे अथाहेति । आज्यलिप्तम् लिप्तमाज्यमाहिताग्न्यादित्वान्निष्ठायां परनिपातः अत्र स्रुचि यल्लिप्तमाज्यम् ॥१४॥ जलधारैव धारा । उक्तप्रकारेण द्युलोके गवाकारा (°रे) वसोर्धारा दिवः सकाशाद्रामध्यागच्छति ॥१५॥ क्षीरधारा । एवं गवि गवाकारा ॥१६॥३॥३॥

अथ वाजप्रसवीयहोमं विधाय तत्प्रयोजनकथनद्वारा तस्य पदस्य प्रवृत्तिनिमित्तं दर्शयति अथात इति । प्रसौति अनुजानाति ॥१॥ वाजप्रसवीयहविः सर्वौषधं सर्वाभिरोषधिभिः सम्पादितं भवति । अत्र सर्वा ओषधय इति सप्त ग्राम्याः सप्तारण्याः परिगृह्यन्ते ॥४॥ येनैतदित्येतच्छब्देनाभिषेककालः परामृश्यते एतस्मिन्काले ॥५॥ यानि सप्त पूर्वाणि वाजस्येममित्यादिमन्त्रसाध्यानि कर्माणि तानि वाजपेयस्य वाजप्रसवीयं कर्म यानि सप्त वाजस्य नु प्रसव इति मन्त्रसाध्यानि कर्माणि तान्यग्निचयनस्य वाजप्रसवीयम् ॥७॥ यजमानस्य कृष्णाजिनेऽभिषेकः । उत्तरतः उत्तरभागे ॥१०॥ अस्य यजमानस्यैव आहवनीयो देवसम्बन्धी आत्मा अग्निचयनेन यजमानस्याग्निवप्राप्तेः । अयमिति यजमानो निर्दिश्यते अयं पुनर्मानुष आत्मा । एवं चाहवनीयसमीपेऽभिषिञ्चन्तस्ते ऋत्विजोऽस्य यजमानस्य दैवमात्मानं मर्त्येनात्मनानुप्रसजन्ति मेलयन्ति द्वावप्यात्मानौ संकीर्णौ कुर्वन्ति ॥१२॥ भूतः प्राप्तैश्वर्यः ऐश्वर्यं प्राप्तुमिङ्क्तुभूषन् ॥१४॥ आस्पृष्टं परिश्रितः तृतीयार्थे षष्ठी आङीषदर्थे परिश्रिता किंचित्स्पृष्टम् । अग्निमन्वारब्धं स्पृष्टवन्तम् ॥१५॥ पार्थादिहोमस्याभिषेकस्य च पौर्वापर्यमुपपादयति ॥१६॥ यजमानस्य दक्षिणबाङ्गसमीपं गत्वा ॥१७॥४॥३॥

राष्ट्रभृदाख्यान्होमान्कुर्यात् राष्ट्रभरणसाधारण्येनैतेषां राष्ट्रभृतां राजत्वमाह राजाना वाऽइति ॥१॥ गन्धोन विशतीति (!) गन्धर्वाः अप्रशब्देन (!) रूपमभिधीयते तेन विशिष्टाश्चरन्तीति अप्सरसः ॥४॥ स्वाहा वाट् इति शब्दद्वयमपि प्रदानार्थम् ॥७॥ आयुवाना मिश्रयत्य-इव ॥८॥ भास्तेजांसि (! भां ते°) ॥१॥ इष्यमाणसाधनत्वादिष्टयः आ इष्टयः एष्टयः ॥१२॥ एष आहवनीयस्योपरि धार्यमाणो रथः असौ आकाशमध्ये वितयमान (!) आदित्यात्मकः । रथस्यादित्यात्मकत्वमादित्यवन्मण्डलाकाररथाङ्गवत्त्वात् शीघ्रगामित्वाद्वा ॥१५॥१॥४॥

उक्तहोमानन्तरं वातहोमान्कुर्यात् ॥१॥ होष्यमाणो वायुरग्नेर्वास्त्यप्रदेशादाहरणीयः । ततो

बहिरवस्थितस्य वायोर्निधानमस्मिन्नग्नौ सम्पाद्यते ॥२॥ इतीवेत्यभिनयेन दर्शनम् एतस्य वायोरितीवाद्यादिवत्स्कन्दनादिविपत्तिर्नास्ति (! °भ्नादिवि°) आविपत्तिरिति (!) पदविभागः । उपरि धार्यमाणस्य रथस्य धुरोऽधोऽधोभागे ॥४॥ असौ लोकः स्वर्लोकः सर्वदा वृष्टिप्रदानेन समृद्धानशीलत्वात्समुद्रः । नभ इति नक्षत्रनाम नभस्त्वान्नक्षत्रविशिष्टः । तेन समुद्रोऽसीत्यादिना मन्त्रप्रयोगेण अमुष्मिन्लोके यो वायुः बहिःप्रदेशादाकृतोऽस्ति तमेवास्मिन्नग्नौ निदधाति ॥५॥ तमश्वं नाभियुञ्ज्यात् अभियोजनं नाम युक्ते पुनर्योजनम् । तं रथमधुर्युगृहपर्यन्तमुपर्येव हरेयुः ॥११॥ रुक्शब्दसम्बन्धाद्धोमसाधनभूता ऋचो रुङ्मत्यः तत्साध्यान्होमान्कुर्यात् ॥१२॥ अयमिदानीं संचितोऽग्निरेवार्कः असाविति दूरदेशवर्ती सूर्यो निर्दिश्यते तस्य चाश्वमेधवमश्वमेधसम्बन्धिनोऽश्वस्य तदात्मनानुसंधातव्यत्वात् ॥१८॥ आवपनं प्रक्षेपः तस्य मीमांसात्र क्रियत इति शेषः । ब्राह्मणवतीं ब्राह्मणसंयुक्तां शाखान्तरेषग्निचयनब्राह्मणोक्तामनाराभ्याधीताम् ॥२७॥२॥४॥

अग्निचयनस्य धिष्ण्यचयनस्य पौर्वापर्यात्पूर्वं क्षत्रं कृत्वाथ विशं कृतवान्भवति ॥१॥ सोमयागसम्बन्धिनोऽग्निचयनसम्बन्धिनश्चेत्युभयानपि धिष्ण्यान् चिनोति ॥५॥ यस्मिन्नृतौ यो म्रियेत स ऋतः स एवर्तुर्भवति अयमर्थस्तैत्तिरीयके श्रूयते यदि वसन्ते प्रमीयते वसन्तो भवतीत्यादिना । ते ऋत्वात्मकाः पितरस्तं मार्जालीयं धिष्ण्यं प्रदक्षिणभागे व्यवस्थापितवन्तः अत इदानीं स एष मार्जालीय एषां देवानां दक्षिणभागेऽवतिष्ठते एवमृत्वात्मकपितृसम्बन्धात्तत्रोपधेयानामिष्टकानामृतुसंख्यानविधानमुपपन्नम् । अथ धिष्ण्यानां चित्याग्नेश्च संस्थानं प्रशंसति स वा इति अ(त्र) इतीति आग्नीध्रदेशं धिष्ण्योपधानप्रकारं हस्तेन दर्शयति इतोमानित्यत्रेतिशब्देन सदसि होत्रीयादिधिष्ण्यानामुपधानप्रकारम् इत्यमुमितीतिशब्देन चित्याग्न्युपधानप्रकारम् ॥८॥ इष्टकाभिश्चितानां धिष्ण्यानां परिश्रिड्डिः परिश्रयणम् । समुद्रगता आपो यथा पृथिवीं परिश्रयन्ति तद्वत्परिश्रितोऽपि धिष्ण्यान्परिश्रयन्ति ॥१॥ दिशामवेष्टीरिति बहुवचनं हविर्बहुत्वापेक्षम् इष्टेरेकत्वात् ॥१०॥ विहितामिष्टिं पूर्वपक्षीकृत्य तत्रेष्ट्यन्तरं विधत्ते तदाहुरिति तत्तत्राग्नीषोमीयस्य पशुपुरोडाशे विहितेष्टिस्थाने दशहविषमेवैतामिष्टिं निर्वपेत् पूर्वोक्तामिष्टिमतिक्रम्यैतदिष्टिस्वीकारे कारणमाह सा सर्वस्तोमेति सेष्टिः त्रिवृदादिभिः सर्वैः स्तोमैः रथन्तरादिभिः सर्वैः पृष्ठैश्च विशिष्टा सर्वाणि च छन्दांसि तद्विशिष्टत्वात् सर्वाश्च दिशः तदीयानां पुरोऽनुवाक्यानां तल्लिङ्गत्वात् सर्वे च ऋतवः तद्विशिष्टत्वात् अत एव तैत्तिरीयके श्रूयते अग्नये गायत्राय त्रिवृते रथन्तराय वासन्तायाष्टाकपाल इत्यादि दिग्वतोः पुरोऽनुवाक्या भवन्ति सर्वासां दिशामभिहित्या (°तित्या) इति च । अयमग्निः एतत्सवज्ञगदात्मकः तथा च सर्वात्मकायाग्नये सर्वस्तोमादिविशिष्टेष्टिरुपसम्पन्ना ॥११॥ पूर्ववदेव तामपोष्टिं पक्षीकृत्येष्ट्यन्तरं विधत्ते तवै (!) देवस्त्वामेवेति ॥१२॥ अथैतासामग्न्यादिदेवतानां नामद्वयसम्बन्धमुपपादयति ता वै द्वितीयं नाम भवति तथा वाजपेययाज्ञीत्येवमादि ॥१३॥ इष्टिर्हीति काम्येष्टिषु प्रधानस्योपांशुत्वमिति व्यवस्थितत्वात् अस्या अपि कामार्थेष्टित्वात् । इष्ट्यामध्वरवन्मैत्रावरुणो नास्तीति अनुब्रूहि यजेत्येव ब्रूयात् ॥१५॥ देवतायागानन्तरं स्विष्टकृदत्पदानात्पूर्वं (! °दवदा°?) सविता वेत्यादिना पूर्वाभिषेकाख्येन मन्त्रेणैनमग्निमभिमृशेत् ॥१६॥३॥४॥

इत्थमौपवसथ्यदिवसप्रयोगमभिधायाथ सुत्याहःप्रयोगं विवक्षुः प्रथममग्नियोगं विधत्ते । प्रातर्यावभ्यो देवेभ्योऽनुब्रूहीत्येवं सम्प्रैषः प्रातरनुवाकस्योपाकरणम् । यथा लोके नियुक्ताश्वेन रथेन ङिगमिषितप्रदेशान्गच्छति तद्वन्नियमितेनानेन सर्वान्कामानाप्नवानीति यज्ञमानो ऽध्वर्युमुखेनाग्निं नियच्छति ॥ १॥ ऋषिशब्देन षष्टकाण्डस्यादावभिहितानृषीनाहेति व्याचष्टे अमूनेतदिति ॥४॥ स एषोऽग्निरस्य यज्ञमानस्य दैव आत्मा एवं च यज्ञमानं एवाभिषिक्तो भवति । सोमस्यामृतवात्सोमाभिषेकेणामृताभिषिक्तो भवति ॥८॥ संध्योः परिधिसंध्योः । पूर्वे त्रिभिर्मन्त्रैस्त्रिष्वपि परिधिष्वग्नेर्युक्तवात्तथैव विमोचनमपि कर्तव्यम् अस्याग्नेरेष विमोचनलक्षणः प्रयोगः मूर्धा मूर्धवत्सर्वस्याप्युपरितनो भवति । अप्सुमतोभ्यामित्यत्रोत्तरमन्त्रे अप्सुशब्दप्रयोगादुपचारेण प्रथममन्त्रस्या(प्य)प्सुमत्त्वम् यज्ञायज्ञियं स्तोत्रं वैश्वानरस्याग्नेः सम्बन्धि भवति तद्देवत्यत्वात् अनेनास्याशान्तत्वमुक्तम् आपस्तु शान्तिः तस्माद्यज्ञायज्ञियस्तोत्रे कर्तव्यं विमोचनमप्सुमतोभ्यामृग्भ्यां क्रियते ॥१३॥ यथा सामिधेन्योऽनूच्यन्ते तासां कर्माङ्गत्वेन प्रत्यहं परिसमाप्ये कर्मणि-कर्मण्यनूच्यत्वात् अतस्तत्समानत्वेन योऽनविमोचनेऽपि प्रत्यहमेव कुर्यात् ॥१६॥४॥४॥

अथातः शिष्टः कृत्स्नोऽपि योगः प्रकृतिवदेवेति अभिप्रायेण तमनभिधाय पयोव्रतस्य मीमांसा क्रियतऽइति वाक्यशेषः । व्रतशब्देनात्राभ्यवहार उच्यते ॥१॥ आसक्ति सत्यं केवलं सत्यं वदन्तस्तदानीमवोरतरा-इव अनाढ्यतरा-इवाभवन् एषेति (!) शब्दः तदानीमित्यस्मिन्नर्थे वर्तते केवलं सत्यं वदतां कार्यानुरोधेन वचनस्यासम्भवात्तदानीमसमर्था-इवानाढ्या-इव भवन्ति ॥१६॥ पिपिष्युः (!) पिष्यु (!) अवषवे (!) अवयविन-इव बभूवुः पिष्टा-इव (पुष्टा-इव ?) बभूवुरित्यर्थः ॥१७॥ समिष्टयजुषः पूर्वभावि कर्म कृतं समिष्टयजुर्न कृतं तस्मिन्नवसरे आगताः ॥१९॥ The explanation of क° २०-२७. as well as of ३४. ३५. ५७. ६२. and part of ६३. is wanting in AB. । एते असमापिता दीक्षणीयादयो यज्ञा नव भवन्ति ॥३०॥ ताः दिगात्मिका दर्भस्तम्बादिरूपा दिशः इष्टकाः तत्रैव प्रथमायां चितौ प्रागादिक्रमेण पञ्चसु दिक्षु प्राणभृतामुपधापनात् (!) दिगात्मिकाः प्राणभृतश्च द्वितीयादिषु चतुर्थ्यन्तासु तिसृषु चितिषु सर्वासामपीष्टकानां प्रागादिक्रमेणैवोपधानात् तासां दिगात्मकत्वम् ताश्च पञ्चम्याश्चितेः सम्बन्धिन्यः असपत्ना नाकसदः पञ्चचूडा इत्येता अपि तथैवोपधानाद्दिगात्मिकाः ता एताः सर्वा अपि दिग्रूपा इष्टकाः ऊर्ध्वा उत्क्रामत्यो गताः ॥३६॥ एतेषां हविषां निर्वापेण दर्भस्तम्बादोष्टकालक्षणासु उत्क्रान्तासु दिक्षु प्रजापतिं प्रतिष्ठापितवान्भवति ॥३८॥ ता एता अनुमत्यादयो देव्यः ॥३९॥ अस्य पशोः समाप्तिरूपवात् ॥४१॥ प्रायणं प्रारम्भः उदयनं समापनम् ॥४३॥ पुरस्तात्षष्ठेऽभिहितं तूष्णीमभिधत्तऽइत्याह अमूनेतदिति ॥४५॥ एतं यजमानम् ॥४६॥ सम्प्रति युक्तमन्यूनानतिरिक्तम् [असम्प्रति] न्यूनातिरिक्तम् ॥४९॥ तच्च नाम कात्यायनेनोक्तम् (१८. ६. २३.) नाम करोति चित्योऽसीतीति (चित्रो!) ॥५२॥ यो यजमानः एतदग्निचयनाख्यं कर्म करोति एतेन देवेषु भवति । मानुष्यां स्त्रियाम् ॥५४॥ तर्हि पूर्ववदेव किमग्निचयनं कृत्स्नमपि कुर्यादिति तत्राह स इति सोऽध्वर्युरनन्तरं क्रियमाणे क्रतौ स्वयमातृष्णा एवोपदधीत [न] पुनरिष्टकान्तराम् एतावता कथं तस्याग्नेः सिद्धिरिति तत्राह इमऽइति प्रथममध्यमोत्तमासूपधीयमानास्तिस्रः स्वयमातृष्णाः पृथिव्यादिलोकत्र-

यात्मिका एष संचितोऽग्निरपि प्रजापतिरूपवाल्लोकत्रयात्मिकः (!) एवं च स्वयमातृण्णोपधानेनैव स संचितोऽग्निः सेत्स्यति ॥५८॥ अथ वा ऋतव्या वा विश्वज्योतिषो वा पुनश्चितिं वोपदधीतेत्याह ऋतव्या एवेति अत्र सर्वत्र एवकारस्यावधारणार्थत्वादितरनिषेधसिद्धौ स्वयमातृण्णादीनां सर्वासामपि विधिनिषेधे सम्भवात् (ऽस्त°?) षोडशिग्रहणावद्विकल्पसिद्धिः (°णावद्वि°) ॥५९॥ एता अग्निर्वाय्वादित्यात्मिका देवता विश्वज्योतिषः ॥६०॥ संचितेऽग्नौ य एवाग्निर्निधीयते तदग्निरूपामेवेष्टकामभिलक्ष्य एष सर्वोऽपि चित्याग्निः सम्पद्यते उपरि निधीयमानायामग्निरूपायामिष्टकायामिष्टकासमुच्चयरूपः(°पायामेतिविष्ट°)कृत्स्नोऽप्यग्निरन्तर्भवति ॥६१॥ तदा सर्वदापि सर्वमेव महद्वक्थं शंसेत् न ऋगाशीर्तीरेव ॥६३॥ अथाग्निभरणविषये अन्यानपि कांश्चित्पक्षान्दर्शयितुमुपोद्घातयति अथ हेति ॥६४॥ न तस्य संवत्सरभरणनियमः किं तु कानिचिद्दिनानि भूत्वा चयनम् ॥६५॥ गवामयनादौ संवत्सरं सोमस्याभिषवात् ॥६६॥ यः द्वादशसु मासेषु पूर्णेषु ज्ञातः स्यात् ॥६८॥१॥५॥

अथ येऽग्नय इत्यस्य मन्त्रस्यानन्तरं वार्त्रहत्यायेत्यादयः सप्त मन्त्राः समाम्नायन्ते तेषामिदानीं विनियोगमभिधातुमुपोद्घातमाह इन्द्र इति । न्यूनस्याकृतस्य कर्मणः प्राप्त्यै आधिक्येन कृतस्यानाधिक्याय अन्यथाकृतस्य चानन्यथाकरणाय । the rest is wanting in AB.

इति माधवीये वेदार्थप्रकाशे माध्यन्दिनीयशतपथब्राह्मणभाष्ये नवमकाण्डव्याख्या समाप्ता ॥१॥

VARIOUS READINGS.

Adhy. १.१.१० स्वस्याम् Sây. - १६ ब्रूयान्न° B. with a dot in the म् (and thus ब् is generally expressed in B.). - १७ ब्रूयादसौ ABC. - २.४३ विज्ञितो A 2. Sây. — *Adhy.* २. ३. ३१ इत्येतत्र ABC. — *Adhy.* ३.१.१२ नियहति Sây. - १७ कपुत्स° A. B 1. कपुह्° C. B 2. इयमेव कपुशा° Sây. - २४ शफन° Sây. (?). - ३.१४ अभूमेति स्वर्हि ABC. — *Adhy.* ४.१.१ नामैते! ABC. - Sây. unites the two first brâhmaṇas into one. - २. ४ आविपत्तिः (?) Sây. - ३.१२ तन्वै A. तवै or तन्वै BC. - १७ प्रतीष्य (!) Sây. — *Adhy.* ५.१.१५ Sây. divides ऐषावीर् into ऐष and अवीर्. - ibid. सकृ वेवा° A 2. B. C. - १७ पिपिशु° पिश्य° Sây. - ५७ °ख्याये° C. ख्याये B 2. - ६२ तन्वेव ABC. - ६५ कामन्वा ABC. - २.१ °पर्ण्यः A. - १६ °ञो लोका ABC. —

ओम् । अग्निरेष पुरस्ताच्चीयते । संवत्सर उपरिष्टान्मरुद्भुक्थꣳ शस्यते प्रजापतेर्विस्रस्तस्याग्यꣳ रसोऽगच्छत् ॥ १ ॥ स यः स प्रजापतिर्व्यस्रꣳसत । संवत्सरः सोऽथ यान्यस्य तानि पर्वाणि व्यस्रꣳसन्ताहोरात्राणि तानि ॥ २ ॥ स यः स संवत्सरः प्रजापतिर्व्यस्रꣳसत । अयमेव स योऽयमग्निश्चीयतेऽथ यान्यस्य तान्यहोरात्राणि पर्वाणि व्यस्रꣳसन्तेष्टका एव तास्तद्यदेता उपदधाति पान्येवास्य तान्यहोरात्राणि पर्वाणि व्यस्रꣳसन्त तान्यस्मिन्नेतत्प्रतिदधाति तदेतदत्रैव यजुश्चितमत्राप्तम् ॥ ३ ॥ अथ योऽस्य सोऽग्यꣳ रसोऽगच्छत् । मरुत्तद्भुक्थं तमस्य तꣳ रसमृक्सामाभ्यामनुयन्ति तद्यत्तत्र यजुः पुरस्तादेत्यभिनेतैव तदेति यथादो मेऽमुत्रैकं तदाहरिष्यामीत्येवं तद्यजुः पुरस्तादेति तꣳ संवत्सरꣳ आप्नुवन्ति ॥ ४ ॥ तमध्वर्युर्ग्रहेण गृह्णाति । यद्गृह्णाति तस्माद्ग्रहस्तस्मिन्नुद्गाता मरुत्वतेन रसं दधाति सर्वाणि कैतानि सामानि यन्मरुत्वतं तदस्मिन्त्सर्वैः सामभी रसं दधाति तस्मिन्होता मरुतोक्थेन रसं दधाति सर्वा कैता ऋचो यन्मरुद्भुक्थं तदस्मिन्त्सर्वाभिर्ऋग्भी रसं दधाति ॥ ५ ॥ ते यदा स्तुवते यदानुशꣳसति । अथास्मिन्नेतं वषट्कृते जुहोति तदेनमेष रसोऽप्येति न वै मरुत्वतमिदꣳ स्तुतꣳ शेतऽइति पश्यन्ति नो मरुद्दिदमुक्थमित्यग्निमेव पश्यन्त्यात्मा वाग्निस्तदेनमेतेऽउभे रसो भूत्वापीत ऋक्च साम च तदुभेऽऋक्सामे यजुरपीतः ॥ ६ ॥ स एष मिथुनोऽग्निः । प्रथमा च चितिर्द्वितीया च तृतीया च चतुर्थी चाथ पञ्चम्यै चितेर्यश्चितेऽग्निर्निधीयते तन्मिथुनं मिथुन उऽएवायमात्मा ॥ ७ ॥ अङ्गुष्ठा इति पुमाꣳसः । अङ्गुलय इति स्त्रियः कर्णाविति

पुमाꣳसौ भ्रुवाविति स्त्रियाऽओष्ठाविति पुमाꣳसौ नासिकेऽइति स्त्रियौ दत्ता इति पुमाꣳसो जिह्वेति स्त्री सर्व एव मिथुनः सोऽनेन मिथुनेनात्मनेतं मिथुनमग्निम-प्येति ॥ ८॥ एषात्रापीतिः । अप्येवं मिथुन इत्यꣳ हु त्वेवापि मिथुनो वागेवेयं योऽयमग्निश्चितो वाचा हि चीयतेऽथ यश्चितेऽग्निर्निधीयते स प्राणः प्राणो वै वाचो वृषा प्राणो मिथुनं वाग्वेवायमात्माथ य आत्मन्प्राणास्तन्मिथुनꣳ सोऽनेन मिथुनेनात्मनेतं मिथुनमग्निमप्येति ॥ ९॥ एषोऽत्रापीतिः । न हु वाऽस्यापुत्र-तायै का चन शङ्का भवति य एवमेतौ मिथुनावात्मानं चाग्निं च वेदान्नꣳ हु त्वेवायमात्मा दक्षिणान्नं वनुते यो न आत्मेति ह्यप्यृषिणाभ्युक्तम् ॥ १०॥ तदिद-मन्नं ह्यग्धं द्वेधा भवति । यदस्यामृतमूर्ध्वं तन्नाभेर्ऊर्ध्वः प्राणेरुच्चरति तद्वायुमप्येत्यथ यन्मर्त्यं पराक् तन्नाभिमत्येति तद्ध्रुवं भूत्वेमामप्येति मूत्रं च पुरीषं च तद्यदिमाम-प्येति योऽयमग्निश्चितस्तं तदप्येत्यथ यद्वायुमप्येति यश्चितेऽग्निर्निधीयते तं तदप्ये-त्येषोऽएवात्रापीतेः ॥ ११॥ ब्राह्मणम् ॥ १॥

प्रजापतिरिमांल्लोकानैप्सत् । स एतं त्रयोविधमात्मानमपश्यदग्निं तं व्यधत्त ते-नेमं लोकमाप्नोत्स द्वितीयं त्रयोविधमात्मानमपश्यन्महाव्रतं तद्व्यधत्त तेनान्तरि-क्षमाप्नोत्स तृतीयं त्रयोविधमात्मानमपश्यन्महꣳ उक्थं तद्व्यधत्त तेन दिवमाप्नोत् ॥ १॥ अयं वाव लोक ऋषोऽग्निश्चितः । अन्तरिक्षं महाव्रतं द्यौर्महꣳ उक्थं तस्मा-देतानि सर्वाणि सहोपेयादग्निं महाव्रतं महꣳ उक्थꣳ सह हीमे लोका असृज्यन्त तद्यदग्निः प्रथमश्चीयतेऽयꣳ ह्येषां लोकानां प्रथमोऽसृज्यतेत्यधिदेवतम् ॥ २॥ अ-थाध्यात्मम् । मन एवाग्निः प्राणो महाव्रतं वाङ्महꣳ उक्थं तस्मादेतानि सर्वाणि सहोपेयात्सह हि मनः प्राणो वाक्तद्यदग्निः प्रथमश्चीयते मनो हि प्रथमं प्राणा-नाम् ॥ ३॥ आत्मैवाग्निः । प्राणो महाव्रतं वाङ् महꣳ उक्थं तस्मादेतानि सर्वाणि सहोपेयात्सह ह्यात्मा प्राणो वाक्तद्यदग्निः प्रथमश्चीयतेऽआत्मा हि प्रथमः सम्भ-

वतः सम्भवति ॥४॥ शिर एवाग्निः । प्राणो महाव्रतमात्मा महदुक्थं तस्मादे-तानि सर्वाणि सहोपेयात्सह हि शिरः प्राण आत्मा तद्यदग्निः प्रथमश्चीयते शिरो हि प्रथमं जायमानस्य जायते तस्माद्यत्रैतानि सर्वाणि सह क्रियन्ते महदेवोक्थमातमां ख्यायतऽआत्मा हि महदुक्थम् ॥५॥ तदाहुः । यदेतानि सर्वाणि सह डरूपापानि कैतेषामुपावतिरिति ज्योतिष्टोमऽएवाग्निष्टोमे ज्योतिष्टोमेनैवाग्निष्टोमेन यजेत ॥६॥ तस्य वाऽएतस्य ज्योतिष्टोमस्याग्निष्टोमस्य । त्रिवृद्वह्निष्यवमानं तद्व्रतस्य शिरः पञ्चदशसप्तदशाऽउत्तरौ पवमानौ तौ पक्षौ पञ्चदशꣳ होतुराज्यꣳ सप्तदशं पृष्ठमेकविꣳशं यज्ञायज्ञियं तत्पुच्छम् ॥७॥ तयोर्वाऽएतयोः । पञ्चदशसप्तदशयोर्द्वात्रिꣳशत्स्तोत्रियास्ततो याः पञ्चविꣳशतिः स पञ्चविꣳश आत्माथ याः सप्तातियन्ति ताः परिमादः पशवो कैताः पशवः परिमाद एतावद्वै महाव्रतं तदेतद्त्रैव महाव्रतमाप्नोति ॥८॥ अथ होता सप्त छन्दाꣳसि शꣳसति । चतुरुत्तराण्येकर्चानि विराडष्टमानि तेषां तिस्रश्चाशीतयोऽक्षराणि पञ्चचत्वारिꣳशच्च ततो या अशीतयः सैवाशीतीनामाप्तिरशीतिभिर्हि महदुक्थमाख्यायतेऽथ यानि पञ्चचत्वारिꣳशत्ततो यानि पञ्चविꣳशतिः स पञ्चविꣳश आत्मा यत्र वाऽआत्मा तदेव शिरस्तत्पक्षपुच्छान्यथ यानि विꣳशतिस्तदावपनमेतावद्वै महदुक्थं तदेतद्त्रैव महदुक्थमाप्नोति तानि वाऽएतानि सर्वाणि ज्योतिष्टोमऽएवाग्निष्टोमऽआप्यन्ते तस्माद्ध ज्योतिष्टोमेनैवाग्निष्टोमेन यजेत ॥१॥ ब्राह्मणम् ॥२॥

प्रजापतिः प्रजा असृजत । स ऊर्ध्वेभ्य एव प्राणेभ्यो देवानसृजत येऽवाञ्चः प्राणास्तेभ्यो मर्त्याः प्रजा अथोर्ध्वमेव मृत्युं प्रजाभ्योऽन्तारमसृजत ॥१॥ तस्य ह प्रजापतेः । अर्धमेव मर्त्यमासीदर्धममृतं तद्यदस्य मर्त्यमासीत्तेन मृत्योरबिभेत्स बिभ्यदिमां प्राविशद्वृयं भूत्वा मृच्चापश्च ॥२॥ स मृत्युर्देवानब्रवीत् । क्व नु सोऽभूद्यो नोऽसृष्टेति बह्विभ्यदिमां प्राविक्षदिति सोऽब्रवीत्तं वाऽअन्विच्छाम तꣳ सम्भ-

राम न वाऽअक्षं तꣳ क्ष्णविष्यामीति तं देवा अस्याऽअधि समभरन्यदस्याप्त्वा-सीत्ता अपः समभरन्नथ यदस्यां तां मृदं तदुभयꣳ सम्भृत्य मृदं चापश्चेष्टकामकुर्व-न्तस्मादितदुभयमिष्टका भवति मृच्चापश्च ॥३॥ तदेता वाऽअस्य ताः। पञ्च मर्त्या-स्तन्व आसंल्लोम त्वक्चाऽसमस्थि मज्जायैता अमृता मनो वाक्प्राणश्चक्षुः श्रोत्रम् ॥४॥ स यः स प्रजापतिः । अयमेव स योऽयमग्निश्चीयतेऽथ या अस्य ताः पञ्च मर्त्यास्तन्व आसन्नेतास्ताः पुरीषचितयोऽथ या अमृता एतास्ता इष्टकाचितयः ॥५॥ ते देवा अब्रुवन् । अमृतमिमं करवामेति तस्यैताभ्याममृताभ्यां तनूभ्यामे-तां मर्त्यां तनूं परिगृह्यामृतामकुर्वन्निष्टकाचितिभ्यां पुरीषचितिं तथा द्वितीयां त-था तृतीयां तथा चतुर्थीम् ॥६॥ अथ पञ्चमीं चितिमुपधाय । पुरीषं निवपति तत्र विकर्णी च स्वयमातृण्णां चोपदधाति हिरण्यशकलैः प्रोक्षत्यग्निमभ्यादधाति सा सप्तमी चितिस्तदमृतमेवमस्यैताभ्याममृताभ्यां तनूभ्यामेता मर्त्यां तनूं परिगृह्या-मृतामकुर्वन्निष्टकाचितिभ्यां पुरीषचितिं ततो वै प्रजापतिरमृतोऽभवत्तथैवैतद्यज-मान एतममृतमात्मानं कृत्वा सोऽमृतो भवति ॥७॥ ते वै देवास्तं नाविदुः । यद्येनꣳ सर्वं वाकुर्वन्न वा सर्वं यद्यति वारेचयन्न वाभ्यापयंस्तऽएतामृचमपश्य-न्यामक्रन्दग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभऽइति ॥८॥ तस्या अस्त्येवाग्नेयम् । अस्त्यैन्द्रमस्ति वैश्वदेवं तद्यदस्या आग्नेयं यदेवैतस्याग्नेराग्नेयं तदस्य तेन समस्कुर्वन्यदैन्द्रं तदैन्द्रेण यद्वैश्वदेवं तद्वैश्वदेवेन त-न्त्रैव सर्वं कृत्स्नꣳ समस्कुर्वन् ॥९॥ तद्यदेतयोपतिष्ठते । यदेवास्यात्र विद्वान्वा-विद्वान्वाति वा रेचयति न वाभ्यापयति तदेवास्यैतया सर्वमाप्नोति यदस्य किं चानाप्तमनुष्टुब्धामक्रन्दवति वाग्वाऽअनुष्टुब्वाग्धामक्रन्दाचैवास्य तदाप्नोति यदस्य किं चानाप्तं पुरीषवतीं चितिं कृत्वोपतिष्ठतेत्यु क्रैकऽआहुस्तत्र हि सा सर्वा कृ-त्स्ना भवतीति ॥१०॥ तदु वाऽआहुः । यविष्ठवत्यैवोपतिष्ठतेतद्वास्य प्रियं धाम

यद्यविष्ठ इति तद्यदस्य प्रियं धाम तेनास्य तदाप्नोति यदस्य किं चानाप्तमाग्नेय्याग्निकर्म हि गायत्र्या गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्य तदाप्नोति यदस्य किं चानाप्तमनिरुक्तया सर्वं वाऽअनिरुक्तꣳ सर्वेणैवास्य तदाप्नोति यदस्य किं चानाप्तं वं यविष्ठ दाशुष इति तस्योक्तो बन्धुः पुरीषवतीं चितिं कृत्वोपतिष्ठेत तत्र हि सा सर्वा कृत्स्ना भवति ॥ ११ ॥ ब्राह्मणम् ॥ ३ ॥ ॥

उभयꣳ हैतद्ये प्रजापतिरास । मर्त्यं चैवामृतं च तस्य प्राणा एवामृता आसुः शरीरं मर्त्यꣳ स एतेन कर्मणैतयावृतैकधाऽऽत्मममृतमात्मानमकुरुत तथैवैतद्यजमान उभयमेव भवति मर्त्यं चैवामृतं च तस्य प्राणा एवामृता भवन्ति शरीरं मर्त्यꣳ स एतेन कर्मणैतयावृतैकधाऽऽत्मममृतमात्मानं कुरुते ॥ १ ॥ स प्रथमां चितिं चिनोति । सा ह्यस्यैषा प्राण एव तद्वै तदमृतममृतꣳ हि प्राणः सैषामृतचितिरथ पुरीष निवपति तद्ध्यस्यैतन्मज्जैव तद्वै तन्मर्त्यं मर्त्यो हि मज्जा तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतं भवति ॥ २ ॥ द्वितीयां चितिं चिनोति । सा ह्यस्यैषापान एव तद्वै तदमृतममृतꣳ ह्यपानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतं भवत्यथ पुरीषं निवपति तद्ध्यस्यैतदस्थ्येव तद्वै तन्मर्त्यं मर्त्यꣳ ह्यस्थि तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतं भवति ॥ ३ ॥ तृतीयां चितिं चिनोति । सा ह्यस्यैषा व्यान एव तद्वै तदमृतममृतꣳ हि व्यानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतं भवत्यथ पुरीषं निवपति तद्ध्यस्यैतत्स्नावैव तद्वै तन्मर्त्यं मर्त्यꣳ हि स्नाव तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतं भवति ॥ ४ ॥ चतुर्थीं चितिं चिनोति । सा ह्यस्यैषोदान एव तद्वै तदमृतममृतꣳ ह्युदानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतं भवत्यथ पुरीषं निवपति तद्ध्यस्यैतन्माꣳसमेव तद्वै तन्मर्त्यं मर्त्यꣳ हि माꣳसं तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतं भवति

॥ ५ ॥ पञ्चमीं चितिं चिनोति । सा ह्यस्यैषा समान एव तद्वै तदमृतममृतꣳ हि समानः सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतं भवत्यथ पुरीषं निवपति तद्ध्यस्यैतन्मेद एव तद्वै तन्मर्त्यं मर्त्यꣳ हि मेदस्तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतं भवति ॥ ६ ॥ षष्ठीं चितिं चिनोति । सा ह्यस्यैषा वागे वतद्वै तदमृतममृतꣳ हि वाक्सैषामृतचितिस्तदेतन्मर्त्यमुभयतोऽमृतेन परिगृह्णाति तेनास्यैतदमृतं भवत्यथ पुरीषं निवपति तद्ध्यस्यैतदसृगेव व्रगेव तद्वै तन्मर्त्यं मर्त्यꣳ ह्यसृङ्मर्त्या व्रक्तदेतस्मिन्नमृते प्रतिष्ठापयति तेनास्यैतदमृतं भवति ॥ ७ ॥ ता वाऽएताः । षडिष्टकाचितयः षट् पुरीषचितयस्तद्द्वादश द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैव तत्प्रजापतिरेकधाऽऽत्मममृतमात्मानमकुरुत तथैवैतद्यजमान एकधाऽऽत्मममृतमात्मानं कुरुते ॥ ८ ॥ अथ विकर्णीं च स्वयमातृण्णां चोपधाय । हिरण्यशकलैः प्रोक्षत्यग्निमभ्यादधाति रूपमेव तत्प्रजापतिर्हिरण्मयमत्तत आत्मनोऽकुरुत तद्यदत्ततस्तस्माद्दिदमत्यमात्मनो रूपं तस्मादाहुर्हिरण्मयः प्रजापतिरिति तथैवैतद्यजमानो रूपमेव हिरण्मयमत्तत आत्मनः कुरुते तद्यदत्ततस्तस्माद्दिदमत्यमात्मनो रूपं तस्माद्यो चैतद्विदुर्यो च न हिरण्मयोऽग्निचिदमुष्मिंल्लोके सम्भवतीत्येवाहुः ॥ ९ ॥ तद्धैतद्धाणिडल्यश्च सात्ययवाहनिश्च । आचार्यान्तेवासिनौ व्यूदाते रूपमेवास्यैतदिति ह स्माह शाणिडल्यो लोमानीति सात्ययवाहनिः ॥ १० ॥ स ह्योवाच शाणिडल्यः । रूपं वाव लोमवद्रूपमलोमकꣳ रूपमेवास्यैतदिति तद्वै तत्तथा यथा तद्धाणिडल्य ऊवाच संचितेऽग्निः प्रणीयते प्रणीतादूर्ध्वꣳ समिध आदधाति इति हूयन्ते ॥ ११ ॥ प्राणेन वै देवा अन्नमदन्ति । अग्निरु देवानाꣳ प्राणास्तस्मात्प्राग्देवेभ्यो जुह्वति प्राणेन हि देवा अन्नमदन्त्यपानेन मनुष्या अन्नमदन्ति तस्मात्प्रत्यङ्मनुष्येष्वन्नं धीयतेऽपानेन हि मनुष्या अन्नमदन्ति ॥ १२ ॥ तदाहुः । न वयसोऽग्निचिदश्नीयाद्वयो वाऽएष

द्रूपं भवति योऽग्निं चिनुतऽईश्वर आर्तिमार्तोस्तस्मान्न वयसोऽग्निचिद्भ्रीयादिति तद्वै काममेवैवंविद्भ्रीयादग्नेर्वाऽएष द्रूपं भवति योऽग्निं चिनुते सर्वं वाऽइदमग्नेरन्नꣳ सर्वं मऽइदमन्नमित्येवैवंविद्विद्यादिति ॥ १३ ॥ तदाहुः । किं तदग्नौ क्रियते येन यजमानः पुनर्मृत्युमपजयतीत्यग्निर्वाऽएष देवता भवति योऽग्निं चिनुतेऽमृतमु वाऽअग्निः श्रीर्देवाः श्रियं गच्छति यशो देवा यशो ह भवति य एवं वेद ॥ १४ ॥ ब्राह्मणम् ॥ ४ ॥ ॥

सर्वे ह्येते यज्ञा योऽयमग्निश्चितः । स यत्पशुमालभते तदस्याधेयमथ यदुखाꣳ सम्भरति तान्यस्याधेयकरवीꣳष्यथ यद्दीक्षते तदग्निहोत्रमथ यद्दीक्षितः समिधावाद्धाति तेऽअग्निहोत्राहुती ॥ १ ॥ ते वै सायंप्रातराद्धाति । सायंप्रातर्ह्यग्निहोत्राहुती जुह्वति समानेन मन्त्रेण समानेन हि मन्त्रेणाग्निहोत्राहुती जुह्वत्यथ यद्वनीवाहनं च भस्मनश्चाभ्यवकरणं तौ दर्शपूर्णमासावथ यद्गार्हपत्यं चिनोति तानि चातुर्मास्यान्यथ यदूर्ध्वं गार्हपत्यादा सर्वौषधात्ता इष्टयोऽथ यदूर्ध्वꣳ सर्वौषधात्प्राचीनं चितिभ्यस्ते पशुबन्धा यऽएवैतेषु यज्ञेषु विष्नुक्रमास्ते विष्नुक्रमा यज्ञस्यं तद्वात्सप्रम् ॥ २ ॥ सौम्योऽध्वरः प्रथमा चितिः । यत्प्राचीनꣳ सवेभ्यो राजसूयो द्वितीया वाजपेयस्तृतीयाश्वमेधश्चतुर्थ्यग्निसवः पञ्चमी यैश्चितꣳ सामभिः परिगायति तन्महाव्रतमथ यत्तत्रोद्गातुः पुरस्ताज्ज्यं तद्बृहद्रथंतरं वसोर्धारा महद्वक्थमथ यदूर्ध्वꣳ सामभ्यः प्राचीनं वसोर्धारायै यदेव तत्र होतुः पुरस्ताज्ज्यं तत्तदथ यदूर्ध्वं वसोर्धारायै ते गृहमेधा एतावन्तो वै सर्वे यज्ञास्तानग्निनाप्नोति ॥ ३ ॥ अथातो यज्ञवीर्याणामेव । सायंप्रातर्ह वाऽअमुष्मिंल्लोकेऽग्निहोत्रमुद्भ्राति तावती ह तस्मिन्यज्ञऽऊर्गर्धमासेऽर्धमासे दर्शपूर्णमासयाज्ञी चतुर्षु-चतुर्षु मासेषु चातुर्मास्ययाज्ञी षट्सु-षट्सु पशुबन्धयाज्ञी संवत्सरे-संवत्सरे सोमयाज्ञी शते-शते संवत्सरेष्वग्निचित्काममश्नाति कामं न तद्धैतस्यावहꣳ संवत्सरास्तावदमृतमनन्तमपर्यन्तꣳ स

यो ह्येतदेवं वेदैव ह्येवास्यैतदमृतमनन्तमपर्यन्तं भवति तस्य यदुपोषीकयवोपहन्यात्तदेवास्यामृतमनन्तमपर्यन्तं भवति ॥ ४ ॥ ब्राह्मणम् ॥ ५ ॥ प्रथमोऽध्यायः [६१.] ॥ ॥

प्रजापतिः स्वर्गं लोकमजिगाꣳसत् । सर्वे वै पशवः प्रजापतिः पुरुषोऽश्वो गौरविरजः स एते द्वूपैर्नाशक्नोत्स एतं वयोविधमात्मानमपश्यदग्निं तं व्यधत्त सोऽनुपसमुक्ष्यानुपाधायोदपिपतिषत्स नाशक्नोत्स उपसमुक्ष्योपाधायोदपतत्तस्माद्येतर्हि वयाꣳसि यदैव पक्षाऽउपसमूहन्ते यदा पत्राणि विसृजन्तेऽथोत्पतितुꣳ शक्नुवन्ति ॥ १ ॥ तं वाऽअङ्गुलिभिर्मिमीते । पुरुषो वै यज्ञस्तेनेदꣳ सर्वं मितं तस्यैषावमा मात्रा यदङ्गुलयस्तस्यास्यावमा मात्रा तामस्य तदाप्नोति तयैनं तन्मिमीते ॥ २ ॥ चतुर्विꣳशत्याङ्गुलिभिर्मिमीते । चतुर्विꣳशत्यक्षरा वै गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनं तन्मिमीते ॥ ३ ॥ स चतुरङ्गुलमेवोभयतोऽत्तरत उपसमूहति । चतुरङ्गुलमुभयतो बाह्यतो व्युदूहति तद्यावदेवोपसमूहति तावद्व्युदूहति तन्नाह्येवातिरेचयति नो कनीयः करोति तथा पुरस्तन्तथोत्तरस्य पक्षस्य ॥ ४ ॥ अथ निर्णामौ पक्षयोः करोति । निर्णामौ हि वयसः पक्षयोर्भवतो वितृतीये वितृतीये हि वयसः पक्षयोर्निर्णामौ भवतोऽत्तरे वितृतीयेऽत्तरे हि वितृतीये वयसः पक्षयोर्निर्णामौ भवतः स चतुरङ्गुलमेव पुरस्ताडुदूहति चतुरङ्गुलं पश्चाडुपसमूहति तद्यावदेवोदूहति तावडुपसमूहति तन्नाह्येवातिरेचयति नो कनीयः करोति ॥ ५ ॥ स तस्मिन्निर्णामे । एकामिष्टकामुपदधाति तद्येयं वयसः पततो निर्णामादेका नाद्युपशेते तां तत्करोत्यथोऽइदम् ॥ ६ ॥ अथ वक्रौ पक्षौ करोति । वक्रौ हि वयसः पक्षौ भवतः स चतुरङ्गुलमेव पश्चाडुदूहति चतुरङ्गुलं पुरस्ताडुपसमूहति तद्यावदेवोदूहति तावडुपसमूहति तन्नाह्येवातिरेचयति नो कनीयः करोति ॥ ७ ॥ अथ द्वूपमुत्तमं करोति । अत्रैष

सर्वोऽग्निः संस्कृतस्तस्मिन्देवा एतद्रूपमुत्तममदधुस्तथैवास्मिन्नयमेतद्रूपमुत्तमं दधाति स सकृस्रमृज्वालिखिता इष्टकाः करोति सकृस्रमित्यालिखिताः सकृस्रमित्यालिखिताः ॥ ८ ॥ अथ पञ्चमीं चितिमुपधाय । त्रेधाग्निं विमिमीते स मध्यमे वितृतीये सकृस्रमृज्वालिखिता इष्टका उपदधाति तद्यानीमानि वयसः प्रत्यञ्चि शीर्ष्ण आ पुच्छादङ्गानि लोमानि तानि तत्करोति ॥ ९ ॥ अथ सकृस्रमित्यालिखिता दक्षिणत उपदधाति । तद्यानीमानि वयसो दक्षिणतो वक्राणि लोमानि तानि तत्करोति ॥ १० ॥ अथ सकृस्रमित्यालिखिता उत्तरत उपदधाति । तद्यानीमानि वयस उत्तरतो वक्राणि लोमानि तानि तत्करोति सकृस्रेण सर्वं वै सकृस्रꣳ सर्वेणैवास्मिन्नेतद्रूपमुत्तमं दधाति त्रिभिः सकृस्रैस्त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवास्मिन्नेतद्रूपमुत्तमं दधाति ॥ ११ ॥ ब्राह्मणम् ॥ ६ [२. १.] ॥ ॥

यान्वै तान्त्सप्त पुरुषान् । एकं पुरुषमकुर्वन्त्स प्रजापतिरभवत्स प्रजा असृजत स प्रजाः सृष्ट्वोर्ध उदक्रामत्स एतं लोकमगच्छत्त्रेष एतत्तपति नो ह तर्ह्यन्य एतस्मादत्र यज्ञिय आस तं देवा यज्ञेनैव यष्टुमध्रियन्त ॥ १ ॥ तस्मादेतदृषिणाभ्यनूक्तम् । यज्ञेन यज्ञमयजन्त देवा इति यज्ञेन हि तं यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्निति ते हि धर्माः प्रथमेऽक्रियन्त ते ह नाकं महिमानः सचन्तेति स्वर्गो वै लोको नाको देवा महिमानस्ते देवाः स्वर्गं लोकꣳ सचन्त ये तं यज्ञमयजन्नित्येतत् ॥ २ ॥ यत्र पूर्वे साध्याः सन्ति देवा इति । प्राणा वै साध्या देवास्तऽएतमग्रऽएवमसाधयन्नेतदेव बुभूषन्तस्तऽउऽएवाप्येतर्हि साधयन्ति पश्चेदमन्यदभवद्यजत्रममर्त्यस्य भुवनस्य भूनेति पश्चाद्धैवेदमन्यद्यज्ञियमास यत्किं चामृतम् ॥ ३ ॥ सुपर्णोऽअङ्ग सवितुर्गरुत्मान् । पूर्वो जातः स उऽअस्यानु धर्मेति प्रजापतिर्वै सुपर्णो गरुत्मानेष सवितैतस्य प्रजापतिरनु धर्ममित्येतत् ॥ ४ ॥ स वै सप्तपुरुषो भवति । सप्तपुरुषो ह्ययं पुरुषो यच्चत्वार आत्मा त्रयः पञ्चपुच्छानि च-

बाहो हि तस्य पुरुषस्यात्मा त्रयः पक्षपुच्छानि ॥५॥ तं वाऽउद्बाहुना पुरुषेण मिमीते । पुरुषो वै यज्ञस्तेनेदꣳ सर्वं मितं तस्यैषा परमा मात्रा यदुद्बाहुस्तस्यास्य परमा मात्रा तामस्य तदाप्नोति तयैनं तन्मिमीते तत्रोप यत्प्रपदेनाभ्युक्षितो भवति तत्परिश्रिद्विराप्नोति तस्माद्ध बाह्वेनैव लेखां परिश्रिद्यः खनेत् ॥६॥ अथ पक्षयोरररत्नीऽउपादधाति । पक्षयोस्तद्वीर्यं दधाति बाहू वै पक्षौ बाहुभ्यामु वाऽअन्नमद्यतेऽन्नायैव तमवकाशं करोति तद्यत्पक्षयोरररत्नीऽउपादधात्यरत्निमात्राद्ध्यन्नमद्यते ॥७॥ अथ पुच्छे वितस्तिमुपादधाति । प्रतिष्ठायां तद्वीर्यं दधाति प्रतिष्ठा वै पुच्छꣳ हस्तो वितस्तिर्हस्तेन वाऽअन्नमद्यतेऽन्नायैव तमवकाशं करोति तद्यत्पुच्छे वितस्तिमुपादधात्यन्नऽएवैनं तत्प्रतिष्ठापयति तद्यत्तत्र कनीय उपादधात्यन्नेक्षेवैनं तत्प्रतिष्ठापयत्यथोऽएतावद्वाऽइदं मितं भवत्येतावदिदं तद्यदेवं मिमीतऽएतस्यैवाप्त्यै ॥८॥ ब्राह्मणम् ॥७ [२. २.] ॥ ॥

या वाऽइयं वेदिः सप्तविधस्य । एषा वेदिर्मात्रा स देवयजनमध्यवसाय पूर्वया द्वारा पत्नीशालं प्रपद्य गार्हपत्यायोद्धत्यावोक्षति गार्हपत्यस्योद्धतात्सप्त प्राचः प्रक्रमान्प्रक्रामति ततः प्राञ्चं व्यामं विमिमीते तस्य मध्यऽआहवनीयायोद्धत्यावोक्षति पूर्वार्धाद्व्यामस्य त्रीन्प्राचः प्रक्रमान्प्रक्रामति स वेद्यन्तः ॥१॥ ॥शतम्५२००॥॥ ते वाऽएते । व्यामैकादशाः प्रक्रमा अन्तरा वेद्यन्तं च गार्हपत्यं चैकादशान्तरा त्रिष्टुब्बृहत्रिष्टुब्वीर्यं त्रिष्टुब्बृहतैवैतद्वीर्येण यजमानः पुरस्ताद्यज्ञमुखाद्रक्षाꣳसि नाष्ट्रा अपहन्ति ॥२॥ सैषा वेदेर्योनिः । एतस्यै वै योनेर्देवा वेदिं प्राजनयन्नथ य एष व्यामः सा गार्हपत्यस्य योनिरेतस्यै वै योनेर्देवा गार्हपत्यं प्राजनयन्गार्हपत्यादाहवनीयम् ॥३॥ स वेद्यन्तात् । षट्त्रिꣳशत्प्रक्रमां प्राचीं वेदिं विमिमीते त्रिꣳशतं पश्चात्तिरश्चीं चतुर्विꣳशतिं पुरस्तात्तन्नवतिः सैषा नवतिप्रक्रमा वेदिस्तस्याꣳ सप्तविधमग्निं विदधाति ॥४॥ तदाहुः । कथमेष सप्तविध एतया वेद्या सम्प-

यतऽइति दश वाऽइमे पुरुषे प्राणाश्चवार्यङ्गान्यात्मा पञ्चदश एवं द्वितीयऽएवं तृतीये षट्सु पुरुषेषु नवतिरथैकः पुरुषोऽत्येति पाङ्क्तो वै पुरुषो लोम त्वङ्मा-समस्थि मज्जा पाङ्क्तोऽइयं वेदिश्चतस्रो दिश आत्मा पञ्चम्येवमेष सप्तविध एतया वेद्या सम्पद्यते ॥५॥ तद्वैके । उत्तरा विधा विधास्यन्त एतांश्च प्रक्रमानितं च व्याममनुवर्धयन्ति योनिमनुवर्धयाम इति न तथा कुर्यान्न वै ज्ञातं गर्भं योनिरनु-वर्धते यावद्वाव योनावन्तर्गर्भो भवति तावदेव योनिर्वर्धतऽएतावत्यु वाऽअत्र गर्भस्य वृद्धिः ॥६॥ ते ये ह तथा कुर्वन्ति । एतꣳ ह ते पितरं प्रजापतिꣳ सम्प-दश्यावयन्ति तऽइष्ट्वा पापीयाꣳसो भवन्ति पितरꣳ हि प्रजापतिꣳ सम्पदश्याव-यन्ति सा यावत्येषा सप्तविधस्य वेदिस्तावतीं चतुर्दश कृत्वऽएकशतविधस्य वेदिं विमिमीते ॥७॥ अथ षट्त्रिꣳशत्प्रक्रमाꣳ रज्जुं मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्प्राच उपदधाति निःसृजति चतुरः ॥८॥ अथ त्रिꣳशत्प्रक्रमां मि-मीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागान्पश्चादुपदधाति निःसृजति चतुरः ॥९॥ अथ चतुर्विꣳशतिप्रक्रमां मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भागा-न्पुरस्तादुपदधाति निःसृजति चतुर इति नु वेदिविमानम् ॥१०॥ अथाग्नेर्विधाः । अष्टाविꣳशतिः प्राञ्चः पुरुषा अष्टाविꣳशतिस्तिर्यञ्चः स आत्मा चतुर्दश पुरुषा द-क्षिणाः पक्षश्चतुर्दशोत्तरश्चतुर्दश पुच्छं चतुर्दशारत्नीन्दक्षिणे पक्षऽउपदधाति चतुर्द-शोत्तरे चतुर्दश वितस्तीः पुच्छऽइति न्वष्टानवतेः पुरुषाणां मात्रा साधिमाना-नाम् ॥११॥ अथ त्रिपुरुषाꣳ रज्जुं मिमीते । ताꣳ सप्तधा समस्यति तस्यै चतुरो भागानात्मन्नुपदधाति त्रीन्पक्षपुच्छेषु ॥१२॥ अथारत्निमात्रीं मिमीते । ताꣳ स-प्तधा समस्यति तस्यै त्रीन्भागान्दक्षिणे पक्षऽउपदधाति त्रीनेवोत्तरे निःसृजति चतुरः ॥१३॥ अथ वितस्तिमात्रीं मिमीते । ताꣳ सप्तधा समस्यति तस्यै त्रीन्भा-गान्पुच्छऽउपदधाति निःसृजति चतुर एवमेष एकशतविध एतया वेद्या सम्पद्यते

॥ १४ ॥ तदाहुः । यत्त्रयोदश पुरुषा अतियन्ति कथमेते सम्पदो न च्यवन्त इति या वाऽएतस्य सप्तमस्य पुरुषस्य सम्पत्सैवैतेषाꣳ सर्वेषाꣳ सम्पत् ॥ १५ ॥ अथो ऽआहुः । प्रजापतिरेवात्मानं विधाय तस्य यत्र-यत्र न्यूनमासीत्तदेतैः समापूरयत तेनोऽएवापि सम्पन्न इति ॥ १६ ॥ तद्वैके । एकविधं प्रथमं विदधत्यथैकोत्तरमापरिमितविधान्न तथा कुर्यात् ॥ १७ ॥ सप्तविधो वाऽअग्रे प्रजापतिरसृज्यत । स आत्मानं विदधान ऐत्स एकशतविधोऽतिष्ठत स योऽर्वाचीनꣳ सप्तविधाद्विधत्त ऽएतꣳ ह स पितरं प्रजापतिं विह्निनत्ति स इष्ट्वा पापीयान्भवति यथा श्रेयाꣳसꣳ हिꣳसित्वाथ य एकशतविधमतिविधत्तेऽस्मात्स सर्वस्माद्बहिर्धा निष्पद्यते सर्वमु होदं प्रजापतिस्तस्माद्व सप्तविधमेव प्रथमं विदधीताथैकोत्तरमेकशतविधादेकशतविधं तु नातिविदधीत नाहैतं पितरं प्रजापतिं विह्निनत्ति नोऽअस्मात्सर्वस्माद्बहिर्धा निष्पद्यते ॥ १८ ॥ ब्राह्मणम् ॥ ८ [२. ३.] ॥ ॥

संवत्सरो वै प्रजापतिः । अग्निरु सर्वे कामाः सोऽयꣳ संवत्सरः प्रजापतिरकामयताग्निꣳ सर्वान्कामानात्मानमभिसंचिन्वीयेति स एकशतधात्मानं व्यधत्त स एकशतधात्मानं विधायाग्निꣳ सर्वान्कामानात्मानमभिसमचिनुत स सर्वे कामा अभवत्तस्मान्न कश्चन बहिर्धा कामोऽभवत्तस्मादाहुः संवत्सरः सर्वे कामा इति न ह संवत्सरात्कश्चन बहिर्धा कामोऽस्ति ॥ १ ॥ तथैवैतद्यजमानः । एकशतधात्मानं विधायाग्निꣳ सर्वान्कामानात्मानमभिसंचिनुते स सर्वे कामा भवति तस्मान्न कश्चन बहिर्धा कामो भवति ॥ २ ॥ स यः स संवत्सरोऽसौ स आदित्यः । स एष एकशतविधस्तस्य रश्मयः शतं विधा एष एवैकशततमो य एष तपत्यस्मिन्त्सर्वस्मिन्प्रतिष्ठितस्तथैवैतद्यजमान एकशतधात्मानं विधायास्मिन्त्सर्वस्मिन्प्रतितिष्ठति ॥ ३ ॥ अथ वाऽएकशतविधः । सप्तविधमभिसम्पद्यतऽएकशतधा वाऽअसावादित्यो विह्नितः सप्तसु देवलोकेषु प्रतिष्ठितः सप्त वै देवलोकाश्चतस्रो दिशश्चय

इमे लोका एते वै सप्त देवलोकास्तेष्वेष प्रतिष्ठितस्तथैवैतद्यज्ञमान एकशतधात्मानं विधाय सप्तसु देवलोकेषु प्रतितिष्ठति ॥४॥ यद्वैवैकशतविधः । सप्तविधमभिसम्पद्यतऽएकशतधा वाऽअसावादित्यो विक्रितः सप्तस्वृतुषु सप्तसु स्तोमेषु सप्तसु पृष्ठेषु सप्तसु छन्दःसु सप्तसु प्राणेषु सप्तसु दिक्षु प्रतिष्ठितस्तथैवैतद्यज्ञमान एकशतधात्मानं विधायैतस्मिन्त्सर्वस्मिन्प्रतितिष्ठति ॥५॥ यद्वैवैकशतविधः । सप्तविधमभिसम्पद्यतऽएकशतधा वाऽअसावादित्यो विक्रितः सप्तान्नरे ब्रह्मन्प्रतिष्ठितः सप्तान्नरं वै ब्रह्मऽइत्येकमन्नरं यजुरिति द्वे सामेति द्वेऽअथ यदतोऽन्यद्ब्रह्मैव तद्व्यन्नरं वै ब्रह्म तदेतत्सर्वꣳ सप्तान्नरं ब्रह्म तस्मिन्नेष प्रतिष्ठितस्तथैवैतद्यज्ञमान एकशतधात्मानं विधाय सप्तान्नरे ब्रह्मन्प्रतितिष्ठति ॥६॥ तस्माद्व सप्तभिः-सप्तभिः परिश्रयन्ति । तस्मादेकशतविधः सप्तविधमभिसम्पद्यतेऽथ वै सप्तविध एकशतविधमभिसम्पद्यते ॥७॥ सप्तविधो वाऽअग्रे प्रजापतिरसृज्यत । स एतमेकशतधात्मानं विक्रितमपश्यत्प्राणभृत्सु पञ्चाशदिष्टकाः पञ्चाशद्यजूꣳषि तक्षतꣳ सादनं च सूददोहाश्चैकशततमे तत्समानꣳ सादयित्वा हि सूददोहसाधिवदति स एतेनैकशतविधेनात्मनेमां क्षितिमन्नयदिमां व्यष्टिं व्याप्नुत तथैवैतद्यज्ञमान एतेनैकशतविधेनात्मनेमां क्षितिं न्नयतीमां व्यष्टिं व्यश्नुतऽएवमु सप्तविध एकशतविधमभिसम्पद्यते स य एवैकशतविधः स सप्तविधो यः सप्तविधः स एकशतविध इति नु विधानाम् ॥८॥ ब्राह्मणम् ॥१ [२. ४.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १४ ॥

अथातश्चयनस्यैव । अन्तरोपसदौ चिनोत्येतद्वै देवा अबिभयुर्यद्वै न इममिक्ष्ण्याꣳसि नाष्ट्रा न कृन्युरिति तऽएताः पुरोऽपश्यन्नुपसद इमानेव लोकानिमे वै लोकाः पुरस्ताः प्रापद्यन्त ताः प्रपद्याभयेऽनाष्टऽएतमात्मानꣳ समस्कुर्वत तथैवैतद्यज्ञमान एताः पुरः प्रपद्याभयेऽनाष्टऽएतमात्मानꣳ संस्कुरुते ॥१॥ यद्वैवान्तरो-

पसदौ चिनोति । एतद्वै देवा अबिभयुर्यद्वै न इममिह रक्षाꣳसि नाष्ट्रा न क्रव्यु-
रिति तꣳ एतान्वज्रानपश्यन्नुपसदो वज्रा वाꣳ उपसदस्तान्प्रापश्यत्त तान्प्रपद्याभये
ऽनाष्ट्रꣳ एतमात्मानꣳ समस्कुर्वत तथैवैतद्यजमान एतान्वज्रान्प्रपद्याभयेऽनाष्ट्रꣳ ए-
तमात्मानꣳ संस्कुरुते ॥२॥ एतद्वै क्रꣳ यज्ञे तपः । यदुपसदस्तपो वाꣳ उपसदस्तद्य-
त्तपसि चीयते तस्मात्तापश्चितस्तद्वै यावदेवोपसद्भिश्चरन्ति तावत्प्रवर्ग्येण संवत्स-
रमेवोपसद्भिश्चरन्ति संवत्सरं प्रवर्ग्येण ॥३॥ अहोरात्राणि वाꣳ उपसदः । आदि-
त्यः प्रवर्ग्योऽमुं तदादित्यमहोरात्रेषु प्रतिष्ठापयति तस्मादेषोऽहोरात्रेषु प्रतिष्ठितः
॥४॥ अथ यदि चतुर्विꣳशतिः । चतुर्विꣳशतिर्वाꣳ अर्धमासा अर्धमासा उपसद आ-
दित्यः प्रवर्ग्योऽमुं तदादित्यमर्धमासेषु प्रतिष्ठापयति तस्मादेषोऽर्धमासेषु प्रतिष्ठि-
तः ॥५॥ अथ यदि द्वादश । द्वादश वै मासा मासा उपसद आदित्यः प्रवर्ग्योऽमुं
तदादित्यं मासेषु प्रतिष्ठापयति तस्मादेष मासेषु प्रतिष्ठितः ॥६॥ अथ यदि षट्
। षड्वाꣳ ऋतव ऋतव उपसद आदित्यः प्रवर्ग्योऽमुं तदादित्यमृतुषु प्रतिष्ठापयति
तस्मादेष ऋतुषु प्रतिष्ठितः ॥७॥ अथ यदि तिस्रः । त्रयो वाꣳ इमे लोका इमे
लोका उपसद आदित्यः प्रवर्ग्योऽमुं तदादित्यमेषु लोकेषु प्रतिष्ठापयति तस्मादेष
एषु लोकेषु प्रतिष्ठितः ॥८॥ अथातश्चितिपुरीषाणामिव मीमाꣳसा । मासं प्रथमा
चितिर्मासं पुरीषमेतावान्वासन्तिकऽऋतौ कामस्तथ्यावान्वासन्तिकऽऋतौ कामस्तं
तत्सर्वमात्मानमभिसंचिनुते ॥९॥ मासं द्वितीया । मासं पुरीषमेतावान्ग्रैष्मऽऋतौ
कामस्तथ्यावान्ग्रैष्मऽऋतौ कामस्तं तत्सर्वमात्मानमभिसंचिनुते ॥१०॥ मासं तृ-
तीया । मासं पुरीषमेतावान्वार्षिकऽऋतौ कामस्तथ्यावान्वार्षिकऽऋतौ कामस्तं
तत्सर्वमात्मानमभिसंचिनुते ॥११॥ मासं चतुर्थी । मासं पुरीषमेतावाञ्छारदऽऋ-
तौ कामस्तथ्यावाञ्छारदऽऋतौ कामस्तं तत्सर्वमात्मानमभिसंचिनुते ॥१२॥ अथ
पञ्चम्ये चितिः । असपत्ना विराजश्च प्रथमाऽमुपदधाति स्तोमभागा एकैकामन्वहं

ताः सकृत्सादयति सकृत्सूददोहसाधिवदति तूष्णीं मासꣳ स्तोमभागापुरीषमभिहरत्येतावान्वै मन्तिकऽऋतौ कामस्तद्यावान्वै मन्तिकऽऋतौ कामस्तं तत्सर्वमात्मानमभिसंचिनुते ॥ १३ ॥ मासꣳ षष्ठी । मासं पुरीषमेतावाञ्छैशिरऽऋतौ कामस्तद्यावाञ्छैशिरऽऋतौ कामस्तं तत्सर्वमात्मानमभिसंचिनुतऽएतावान्वै द्वादशसु मासेषु कामः षट्स्वृतुषु तद्यावान्द्वादशसु मासेषु कामः षट्स्वृतुषु तं तत्सर्वमात्मानमभिसंचिनुते ॥ १४ ॥ अथ त्रीण्यहान्युपातियन्ति । यदहः शतरुद्रियं जुहोति यदहरुपवसथो यदहः प्रसुतस्तद्यत्तेषहःसूपसदा चरन्ति तानि तस्य मासस्याहोरात्राण्यथ यत्प्रवर्ग्येण तदु तस्मिन्नृतावादित्यं प्रतिष्ठापयत्येतावान्वै त्रयोदशसु मासेषु कामः सप्तस्वृतुषु तद्यावांस्त्रयोदशसु मासेषु कामः सप्तस्वृतुषु तं तत्सर्वमात्मानमभिसंचिनुते ॥ १५ ॥ स संवत्सरं प्रसुतः स्यात् । सर्वं वै संवत्सरः सर्वमेकशतविधः सर्वेणैव तत्सर्वमाप्नोति यदि संवत्सरं न शक्नुयाद्विश्वजिता सर्वपृष्ठेनातिरात्रेण यजेत तस्मिन्त्सर्ववेदसं दद्यात्सर्वं वै विश्वजित्सर्वपृष्ठोऽतिरात्रः सर्वꣳ सर्ववेदसꣳ सर्वमेकशतविधः सर्वेणैव तत्सर्वमाप्नोति ॥ १६ ॥ ब्राह्मणम् ॥ १ [२. ५.] ॥ ॥

संवत्सरो वै प्रजापतिरेकशतविधः । तस्याहोरात्राण्यर्धमासा मासा ऋतवः षष्टिर्मासस्याहोरात्राणि मासि वै संवत्सरस्याहोरात्राण्याप्यन्ते चतुर्विꣳशतिरर्धमासास्त्रयोदश मासास्त्रय ऋतवस्ताः शतं विधाः संवत्सर एवैकशततमी विधा ॥ १ ॥ स ऋतुभिरेव सप्तविधः । षडृतवः संवत्सर एव सप्तमी विधा तस्यैतस्य संवत्सरस्यैतत्तेजो य एष तपति तस्य रश्मयः शतं विधा मण्डलमेवैकशततमी विधा ॥ २ ॥ स दिग्भिरेव सप्तविधः । ये प्राच्यां दिशि रश्मयः सैका विधा ये दक्षिणायाꣳ सैका ये प्रतीच्याꣳ सैका यऽउदीच्याꣳ सैका यऽऊर्ध्वायाꣳ सैका येऽवाच्याꣳ सैका मण्डलमेव सप्तमी विधा ॥ ३ ॥ तस्यैतस्य परस्तात्कामप्रो लोकः । अमृतं

वै कामप्रमृतमेवास्य तत्परस्तात्तद्यत्तदमृतमेतत्तद्यदेतदर्चिर्दीप्यते ॥४॥ तदेतद्व-सुचित्रꣳ राधः । तदेष सविता विभक्ताभ्यः प्रजाभ्यो विभजत्यप्योषधिभ्योऽपि व-नस्पतिभ्यो भूय-इव ह्येवैकाभ्यः प्रयच्छति कनीय-इवैकाभ्यस्तद्याभ्यो भूयः प्रयच्छ-ति ता ह्योत्तमां जीवन्ति याभ्यः कनीयः कनीयस्ताः ॥५॥ तदेतदृचाभ्युक्तम् । विभक्तारꣳ हवामहे वसोश्चित्रस्य राधसः सवितारं नृचक्षसमिति तदेतत्सर्व-मायुर्दीर्घमनन्तꣳ हि तद्यदिदमाहुर्दीर्घं तऽआयुरस्तु सर्वमायुरिहीत्येष ते लोक एतत्तेऽस्त्विति ह्येवैतत् ॥६॥ पश्यन्ती वाग्वदति । तदेतदेकशतविधेन वैवाप्त-व्यꣳ शतायुतया वा य एवैकशतविधं विधत्ते यो वा शतं वर्षाणि जीवति स ह्येवैतदमृतमाप्नोति तस्माद्ये चैतद्विदुर्ये च न लोक्या शतायुतित्येवाब्रुवंस्तस्माद्ध ह न पुरायुषः स्वकामी प्रेयाल्लोक्यꣳ ह्येतऽउ वाव लोका यदहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरः ॥७॥ तद्येऽर्वाग्विꣳशेषु वर्षेषु प्रयन्ति । अहोरात्रिषु ते लोकेषु सद्यन्तेऽथ ये परोविꣳशेषुर्वाक्चत्वारिꣳशेषुर्धमासेषु तेऽथ ये परश्चत्वारिꣳ-शेषुर्वाक्षष्टेषु मासेषु तेऽथ ये परःषष्टेषुर्वागशीतेषूतुषु तेऽथ ये परोऽशीतेष-र्वाक्शतेषु संवत्सरे तेऽथ य एव शतं वर्षाणि यो वा भूयाꣳसि जीवति स ह्ये-वैतदमृतमाप्नोति ॥८॥ बहुभिर्ह वै यज्ञैः । एकमहरेका रात्रिर्मिता स य एवैक-शतविधं विधत्ते यो वा शतं वर्षाणि जीवति स ह्येवैनद्धातमामाप्नोत्येष वा ऽएकशतविधं विधत्ते य एनꣳ संवत्सरं बिभर्ति तस्मादेनꣳ संवत्सरभृतमेव चि-न्वीतेत्यधिदैवतम् ॥९॥ अथाधियज्ञम् । यानमूनेकशतमुद्वाङ्प्रुषान्मिमीते स विधैकशतविधः स चितिभिरेव सप्तविधः षड्तव्यवत्यश्चितयोऽग्निरेव सप्तमी वि धा ॥१०॥ सऽउ वाऽइष्टकैकशतविधः । याः पञ्चाशत्प्रथमा इष्टका याश्चोत्तमा-स्ताः शतं विधा अथ या एतदन्तरेणेष्टका उपधीयन्ते सैवैकशततमी विधा ॥११॥ स उ एव यज्ञुस्तेजाः । यज्ञुरेकशतविधो यानि पञ्चाशत्प्रथमानि यजूꣳषि यानि

चोत्तमानि ताः शतं विधा अथ यान्येतदन्तरेण यज्ञूꣳषि क्रियन्ते सैवैकशततमी विधैवमु सप्तविध एकशतविधो भवति स यः शतायुतायां कामो य एकशतविधे सप्तविधेन कैव तमेवंविदाप्नोति ॥ १२॥ एवं वाव सर्वे यज्ञाः । एकशतविधा आग्निहोत्रादृग्भिर्यजुर्भिः पदैरक्षरैः कर्मभिः सामभिः स यः शतायुतायां कामो य एकशतविधे यः सप्तविधे यज्ञेन यज्ञेन कैव तमेवंविदाप्नोतीत्यु एवाधियज्ञम् ॥१३॥ अथाध्यात्मम् । पञ्चेमाश्चतस्रो विधा अङ्गुलयो द्वे कल्कुषी दोरꣳसफलकं चाक्षश्च तत्पञ्चविꣳशतिरेवमिमानीतराण्यङ्गानि ताः शतं विधा आत्मैवैकशततमी विधोक्तꣳ सप्तविधतायै ॥ १४॥ स ऽएव प्राणतेजाः । प्राणैकशतविधोऽन्वङ्गमङ्गेऽङ्गे हि प्राणः स यः शतायुतायां कामो य एकशतविधे यः सप्तविधे यः सर्वेषु यज्ञेषु विद्यया कैव तमेवंविदाप्नोति सर्वैर्हि यज्ञैरात्मानꣳ सम्पन्नं विदुः ॥ १५॥ त्रीणि वाऽइमानि पञ्चविधानि । संवत्सरोऽग्निः पुरुषस्तेषां पञ्च विधा अन्नं पानꣳ श्रीर्ज्योतिरमृतं यदेव संवत्सरेऽन्नं तदन्नं या आपस्तत्पानꣳ रात्रिरेव श्रीः श्रियाꣳ कैतद्रात्र्याꣳ सर्वाणि भूतानि संवसन्त्यक्तर्ज्योतिरादित्योऽमृतमित्यधिदेवतम् ॥ १६॥ अथाधियज्ञम् । यदेवाग्नावन्नमुपधीयते तदन्नं या आपस्तत्पानं परिश्रित एव श्रीस्तद्धि रात्रीणाꣳ रूपं यजुष्मत्यो ज्योतिस्तद्यद्भाꣳ रूपमग्निरमृतं तद्यादित्यस्य रूपमित्यु ऽएवाधियज्ञम् ॥ १७॥ अथाध्यात्मम् । यदेव पुरुषेऽन्नं तदन्नं या आपस्तत्पानमस्थीन्येव श्रीस्तद्धि परिश्रिताꣳ रूपं मज्जानो ज्योतिस्तद्धि यजुष्मतीनाꣳ रूपं प्राणोऽमृतं तद्यग्ने रूपं प्राणोऽग्निः प्राणोऽमृतमित्यु वाऽआहुः ॥ १८॥ अन्नाद्धाऽअशनाया निवर्तते । पानात्पिपासा श्रियै पाप्मा ज्योतिषस्तमोऽमृतान्मृत्युर्नि ह वाऽअस्मादेतानि सर्वाणि वर्तन्तेऽप पुनर्मृत्युं जयति सर्वमायुरेति य एवं वेद तदेतदमृतमित्येवामुत्रोपासीतायुरितीह प्राण इति हैकऽउपासते प्राणोऽग्निः प्राणोऽमृतमिति वदन्तो न तथा विद्याद्ध्रुवं वै तद्यत्प्राणास्तं ते विद्याम्यायुषो

न मध्यादिति क्वापि यजुषाभ्युक्तं तस्मादिनदमृतमित्येवामुत्रोपासीतायुरितीह तथो ह सर्वमायुरेति ॥ ११ ॥ ब्राह्मणम् ॥ २ [२. ६.] ॥ द्वितीयोऽध्यायः [६२.] ॥ ॥

प्राणो गायत्री । चक्षुरुष्णिग्वागनुष्टुम्मनो बृहती श्रोत्रं पङ्क्तिर्योऽयंऽप्रज्ञननः प्राण एष त्रिष्टुबथ योऽयमवाङ् प्राण एष जगती तानि वाऽएतानि सप्त छन्दाऽसि चतुरुत्तराण्यग्नौ क्रियन्ते ॥ १ ॥ प्राणो गायत्रीति । तद्य एव प्राणस्य महिमा यद्वीर्यं तदेतत्सकृल्लं प्राणस्यैवैतद्वीर्यं यद्यस्य चिन्वतः प्राण उत्क्रामेत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सकृल्लमेष गायत्रीः संचितो भवति ॥ २ ॥ चक्षुरुष्णिगिति । तद्य एव चक्षुषो महिमा यद्वीर्यं तदेतत्सकृल्लं चक्षुष एवैतद्वीर्यं यद्यस्य चिन्वतश्चक्षुरुत्क्रामेत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सकृल्लमेष उष्णिहः संचितो भवति ॥ ३ ॥ वागनुष्टुबिति । तद्य एव वाचो महिमा यद्वीर्यं तदेतत्सकृल्लं वाच एवैतद्वीर्यं यद्यस्य चिन्वतो वागुत्क्रामेत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सकृल्लमेषोऽनुष्टुभः संचितो भवति ॥ ४ ॥ मनो बृहतीति । तद्य एव मनसो महिमा यद्वीर्यं तदेतत्सकृल्लं मनस एवैतद्वीर्यं यद्यस्य चिन्वतो मन उत्क्रामेत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सकृल्लमेष बृहतीः संचितो भवति ॥ ५ ॥ श्रोत्रं पङ्क्तिरिति । तद्य एव श्रोत्रस्य महिमा यद्वीर्यं तदेतत्सकृल्लꣳ श्रोत्रस्यैवैतद्वीर्यं यद्यस्य चिन्वतः श्रोत्रमुत्क्रामेत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सकृल्लमेष पङ्क्तीः संचितो भवति ॥ ६ ॥ यऽएवायं प्रज्ञननः प्राणः । एष त्रिष्टुबिति तद्य एवैतस्य प्राणस्य महिमा यद्वीर्यं तदेतत्सकृल्लमेतस्यैवैतत्प्राणस्य वीर्यं यद्यस्य चिन्वत एष प्राण आलुभ्येत्तत एवैषोऽग्निर्न चीयेतैतेनैवास्य रूपेण सकृल्लमेष त्रिष्टुभः संचितो भवति ॥ ७ ॥ अथ योऽयमवाङ् प्राणः । एष जगतीति तद्य एवैतस्य प्राणस्य महिमा यद्वीर्यं तदेतत्सकृल्लमेतस्यैवैतत्प्राणस्य वीर्यं यद्यस्य चिन्वत एष प्राण आलुभ्येत्तत एवैषोऽग्निर्न चीयेतैतेनैवा-

स्य ह्रूपेण सक्थ्नमेषु जगतीः संचितो भवति ॥ ८॥ तानि वाऽएतानि । सप्त छन्दाꣳसि चतुरुत्तराण्यन्योऽन्यस्मिन्प्रतिष्ठितानि सप्तेमे पुरुषे प्राणा अन्योऽन्यस्मिन्प्रतिष्ठितास्तद्यावत्तमेवंविच्छन्दसां गणमन्वाह छन्दसश्छन्दसो ह्रैवास्य सोऽनूक्तो भवति स्तुतो वा शस्तो वोपहितो वा ॥ १॥ ब्राह्मणम् ॥ ३ [३. १.] ॥ ॥

तदाहुः । किं छन्दः का देवताग्नेः शिर इति गायत्री छन्दोऽग्निर्देवता शिरः ॥ १॥ किं छन्दः । का देवता ग्रीवा इत्युष्णिक्छन्दः सविता देवता ग्रीवाः ॥ २॥ किं छन्दः । का देवतानूकमिति बृहती छन्दो बृहस्पतिर्देवतानूकम् ॥ ३॥ किं छन्दः । का देवता पक्षाविति बृहद्रथन्तरे छन्दो द्यावापृथिवी देवते पक्षौ ॥ ४॥ किं छन्दः । का देवता मध्यमिति त्रिष्टुप्छन्द इन्द्रो देवता मध्यम् ॥ ५॥ किं छन्दः । का देवता श्रोणी इति जगती छन्द आदित्यो देवता श्रोणी ॥ ६॥ किं छन्दः । का देवता यस्मादिदं प्राणादेतः सिच्यतऽइत्यतिछन्दाश्छन्दः प्रजापतिर्देवता ॥ ७॥ किं छन्दः । का देवता योऽयमवाङ् प्राण इति यज्ञायज्ञियं छन्दो वैश्वानरो देवता ॥ ८॥ किं छन्दः । का देवतोद्वऽइत्यनुष्टुप्छन्दो विश्वे देवा देवतोद्व ॥ ९॥ किं छन्दः । का देवताष्ठीवत्ताविति पङ्क्तिश्छन्दो मरुतो देवताष्ठीवत्तौ ॥ १०॥ किं छन्दः । का देवता प्रतिष्ठऽइति द्विपदा छन्दो विष्णुर्देवता प्रतिष्ठ ॥ ११॥ किं छन्दः । का देवता प्राणा इति विछन्दाश्छन्दो वायुर्देवता प्राणाः ॥ १२॥ किं छन्दः । का देवतोनातिरिक्तानीति न्यूनाक्षरा छन्द आपो देवतोनातिरिक्तानि सैषात्मविद्यैवैतन्मयो ह्रैवैता देवता एतमात्मानमभिसम्भवति न ह्रात्रान्या लोक्यताया आशीरस्ति ॥ १३॥ ब्राह्मणम् ॥ ४ [३. २.] ॥ ॥

धीरो ह शातपर्णेयः । महाशालं जाबालमुपोत्ससाद तꣳ होवाच किं मा विद्वानुपोदसद इत्यग्निं वेदेति कमग्निं वेत्थेति वाचमिति यस्तमग्निं वेद किꣳ स भवतीति वाग्मी भवतीति होवाच नैनं वाग्जहातीति ॥ १॥ वेत्थाग्निमिति होFFF FF*

वाच । किमेव मा विद्वानुपोदसद इत्यग्निं वेदेति कमग्निं वेत्थेति चक्षुरिति यस्तमग्निं वेद किꣳ स भवतीति चक्षुष्मान्भवतीति होवाच नैनं चक्षुर्जहातीति ॥ २ ॥ वेत्थाग्निमिति होवाच । किमेव मा विद्वानुपोदसद इत्यग्निं वेदेति कमग्निं वेत्थेति मन इति यस्तमग्निं वेद किꣳ स भवतीति मनस्वी भवतीति होवाच नैनं मनो जहातीति ॥ ३ ॥ वेत्थाग्निमिति होवाच । किमेव मा विद्वानुपोदसद इत्यग्निं वेदेति कमग्निं वेत्थेति श्रोत्रमिति यस्तमग्निं वेद किꣳ स भवतीति श्रोत्रवान्भवतीति होवाच नैनꣳ श्रोत्र जहातीति ॥ ४ ॥ वेत्थाग्निमिति होवाच । किमेव मा विद्वानुपोदसद इत्यग्निं वेदेति कमग्निं वेत्थेति य एतत्सर्वमग्निस्तं वेदेति तस्मिन्होक्तꣳ उपावरुरोकाधीहि भोस्तमग्निमिति ॥ ५ ॥ स होवाच । प्राणो वाव सोऽग्निर्यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं मनः प्राणꣳ श्रोत्रं यदा प्रबुध्यते प्राणादेवाधि पुनर्जायत्ताऽइत्यध्यात्मम् ॥ ६ ॥ अथाधिदैवतम् । या वै सा वागग्निरेव स यत्तच्चक्षुरसौ स आदित्यो यत्तन्मन एष स चन्द्रमा यत्तच्छ्रोत्रं दिश एव तदथ यः स प्राणोऽयमेव स वायुर्योऽयं पवते ॥ ७ ॥ यदा वाऽअग्निरनुगच्छति । वायुं तर्ह्यनूद्धाति तस्मादिनमुदवासीदित्याहुर्वायुꣳ ह्यनूद्धाति यदादित्योऽस्तमेति वायुं तर्हि प्रविशति वायुं चन्द्रमा वायौ दिशः प्रतिष्ठिता वायोरेवाधि पुनर्जायत्ते स यदेवंविदस्माल्लोकात्प्रैति वाचैवाग्निमप्येति चक्षुषादित्यं मनसा चन्द्रꣳ श्रोत्रेण दिशः प्राणेन वायुꣳ स एतन्मय एव भूत्वेतासां देवतानां यां-यां कामयते सा भूत्वेलयति ॥ ८ ॥ ब्राह्मणम् ॥ ५ [३. ३.] ॥

श्वेतकेतुर्हारुणेयः । यद्यमाण आस तꣳ ह पितोवाच कानृत्विजोऽवृथा इति स होवाचायं न्वेव मे वैश्यावसव्यो होतेति तꣳ ह पप्रच्छ वेत्थ ब्राह्मण वैश्यावसव्य ॥ १ ॥ चत्वारि महान्तीꣳ इति । वेद भोꣳ इति होवाच वेत्थ चत्वारि महतां महान्तीꣳ इति वेद भोꣳ इति होवोच वेत्थ चत्वारि व्रतानीꣳ इति वेद

भो३ऽइति होवाच वेत्थ चत्वारि व्रतानां व्रतानी३ऽइति वेद भो३ऽइति होवाच वेत्थ चत्वारि क्यानी३ऽइति वेद भो३ऽइति होवाच वेत्थ चत्वारि क्यानां क्यानी३ऽइति वेद भो३ऽइति होवाच वेत्थ चतुरोऽर्का३निति वेद भो३ऽइति होवाच वेत्थ चतुरोऽर्काणामर्का३निति वेद भो३ऽइति होवाच ॥२॥ वेत्थार्कमिति । अथ वै नो भवान्वक्ष्यतीति वेत्थार्कपर्णेऽइत्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कपुष्पेऽइत्यथ वै नो भवान्वक्ष्यतीति वेत्थार्ककोश्यावित्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कसमुद्गावित्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कधाना इत्यथ वै नो भवान्वक्ष्यतीति वेत्थार्काष्ठीलामित्यथ वै नो भवान्वक्ष्यतीति वेत्थार्कमूलमित्यथ वै नो भवान्वक्ष्यतीति ॥३॥ स ह वै यत्तदुवाच । वेत्थ चत्वारि महान्ति वेत्थ चत्वारि महतां महान्तीत्यग्निर्महांस्तस्य महतो महदोषधयश्च वनस्पतयश्च तद्ध्यस्यान्नं वायुर्महांस्तस्य महतो महदापस्तद्ध्यस्यान्नमादित्यो महांस्तस्य महतो महच्चन्द्रमास्तद्ध्यस्यान्नं पुरुषो महांस्तस्य महतो महत्पशवस्तद्ध्यस्यान्नमेतान्येव चत्वारि महान्त्येतानि चत्वारि महतां महान्त्येतान्येव चत्वारि व्रतान्येतानि चत्वारि व्रतानां व्रतान्येतान्येव चत्वारि क्यान्येतानि चत्वारि क्यानां क्यान्येतऽएव चत्वारोऽर्का एते चत्वारोऽर्काणामर्काः ॥४॥ अथ ह वै यत्तदुवाच । वेत्थार्कमिति पुरुषꣳ हैव तदुवाच । वेत्थार्कपर्णेऽइति कर्णौ हैव तदुवाच वेत्थार्कपुष्पेऽइत्यक्षिणी हैव तदुवाच वेत्थार्ककोश्याविति नासिके हैव तदुवाच वेत्थार्कसमुद्गावित्योष्ठौ हैव तदुवाच वेत्थार्कधाना इति दन्तान्हैव तदुवाच वेत्थार्काष्ठीलामिति जिह्वाꣳ हैव तदुवाच वेत्थार्कमूलमित्यन्नꣳ हैव तदुवाच स एषोऽग्निर्को यत्पुरुषः स यो हैतमेवमग्निमर्कं पुरुषमुपास्तेऽयमहमग्निरर्कोऽस्मीति विद्यया हैवास्यैष आत्मन्नग्निरर्कश्चितो भवति ॥५॥ ब्राह्मणम् ॥६ [३.४.] ॥॥

अयं वाव यजुर्योऽयं पवते । एष हि यन्नेवेदꣳ सर्वं जनयत्येतं यत्तमिद्मनु

प्रज्ञायते तस्माद्वायुरेव यजुः ॥१॥ अयमेवाकाशो ब्रह्म । यदिदमन्तरिक्षमेतꣳ क्वाकाशमनु ज्ञवते तदेतद्यजुर्वायुश्चान्तरिक्षं च यच्च ब्रह्म च तस्माद्यजुरेष एव यदेष क्वेति तदेतद्यजुर्ऋक्सामयोः प्रतिष्ठितमृक्सामे वक्तस्तस्मात्समानैरेवाध्वर्यवैः कर्म करोत्यन्यान्यन्यानि स्तुतशस्त्राणि भवन्ति यथा पूर्वाभ्याꣳ स्यन्द्वापराभ्यां धावयेत्तादृक्तत् ॥२॥ अग्निरेव पुरः । अग्निꣳ हि पुरस्कृत्येमाः प्रजा उपासतऽआदित्य एव चरणं यदा क्वेवैष उदेत्यथेदꣳ सर्वं चरति तदेतद्यजुः सपुरश्चरणमधिदेवतम् ॥३॥ अथाध्यात्मम् । प्राण एव यजुः प्राणो हि यन्नवेदꣳ सर्वं ज्ञनयति प्राणं यन्तमिदमनु प्रज्ञायते तस्मात्प्राण एव यजुः ॥४॥ अयमेवाकाशो ब्रह्म । योऽयमन्तरात्मन्नाकाश एतꣳ क्वाकाशमनु ज्ञवते तदेतद्यजुः प्राणश्चाकाशश्च यच्च ब्रह्म च तस्माद्यजुः प्राण एव यत्प्राणो क्वेति ॥५॥ ॥ शतम्५३०० ॥ ॥ अन्नमेव यजुः । अन्नेन हि ज्ञायतेऽन्नेन ज्ञवते तदेतद्यजुरन्ने प्रतिष्ठितमन्नं वक्ति तस्मात्समानऽएव प्राणेऽन्यदन्यदन्नं धीयते ॥६॥ मन एव पुरः । मनो हि प्रथमं प्राणानां चक्षुरेव चरणं चक्षुषा क्वयमात्मा चरति तदेतद्यजुः सपुरश्चरणमधिदेवतं चाध्यात्मं च प्रतिष्ठितꣳ स यो कैतदेवं यजुः सपुरश्चरणमधिदेवतं चाध्यात्मं च प्रतिष्ठितं वेद ॥७॥ अरिष्टो कैवानार्तः । स्वस्ति यज्ञस्योदृचमश्नुते स्वानाꣳ श्रेष्ठः पुरएता भवत्यन्नादोऽधिपतिर्य एवं वेद ॥८॥ य ऽ कैवंविदꣳ । स्वेषु प्रतिप्रतिर्बुभूषति न कैवालं भार्येभ्यो भवत्यथ य एवैतमनुभवति यो वै तमनु भार्यान्बुभूषति स कैवालं भार्येभ्यो भवति ॥९॥ तदेतज्ज्येष्ठं ब्रह्म । न क्वेतस्मात्किं चन ज्यायोऽस्ति ज्येष्ठो ह वै श्रेष्ठः स्वानां भवति य एवं वेद ॥१०॥ तदेतद्ब्रह्मापूर्वमपरवत् । स यो कैतदेवं ब्रह्मापूर्वमपरवद्वेद न ह्यस्मात्कश्चन श्रेयान्ममानेषु भवति श्रेयाꣳसः-श्रेयाꣳसो कैवास्मादपरपुरुषा ज्ञायन्ते तस्माद्योऽस्माज्ज्यायान्त्स्यादिशोऽस्मात्पूर्वा इत्युपासीत तथो कैनं न क्षिनस्ति ॥११॥ तस्य वाऽएतस्य यजुषः । रस

एवोपनिषत्तस्माद्यावन्मात्रेण यजुषाधर्युर्ग्रहं गृह्णाति स उभे स्तुतशस्त्रेऽअनुविभवत्युभे स्तुतशस्त्रेऽअनुव्यश्नुते तस्माद्यावन्मात्र-इवान्नस्य रसः सर्वमन्नमवति सर्वमन्नमनुव्येति ॥ १२ ॥ तृप्तिरेवास्य गतिः । तस्माद्यदान्नस्य तृप्यत्यथ स गत-इव मन्यतऽआनन्द एवास्य विज्ञानमात्मानन्दात्मानो ह्येव सर्वे देवाः सा ह्येषैव देवानामद्धाविद्या स ह स न मनुष्यो य एवंविद्देवानाꣳ ह्येव स एकः ॥ १३ ॥ एतद्ध स्म वै तद्विद्वान्प्रियव्रतो रौहिणायन आह । वायुं वान्तमानन्दस्तऽआत्मेतो वा वाहीतो वेति स ह स्म तथैव वाति तस्माद्यां देवेष्वाशिषमिच्छेद्तेनैवोपतिष्ठतानन्दो व आत्मासौ मे कामः स मे समृध्यतामिति सꣳ ह्येवास्मै स काम ऋध्यते यत्कामो भवत्येताꣳ ह वै तृप्तिमेतां गतिमेतमानन्दमेतमात्मानमभिसम्भवति य एवं वेद ॥ १४ ॥ तदेतदृग्यजुरुपाꣳश्वनिरुक्तम् । प्राणो वै यजुरुपाꣳश्वायतनो वै प्राणस्तस्य एनं निर्ब्रुवन्तं ब्रूयादनिरुक्तां देवतां निरवोचत्प्राण एनꣳ हास्यतीति तथा ह्येव स्यात् ॥ १५ ॥ तस्य ह यो निरुक्तमाविर्भावं वेद । आविर्भवति कीर्त्या यशसोपाꣳशु यजुषाधर्युर्ग्रहं गृह्णाति गृहीतः सन्न आविर्भवत्युपाꣳशु यजुषाग्निं चिनोति चितः संचित आविर्भवत्युपाꣳशु यजुषा हविर्निर्वपति शृतं निष्ठितमाविर्भवत्येवं यत्किं चोपाꣳशु करोति कृतं निष्ठितमाविर्भवति तस्य ह य एतमेवं निरुक्तमाविर्भावं वेदाविर्भवति कीर्त्या यशसा ब्रह्मवर्चसेन क्षिप्रꣳ ह्येवाविदं गच्छति स ह यजुरेव भवति यजुषैनमाचक्षते ॥ १६ ॥ ब्राह्मणम् ॥ ६ [३. ५.] ॥ तृतीयोऽध्यायः [६३.] ॥ ॥

प्रजापतिं विस्रस्तम् । यत्र देवाः समस्कुर्वंस्तमुखायां योनौ रेतो भूतमसिञ्चन्योनिर्वाऽउखा तस्माऽएतत्संवत्सरेऽन्नꣳ समस्कुर्वन्योऽयमग्निश्चितस्तदात्मना पर्यदधुस्तदात्मना परिहितमात्मैवाभवत्तस्माद्यन्नमात्मना परिहितमात्मैव भवति ॥ १ ॥ तथैवैतद्यजमानः । आत्मानमुखायां योनौ रेतो भूतꣳ सिञ्चति योनिर्वा

ऽउखा तस्माऽएतत्सवत्सरेऽन्नꣳ संस्करोति योऽयमग्निश्चितस्तदात्मना परिदधाति तदात्मना परिक्षितमात्मैव भवति तस्मादन्नमात्मना परिक्षितमात्मैव भवति ॥२॥ तं निदधाति । वौषडिति वौगिति वाऽएष षडितीदꣳ षट्क्षितिकमन्नं कृत्वास्माऽअपिदधात्यात्मसंमितं यदु वाऽआत्मसंमितमन्नं तदवति तन्न क्षिनस्ति यद्ध्रुयो क्षिनस्ति तद्यत्कनीयो न तदवति ॥३॥ स एष एवार्कः । यमेतमत्राग्निमाक्षरन्ति तस्यैतदन्नं क्यं योऽयमग्निश्चितस्तदर्क्यं यन्नुष्ट एष एव महांस्तस्यैतदन्नं व्रतं तन्महाव्रतꣳ सामत एष ऽएवोक्तस्यैतदन्नं यं तदुक्थमृक्तस्तदेतदेकꣳ सत्त्रेधाख्यायते ॥४॥ अथेन्द्राग्नी वाऽअसृज्येताम् । ब्रह्म च क्षत्रं चाग्निरेव ब्रह्मेन्द्रः क्षत्रं तौ सृष्टौ नानैवास्तां तावब्रूतां न वाऽइत्थꣳ सत्तौ शक्ष्यावः प्रजाः प्रजनयितुमेकꣳ रूपमुभावसावेति तावेकꣳ रूपमुभावभवताम् ॥५॥ तौ यौ तावेन्द्राग्नी । एतौ तौ रुक्मश्च पुरुषश्च रुक्म एवेन्द्रः पुरुषोऽग्निस्तौ हिरण्मयौ भवतो ज्योतिर्वै हिरण्यं ज्योतिरिन्द्राग्नीऽअमृतꣳ हिरण्यममृतमिन्द्राग्नी ॥६॥ तावेतावेन्द्राग्नीऽएव चिन्वन्ति । यद्धि किं चैष्टकमग्निरेव तत्तस्मात्तदग्निना पचन्ति यद्धि किं चाग्निना पचत्यग्निरेव तदथ यत्पुरीषꣳ स इन्द्रस्तस्मात्तदग्निना न पचन्ति नेदग्निरेवासन्नेन्द्र इति तस्मादेतावेन्द्राग्नीऽएव चितौ ॥७॥ अथ यश्चितेऽग्निर्निधीयते । तदेकꣳ रूपमुभौ भवतस्तस्मात्तावेतेनैव रूपेणेमाः प्रजाः प्रजनयतः सैषैकैवेष्टकाग्निरेव तामेष सर्वोऽग्निरभिसम्पद्यते सैवेष्टकासम्पत्तदेतदेकमेवाक्षरं वौगिति तदेष सर्वोऽग्निरभिसम्पद्यते सैवाक्षरसम्पत् ॥८॥ तद्धैतत्पश्यन्नृषिरभ्यनूवाद । भूतं भविष्यत्प्रस्तौमि महद्ब्रह्मैकमक्षरं बहु ब्रह्मैकमक्षरमित्येतद्धैवाक्षरꣳ सर्वे देवाः सर्वाणि भूतान्यभिसम्पद्यन्ते तदेतद्ब्रह्म च क्षत्रं चाग्निरेव ब्रह्मेन्द्रः क्षत्रमिन्द्राग्नी वै विश्वे देवा विडु विश्वे देवास्तदेतद्ब्रह्म क्षत्रं विट् ॥९॥ एतद्ध स्म वै तद्विद्वाञ्छ्यापर्णाः सायकायन आह । यद्वै मऽइदं कर्म समाप्स्यत मेव प्रजा

सल्वानाꣳ राज्ञानोऽभविष्यन्मम ब्राह्मणा मम वैश्या यत्तु मऽएतावत्कर्मणः समापि तेन मऽउभयथा सल्वान्प्रज्ञातिरेक्ष्यतऽइति स एष एव श्रीरेष यश एषोऽन्नादः ॥१०॥ एतद्ध वै तद्वाणिऽउल्यः । वामकक्षायणाय प्रोच्योवाच श्रीमान्यशस्व्यन्नादो भविष्यसीति श्रीमान्ह वै यशस्व्यन्नादो भवति य एवं वेद ॥११॥ स एषोऽग्निः प्रजापतिरेव । ते देवा एतमग्निं प्रजापतिꣳ संस्कृत्याथास्माऽएतत्संवत्सरेऽन्नꣳ समस्कुर्वन्य एष महाव्रतीयोऽग्रहः ॥१२॥ तमध्वर्युर्ग्रहेण गृह्णाति । यद्गृह्णाति तस्माद्ग्रहस्तस्मिन्नुद्गाता महाव्रतेन रसं दधाति सर्वाणि ह्येतानि सामानि यन्महाव्रतं तदस्मिन्त्सर्वैः सामभी रसं दधाति तस्मिन्होता महानाम्न्येन रसं दधाति सर्वा ह्येता ऋचो यन्महानाम्न्यं तदस्मिन्त्सर्वाभिर्ऋग्भी रसं दधाति ॥१३॥ ते यदा स्तुवते यदानुशꣳसति । अथास्मिन्नेतं वषट्कृते जुह्वोति वौगिति वाऽएष षडितीदꣳ षड्विधमन्नं कृत्वास्माऽअपिदधात्यात्मसंमितं यद्ध वाऽआत्मसंमितमन्नं तद्वति तन्न क्षिनस्ति यद्भूयो क्षिनस्ति तथ्यत्कनीयो न तद्वति ॥१४॥ स एष एवार्कः । योऽयमग्निश्चितस्तस्यैतदन्नं क्यमेष महाव्रतीयो ग्रहस्तदर्क्यं यजुष्ट एष एव महांस्तस्यैतदन्नं व्रतं तन्महाव्रतꣳ सामत एष ऽएवोक्तदन्नं थं तद्वक्थमुक्तस्तदेतदेकꣳ सन्त्रेधाख्यायते ॥१५॥ स एष संवत्सरः प्रजापतिरग्निः । तस्यार्धमेव सावित्राण्यर्धं वैश्वकर्मणान्यष्टावेवास्य कलाः सावित्राण्यष्टौ वैश्वकर्मणान्यथ यदेतदुत्तरेण कर्म क्रियते स एव सप्तदशः प्रजापतिर्यो वै कला मनुष्याणामक्षरं तद्देवानाम् ॥१६॥ तद्वै लोमेति द्वेऽअक्षरे । त्वगिति द्वेऽअसृगिति द्वे मेद इति द्वे माꣳसमिति द्वे स्नावेति द्वेऽअस्थीति द्वे मज्जेति द्वे ताः षोडश कला अथ य एतदुत्तरेण प्राणः संचरति स एव सप्तदशः प्रजापतिः ॥१७॥ तस्माऽएतस्मै प्राणाय । एताः षोडश कला अन्नमभिक्षरन्ति ता यदानभिक्षर्तुं ध्रियन्तेऽथैता एव जग्धोत्क्रामति तस्माद्व ह्येतदशिशिषतस्तृप्तमिव भवति प्राणैरश्यमानस्य तस्माद्व

केतुरुपतापी कृश इव भवति प्राणैर्हि ऋग्घो भवति ॥१८॥ तस्माऽएतस्मै सप्तदशाय प्रजापतये । एतत्सप्तदशमन्नꣳ समस्कुर्वन्य एष सौम्योऽध्वरोऽथ या अस्य ताः षोडश कला एते ते षोडशऽर्विन्नस्तस्मान्न सप्तदशमृत्विजं कुर्वीत नेदतिरेचयानीत्यथ य एवात्र रसो या आकृतयो ह्रूयन्त तदेव सप्तदशमन्नम् ॥१९॥ ते यदा स्तुवते यदानुशꣳसति । अथास्मिन्नेतं वषट्कृते जुह्वति वौगिति वाऽएष षडितीदꣳ षड्विधमन्नं कृत्वास्माऽआपिदधात्यात्मसंमितं यदु वाऽआत्मसंमितमन्नं तदवति तन्न क्षिनस्ति यद्बह्वो क्षिनस्ति तन्यत्कनीयो न तदवति ॥२०॥ स एष एवार्कः । योऽयमग्निश्चितस्तस्यैतदन्नं क्यमेष सौम्योऽध्वरस्तदर्क्यं यजुष्ट एष एव महांस्तस्यैतदन्नं व्रतं तन्महाव्रतꣳ सामत एष उऽएवोक्तस्यैतदन्नं थं तदुक्थमुक्तस्तदेतदेकꣳ सत्त्रेधाख्यायते स एतेनान्नेन सह्रोर्ध्व उदक्रामत्स यः स उदक्रामदसौ स आदित्योऽथ येन तेनान्नेन सह्रोदक्रामदेष स चन्द्रमाः ॥२१॥ स एष एवार्को य एष तपति । तस्यैतदन्नं क्यमेष चन्द्रमास्तदर्क्यं यजुष्ट एष एव महांस्तस्यैतदन्नं व्रतं तन्महाव्रतꣳ सामत एष उऽएवोक्तस्यैतदन्नं थं तदुक्थमुक्तस्तदेतदेकꣳ सत्त्रेधाख्यायतऽइत्यधिदैवतम् ॥२२॥ अथाध्यात्मम् । प्राणो वाऽअर्कस्तस्यान्नमेव क्यं तदर्क्यं यजुष्टः प्राण एव महांस्तस्यान्नमेव व्रतं तन्महाव्रतꣳ सामतः प्राण उऽएवोक्तस्यान्नमेव थं तदुक्थमुक्तस्तदेतदेकꣳ सत्त्रधाख्यायते स एष एवैषोऽधिदैवतमयमध्यात्मम् ॥२३॥ ब्राह्मणम् ॥७ [४. १.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या१०१ ॥ ॥

संवत्सरो वै प्रजापतिरग्निः । सोमो राजा चन्द्रमाः स ह स्वयमेवात्मानं प्रोचे यज्ञवचसे राजस्तम्बायनाय यावन्ति वाव मे ज्योतीꣳषि तावत्यो मऽइष्टका इति ॥१॥ तस्य वाऽएतस्य संवत्सरस्य प्रजापतेः । तन्न च शतानि विꣳशतिश्चाहोरात्राणि ज्योतीꣳषि ता इष्टकाः षष्टिश्च त्रीणि च शतानि परिश्रितः षष्टिश्च

त्रीणि च शतानि यज्ञुष्मत्यः सोऽयꣳ संवत्सरः प्रजापतिः सर्वाणि भूतानि ससृते यच्च प्राणि यच्चाप्राणमुभयान्देवमनुष्यान्त्स सर्वाणि भूतानि सृष्ट्वा रिरिचान इव मेने स मृत्योर्बिभयां चकार ॥२॥ स ईक्षां चक्रे । कथं न्वहमिमानि सर्वाणि भूतानि पुनरात्मन्नावपेय पुनरात्मन्दधीय कथं न्वहमेवैषाꣳ सर्वेषां भूतानां पुनरात्मा स्यामिति ॥३॥ स द्वेधात्मानं व्यौहत् । षष्टिꣳ च त्रीणि च शतान्यन्यतरस्येष्टका अभवन्नेवमन्यतरस्य स न व्याप्नोत् ॥४॥ त्रीनात्मनोऽकुरुत । तिस्रस्तिस्रोऽशीतय एकैकस्येष्टका अभवन्त्स नैव व्याप्नोत् ॥५॥ चतुर आत्मनोऽकुरुत । अशीतिशतेष्टकान्त्स नैव व्याप्नोत् ॥६॥ पञ्चात्मनोऽकुरुत । चतुश्चत्वारिꣳशꣳ शतमेकैकस्येष्टका अभवन्त्स नैव व्याप्नोत् ॥७॥ षडात्मनोऽकुरुत । विꣳशतिशतेष्टकान्त्स नैव व्याप्नोन्न सप्तधा व्यभवत् ॥८॥ अष्टावात्मनोऽकुरुत । नवतीष्टकान्त्स नैव व्याप्नोत् ॥९॥ नवात्मनोऽकुरुत । अशीतीष्टकान्त्स नैव व्याप्नोत् ॥१०॥ दशात्मनोऽकुरुत । द्वासप्ततीष्टकान्त्स नैव व्याप्नोन्नैकादशधा व्यभवत् ॥११॥ द्वादशात्मनोऽकुरुत । षष्टीष्टकान्त्स नैव व्याप्नोन्न त्रयोदशधा व्यभवन्न चतुर्दशधा ॥१२॥ पञ्चदशात्मनोऽकुरुत । अष्टाचत्वारिꣳशदिष्टकान्त्स नैव व्याप्नोत् ॥१३॥ षोडशात्मनोऽकुरुत । पञ्चचत्वारिꣳशदिष्टकान्त्स नैव व्याप्नोन्न सप्तदशधा व्यभवत् ॥१४॥ अष्टादशात्मनोऽकुरुत । चत्वारिꣳशदिष्टकान्त्स नैव व्याप्नोन्नैकां-न-विꣳशतिधा व्यभवत् ॥१५॥ विꣳशतिमात्मनोऽकुरुत । षट्त्रिꣳशदिष्टकान्त्स नैव व्याप्नोन्नैकविꣳशतिधा व्यभवन्न द्वाविꣳशतिधा न त्रयोविꣳशतिधा ॥१६॥ चतुर्विꣳशतिमात्मनोऽकुरुत । त्रिꣳशदिष्टकान्त्सोऽत्रातिष्ठत पञ्चदशे व्यूहे तद्यत्पञ्चदशे व्यूहेऽतिष्ठत तस्मात्पञ्चदशापूर्यमाणस्य रूपाणि पञ्चदशापक्षीयमाणस्य ॥१७॥ अथ यच्चतुर्विꣳशतिमात्मनोऽकुरुत । तस्माच्चतुर्विꣳशत्यर्धमासः संवत्सरः स एतैश्चतुर्विꣳशत्या त्रिꣳशदिष्टकैरात्मभिर्न व्यभवत्स पञ्चदशाङ्को रूपा-

ण्यपश्यदात्मनस्तन्वो मुहूर्तांल्लोकम्पृणाः पञ्चदशैव रात्रिस्तद्यन्मुहु त्रायन्ते तस्मान्मुहूर्ता अथ यत्क्षुद्राः सन्त इमांल्लोकानापूरयन्ति तस्माल्लोकम्पृणाः ॥१८॥ एष वाऽइदꣳ सर्वं पचति । अहोरात्रैरर्धमासैर्मासैर्ऋतुभिः संवत्सरेण तदमुना पक्तमयं पचति पक्तस्य पक्तेति ह स्माह भारद्वाजोऽग्निममुना हि पक्तमयं पचतीति ॥१९॥ नानि संवत्सरे । दश च सहस्राण्यष्टौ च शतानि समपद्यन्त सोऽत्रातिष्ठत दशसु च सहस्रेष्वष्टासु च शतेषु ॥२०॥ अथ सर्वाणि भूतानि पर्यैक्षत् । स त्रय्यामेव विद्यायाꣳ सर्वाणि भूतान्यपश्यदत्र हि सर्वेषां छन्दसामात्मा सर्वेषाꣳ स्तोमानाꣳ सर्वेषां प्राणानाꣳ सर्वेषां देवानामितद्वाऽअस्त्येतद्धामृतं यद्धामृतं तद्धास्त्येतदु तद्यन्मर्त्यम् ॥२१॥ स ऐक्षत प्रजापतिः । त्रय्यां वाव विद्यायाꣳ सर्वाणि भूतानि हन्त त्रयीमेव विद्यामात्मानमभिसंस्करवाऽइति ॥२२॥ स ऋचो व्यौहत् । द्वादश बृहतीसहस्राण्येतावत्यो हऽर्चो याः प्रजापतिसृष्टास्ताꣳस्त्रिꣳशत्तमे व्यूहे पङ्क्तिष्वतिष्ठन्त ता यत्त्रिꣳशत्तमे व्यूहेऽतिष्ठन्त तस्मात्त्रिꣳशन्मासस्य रात्रयोऽथ यत्पङ्क्तिषु तस्मात्पाङ्क्तः प्रजापतिस्ता अष्टाशतꣳ शतानि पङ्क्तयोऽभवन् ॥२३॥ अथेतरौ वेदौ व्यौहत् । द्वादशैव बृहतीसहस्राण्यष्टौ यजुषां चत्वारि साम्नामेतावद्वैतयोर्वेदयोर्यत्प्रजापतिसृष्टं तौ त्रिꣳशत्तमे व्यूहे पङ्क्तिष्वतिष्ठेतां तौ यत्त्रिꣳशत्तमे व्यूहेऽतिष्ठेतां तस्मात्त्रिꣳशन्मासस्य रात्रयोऽथ यत्पङ्क्तिषु तस्मात्पाङ्क्तः प्रजापतिस्ता अष्टाशतमेव शतानि पङ्क्तयोऽभवन् ॥२४॥ ते सर्वे त्रयो वेदाः । दश च सहस्राण्यष्टौ च शतान्यशीतीनामभवन्त्स मुहूर्तेन-मुहूर्तेनाशीतिमाप्नोन्मुहूर्तेन-मुहूर्तेनाशीतिः समपद्यत ॥२५॥ स एषु त्रिषु लोकेषूखायाम् । योनौ रेतो भूतमात्मानमसिञ्चच्छन्दोमयꣳ स्तोममयं प्राणमयं देवतामयं तस्यार्धमासे प्रथम आत्मा समस्क्रियत द्वितीयसि परो द्वितीयसि परः संवत्सरऽएव सर्व कृत्स्नः समस्क्रियत ॥२६॥ तद्यत्परिश्रितमुपाधत्त । तद्रात्रिमुपाधत्त तदनु पञ्चदश मुहूर्तान्मुहूर्तानन्नु

पञ्चदशाशीतीरथ यज्ञुष्मतीमुपाधत्त तदुरुपाधत्त तदनु पञ्चदश मुहूर्तान्मुहूर्ता-ननु पञ्चदशाशीतीरेवमेतां त्रयीं विद्यामात्मन्नावपतात्मन्नकुरुत सोऽत्रैव सर्वे-षां भूतानामात्माभवच्छन्दोमय स्तोममयः प्राणमयो देवतामयः स एतन्मय एव भूर्वोर्ध उदक्रामत्स यः स उदक्रामदेष स चन्द्रमाः ॥२७॥ तस्यैषा प्रतिष्ठा । य एष तपत्येतस्मादेवाध्यचीयतैतस्मिन्नध्यचीयतात्मन एवैनं तन्निरमिमीतात्मनः प्रा-जनयत् ॥२८॥ स यदग्निं चेष्यमाणो दीक्षते । यथैव तत्प्रजापतिरेषु त्रिषु लोके-ष्वूखायां योनौ रेतो भूतमात्मानमसिञ्चदेवमेवैष एतदात्मानमुखायां योनौ रेतो भूतꣳ सिञ्चति छन्दोमयꣳ स्तोममयं प्राणमयं देवतामयं तस्यार्धमासे प्रथम आत्मा संस्क्रियते द्वीयसि परो द्वीयसि परः संवत्सरऽएव सर्वः कृत्स्नः संस्क्रियते ॥२९॥ तद्यत्यरिश्रितमुपधत्ते । तद्रात्रिमुपधत्ते तदनु पञ्चदश मुहूर्तान्मुहूर्तानन्नु पञ्चदशाशीतीरथ यज्ञुष्मतीमुपधत्ते तदुरुपधत्ते तदनु पञ्चदश मुहूर्तान्मुहूर्ता-ननु पञ्चदशाशीतीरेवमेतां त्रयीं विद्यामात्मन्नावपतऽआत्मन्कुरुते सोऽत्रैव स-र्वेषां भूतानामात्मा भवति छन्दोमय स्तोममयः प्राणमयो देवतामयः स एतन्मय एव भूर्वोर्ध उत्क्रामति ॥३०॥ तस्यैषा प्रतिष्ठा । य एष तपत्येतस्माद्वेवाधिची-यतऽएतस्मिन्नधिचीयतऽआत्मन एवैनं तन्निर्मितीतऽआत्मनः प्रजनयति स यदै-वंविदस्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवति छन्दोमयꣳ स्तोममयं प्राणमयं देवतामयꣳ स एतन्मय एव भूर्वोर्ध उत्क्रामति य एवं विद्वानेतत्कर्म कुरुते यो वैतदेवं वेद ॥३१॥ ब्राह्मणम् ॥ १ [४. २.] ॥ ॥

एष वै मृत्युर्यत्संवत्सरः । एष हि मर्त्यानामहोरात्राभ्यामायुः क्षिणोत्यथ म्रि-यन्ते तस्मादेष एव मृत्युः स यो हैतं मृत्युꣳ संवत्सरं वेद न ह्यस्यैष पुरा जर-सोऽहोरात्राभ्यामायुः क्षिणोति सर्वꣳ ह्येवायुरेति ॥१॥ एष उऽएवान्तकः । एष हि मर्त्यानामहोरात्राभ्यामायुषोऽन्तं गच्छत्यथ म्रियन्ते तस्मादेष एवान्तकः स यो

क्षैतमन्तकं मृत्युꣳ संवत्सरं वेद न ह्यस्येष पुरा जरसोऽहोरात्राभ्यामायुषोऽन्तं गच्छति सर्वꣳ ह्येवायुरेति ॥२॥ ते देवाः । एतस्मादन्तकान्मृत्योः संवत्सरात्प्रजापतेर्बिभयां चक्रुर्यद्वै नोऽयमहोरात्राभ्यामायुषोऽन्तं न गच्छेदिति ॥३॥ तऽएतान्यज्ञक्रतूꣳस्तेनिरे । अग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुबन्धꣳ सौम्यमध्वरं त ऽएतैर्यज्ञक्रतुभिर्यजमाना नामृतत्वमानशिरे ॥४॥ ते ह्याप्यग्निं चिक्यिरे । तेऽपरिमिता एव परिश्रित ऽउपदधुरपरिमिता यजुष्मतीरपरिमिता लोकम्पृणा यथेदमप्येतर्ह्येकऽउपदधतीति देवा अकुर्वन्निति ते ह नैवामृतत्वमानशिरे ॥५॥ तेऽर्चन्तः श्राम्यन्तश्चेरुः । अमृतत्वमवरुरुत्समानास्तान्ह प्रजापतिरुवाच न वै मे सर्वाणि रूपाण्युपधत्थाति वैव रेचयथ न वाभ्यापयथ तस्मान्नामृता भवथेति ॥६॥ ते होचुः । तेभ्यो वै नस्त्वमेव तद्ब्रूहि यथा ते सर्वाणि रूपाण्युपदधामेति ॥७॥ स होवाच । षष्टिं च त्रीणि च शतानि परिश्रित ऽउपधत्त षष्टिं च त्रीणि च शतानि यजुष्मतीरधि षट्त्रिꣳशतमथ लोकम्पृणा दश च सहस्राण्यष्टौ च शतान्युपधत्ताथ मे सर्वाणि रूपाण्युपधास्यथाथामृता भविष्यथेति ते ह तथा देवा ऽउपदधुस्ततो देवा अमृता आसुः ॥८॥ स मृत्युर्देवानब्रवीत् । इत्थमेव सर्वे मनुष्या अमृता भविष्यन्त्यथ को मह्य भागो भविष्यतीति ते होचुर्नातोऽपरः कश्चन सह शरीरेणामृतोऽसद्यदेव त्वमेतं भागꣳ हरासाऽथ व्यावृत्य शरीरेणामृतोऽसद्यो ऽमृतोऽसदिज्यया वा कर्मणा वेति यद्वै तद्ब्रुवन्विद्यया वा कर्मणा वेत्येषा ह्येव सा विद्या यदग्निरितदु ह्येव तत्कर्म यदग्निः ॥९॥ ते यऽएवमेतद्विदुः । ये वैतत्कर्म कुर्वते मृत्वा पुनः सम्भवन्ति ते सम्भवन्त एवामृतत्वमभिसम्भवन्त्यथ यऽएवं न विदुर्ये वैतत्कर्म न कुर्वते मृत्वा पुनः सम्भवन्ति तऽएतस्यैवान्नं पुनः-पुनर्भवन्ति ॥१०॥ स यदग्निं चिनुते । एतमेव तदन्तकं मृत्युꣳ संवत्सरं प्रजापतिमग्निमाप्नोति यं देवा आप्नुवन्नेतमुपधत्ते यथैवैनमदो देवा ऽउपादधत ॥११॥ परिश्रिद्भिरि-

वास्य रात्रीरान्नोति । यन्नुष्मतीभिरुक्तान्यर्धमासान्मासानृतूंल्लोकम्पृणाभिर्मुहूर्तान् ॥ १२ ॥ तस्याः परिश्रितः । रात्रिलोकास्ता रात्रीणामेव साप्तिः क्रियते रात्रीणां प्रतिमा ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्य रात्रयस्तासामेकविंशतिं गार्हपत्ये परिश्रयति द्वाभ्यां नाशीतिं धिष्ण्येषु द्वेऽएकषष्टे शतेऽआहवनीये ॥ १३ ॥ अथ यन्नुष्मत्यः । दर्भस्तम्बो लोगेष्टकाः पुष्करपर्णं रुक्मपुरुषौ स्रुचौ स्वयमातृण्णा दूर्वेष्टका द्वियजू रेतःसिचौ विश्वज्योतिर्ऋतव्येऽअषाढा कूर्म उलूखलमुसलेऽउखा पञ्च पशुशीर्षाणि पञ्चदशापस्याः पञ्च ह्रन्द्स्याः पञ्चाशत्प्राणभृतस्ता द्वाभ्यां न शतं प्रथमा चितिः ॥ १४ ॥ अथ द्वितीया । पञ्चाश्विन्यो द्वेऽऋतव्ये पञ्च वैश्वदेव्यः पञ्च प्राणभृतः पञ्चापस्या एकया न विंशतिर्वयस्यास्ता एकचत्वारिंशद्द्वितीया चितिः ॥ १५ ॥ अथ तृतीया । स्वयमातृण्णा पञ्च दिश्या विश्वज्योतिश्चतस्र ऋतव्या दश प्राणभृतः षट्त्रिंशच्छन्द्स्याश्चतुर्दश वालखिल्यास्ता एकसप्ततिस्तृतीया चितिः ॥ १६ ॥ अथ चतुर्थी । अष्टादश प्रथमा अथ द्वादशाय सप्तदश ताः सप्तचत्वारिंशच्चतुर्थी चितिः ॥ १७ ॥ अथ पञ्चमी । पञ्चासपत्नाश्चत्वारिंशद्विराज एकया न त्रिंशत्स्तोमभागाः पञ्च नाकसदः पञ्च पञ्चचूडा एकत्रिंशच्छन्द्स्या अष्टौ गार्हपत्या चितिरष्टौ पुनश्चितिर्ऋतव्ये विश्वज्योतिर्विकर्णी च स्वयमातृण्णा चाश्मा पृश्निर्यश्चितेऽग्निर्निधीयते ता अष्टात्रिंशं शतं पञ्चमी चितिः ॥ १८ ॥ ताः सर्वाः पञ्चभिर्न चत्वारि शतानि । ततो याः षष्टिश्च त्रीणि च शतान्यक्लोकास्ता अक्लामेव साप्तिः क्रियतेऽक्लां प्रतिमा ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहान्यथ याः षट्त्रिंशत्पुरीषं तासाꣳ षट्त्रिंशो ततो याश्चतुर्विंशतिरर्धमासलोकास्ता अर्धमासानामेव साप्तिः क्रियतेऽर्धमासानां प्रतिमाथ या द्वादश मासलोकास्ता मासानामेव साप्तिः क्रियते मासानां प्रतिमा ता उ द्वे-द्वे सꣳर्तु-

लोका ऋतूनामशून्यतायै ॥ ११ ॥ अथ या लोकम्पृणाः । मुहूर्तलोकास्ता मुहूर्तानामेव सात्तिः क्रियते मुहूर्तानां प्रतिमा ता दश च सहस्राण्यष्टौ च शतानि भवन्त्येतावन्तो हि संवत्सरस्य मुहूर्तास्तासामेकविꣳशतिं गार्हपत्यऽउपदधाति द्वाभ्यां नाशीतिं धिष्ण्येष्वाहवनीयऽइतरा एतावन्ति वै संवत्सरस्य रूपाणि तान्यस्यात्रात्मन्युपहितानि भवन्ति ॥ २० ॥ तद्वैके । आहवनीयऽएवैताꣳ सम्पदमापिपयिषन्त्यन्ये वाऽएतेऽग्नयश्चिताः किमन्यत्रोपहिता इह सम्पश्येमेति न तथा कुर्याद्दश वाऽएतानग्नींश्चिनुतेऽष्टौ धिष्ण्यानाहवनीयं च गार्हपत्यं च तस्मादाहुर्विराडग्निरिति दशाक्षरा हि विराट् तान्तु सर्वानेकमिवैवाचक्षतेऽग्निरित्येतस्य क्षेत्रैतानि सर्वाणि रूपाणि यथा संवत्सरस्याहोरात्राण्यर्धमासा मासा ऋतव एवमस्यैतानि सर्वाणि रूपाणि ॥ २१ ॥ ते ये ह तथा कुर्वन्ति । एतानि ह्यस्य ते रूपाणि वर्हिधा कुर्वन्त्यथो पापवस्यसं कुर्वन्ति क्षत्राय विशं प्रतिप्रतिनीं प्रत्युष्यामिनीमाग्नीध्रीये वाऽअश्मानं पृश्निमुपदधात्यथ तꣳ सम्पश्यति किमु तꣳ सम्पश्यन्नितरा न सम्पश्येत्येनेव निर्ऋतिं पाप्मानमपहते स एकादशः ॥ २२ ॥ तदाहुः । कथमु ना अत्र न सम्पश्यतीति न ह्येना अभिनुहोत्याहुत्या वाऽइष्टका सर्वा कृत्स्ना भवतीति ॥ २३ ॥ तदाहुः । कथमस्यैता अनतिरिक्ता उपहिता भवन्तीति वीर्यं वाऽअस्यैता अनतिरिक्तं वै पुरुषं वीर्यꣳ स ह वाऽएतꣳ सर्वं कृत्स्नं प्रजापतिꣳ संस्करोति य एवं विद्वानेतत्कर्म कुरुते यो वैतदेवं वेद ॥ २४ ॥ ब्राह्मणम् ॥ २ [४. ३.] ॥ ॥

प्रजापतिं वै प्रजाः सृजमानम् । पाप्मा मृत्युरभिपरिजघान स तपोऽतप्यत सहस्रꣳ संवत्सरान्पाप्मानं विजिहासन् ॥ १ ॥ तस्य तपस्तेपानस्य । एभ्यो लोमगर्तेभ्य ऊर्धानि ज्योतीꣳष्यायंस्तद्यानि तानि ज्योतीꣳष्येतानि तानि नक्षत्राणि यावत्येतानि नक्षत्राणि तावन्तो लोमगर्ता यावन्तो लोमगर्तास्तावन्तः सहस्रसं-

वत्सरस्य मुहूर्ताः ॥२॥ स सहस्रतमे संवत्सरे । सर्वोऽत्यपवत स यः सोऽत्यपवतायमेव स वायुर्योऽयं पवतेऽथ यं तं पाप्मानमत्यपवतेदं तच्छरीरं क उ तस्मै मनुष्यो यः सहस्रसंवत्सरमवरुन्धीत विद्यया ह वाऽएवंवित्सहस्रसंवत्सरमवरुन्द्धे ॥३॥ सर्वा एवैता इष्टकाः साहस्रीरुपासीत । रात्रिसहस्रेण-रात्रिसहस्रेणैकैकां परिश्रितꣳ सम्पन्नामुपासीताहःसहस्रेणाहःसहस्रेणैकैकामर्धाऱ्धमर्धमाससहस्रेणार्धमाससहस्रेणैकैकामर्धमासभाजं माससहस्रेण-माससहस्रेणैकैकां मासभाजमृतुसहस्रेणऽर्तूसहस्रेणैकैकामृतुभाजं मुहूर्तसहस्रेण-मुहूर्तसहस्रेणैकैकां मुहूर्तभाजꣳ संवत्सरसहस्रेण संवत्सरं ते यऽएतमेवमग्निꣳ संवत्सरेण सम्पन्नं विदुः सहस्रतमीꣳ ह्यस्य ते कलां विदुरथ यऽएनमेवं न विदुर्न ह्यस्य ते सहस्रतमीं चन कलां विदुरथ य एवैवं वेद यो वैतत्कर्म कुरुते स ह्येवैतꣳ सर्वं कृत्स्नं प्राजापत्यमग्निमाप्नोति यं प्रजापतिराप्नोत्तस्मादेवंवित्तप एव तप्येत यदु ह वाऽएवंवित्तप तप्यतऽआ मैथुनात्सर्वꣳ ह्यस्य तत्स्वर्गं लोकमभिसम्भवति ॥४॥ तदेतदृचाभ्युक्तम् । न मृषा श्रान्तं यदवन्ति देवा इति न ह्येवैवं विदुषः किं चन मृषा श्रान्तं भवति तथो ह्यस्यैतत्सर्वं देवा अवन्ति ॥५॥ ब्राह्मणम् ॥३ [४.४.] ॥॥

अथादेशा उपनिषदाम् । वायुरग्निरिति ह शाकायनिन उपासतऽआदित्यो ऽग्निरित्यु हैकऽआहुरथ ह स्माह औमत्यो वा ह्यालिङ्गवो वा वायुरेवाग्निस्तस्माद्यदेवार्धर्युरुत्तमं कर्म करोत्यथैतमेवाप्येतीति ॥१॥ शाट्यायनिरु ह स्माह । संवत्सर एवाग्निस्तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्षा उत्तरः शरदुर्मध्यमात्मा हेमन्तशिशिरावूरू पुच्छं प्रतिष्ठा वागग्निः प्राणो वायुश्चक्षुरादित्यो मनश्चन्द्रमाः श्रोत्रं दिश आपो मिथुनं तपः प्रतिष्ठा मासाः पर्वाण्यर्धमासा नाड्यो ऽहोरात्राणि रजतसुवर्णानि पत्राणि स एवं देवानप्येतीति संवत्सरोऽग्निरित्यु हैव विद्यादेतन्मयो भवतीति ह्येव विद्यात् ॥२॥ चेलक उ ह स्माह शाण्डि-

ल्यायनः । इमꣳ एव लोकास्तिस्रः स्वयमातृण्णवत्यश्चितयो यजमानश्चतुर्थी सर्वे कामाः पञ्चमीमांश्च लोकान्त्संस्कुर्वꣳआत्मानं च सर्वांश्च कामानित्येव विद्यादिति ॥३॥ ब्राह्मणम् ॥४ [४. ५.] ॥ चतुर्थोऽध्यायः [६४.] ॥ ॥

तस्य वाꣳ एतस्याग्नेः । वागेवोपनिषद्वाचा हि चीयतऽऋचा यजुषा साम्नेति नु दैव्याथ यन्मानुष्या वाचाकेतीदं कुरुतेतीदं कुरुतेति तद्धि तया चीयते ॥१॥ सा वाꣳ एषा वाक्त्रेधाविहिता । ऋचो यजूꣳषि सामानि तेनाग्निस्त्रेधाविहित एतेन हि त्रयेण चीयतेऽप्येवं त्रेधाविहित इत्यꣳ हु त्वेवापि त्रेधाविहितो यदस्मिंस्त्रेधाविहिता इष्टका उपधीयन्ते पुंनाम्न्य स्त्रीनाम्न्यो नपुꣳसकनाम्न्यस्त्रेधाविहितान्युꣳ एवेमानि पुरुषस्याङ्गानि पुंनामानि स्त्रीनामानि नपुꣳसकनामानि ॥२॥ ॥ शतत्५४०० ॥ ॥ सोऽयमात्मा त्रेधाविहित एव । सोऽनेन त्रेधाविहितेनात्मनैतं त्रेधाविहितं दैवममृतमाप्नोति ता उ सर्वा इष्टका इत्येवाचक्षते नेष्टक इति नेष्टकमिति वाचो हूपेण वाग्ध्येवैतत्सर्वं यत्स्त्री पुमान्नपुꣳसकं वाचा ह्येवैतत्सर्वमाप्तं तस्मादेना अङ्गिरस्वद्ध्रुवा सीदेत्येव सर्वाः सादयति नाङ्गिरस्वद्ध्रुवः सीदेति नाङ्गिरस्वद्ध्रुवꣳ सीदेति वाचꣳ ह्येवैताꣳ संस्कुरुते ॥३॥ सा या सा वागसौ स आदित्यः । स एष मृत्युस्तद्यकिं चार्वाचीनमादित्यात्सर्वं तन्मृत्युनाप्तꣳ स यो ह्येनमतोऽर्वाचीनं चिनुते मृत्युना ह्येनꣳ स आप्तं चिनुते मृत्यवे हु स आत्मानमपिदधात्यथ य एनमत ऊर्ध्वं चिनुते स पुनर्मृत्युमपजयति विद्यया हु वाꣳ अस्येषोऽत ऊर्ध्वं चितो भवति ॥४॥ सा वाꣳ एषा वाक्त्रेधाविहिता । ऋचो यजूꣳषि सामानि मण्डलमेवꣳ र्चोऽर्चिः सामानि पुरुषो यजूꣳष्यथैतदमृतं यदेतदर्चिर्दीप्यतꣳ इदं तत्पुष्करपर्णं तद्यत्पुष्करपर्णमुपधायाग्निं चिनोत्येतस्मिन्नेवैतदमृतऽऋक्मयं यजुर्मयꣳ साममयमात्मानꣳ संस्कुरुते सोऽमृतो भवति ॥५॥ ब्राह्मणम् ॥५ [५. १.] ॥ ॥

यदेतन्मण्डलं तपति । तन्मरुद्भ्यः स ऋचां लोकोऽथ यदेतदर्चिर्दीप्यते तन्मरुद्भ्यस्तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन्मण्डले पुरुषः सोऽग्निस्तानि यजूंषि स यजुषां लोकः ॥ १ ॥ सैषा त्रय्येव विद्या तपति । तद्धैतदप्यविद्वाꣳस आहुस्त्रयी वाऽएषा विद्या तपतीति वाग्घैव तत्पश्यन्ती वदति ॥ २ ॥ स एष एव मृत्युः । य एष एतस्मिन्मण्डले पुरुषोऽयैतदमृतं यदेतदर्चिर्दीप्यते तस्मान्मृत्युर्न म्रियतेऽमृते ह्येतत्तस्माद्ध न दृश्यतेऽमृते ह्येतत् ॥ ३ ॥ तदेष श्लोको भवति । अन्तरं मृत्योरमृतमित्यवरꣳ हेतन्मृत्योरमृतं मृत्यावमृतमाहितमित्येतस्मिन्हि पुरुषऽएतन्मण्डलं प्रतिष्ठितं तपति मृत्युर्विवस्वन्तं वस्त ऽइत्यसौ वाऽआदित्यो विवस्वानेष ह्येतोरात्रे विवस्ते तमेष वस्ते सर्वतो ह्येनेन परिवृतो मृत्योरात्मा विवस्वतीत्येतस्मिन्हि मण्डलऽएतस्य पुरुषस्यात्मेतदेष श्लोको भवति ॥ ४ ॥ तयोर्वाऽएतयोः । उभयोरेतस्य चार्चिष एतस्य च पुरुषस्यैतन्मण्डलं प्रतिष्ठा तस्मान्मरुद्भ्यं परस्मै न शꣳसेन्नेदेतां प्रतिष्ठां हिन्सदा ऽइत्येताꣳ ह स प्रतिष्ठां हिन्स्ति यो मरुद्भ्यं परस्मै शꣳसति तस्माद्भ्यशसं भूयिष्ठं परिचक्षते प्रतिष्ठाहिन्सो हि भवतीत्यधिदैवतम् ॥ ५ ॥ अथाधियज्ञम् । यदेतन्मण्डलं तपत्यग्नꣳ स रुक्मोऽथ यदेतदर्चिर्दीप्यतऽइदं तत्पुष्करपर्णमापो ह्येता आपः पुष्करपर्णमथ य एष एतस्मिन्मण्डले पुरुषोऽयमेव स योऽयꣳ हिरण्मयः पुरुषस्तदेतदेवैतत्त्रयꣳ संस्कृत्येहोपधत्ते तत्त्रयस्यैवानु सꣳस्थामूर्ध्वमुत्क्रामति तदेतमप्येति य एष तपति तस्मादग्निं नाद्रियेत परिक्लृप्तमस्य ह्येष तदा भवतीत्यु ऽएवाधियज्ञम् ॥ ६ ॥ अथाध्यात्मम् । यदेतन्मण्डलं तपति यश्चैष रुक्म इदं तच्छुक्लमक्षन्नथ यदेतदर्चिर्दीप्यते यच्चैतत्पुष्करपर्णमिदं तत्कृष्णमक्षन्नथ य एष एतस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषोऽयमेव स योऽयं दक्षिणेऽक्षन्पुरुषः ॥ ७ ॥ स एष एव लोकम्पृणा । तामेष सर्वोऽग्निरभिसम्पद्यते तस्यैतन्मिथुनं योऽयꣳ

सर्व्वेऽन्नन्पुरुषोऽधम् कैतदात्मनो यन्मिथुनं यदा वै सरू मिथुनेनाथ सर्वोऽथ कृत्स्नः कृत्स्नतायै तस्यत्ते द्वे भवतो द्वन्द्व ह्रि मिथुनं प्रजननं तस्माद्वे-द्वे लोकम्पृणेऽवधीयेते तस्माद्व द्वाभ्यां चितिं प्रणयन्ति ॥८॥ स एष एवेन्द्रः । योऽयं दक्षिणेऽन्नन्पुरुषोऽथेयमिन्द्राणी ताभ्यां देवा एतां विधृतिमकुर्वन्नासिकां तस्माज्ज्ञायाया अन्ते नाश्नीयाद्वीर्यवान्ह्यास्माज्ज्ञायते वीर्यवत्तमु ह सा जनयति यस्या अन्ते नाश्नाति ॥९॥ तदेतदेवव्रतव्व । राजन्यबन्धवो मनुष्याणामनुतमां गोपायन्ति तस्माद्व तेषु वीर्यवान्जायतेऽमृतवाका वयसाव्व सा क्षिप्रश्येनं जनयति ॥१०॥ तौ हृदयस्याकाशं प्रत्यवेत्य । मिथुनीभवतस्तौ यदा मिथुनस्यान्तं गछतोऽथ कैतत्पुरुषः स्वपिति तस्यथा कैवेदं मानुषस्य मिथुनस्यान्तं गत्वासंविद्-इव भवत्येवव्व कैवैतदसंविद्-इव भवति दैवव्व ह्येतन्मिथुनं परमो ह्येष आनन्दः ॥११॥ तस्मादेवंवित्स्वप्यात् । लोक्यव्व कैतेऽएव तद्देवते मिथुनेन प्रियेण धाम्ना समर्धयति तस्माद्व ह स्वपन्तं धुरेव न बोधयेन्नेदेते देवते मिथुनीभवत्यौ क्षिनसानीति तस्माद्व कैतत्सुषुपुषः श्लेष्मणमिव मुखं भवत्येतेऽएव तद्देवते रेतः सिञ्चतस्तस्माद्रेतस इदव्व सर्वव्व सम्भवति यदिदं किं च ॥१२॥ स एष एव मृत्युः । य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽन्नन्पुरुषस्तस्य कैतस्य हृदये पादावतिकृतौ तौ कैतदाक्ष्योत्क्रामति स यदोत्क्रामत्यथ कैतत्पुरुषो म्रियते तस्माद्व कैतत्प्रेतमाकुराक्ष्यस्येति ॥१३॥ एष उऽएव प्राणः । एष ह्रीमाः सर्वाः प्रजा प्रणयति तस्यैते प्राणाः स्वाः स यदा स्वपित्यथैनमेते प्राणाः स्वा अपियन्ति तस्मात्स्वाप्ययः स्वाप्ययो ह वै तव्व स्वप्न इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवाः ॥१४॥ स एतैः सुप्तः । न कस्य चन वेद न मनसा संकल्पयति न वाचान्नस्य रसं विजानाति न प्राणेन गन्धं विजानाति न चक्षुषा पश्यति न श्रोत्रेण शृणोत्येतव्व ह्येते तदापीता भवन्ति स एष एकः सन्प्रजासु बहुधा व्यावि-

ष्टस्तस्मादेका सती लोकम्पृणा सर्वमग्निमनुविभवत्यथ यदेक एव तस्मादेका ॥ १५ ॥ तदाहुः । एको मृत्युर्बहुवा३ इत्येकश्च बहुवश्चेति ह ब्रूयाद्यद्ह्यसावमुत्र तेनैकोऽथ यदिह प्रज्ञासु बहुधा व्याविष्टस्तेनो बहुवः ॥ १६ ॥ तदाहुः । अन्तिके मृत्युर्दूराऽइत्यन्तिके च दूरे चेति ह ब्रूयाद्यद्ह्यायमिहाध्यात्मं तेनान्तिकेऽथ यदसावमुत्र तेनो दूरे ॥ १७ ॥ तदेष श्लोको भवति । अन्ने भात्यपश्रितो रसानाꣳ संन्नरेऽमृत इति यदेतन्मण्डलं तपति तदन्नमथ य एष एतस्मिन्मण्डले पुरुषः सोऽत्ता स एतस्मिन्नन्नेऽपश्रितो भातीत्यधिदेवतम् ॥ १८ ॥ अथाध्यात्मम् । इदमेव शरीरमन्नमथ योऽयं दक्षिणेऽक्षन्पुरुषः सोऽत्ता स एतस्मिन्नन्नेऽपश्रितो भाति ॥ ११ ॥ तमेतमग्निरित्यध्वर्यव उपासते । यजुरित्येष ह्येदꣳ सर्वं युनक्ति सामेति छन्दोगा एतस्मिन्ह्येदꣳ सर्वꣳ समानमुक्थमिति बह्वृचा एष ह्येदꣳ सर्वमुत्थापयति यातुरिति यातुविद एतेन ह्येदꣳ सर्वं यतं विषमिति सर्पाः सर्प इति सर्पविद ऊर्गिति देवा रयिरिति मनुष्या मायेत्यसुराः स्वधेति पितरो देवजन इति देवजनविदो रूपमिति गन्धर्वा गन्ध इत्यप्सरसस्तं यथा-यथोपासते तदेव भवति तद्धैनान्भूत्वावति तस्मादेतमेवंवित्सर्वैरेवैतैरुपासीत सर्वꣳ ह्येतद्भवति सर्वꣳ ह्येनमेतद्भूत्वावति ॥ २० ॥ स एष त्रीष्टकोऽग्निः । ऋगेका यजुरेका सामैका तस्यां का चात्रर्ग्चोपदधाति रुक्म एव तस्या आयतनमथ यां यजुषा पुरुष एव तस्या आयतनमथ याꣳ साम्ना पुष्करपर्णमिव तस्या आयतनमेवं त्रीष्टकः ॥ २१ ॥ ते वा ऽएते । उभेऽएष च रुक्म एतच्च पुष्करपर्णमितं पुरुषमुपीत उभे ह्यृक्सामे यजुरुपीत एवम्वेकेष्टकः ॥ २२ ॥ स एष एव मृत्युः । य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषः स एष एवंविद आत्मा भवति स यदैवंविदस्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवति सोऽमृतो भवति मृत्युर्ह्यस्यात्मा भवति ॥ २३ ॥ ब्राह्मणम् ॥ ६ [५. २.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या ११ ॥ ॥

नेव वाऽइदमग्रेऽसदासीन्नेव सदासीत् । आसीदिव वाऽइदमग्रे नेवासीत्तद्ध तन्मन एवास ॥ १ ॥ तस्मादेतदृषिणाभ्यनूक्तम् । नासदासीन्नो सदासीत्तदानीमिति नेव हि सन्मनो नेवासत् ॥ २ ॥ तदिदं मनः सृष्टमाविरबुभूषत् । निरुक्ततरं मूर्ततरं तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्छत्तत्षट्त्रिꣳशतꣳ सकृस्राण्यपश्यदात्मनोऽग्नीनर्कान्मनोमयान्मनश्चितस्ते मनसैवाधीयत्त मनसाचीयत्त मनसैषु ग्रहा अगृह्यन्त मनसास्तुवत मनसाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म मनसैव तेषु तन्मनोमयेषु मनश्चित्सु मनोमयमक्रियत तद्यत्किं चेमानि भूतानि मनसा संकल्पयन्ति तेषामिव सा कृतिस्तानेवाद्धति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै मनसो विभूतिरेतावती विसृष्टिरेतावन्मनः षट्त्रिꣳशत्सकृस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्यावानसौ पूर्वः ॥ ३ ॥ तन्मनो वाचमसृजत । सेयं वाक्सृष्टाविरबुभूषन्निरुक्ततरा मूर्ततरा सात्मानमन्वैच्छत्सा तपोऽतप्यत सा प्रामूर्छत्सा षट्त्रिꣳशतꣳ सकृस्राण्यपश्यदात्मनोऽग्नीनर्कान्वाङ्मयान्वाक्चितस्ते वाचैवाधीयत्त वाचाचीयत्त वाचैषु ग्रहा अगृह्यन्त वाचास्तुवत वाचाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म वाचैव तेषु तद्वाङ्मयेषु वाक्चित्सु वाङ्मयमक्रियत तद्यत्किं चेमानि भूतानि वाचा वदन्ति तेषामिव सा कृतिस्तानेवाद्धति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै वाचो विभूतिरेतावती विसृष्टिरेतावती वाक्षट्त्रिꣳशत्सकृस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्यावानसौ पूर्वः ॥ ४ ॥ सा वाक्प्राणमसृजत । सोऽयं प्राणः सृष्ट आविरबुभूषन्निरुक्ततरो मूर्ततरः स आत्मानमन्वैच्छत्स तपोऽतप्यत स प्रामूर्छत्स षट्त्रिꣳशत्तꣳ सकृस्राण्यपश्यदात्मनोऽग्नीनर्कान्प्राणमयान्प्राणचितस्ते प्राणैनैवाधीयन्त प्राणेनाचीयन्त प्राणेनैषु ग्रहा अगृह्यन्त प्राणेनास्तुवत प्राणेनाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं

कर्म प्राणेनैव तेषु तत्प्राणमयेषु प्राणचित्सु प्राणमयमक्रियत तद्यत्किं चेमानि भूतानि प्राणेन प्राणन्ति तेषामेव सा कृतिस्तानेवाद्धति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै प्राणस्य विभूतिरेतावती विसृष्टिरेतावान्प्राणः षट्त्रिꣳश° ॥५॥ स प्राणश्चक्षुरसृजत । तदिदं चक्षुः सृष्टमाविरबुभूषन्निरुक्ततरं मूर्ततरं तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्छत्तत्षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्रीनर्काꣳश्चक्षुर्मयांश्चक्षुश्चितस्ते चक्षुषैवाधीयन्त चक्षुषाचीयन्त चक्षुषेषु ग्रहा अगृह्यन्त चक्षुषास्तुवत चक्षुषाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म चक्षुषैव तेषु तच्चक्षुर्मयेषु चक्षुश्चित्सु चक्षुर्मयमक्रियत तद्यत्किं चेमानि भूतानि चक्षुषा पश्यन्ति तेषामेव सा कृतिस्तानेवाद्धति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै चक्षुषो विभूतिरेतावती विसृष्टिरेतावच्चक्षुः षट्त्रिꣳश° ॥६॥ तच्चक्षुः श्रोत्रमसृजत । तदिदꣳ श्रोत्रꣳ सृष्टमाविरबुभूषन्निरुक्ततरं मूर्ततरं तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्छत्तत्षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्रीनर्काꣳश्श्रोत्रमयाꣳश्श्रोत्रचितस्ते श्रोत्रेणैवाधीयन्त श्रोत्रेणाचीयन्त श्रोत्रेणेषु ग्रहा अगृह्यन्त श्रोत्रेणास्तुवत श्रोत्रेणाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म श्रोत्रेणैव तेषु तच्छ्रोत्रमयेषु श्रोत्रचित्सु श्रोत्रमयमक्रियत तद्यत्किं चेमानि भूतानि श्रोत्रेण शृण्वन्ति तेषामेव सा कृतिस्तानेवाद्धति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै श्रोत्रस्य विभूतिरेतावती विसृष्टिरेतावच्छ्रोत्रꣳ षट्त्रिꣳश° ॥७॥ तच्छ्रोत्रं कर्मासृजत । तत्प्राणानभिसममूर्छदिमꣳ संदेघमन्नसंदेकमकृत्स्नं वै कर्मऽर्ते प्राणेभ्योऽकृत्स्ना उ वै प्राणा ऋते कर्मणः ॥८॥ तदिदं कर्म सृष्टमाविरबुभूषत् । निरुक्ततरं मूर्ततरं तदात्मानमन्वैच्छत्तत्तपोऽतप्यत तत्प्रामूर्छत्तत्षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्रीनर्कान्कर्ममयान्कर्माचितस्ते कर्मणैवाधीयन्त कर्म-

णाचीयन्त कर्मणीषु ग्रहा अगृह्यन्त कर्मणास्तुवत कर्मणाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्म कर्मणीव तेषु तत्कर्ममयेषु कर्मचित्सु कर्ममयमक्रियत तद्यत्किं चेमानि भूतानि कर्म कुर्वते तेषामेव सा कृतिस्तानेवाद्धति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वै कर्मणो विभूतिरेतावती विसृष्टिरेतावत्कर्म षट्त्रिꣳशꣳ ॥ १ ॥ तत्कर्माग्निमसृजत । आविस्तरां वाऽअग्निः कर्मणः कर्मणा क्षेनं जनयन्ति कर्मणेन्धते ॥ १० ॥ सोऽयमग्निः सृष्ट आविरबुभूषत् । निरुक्ततरो मूर्ततरः स आत्मानमन्वैक्षत्स तपोऽतप्यत स प्रामूर्क्षत्स षट्त्रिꣳशतꣳ सहस्राण्यपश्यदात्मनोऽग्नीनर्कानग्निमयानग्निचितस्तेऽग्निनैवाधीयताग्निनाचीयताग्निनेषु ग्रहा अगृह्यताग्निनास्तुवताग्निनाशꣳसन्यत्किं च यज्ञे कर्म क्रियते यत्किं च यज्ञियं कर्माग्निनैव तेषु तदग्निमयेधाग्निचित्स्वग्निमयमक्रियत तद्यत्किं चेमानि भूतान्यग्निमिन्धते तेषामेव सा कृतिस्तानेवाद्धति तांश्चिन्वन्ति तेषु ग्रहान्गृह्णन्ति तेषु स्तुवते तेषु शꣳसन्त्येतावती वाऽअग्नेर्विभूतिरेतावती विसृष्टिरेतावानग्निः षट्त्रिꣳशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान्यावानसौ पूर्वः ॥ ११ ॥ ते ह्येते विद्याचित एव । तान्ह्येतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते विद्यया ह्येवैतꣳएवंविदश्चिता भवन्ति ॥ १२ ॥ ब्राह्मणम् ॥ १ [५. ३.] ॥ ॥

अयं वाव लोक एषोऽग्निश्चितः । तस्यापएव परिश्रितो मनुष्या यजुष्मत्य इष्टकाः सूददोहा ओषधयश्च वनस्पतयश्च पुरीषमाहुतयः समिधोऽग्निर्लोकम्पृणा तद्वाऽएतत्सर्वमग्निमेवाभिसम्पद्यते तत्सर्वोऽग्निर्लोकम्पृणामभिसम्पद्यते स यो ह्येतदेवं वेद लोकम्पृणामेनं भूतमेतत्सर्वमभिसम्पद्यते ॥ १ ॥ अन्तरिक्षꣳ कूर्म एषोऽग्निश्चितः । तस्य द्यावापृथिव्योरेव संधिः परिश्रितः परेण ह्यन्तरिक्षं द्यावापृथिवी संधत्तस्ताः परिश्रितो वयाꣳसि यजुष्मत्य इष्टका वर्षꣳ सूददोहा मरीचयः

पुरीषमाङ्गतयः समिधो वायुर्लोकम्पृणा तद्वाऽएतत्सर्वं वायुमेवाभिसम्पद्यते तत्सर्वोऽग्निर्लो° ॥२॥ द्यौर्ह वेवैषोऽग्निश्चितः । तस्याप एव परिश्रितो यथा ह वाऽइदं कोशः समुब्जित एवमिमे लोका अप्स्वन्तस्तद्या इमांल्लोकान्परेणापस्ताः परिश्रितो देवा यजुष्मत्य इष्टका यद्वैतस्मिंल्लोकेऽन्नं तत्सूददोहा नक्षत्राणि पुरीषमाङ्गतयः समिध आदित्यो लोकम्पृणा तद्वाऽएतत्सर्वमादित्यमेवाभिसम्पद्यते तत्सर्वोऽग्निर्लो° ॥३॥ आदित्यो ह वेवैषोऽग्निश्चितः । तस्य दिश एव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यं दिशः समन्तं परियन्ति रश्मयो यजुष्मत्य इष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यस्य रश्मयस्तद्यत्परिश्रित्सु यजुष्मतीः प्रत्यर्पयति रश्मींस्तद्दिक्षु प्रत्यर्पयत्यथ यद्दन्तरा दिशश्च रश्मींश्च तत्सूददोहा अथ यद्दिक्षु च रश्मिषु चान्नं तत्पुरीषं ता आङ्गतयस्ताः समिधोऽथ यद्दिश इति च रश्मय इति चाख्यायते तल्लोकम्पृणा तद्वाऽएतत्सर्वं दिश इति चैव रश्मय इति चाख्यायते तत्सर्वोऽग्निर्लो° ॥४॥ नक्षत्राणि ह वेवैषोऽग्निश्चितः । तानि वाऽएतानि सप्तविंशतिर्नक्षत्राणि सप्तविंशतिः-सप्तविंशतिर्ह्येपनक्षत्राण्येकैकं नक्षत्रमनूपतिष्ठन्ते तानि सप्त च शतानि विंशतिश्चाधि षट्त्रिंशत्ततो यानि सप्त च शतानि विंशतिश्चेष्टका एव ताः षष्टिश्च त्रीणि च शतानि परिश्रितः षष्टिश्च त्रीणि च शतानि यजुष्मत्योऽथ यान्यधि षट्त्रिंशत्स त्रयोदशो मासः स आत्मा त्रिंशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव षट्त्रिंश्यौ तद्यत्ते द्वे भवतो यन्नरं हि शिरोऽथ यदन्तरा नक्षत्रे तत्सूददोहा अथ यन्नक्षत्रेष्वन्नं तत्पुरीषं ता आङ्गतयस्ताः समिधोऽथ यन्नक्षत्राणीत्याख्यायते तल्लोकम्पृणा तद्वाऽएतत्सर्वं नक्षत्राणीत्येवाख्यायते तत्सर्वोऽग्निर्लो° ॥५॥ ता वाऽएताः । एकविंशतिर्बृहत्य एकविंशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसम्प-

यतऽएकविꣳशं च स्तोमं बृहतीं च छन्दः ॥ ६ ॥ छन्दाꣳसि वै देवेषोऽग्निश्चितः । तानि वाऽएतानि सप्त छन्दाꣳसि चतुरुत्तराणि त्रिचानि तेषाꣳ सप्त च शतानि विꣳशतिश्चाक्षराण्यधि षट्त्रिꣳशत्ततो यानि सप्त च शतानि विꣳशतिश्चेष्टका एव ताः षष्टिश्च त्रीणि च शतानि परिश्रितः षष्टिश्च त्रीणि च शतानि यजुष्मत्योऽथ यान्यधि षट्त्रिꣳशन्स त्रयोदशो मासः स आत्मा त्रिꣳशदात्मा प्रतिष्ठा द्वे प्राणा द्वे शिर एव षट्त्रिꣳश्यौ तद्यत्ते द्वे भवतो द्व्यक्षरꣳ हि शिरः ॥ ७ ॥ तस्यै वाऽएतस्यै षट्त्रिꣳशदक्षरायै बृहत्यै । यानि दश प्रथमान्यक्षराणि सा दशाक्षरैकपदाथ यानि विꣳशतिः सा विꣳशत्यक्षरा द्विपदाथ यानि त्रिꣳशत्सा त्रिꣳशदक्षरा विराडथ यानि त्रयस्त्रिꣳशत्सा त्रयस्त्रिꣳशदक्षराथ यानि चतुस्त्रिꣳशत्सा चतुस्त्रिꣳशदक्षरा स्वराडथ यत्सर्वैश्छन्दोभिरयमग्निश्चितस्तद्यतिश्छन्दास्ता उ सर्वा इष्टका एवेष्टकेति त्रीण्यक्षराणि त्रिपदा गायत्री तेनैष गायत्रोऽग्निर्मृदाप इति त्रीण्यक्षराणि त्रिपदा गायत्री तेनोऽएवैष गायत्रोऽथ यदुत्तरा छन्दसी तत्सूदृदोहा अथ यच्छन्दःस्वन्नं तत्पुरीषं ता आकृतयस्ताः समिधोऽथ यच्छन्दाꣳसीत्याख्यायते तल्लोकम्पृणा तद्वाऽएतत्सर्वं छन्दाꣳसीत्येवाख्यायते तत्सर्वोऽग्निर्लो॰ ॥ ८ ॥ ता वाऽएताः । एकविꣳशतिर्बृहत्य एकविꣳशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसम्पद्यतऽएकविꣳशं च स्तोमं बृहतीं च छन्दः ॥ १ ॥ संवत्सरो वै देवेषोऽग्निश्चितः । तस्य गात्रय एव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च वै त्रीणि च शतानि संवत्सरस्य रात्रयोऽहानि यजुष्मत्य इष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च वै त्रीणि च शतानि संवत्सरस्याहान्यथ या अमूः षट्त्रिꣳशदिष्टका अतियन्ति यः स त्रयोदशो मास आत्मार्धमासाश्च ते मासाश्च चतुर्विꣳशतिरर्धमासा द्वादश मासा अथ यदुत्तराहोरात्रे तत्सूदृदोहा अथ यदहोरात्रेष्वन्नं तत्पुरीषं ता आकृतयस्ताः समिधोऽथ

यदहोरात्राणीत्याख्यायते तल्लोकम्पृणा तद्वाऽएतत्सर्वमहोरात्राणीत्येवाख्यायते तत्सर्वोऽग्निर्ली° ॥१०॥ ता वाऽएताः । एकविꣳशतिर्बृहत्यै एकविꣳशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसम्पद्यते एकविꣳशं च स्तोमं बृहतीं च छन्दः ॥११॥ आत्मा ह वेवैषोऽग्निश्चितः । तस्यास्थीन्येव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि पुरुषस्यास्थीनि मज्ञानो यजुष्मत्य इष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतानि पुरुषस्य मज्ञानोऽथ या अमूः षट्त्रिꣳशदिष्टका अतियन्ति यः स त्रयोदशो मास आत्मा प्राणः स तस्य त्रिꣳशदात्मन्विधाः प्रतिष्ठायां द्वे प्राणेषु द्वे शीर्षन्द्वे तय्यत्ते द्वे भवतो द्विकपालꣳ हि शिरोऽथ येनेमानि पर्वाणि संततानि तत्सूद्दोहा अथैतत्त्रयं येनायमात्मा प्रछन्नो लोम ब्रह्माꣳसमिति तत्पुरीषं यत्पिबति ता आकुतयो यदश्नाति ताः समिधोऽथ यदात्मेत्याख्यायते तल्लोकम्पृणा तद्वाऽएतत्सर्वमात्मेत्येवाख्यायते तत्सर्वोऽग्निर्ली° ॥१२॥ ता वाऽएताः । एकविꣳशतिर्बृहत्यै ॥१३॥ सर्वाणि ह वेव भूतानि । सर्वे देवा एषोऽग्निश्चित आपो वै सर्वे देवाः सर्वाणि भूतानि ता ह्येता आप एवैषोऽग्निश्चितस्तस्य नाव्या एव परिश्रितस्ताः षष्टिश्च त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यं नाव्याः समन्तं परियन्ति नाव्या उऽएव यजुष्मत्य इष्टकास्ताः षष्टिश्चैव त्रीणि च शतानि भवन्ति षष्टिश्च ह वै त्रीणि च शतान्यादित्यं नाव्या अभिन्नरत्यथ यदन्तरा नाव्ये तत्सूद्दोहा अथ या अमूः षट्त्रिꣳशदिष्टका अतियन्ति यः स त्रयोदशो मास आत्मायमेव स योऽयꣳ हिरण्मयः पुरुषः ॥१४॥ तस्यैते प्रतिष्ठे । रुक्मश्च पुष्करपर्णं चापश्चादित्यमण्डलं च स्रुचौ बाहू ताविन्द्राग्नी द्वे स्वयमातृण्णेऽइयं चात्तरिक्षं च तिस्रो विश्वज्योतिष एता देवता अग्निर्वायुरादित्य एता ह्येव देवता विश्वं ज्योतिर्द्वादशर्तव्याः स

संवत्सरः स आत्मा पञ्च नाकसदः पञ्च पञ्चचूडाः स यज्ञस्ते देवा अथ यद्विकर्णी च स्वयमातृण्णा चाश्मा पृश्निर्यश्चितेऽग्निर्निधीयते सा पञ्चत्रिꣳशी लोकम्पृणायै यजुः षट्त्रिꣳशी सोऽस्येष सर्वस्यात्मैवात्मा स एष सर्वासामपां मध्ये स एष सर्वैः कामैः सम्पन्न आपो वै सर्वे कामाः स एषोऽकामः सर्वकामो न क्वेतं कस्य चन कामः ॥१५॥ तदेष श्लोको भवति । विप्रया तदारोहन्ति यत्र कामाः परागताः न तत्र दक्षिणा यन्ति नाविद्वाꣳसस्तपस्विन इति न क्वैव तं लोकं दक्षिणाभिर्न तपसानेवंविदश्रुतऽएवंविदा ह क्वैव स लोकः ॥१६॥ अभ्रं पुरीषम् । चन्द्रमा आकृतयो नक्षत्राणि समिधो यच्चन्द्रमा नक्षत्रे वसत्याकृतिस्तत्समिधि वसत्येतद्ध वा ऽआकृतेरन्नमेषा प्रतिष्ठा तस्मादाकृतिर्न क्षीयतऽएतद्ध्यस्या अन्नमेषा प्रतिष्ठाथ यदेवा इत्याख्यायते तल्लोकम्पृणा तद्धाऽएतत्सर्वं देवा इत्येवाख्यायते ॥१७॥ तदेतदृचाभ्युक्तम् । विश्वे देवा अनु तत्ते यजुर्गुरिति सर्वाणि क्वात्र भूतानि सर्वे देवा यजुरेव भवन्ति तत्सर्वोऽग्निर्लोकम्पृणामभिसम्पद्यते स यो क्वैतदेवं वेद लोकम्पृणामेनं भूतमेतत्सर्वमभिसम्पद्यते ॥१८॥ ता वाऽएताः । एकविꣳशतिर्बृहत्य एकविꣳशो वै स्वर्गो लोको बृहती स्वर्गो लोकस्तदेष स्वर्गं लोकमभिसम्पद्यतऽएकविꣳशं च स्तोमं बृहतीं च छन्दः ॥१९॥ ब्राह्मणम् ॥२ [५.४.] ॥॥

कुम्भिर्ह वाज्रश्रवसोऽग्निं चिक्ये । तꣳ होवाच सुश्रवाः कौष्यो गौतम यद्ग्निमचैषीः प्राञ्चमेनमचैषीः प्रत्यञ्चमेनमचैषीर्न्यञ्चमेनमचैषीरुत्तानमेनमचैषीः ॥१॥ यद्यद्धैनं प्राञ्चमचैषीः । यथा पराचऽआसीनाय पृष्टतोऽन्नाद्यमुपाहरेत्तादृक्तन्न ते क्वविः प्रतिग्रहीष्यति ॥२॥ यद्यु वाऽएनं प्रत्यञ्चमचैषीः । कस्मादस्य तर्हि पश्चात्पुरुषमकार्षीः ॥३॥ यद्यु वाऽएनं न्यञ्चमचैषीः । यथा नीचः शयानस्य पृष्ठेऽन्नाद्यं प्रतिष्ठापयेत्तादृक्तन्नैव ते क्वविः प्रतिग्रहीष्यति ॥४॥ यद्यु वाऽएनमुत्तानमचैषीः । न वाऽउत्तानं वयः स्वर्गं लोकमभिवक्वति न वा स्वर्गं लोकमभिवद्व्यत्यस्वर्ग्य

उ ते भविष्यतीति ॥५॥ स ह्योवाच । प्राञ्चमेनमचैषं प्रत्यञ्चमेनमचैषं न्यञ्चमेनमचैषमुत्तानमेनमचैषꣳ सर्वा अनु दिश एनमचैषमिति ॥६॥ स यत्प्राञ्चं पुरुषमुपदधाति । प्राच्यौ सुचौ तत्प्राङ् चीयतेऽथ यत्प्रत्यञ्चं कूर्ममुपदधाति प्रत्यञ्चि पशुशीर्षाणि तत्प्रत्यङ् चीयतेऽथ यन्न्यञ्चं कूर्ममुपदधाति न्यञ्चि पशुशीर्षाणि नीचीरिष्टकास्तन्न्यङ् चीयतेऽथ यदुत्तानं पुरुषमुपदधात्युत्ताने सुचाऽउत्तानमुलूखलमुत्तानामुखां तदुत्तानश्चीयतेऽथ यत्सर्वा अनु दिशः परिसर्पमिष्टका उपदधाति तत्सर्वतश्चीयते ॥७॥ अथ ह कोषा धावयन्तः । निरूढꣳशिरसमग्निमुपाधावयाꣳ चक्रुस्तेषाꣳ हैक उवाच श्रीर्वै शिरः श्रियमस्य निरौक्षीत्सर्वज्यानिं ज्यास्यतऽइति स ह तथैवास ॥८॥ अथ हैक उवाच । प्राणा वै शिरः प्राणानस्य निरौक्षीत्क्षिप्रेऽमुं लोकमेष्यतीति स उ ह तथैवास ॥९॥ ऊर्ध्वो वाऽएष एतच्चीयते । यद्दर्भस्तम्बो लोगेष्टकाः पुष्करपर्णꣳ रुक्मपुरुषौ सुचौ स्वयमातृण्णा दूर्वेष्टका द्वियजूरेतःसिचौ विश्वज्योतिर्गृहीतव्येऽग्नेषाऽ कूर्मोऽथ ह्यस्यैतदेव प्रत्यक्षतमाꣳ शिरो यश्चितेऽग्निर्निधीयते तस्मान्न निरूढेत् ॥१०॥ ब्राह्मणम् ॥ ३ [५. ५.] ॥ पञ्चमोऽध्यायः [६५.] ॥ ॥

अथ हैतेऽरुणो । औपवेशौ समाजग्मुः सत्ययज्ञः पौलुषिर्मह्राशालो जाबालो बुडिल आश्वतराश्विरिन्द्रद्युम्नो भाल्लवेयो जनः शार्कराक्ष्यस्ते ह वैश्वानरे समासत तेषाꣳ ह वैश्वानरे न समियाय ॥१॥ ते होचुः । अश्वपतिर्वाऽअयं कैकेयः सम्प्रति वैश्वानरं वेद तं गच्छामेति ते ह्याश्वपतिं कैकेयमाजग्मुस्तेभ्यो ह पृथगावसथान्पृथगपचितीः पृथक्साकꣳस्रात्सोमान्प्रोवाच ते ह प्रातरसंविदाना एव समित्पाणयः प्रतिचक्रमिरेऽउप त्वायामेति ॥२॥ स होवाच । यन्नु भगवन्तोऽनूचाना अनूचानपुत्राः किमिदमिति ते होचुर्वैश्वानरꣳ ह भगवान्त्सम्प्रति वेद तं नो ब्रूहीति स होवाच सम्प्रति खलु न्वाऽअहं वैश्वानरं वेदाभ्याधत्त समिध

ऽपेता स्येति ॥ ३ ॥ स होवाचारुणमौपवेशिम् । गौतम कं त्वं वैश्वानरं वेत्थेति पृथिवीमेव राजन्निति होवाचोमिति होवाचैष वै प्रतिष्ठा वैश्वानर एतꣳ हि वै त्वं प्रतिष्ठां वैश्वानरं वेत्थ तस्मात्त्वं प्रतिष्ठितः प्रजया पशुभिरसि यो वाऽएतं प्रतिष्ठां वैश्वानरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेति पादौ त्वाऽएतौ वैश्वानरस्य पादौ तेऽस्नास्यतां यदि ह नागमिष्य इति पादौ तेऽविदितावभविष्यतां यदि ह नागमिष्य इति वा ॥ ४ ॥ अथ होवाच सत्ययज्ञं पौलुषिम् । प्राचीनयोग्य कं त्वं वैश्वानरं वेत्थेत्यप एव राजन्निति होवाचोमिति होवाचैष वै रयिर्वैश्वानर एतꣳ हि वै त्वꣳ रयिं वैश्वानरं वेत्थ तस्मात्त्वꣳ रयिमान्पुष्टिमानसि यो वाऽएतꣳ रयिं वैश्वानरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेति वस्तिस्त्वाऽएष वैश्वानरस्य वस्तिस्त्वाहास्यद्यदि ह नागमिष्य इति वस्तिस्तेऽविदितोऽभविष्यद्यदि ह नागमिष्य इति वा ॥ ५ ॥ अथ होवाच महाशालं जाबालम् । औपमन्यव कं त्वं वैश्वानरं वेत्थेत्याकाशमेव राजन्निति होवाचोमिति होवाचैष वै बहुला वैश्वानर एतꣳ हि वै त्वं बहुलं वैश्वानरं वेत्थ तस्मात्त्वं बहुः प्रजया पशुभिरसि यो वाऽएतं बहुलं वैश्वानरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेत्यात्मा त्वाऽएष वैश्वानरस्यात्मा त्वाहास्यद्यदि ह नागमिष्य इत्यात्मा तेऽविदितोऽभविष्यद्यदि ह नागमिष्य इति वा ॥ ६ ॥ अथ होवाच बुडिलमाश्वतराश्विम् । वैयाघ्रपद्य कं त्वं वैश्वानरं वेत्थेति वायुमेव राजन्निति होवाचोमिति होवाचैष वै पृथग्वर्त्मा वैश्वानर एतꣳ हि वै त्वं पृथग्वर्त्मानं वैश्वानरं वेत्थ तस्मात्त्वां पृथग्रथेनायोऽनुयान्ति यो वाऽएतं पृथग्वर्त्मानं वैश्वानरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेति प्राणास्त्वाऽएष वैश्वानरस्य प्राणास्त्वाहास्यद्यदि ह नागमिष्य इति प्राणास्तेऽविदितोऽभविष्यद्यदि ह नागमिष्य इति वा ॥ ७ ॥ अथ होवचेन्द्रद्युम्न भाल्लवेयम् । वैयाघ्रपद्य कं त्वं वैश्वानरं वेत्थेत्यादित्यमेव राजन्निति होवाचोमिति होवाचैष

वै सुतेजा वैश्वानरꣳ एतꣳ हि वै त्वꣳ सुतेजसं वैश्वानरं वेत्थ तस्मात्तवैष सु-तोऽग्यमानः पच्यमानोऽक्षीयमाणो गृहेषु तिष्ठति यो वाऽएतꣳ सुतेजसं वै-श्वानरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेति चक्षुस्त्वाऽएतद्वैश्वानरस्य चक्षुस्त्वाहा-स्यद्यदि ह नागमिष्य इति चक्षुस्तेऽविदितमभविष्यद्यदि ह नागमिष्य इति वा ॥८॥ अथ होवाच जनꣳ शार्कराक्ष्यम् । सायवस कं त्वं वैश्वानरं वेत्थेति दिव-मेव राजन्निति होवाचोमिति होवाचैष वाऽअतिष्ठा वैश्वानरꣳ एतꣳ हि वै त्व-मतिष्ठां वैश्वानरं वेत्थ तस्मात्त्वꣳ समानानतितिष्ठसि यो वाऽएतमतिष्ठां वैश्वा-नरं वेदाप पुनर्मृत्युं जयति सर्वमायुरेति मूर्धा त्वाऽएष वैश्वानरस्य मूर्धा त्वाहा-स्यद्यदि ह नागमिष्य इति मूर्धा तेऽविदितोऽभविष्यद्यदि ह नागमिष्य इति वा ॥९॥ तान्होवाच । एते वै यूयं पृथग्वैश्वानरान्विद्वाꣳसः पृथगन्नमघस्त प्रादेश-मात्रमिव ह वै देवाः सुविदिता अभिसम्पन्नास्तथा तु व एनान्वक्ष्यामि यथा प्रा-देशमात्रमेवाभिसम्पादयिष्यामीति ॥१०॥ स होवाच । मूर्धानमुपदिशन्नेष वा ऽअतिष्ठा वैश्वानर इति चक्षुषी उपदिशन्नुवाचैष वै सुतेजा वैश्वानर इति ना-सिकेऽउपदिशन्नुवाचैष वै पृथग्वर्त्मा वैश्वानर इति मुख्यमाकाशमुपदिशन्नुवाचैष वै बहुलो वैश्वानर इति मुख्या अप उपदिशन्नुवाचैष वै रयिर्वैश्वानर इति बु-बुकमुपदिशन्नुवाचैष वै प्रतिष्ठा वैश्वानर इति स एषोऽग्निर्वैश्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेदाप पुनर्मृत्युं जयति सर्वमायुरेति न हास्य ब्रुवाणं चन वैश्वानरो हिनस्ति ॥११॥ ब्राह्मणम् ॥४ [६.१.]॥

द्वयं वाऽइदमत्ता चैवाद्यं च । तद्यदोभयꣳ समागच्छत्यत्तैवाद्यायते नाद्यम् ॥१॥ स वै यः सोऽत्ताग्निरेव सः । तस्मिन्यत्किं चाभ्यादधत्याहितय एवास्य ता आहितयो ह वै ता आकृतय इत्याचक्षते परोऽक्षं परोऽक्षकामा हि देवाः ॥२॥ आदित्यो वाऽअत्ता । तस्य चन्द्रमा एवाहितयश्चन्द्रमसꣳ ह्यादित्यऽआद-

धतीत्यधिदैवतम् ॥ ३ ॥ अथाध्यात्मम् । प्राणो वाऽअत्ता तस्यान्नमेवाहितयोऽन्नꣳ हि प्राणोऽआदधतीति न्वग्नेः ॥ ४ ॥ अथार्कस्य । अग्निर्वाऽअर्कस्तस्याकृतय एव कमाकृतयो ह्यग्नये कम् ॥ ५ ॥ आदित्यो वाऽअर्कः । तस्य चन्द्रमा एव कं चन्द्रमा ह्यादित्याय कमित्यधिदैवतम् ॥ ६ ॥ अथाध्यात्मम् । प्राणो वाऽअर्कस्तस्यान्नमेव कमन्नꣳ हि प्राणाय कमिति न्वेवार्कस्य ॥ ७ ॥ अथोक्थस्य । अग्निर्वाऽउक्तस्याकृतय एव यमाकृतिभिर्ह्यग्निरुत्तिष्ठति ॥ ८ ॥ आदित्यो वाऽउक् । तस्य चन्द्रमा एव यं चन्द्रमसा ह्यादित्य उत्तिष्ठतीत्यधिदैवतम् ॥ १ ॥ अथाध्यात्मम् । प्राणो वाऽउक्तस्यान्नमेव यमन्नेन हि प्राण उत्तिष्ठतीति न्वेवोक्थस्य स एषोऽग्निविधोऽर्कविध उक्थविधो यत्पुरुषः स यो हैतमेवमग्निविधमर्कविधमुक्थविधं पुरुषमुपास्ते विदुषो हैवास्यैवं भ्रातृव्यो म्लायति ॥ १० ॥ प्राणेन वाऽअग्निर्दीप्यते । अग्निना वायुर्वायुनादित्य आदित्येन चन्द्रमाश्चन्द्रमसा नक्षत्राणि नक्षत्रैर्विद्युदेतावती वै दीप्तिरस्मिंश्च लोकेऽमुष्मिंश्च सर्वाꣳ हैतां दीप्तिं दीप्यतेऽस्मिंश्च लोकेऽमुष्मिंश्च य एवं वेद ॥ ११ ॥ ब्राह्मणम् ॥ ५ [६. २.] ॥ ॥

सत्यं ब्रह्मेत्युपासीत । अथ खलु क्रतुमयोऽयं पुरुषः स यावत्क्रतुरयमस्माल्लोकात्प्रैत्येवंक्रतुर्हामुं लोकं प्रेत्याभिसम्भवति ॥ १ ॥ स आत्मानमुपासीत । मनोमयं प्राणशरीरं भारूपमाकाशात्मानं कामरूपिणं मनोजवसं सत्यसंकल्पꣳ सत्यधृतिꣳ सर्वगन्धꣳ सर्वरसꣳ सर्वा अनु दिशः प्रभूतꣳ सर्वमिदमभ्यात्तमवाक्यनादरं यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरात्मन्पुरुषो हिरण्मयो यथा ज्योतिरधूममेवं ज्यायान्दिवो ज्यायानाकाशाज्ज्यायानस्यै पृथिव्यै ज्यायान्सर्वेभ्यो भूतेभ्यः स प्राणस्यात्मैष मऽआत्मैतमित आत्मानं प्रेत्याभिसम्भविष्यामीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्य एवमेतदिति ॥ २ ॥ ब्राह्मणम् ॥ ६ [६. ३.] ॥ ॥

उषा वाऽअश्वस्य मेध्यस्य शिरः । सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माश्वस्य मेध्यस्य द्यौष्पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वेऽअवान्तरदिशः पर्शव ऋतवोऽङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो माꣳसान्यूवध्यꣳ सिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमान्युद्यन्पूर्वार्धो निम्लोचन्नघनार्धो यद्विजृम्भते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वागहर्वाऽअश्वं पुरस्तान्महिमान्वजायत तस्य पूर्वे समुद्रे योनी रात्रिरेनं पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ वाऽअश्वं महिमानावभितः सम्बभूवतुर्हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वासुरानश्वो मनुष्यान्त्समुद्र एवास्य बन्धुः समुद्रो योनिः ॥ १ ॥ ब्राह्मणम् ॥ ७ [६. ४.]

नैवेह किं चनाग्रऽआसीत् । मृत्युनैवेदमावृतमासीदशनाययाशनाया हि मृत्युस्तन्मनोऽकुरुतात्मन्वी स्यामिति सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वं कꣳ ह वाऽअस्मै भवति य एवमेतदर्कस्यार्कत्वं वेद ॥ १ ॥ आपो वाऽअर्कः । तद्यदपाꣳ शर आसीत्तत्समहन्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रान्तस्य तप्तस्य तेजो रसो निरवर्ततााग्निः ॥ २ ॥ स त्रेधात्मानं व्यकुरुत । आदित्यं तृतीयं वायुं तृतीयꣳ स एष प्राणस्त्रेधाविहितस्तस्य प्राची दिक्शिरोऽसौ चासौ चेमावस्य प्रतीची दिक्पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा चोदीची च पार्श्वे द्यौष्पृष्ठमन्तरिक्षमुदरमियमुरः स एषोऽप्सु प्रतिष्ठितो यत्र क्व चैति तदेव प्रतितिष्ठत्येवं विद्वान् ॥ ३ ॥ सोऽकामयत । द्वितीयो मऽआत्मा जायेतेति स मनसा वाचं मिथुनꣳ समभवदशनायां मृत्युस्तद्रेत आसीत्स संवत्सरोऽभवन्न ह पुरा ततः संवत्सर आस तमेतावन्तं कालमबिभर्यावान्त्संवत्सरस्तमेतावतः कालस्य परस्तादसृजत तं जातमभिव्याददात्स भाणाकरोत्सैव

वागभवत् ॥४॥ स ऐक्षत । यदि वाऽइममभिमन्थ्ये कनीयोऽन्नं करिष्यऽइति स तया वाचा तेनात्मनेदꣳ सर्वमसृजत यदिदं किं चऽर्चो यजूꣳषि सामानि छन्दाꣳसि यज्ञान्प्रजां पशून्त्स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वाऽअत्तीति तददितेरदितित्वꣳ सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेद ॥५॥ सोऽकामयत । भूयसा यज्ञेन भूयो यजेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत्प्राणा वै यशो वीर्यं तत्प्राणेषूत्क्रान्तेषु शरीरꣳ श्वयितुमध्रियत तस्य शरीरऽएव मन आसीत् ॥६॥ सोऽकामयत । मेध्यं मऽइदꣳ स्यादात्मन्व्यनेन स्यामिति ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वमेष ह वाऽअश्वमेधं वेद य एनमेवं वेद ॥७॥ तमनवरुध्येवामन्यत । तꣳ संवत्सरस्य परस्तादात्मनऽआलभत पशून्देवताभ्यः प्रत्यौक्षत्तस्मात्सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभन्तऽएष वाऽअश्वमेधो य एष तपति तस्य संवत्सर आत्मायमग्निर्कस्तस्येमे लोका आत्मानस्तावेतावर्काश्वमेधौ सो पुनरेकैव देवता भवति मृत्युरेवाप पुनर्मृत्युं जयति नैनं मृत्युराप्नोति मृत्युरस्यात्मा भवति सर्वमायुरेत्येतासां देवतानामेको भवति य एवं वेद ॥८॥ ॥ शतम्५५०० ॥ ॥ अथ वꣳशः । समानमा सांजीवीपुत्रात्सांजीवीपुत्रो माण्डूकायनिर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो माहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कुश्रेः कुश्रिर्यज्ञवचसो राज्ञस्तम्बायनाद्यज्ञवचा राज्ञस्तम्बायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयम्भु ब्रह्मणे नमः ॥१॥ ब्राह्मणम् ॥८ [६.५.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या७५ ॥ षष्ठोऽध्यायः [६६.] ॥ अस्मिन्काण्डे कण्डिकासंख्या३६१ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणेऽग्निरहस्यनाम दशम काण्ड समाप्तम् ॥१०॥ ॥

EXTRACTS FROM THE COMMENTARY OF SÂYANÂCÂRYA.

षष्ठादिकाण्डचतुष्टये उखासम्भरणादि संचितकर्मात्मकमग्निचयनं साङ्गं निरूपितम्। तत्र कर्मणां भावनापुरःसरमनुष्ठाने फलविशेषो भविष्यतीति प्रतिपादयितुं दशमकाण्डमारभ्यते। षष्ठादिकाण्डचतुष्टयेन प्रतिपादितकर्मणो भावनोपयोगितया अनुष्ठानाङ्गयुक्ताकर्मप्रतिपादकतया च सर्वशेषत्वादस्य काण्डस्याग्निरहस्यमिति संज्ञा। रहसि भवं रहस्यम्। अग्निविषयं रहस्यज्ञानमित्यर्थः। तत्र अग्निशब्देन आहवनीयाधिकरणं सप्तपुरुषाद्येकशतपुरुषपरिमितं चितं क्षेत्रमभिधीयते इष्टकाभिरग्निं चिनोतीति श्रुतेः तथाग्निमारोहति अग्निं प्रोक्षतीति च आरोहणप्रोक्षणे स्थलस्यैवोच्येते तस्य चित्याग्नेरुपरि निधीयमान आहवनीयोऽग्निस्तत्कर्म चाग्निशब्देनोच्यते तद्विषयं पूर्वमनुक्तमग्निमानादिकं तद्रहस्यं च ध्यानभागोऽस्मिन्काण्डे वक्ष्यत इति अग्निरहस्यमिति नामधेयं युक्तम्॥ तत्राग्निं चिनुतऽइत्यनारभ्य-विहितस्य अक्तोपसदौ चिनोति प्रायणीयेन प्रचर्य सीरं युनक्ति पितो गार्हपत्यो भवत्यचित आहवनीयोऽथ राज्ञानं क्रीणातीत्येवमादिगुणयोगादग्नेः सोमयागाङ्गत्वेऽपि तस्मादेतानि सर्वाणि सहोपेयादग्निं महाव्रतं महदुक्थमिति समाम्नानात् महाव्रतस्य क्रतुविशेषे नियमदर्शनादन्यत्र प्रथमज्योतिष्टोमाग्निष्टोमसंस्थाव्यतिरिक्तोऽपीक्ष्यानुष्ठानम्। महाव्रतं नाम संवत्सरसाध्यस्य गवामयनस्योपाख्यमहः तत्राग्निचयनमहाव्रतसामबृहदुक्थानां नियमेन सहप्रयोज्यत्वात्तानि त्रीण्येवं सहभावीनीति वक्तुमग्निबृहदुक्थे प्रथममनुवदति अग्निरेष इति आद्यत्ववर्तिचयनोक्थयोर्ग्रहणेन तन्मध्यपतितं महाव्रतसामापि संगृहीतं भवति एषोऽग्निः संवत्सरात्मकः पुरस्तात्पूर्वं चीयते इष्टकाभिः अग्नेः संवत्सरात्मकत्वं षष्ठे काण्डे प्रतिपादितम् उपरिष्टान्मरुत्वतीयशस्त्रादनन्तरं महाव्रतसामोद्गात्रा गीयते तस्मादनन्तरं महदुक्थं नाम बृहतीसहस्रात्मकं शस्त्रं होत्रा शस्यते। संवत्सरात्मकाग्नेः पूर्वं चयनं बृहदुक्थस्यान्ते शंसनमिति यदुक्तं तत्प्रशंसितुमाह प्रजापतेरिति अग्निचयनं नाम प्रजापतिसंधानार्थमिति षष्ठे प्रपञ्चेन प्रतिपादितम्॥ १॥ प्रजापतेः संवत्सररूपतामाह॥ २॥ चीयमानाग्नेः संवत्सरप्रजापतिरूपतामाह। इष्टकाश्च किंचिदधिकैकादशसहस्रसंमिता उपधेयाः अत्र यावत्य इष्टका यजुर्मन्त्रैरुपहिताः तावत्य एव प्रजापत्यवयवात्मना प्रतिसंहिता इत्याह तदेतदत्रैवेति अत्रैवाग्नौ एतद्यजुश्चितं यजुर्भिर्मन्त्रैरिष्टकाभिश्चयनं कृतं तदत्र प्रजापतौ आत्मं प्रतिसंहितमवयवात्मना युक्तं संवत्सरसम्बन्धिनामहोरात्राणां पर्वरूपाणां यजुष्मतीनामिष्टकानां च संख्यासाम्यात्ताभिरेव कृत्स्नं प्रजापतिशरीरमापद्यत इत्यभिप्रायः॥ ३॥ एवं चित्यमग्निं प्रजापत्यात्मना स्तुत्वा स्तोत्रशस्त्रे स्तोतुमाह अथ यो ऽस्येति। अत्रोक्थशब्द स्तुतशस्त्रसाधारणः उत्तरत्र द्वयोरपि स्तूयमानत्वात् ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति ग्रहग्रहणं वा चमसोन्नयनं वा स्तोत्रप्रारम्भकालः) स्तुतमनुशंसतीति स्तोत्रादनन्तरं शस्त्रं शसनीयम् अत इदानीं तत्पूर्वभावि ग्रहग्रहणं प्रशंसितुं तत्र ग्रहे सेव्यमानं च संस्तौति तमस्य तं रसमिति। अनुयन्ति अनुगमयन्ति। लोके यथा अमुत्र विप्रकृष्टे प्रदेशे अद इष्टं मे मदीयमेकं वस्तु आहरिष्याम्यहमिति पूर्वं गच्छति यज्ञुर्मन्त्रः ऋक्सामाभ्यां रसानयनाय प्रथमं गतः तं रसं संवत्सरसाध्यगवामयनोपाख्यादिवस-

निष्पाद्ये महाव्रते आप्नुवन्ति ॥४॥ तस्मिन्निति निमित्तसप्तमी यजुषा ग्रहे गृहीते । तत्र प्रजननगायत्रबृहद्रथन्तरभद्राख्यानि (!) पञ्च सामानि विद्यन्ते । बृहदुक्थस्य गायत्रैष्णिहबार्हततृचाशीतित्रयात्मकत्वात्सर्वा ऋचो महदुक्थमित्युपपन्नम् ॥५॥ पूर्वं प्रजापते रसंयुक्तता स्यात् अन्यथा रसाभावे शरीरमदृढं भवेदितीमामाशङ्कां रसस्थापनेन व्युदस्यति ते यदेति । यस्मिन्काले स्तुवते उद्गातृप्रस्तोतृप्रतिहर्तारः यदा चानुशंसति स्तोत्रमनुलक्ष्य शस्त्रं पठेत् होता अथ शस्त्रादनन्तरं वषट्कृते शस्त्रयाज्यान्ते वषट्कारे कृते एनं गृहीतं स्तोत्रशस्त्राभ्यां संस्कृतं रसमस्मिन्नग्नौ प्रजापतिरूपे जुहोति तत्तेन होमेन एनं प्रजापतिं एष ज्ञतो रसोऽप्येति अपिगकृति संयुक्तो भवति । इदानीमस्मिन् चयनप्रदेशे महाव्रतं साम स्तुतं शेते तिष्ठतीति न पश्यन्ति । किं तु अग्निं चितमेव पश्यन्ति अग्निर्हि आत्मा स्थूलं शरीरम् तत्तस्मादेनं चित्याग्निमेतेऽउभे महाव्रतबृहदुक्थे रसो भूत्वापीतः अपिगकृतः एकीभवतः उभे च ऋक्सामे ग्रहग्रहणायशुरपीतः ऋक्सामाभ्यां पुरस्ताद्यजुर्मन्त्रेण ग्रहणात् ॥६॥ चित्याग्निं मिथुनरूपेण प्रशंसति । चिते चित्याग्नौ योऽग्निराहवनीयो निधीयते । अतः पञ्चमी चितिः तस्या उपरि निधीयमान आहवनीयोऽग्निरिति द्वयमेकं मिथुनम् । अयमात्मा स्थूलं शरीरं मिथुनरूप एव भवति ॥७॥ मिथुनत्वं नाम स्त्रीपुंसयुगलम् तत्करीरे प्रदर्शयति अङ्गगुष्ठा इति । स वषट्कारान्ते ज्ञतो रसः अनेन मिथुनेनात्मना शरीरेण एतं चितिद्वन्द्वमिथुनरूपमग्निमपिगकृति ॥८॥ उक्तमिथुनरूपेणाप्ययनप्रकार प्रदर्शितः पुनश्चित्याग्निं मिथुनरूपेण प्रस्तोतुं प्रकारान्तरेण मिथुनत्वं प्रतिज्ञानीते अप्यहैवमिति ॥९॥ मिथुनपरम्परावेदितुः फलमाह न ह वाऽइति । प्रकारान्तरेणाप्ययप्रकारं वक्तुमात्मनोऽन्नरूपत्वमाह अन्नं ह वैवेति अयमात्मा अन्नमेव तत्साध्यत्वात् उक्तार्थे मन्त्रं संवादयति (१०. १०७. ७.) ॥१०॥ भूमावग्निश्चीयते अत आधाराधेययोरभेदोपचारेण भूमेरग्नित्वं सम्पन्नम् । चितोऽग्निर्ऽगधान्तस्थविष्ठभागात्मना भावनीयः तस्योपरि निहित आहवनीयोऽग्निरन्तस्थाणिष्ठभागात्मना ध्येयः ॥११॥१॥१॥

पूर्वं महाव्रतयज्ञे सह प्रयुक्तानि अग्निचयनमहाव्रतसाममहदुक्थशस्त्राणि त्रीण्यपि पक्ष्याकाराणि अधिदेवं पृथिव्यन्तरिक्षद्युलोकात्मकानि अध्यात्मं मनःप्राणवाग्रूपाणि चेति द्वितीयब्राह्मणे प्रतिपाद्यते ज्योतिष्टोमयज्ञऽएवैतेषां त्रयाणां सम्पादनाप्रकारश्चोच्यते ॥ अग्निं चित्याग्निं व्यधत्त । तृतीयं पक्ष्याकारमात्मानं बृहदुक्थं बृहतोसहस्रात्मकं शस्त्रं व्यधत्त ॥१॥ यस्मादिमे त्रयो लोकाः सहासृज्यन्त तस्मादेतानि त्रीणि अग्निमहाव्रतबृहदुक्थानि सहानुतिष्ठेत् ॥२॥ उत्पद्यमानस्य पुरुषस्य प्रथममात्मा मध्यशरीरं सम्भवति ॥३॥ तत्र महदुक्थमाख्यायते तमां सम्पूर्णमुच्यते बृहतोसहस्रात्मकत्वात्सम्पूर्णोक्तिः । सम्यगुक्तौ युक्त्यन्तरमप्याह आत्मा ह्येति आत्मनस्तु सर्वाङ्गेभ्योऽपि स्थूलत्वात् ॥५॥ अधुना प्रथमसंस्थारूपज्योतिष्टोमाग्निष्टोमं महाव्रतयज्ञात्मना स्तोतुं तत्रैवाग्निचयनादित्रयस्योपादानाद्ब्रह्मवादिप्रश्नोत्तराभ्यां दर्शयति । सह युगपत् दुरुपापानि आप्तुमशक्यानि सर्वेषां महाव्रतयज्ञानुष्ठाने प्रयोगब्राह्मत्वेन ऋत्विक्सम्पादनादेः दुष्करत्वेन चानधिकारात् । तत्राग्निष्टोम इति पदेनाग्निस्तवनोक्तेरग्निचयनमुक्तामिति मन्तव्यम् ॥६॥ पक्ष्याकारस्य महाव्रतसाम्नो हि शिरःपक्षमध्यपुच्छात्मकाः पञ्चावयवाः शिरो गायत्रं रथन्तरं दक्षिणः पक्षः बृहदुत्तरः पक्षः भद्रमस्य पुच्छं राज्ञनसाम (!) त्यात्मेति तत्सर्वमग्निष्टोमे सम्पादयति तस्य वाऽइति ऋक्त्रयात्मकमेकं सूक्तं तादृशानि त्रीणि

सूक्तानि त्रिवृतोऽवयवा यस्य स्तोमस्य तदिदं त्रिवृद्बहिष्पवमानम् प्रातःसवनिकं तृचसूक्तत्रयात्मकं बहिष्पवमानं महाव्रतस्य शिरो भवति बहिष्पवमानमपि गायत्रीछन्दस्कैस्तृचैर्गातव्यम माध्यन्दिन(:) पञ्चदशस्तोत्रियात्मकः पवमानः तृतीयसवने सप्तदशस्तोत्रियात्मकः आर्भवः पवमानः पक्षस्थानीयौ । होत्रानुशंसनीयं प्रथममाज्यस्तोत्रम् सप्तदशस्तोत्रियात्मकं पृष्ठनामकं होतुः प्रथमं स्तोत्रम् तदुभयं मध्यात्मरूपम् । एकविंशत्यावृत्तिरूपं यज्ञा यज्ञा वोऽग्नय इत्यत्रोत्पन्नं साम पुच्छस्थानीयम् ॥७॥ आज्यं पृष्ठमित्युभयोर्मध्यात्मरूपतामाह । आज्यस्तोत्रं पञ्चदशस्तोत्रियात्मकम् । परिमादः परितो हर्षहेतवः महाव्रते क्रियमाणानि यानि परिमात्रामकानि सामानि तत्स्थानीयास्ताः ॥८॥ महदुक्थेऽपि गायत्रबार्हतौष्णिहतृचाशीतयः पक्षमध्यपुच्छात्मकाश्चावयवाः सन्ति तत्सर्वमग्निष्टोमे दर्शयति । प्रातरनुवाके गायत्र्यादीनि सप्त छन्दांसि धाय्यादिषु विराट्छन्दश्चाष्टमं होता शंसति । विराजस्त्रयस्त्रिंशदक्षराणि [५.४.८.] । ता महदुक्थगतास्तिस्रोऽशीतयः । बृहदुक्थे शिरःपक्षाद्यवयवाः सन्तीत्युक्तं तद्दर्शयति अथ यानि पञ्चचत्वारिंशदिति तत्र यानि पञ्चविंशतिसंख्यान्यक्षराणि तान्यात्मा मध्यशरीरम् अनेन शिरःपक्षद्वयपुच्छान्यवयवा अप्युक्ता वेदितव्याः अथ यान्यवशिष्टानि विंशतिरक्षराणि तदावपनं नाम महदुक्थशस्त्रस्योरुभागात्मकत्वेन (शं)सनीयेषु सूक्तेषु वने न वा यो न्यधायि चाकन् (१०.२१.१.) यो जात एव प्रथमो मनस्वान् (२.१२.१.) इत्यनयोः सूक्तयोर्मध्ये आयुष्कामयज्ञमानार्थं तासां कासां चिदृचां शंसनम् ॥१॥२॥१॥

अग्निचयनेष्टकाहेतवो मृदापश्च चित्याग्नेः पञ्चेष्टकाचितयः पञ्च पुरोषचितयः चित्युपस्थानमन्त्रश्च तत्र प्रजापतिरूपेणेष्टकाः पुरोषेष्टकाचितयः प्रजापतेर्मर्त्यामृतशरीरात्मना मन्त्रोपस्थान कृत्स्नशरीरसम्पादकत्वेन च तृतीयब्राह्मणे स्तूयते ॥ मर्त्यप्रजानां भक्षयितारम् ॥१॥ पञ्चम्या इष्टकाचितेरुपरि निहितायाः पञ्चम्याः पुरीषचितेरुपरि विकर्णीनामिकामिष्टकां स्वयमातृण्णानामेकां चोपधाय हिरण्यशकलैः सम्प्रोक्ष्य तत्राहवनीयाग्नेराधानं सप्तमी चितिरिति व्यवह्रियते अतः पञ्चमीसप्तमीभ्यामिष्टकाचितिभ्यां तन्मध्यस्थितायाः पुरीषचितेरमृतीकरणम् ॥७॥ चित्याग्नेर्न्यूनातिरेकपरिहाराय मन्त्रेणोपस्थानं देवाः कृतवन्तः ॥८॥ ऋग्गतमनुष्टुप्छन्दो वाग्रूपेण प्रशंसति धामछदग्निरित्यृगनुष्टुब्वाग्रूपा चतुष्पात्त्वसाम्यात् चत्वारि वाकपरिमिता पदानीति वाचः पादचतुष्टयमाम्नातम् । अत्तिमां पुरीषवतीं चितिं चित्वानेन मन्त्रेणोपस्थानम् ॥१०॥ यत्रिष्टपदवत्या । अनिरुक्तायास्पष्टाग्निलिङ्गया । निर्वक्तुमनर्हमनिरुक्तम् । यद्यप्यग्न्यादिपदं स्पष्टतया न प्रतीयते सूक्तस्याग्नेयत्वादस्या अप्याग्नेयत्वं प्रकरणादवसीयते ॥११॥३॥१॥

चतुर्थब्राह्मणे षट्संख्याका इष्टकाचितयः प्रजापतेर्मरणधर्मकस्थूलशरीरगतमज्जास्थिस्नावमांसमेदोऽसृक्त्वग्वाग्रूपत्वेन च एकैकस्या इष्टकाचितेरुपरि निधीयमानाया एकैकस्याः पुरीषचितेरमृतत्वसम्पत्त्यामत्तिमायाश्चितेरुपरि निहितविकर्णीस्वयमातृण्णेष्टकाहिरण्यशकलाहवनीयनिधानं प्रजापतेर्हिरण्यरूपत्वेन प्रणीतेऽग्नौ क्षूयमानाः समिधो देवानामन्नत्वेन स्तूयन्ते अथाग्निचितः पक्षिभक्षणवर्जनं व्रतं च प्रतिपाद्यते ॥ एतेनाग्निकर्मणा एतयावृता क्रियया एकधा एकप्रकारमात्मानं जरामरणधर्मरहितं कृतवान् ॥१॥ अग्निं चितवान्यज्ञमानोऽमुष्मिन्स्वर्गे लोके हिरण्यसमानवर्णः सम्भवति ॥१॥ चित्याग्निमभिलक्ष्य आहवनीयाग्नेः प्राङ्मुखत्वेन प्र-

णयनम्। संचिते इष्टकाचितेऽग्नौ। प्रणीतादूर्ध्वं प्रणीतेऽग्नौ। इत्येवम् ॥ ११॥ प्राणस्योर्ध्वगतित्वादेवेभ्यः प्राक् प्राचा ह्स्तेनोर्ध्वं होमं कुर्वन्ति। तस्मादग्नेः प्रणयनं देवानां प्राङ्मुखत्वेन ह्वनमित्यर्थः ॥ १२॥ ४॥ १॥

अग्निचयनकर्म अग्न्याधानाग्न्याधेयहविरग्निहोत्रदर्शपूर्णमासेष्टिपशुचातुर्मास्यसोमाश्वराजसूयादिसर्वयज्ञात्मकमिति पञ्चमब्राह्मणे स्तूयते यज्ञवीर्याणां मीमांसा च वक्ष्यते॥ सोऽग्निं चिकीर्षमाणः पशुं पुरुषाश्वादीन्पशून्नालभते आधानप्रथमकरणसाम्यात्पशुालम्भनमेवाधानरूपत्वेन स्तूयते ॥१॥ समानेन मन्त्रेण प्रातःकालीन एक एव मन्त्रः सायंतनोऽप्येक एव रात्रिमप्रयावमिति सायंतनो मन्त्रः अहरहरप्रयावमिति प्रातःकालीनो मन्त्रः। देवयजनं प्रत्यग्नेः प्रणयनम् अप्सूष्यभस्मावपनम्। एतेषु दर्शपूर्णमासादियज्ञेषु ये विष्णुक्रमास्तऽएव अग्निचयने क्रियमाणा विष्णुक्रमाः। यज्ञेषु यज्ञाप्यं तद्वात्सप्रं सूक्तम् ॥२॥ चितमग्निं यैः सामभी रथन्तरादिभिः परिगायति तत्सामज्ञातं महाव्रतम्। तत्र महाव्रतयज्ञे सामगानात्प्राङ्मात्रा पुरस्ताज्ज्ञप्यो मन्त्रोऽस्ति तदत्र शतरुद्रियम्। वसोर्धारा नाम चमकसूक्तेन (वाज्ञस° स° १८. १-२७.) ह्रूयमानाज्यधारा सा बृहदुक्थं बृहतोसहस्रात्मकं शस्त्रम्। गृहमेधाः सत्त्रयागाः ॥३॥ पशुबन्धः षट्सु-षट्सु मासेषु क्रियते। वसन्ते वसन्ते ज्योतिषा यजेतेति सोमयागः संवत्सरे विधीयते। उपहन्यात्पृथक्कुर्यात् ॥४॥५॥१॥

एवं पूर्वाध्यायेन महाव्रतयज्ञे अग्निचयनमहाव्रतबृहदुकथानि सह प्रयोक्तव्यानीत्युक्त्वा तानि च सर्वैरग्निष्टोमऽएवाप्तुं शक्यानीत्यग्निष्टोमगतसामशस्त्राण्येव महाव्रतसाममहदुकथात्मना स्तुवा चित्याग्निं प्रजापत्यात्मना प्रस्तुत्य पञ्चेष्टकाचितीः पुरीषचितीश्च प्रजापतेर्मर्त्यामृतशरीरात्मना प्रतिपाद्य हिरण्यशकलप्रोक्षणमाहवनीयस्थापनं हिरण्मयरूपवेन स्तुवा अग्निचितः वयोभक्षणवर्जननियमादनन्तरमग्निचयनस्य पुनर्मर्त्युञ्जयरूपं फलं तस्याग्निकर्मणः सर्वयज्ञात्मना स्तुतिरुक्ता। अथ द्वितीयेऽध्याये चित्याग्निविषयो विचारो वक्ष्यते। तत्र प्रथमब्राह्मणे चित्याग्नेः पक्षिरूपत्वं पक्षपुच्छयोः प्रमाणं च विधीयते॥ पुरुषादिपञ्चपशवः प्रजापतिः सर्वात्मकत्वात्तस्य। अनुपसमुह्य मध्यप्रदेशे अवष्टम्भमकृत्वा अनुपाधाय कांचिदाधारमकृत्वा यद्वा पक्षाभ्यां मध्यभागमनवष्टभ्य पक्षाग्राणि अविस्तीर्य। यदैव पक्षौ उपसमूहन्ते पक्षाभ्यां मध्यभागं समूहन्ते पक्षमूलभागं मध्यभागसमीपे संकोचयन्ति यदा च पक्षाग्राणि विसृजन्ति विकिरन्ति ॥१॥ चित्याग्नेः अङ्गुलिपरिमाणं दर्शयति ॥२॥ अरत्निपरिमाणं विधत्ते। वितस्तिर्द्वादशाङ्गुलः वितस्तिद्वयमरत्निः सा चतुर्विंशत्यङ्गुलिपरिमाणा तया मिमीते ॥३॥ उभयतः पक्षस्य पार्श्वद्वये अन्तरतः चित्याग्नेर्मध्यदेशे। व्युहति अन्ते विवर्धयति ॥४॥ नितरां (!) नामो नमनं निर्नामः। वितृतीयऽइति पक्षभागं त्रेधा विभज्य अन्तरे तृतीयभागे ॥५॥ उहति विकर्षति समूहति संकर्षति ॥७॥ अथ पञ्चेष्टकाचित्युपधानानन्तरमात्ममध्यपक्षद्वयेन ऋज्वालिखितदक्षिणावृत्सव्यावृतः सहस्रत्रयसंख्याका इष्टका उपधेयाः तदुपधानं प्रशंसति अथ रूपमिति उत्तममन्तिमम् अत्रान्तिमे रूपे एष सर्वोऽग्निः संस्कृतः इष्टकाभिश्चितः। ऋज्वालिखिताः ऋजुलेखा अकुटिलरेखाः इत्यालिखिताः इतिशब्दोऽभिनये एवमालिखिता इत्यनेन दक्षिणावृतः द्वितीयेत्यालिखितशब्देन सव्यावृतः ॥८॥ पञ्चमीमिष्टकाचितिमुपधाय अग्निं स-

प्तपुरुषसंमितं त्रेधा विभज्य मध्यमे तृतीयभागे ऋजुलेखा इष्टका उपदध्यात् ॥१॥ अग्नेस्त्रिवृत्वं षष्ठे प्रतिपादितम् (६. १. ३. १८.) ॥ ११ ॥ १ ॥ २ ॥

द्वितीयब्राह्मणे चित्याग्नेः सप्तपुरुषप्रमाणतां पक्षपुक्ष्योश्च अरत्निवितस्तिप्रमाणतां विधत्ते । वैशब्दः प्रसिद्धिद्योतकः (६. १. १. ३.) ॥१॥ स सुपर्णरूपः प्रजापतिः सप्तपुरुषसंमितोऽभवत् ॥५॥ समस्थितेन यजमानेनोर्ध्वबाहुना चित्याग्नेर्मानं कुर्यात् । एवं प्रपदेन पादाग्रेणावस्थानादुन्नतो भवतीति यत्प्रमाणमस्ति तत्परिश्रिद्भिः शर्कराभिराप्नवान्भवति ॥६॥ चित्याग्निः सार्धसप्तपुरुषप्रमाण इत्यापस्तम्बवचनम् अत्र तु सप्तपुरुषप्रमाणमेवोच्यते अधिकमर्धपुरुषप्रमाणं नोक्तमिति तद्विधत्ते अथ पक्षयोरिति पुरुषः पक्षारत्निक इत्युक्तम् पक्षद्वये अरत्निद्वयं पुक्षे वितस्तिरिति वक्ष्यते उभयं मिलित्वा सार्धमरत्निद्वयमर्धपुरुषप्रमाणं लभ्यते ॥७॥ मणिबन्धादारभ्य साङ्गुलिरग्रको वितस्तिः ॥८॥२॥२॥

प्राकृतस्य सप्तविधाग्नेः वैकृतेष्वन्यस्यैकशतविधाग्नेश्च वेदिमानं तृतीयब्राह्मणे विधत्ते ॥ या इयं वेदिः सौमिकी प्रसिद्धा सा सप्तविधस्याग्नेः मात्रा भवति । महावेदेर्मानं विधातुं प्राचीनवंशगतवेदेर्मानं सेतिकर्तव्यताकं विधत्ते स देवयजनमिति सोऽध्वर्युः देवयजनक्षेत्रं निश्चित्य पूर्वद्वारेण पत्नीशालां प्राग्वंशं प्रविश्य गार्हपत्यार्थं स्थाण्डिलं कृत्वा तत्क्षेत्रं जलेन सिञ्चेत् गार्हपत्यार्थं कल्पितात्प्रदेशात्सप्त प्रक्रमान्प्रागायतान्गृह्णीयात् पक्षारत्निः पुरुषो दशपदो द्वादशाङ्गुलं पदं प्रक्रमस्त्रिपदः सप्त प्रक्रमा गार्हपत्याहवनीययोर्मध्यम् ततः सप्त प्रक्रमेभ्यः प्राञ्चं व्यामं विमिमीते व्यामश्चतुररत्निप्रमाणः तस्य व्यामस्य मध्ये आहवनीयस्थानं कल्पयेत् एष आहवनीयो वक्ष्यमाणायाश्चयनमहावेदेर्गार्हपत्यो भवति । स प्रक्रमत्रयान्तप्रदेशो महावेदेः पश्चिमभागस्यान्तः ॥१॥ व्यामैकादशप्रक्रमकृतां वेदिं महावेदेर्योनित्वेन प्रशंसति सैषेति । एतस्या व्यामत्रयाया योनेर्गार्हपत्यचित्यात्मकमाग्नेयं जनितवन्तः गार्हपत्यादाहवनीयं महावेदिगतमाहवनीयचित्यात्मकमजनयन् ॥३॥ सप्तविधं सप्तपुरुषप्रमाणम् ॥४॥ अथ यथा सप्तविधस्य प्राकृताग्नेर्व्यामैकादशाः प्रक्रमाः एवमष्टविधनवविधादिपुरुषप्रमाणानामेकशतविधपर्यन्तानामग्नीनामेकादशप्रक्रमा प्राकृती वेदिः किं पुरुषसंख्यया वर्धयितव्या आहोस्विन्न वेति संशयं व्युदसितुं पूर्वपक्षयति तद्वैकऽइति । उत्तरा विधाः अष्टविधाद्येकशतपर्यन्ता अग्निप्रकारान्करिष्यन्त. । अष्टविधाद्यग्निमहावेदीनां योनिभूतवेदिवृद्धिं विना वृद्धिः कर्तुं न युक्ता । अग्निर्गर्भः स हि सप्तपुरुषप्रमाणमेव प्राकृतेऽष्टविधादीनामपि भवति ज्ञातस्यैव तस्याष्टविधादिरूपेण वृद्धिः अतस्तस्य योनिभूता वेदिर्व्यामैकादशप्रक्रममात्रैव । तस्मादष्टविधाद्येकशतविधान्तासु विकृतिषु प्राग्वंशगता वेदिर्गार्हपत्या चितिश्च प्रकृतिभूतसप्तविधैकपरिमाणैव कार्या अग्निक्षेत्रं महावेदीष्टका इत्येतत्सर्वमुत्तरोत्तरं विवर्धते ॥६॥ प्रथमं वेद्यन्तात्प्रागायतषट्त्रिंशत्प्रक्रमा रज्जुर्मिता तां सप्तधा विभज्य तस्या रज्ज्वाः सप्तसु भागेषु मध्ये प्राचस्त्रीन्भागानुपदधाति इष्टकाभिरुपदध्यात् अवशिष्टांश्चतुरो भागानुपधानार्थं न विनियुञ्जीत किं तु हविर्धानसदःप्रभृत्यर्थं परित्यजेत् ॥८॥ अथ चित्याग्नेः प्रकारान्प्रतिजानीते अथाग्नेरिति विधाः प्रकारा उच्यन्तऽइति शेषः । साधिमानानाम् पक्षपुक्ष्वाधिक्येन निक्षिप्तारत्निवितस्तिप्रमाणसहितानाम् ॥११॥ सप्तपुरुषाश्चतुर्दशभिर्गुणनेनाष्टानवतिः सम्पद्यते अत्र त्रिपुरुषप्रमाणयोगेन एकशतविधोऽग्निरुत्पद्यते ॥१२॥ एवमेकशतपुरुषप्रमाणं मध्यपक्षपुक्ष्वेषु दर्शयित्वा

प्राकृताग्निवत्पक्षपुच्छेष्वधिकं योजनीयं प्रमाणमाह ॥१३॥ प्राकृतसप्तविधे सप्तमस्य या संख्यासम्पत्तिरुक्ता अथैकः पुरुषोऽत्येतीत्यादिना (क° ५.) सा सम्पत्तिरितरेषु त्रयोदशसु पुरुषेषु द्रष्टव्या ॥१५॥ प्रकारान्तरेण सम्पत्तिमाह ॥१६॥३॥२॥

चतुर्थब्राह्मणे एकशतविधस्याग्नेः सर्वकामदूपत्वेन आदित्यात्मना स्तुतिः तस्य सप्तविधप्राकृताग्निसंख्यया सम्पत्तिप्रकारः (१-७.) सप्तविधस्य चैकशतविधसंख्यया सम्पत्तिश्च (८.) प्रदर्श्यते ॥१॥ अधिमासेन सह सप्तऽर्तवः । सप्तसु स्तोमेषु त्रिवृत्पञ्चदशसप्तदशैकविंशचतुर्विंशत्रिणवत्रयस्त्रिंशेषु । बृहद्रथन्तरवैरूपवैराजशाक्वरादिषु सप्तसु पृष्ठेषु । सप्तसु शीर्षण्येषु प्राणेषु । प्राच्यादयश्चतस्र ऊर्ध्वाचयौ द्वे सूर्यमण्डलमेव सप्तमी दिगिति सप्त दिशः ॥५॥४॥२॥

एवं चित्याग्नेर्वेदेश्च मानमुक्तम् अथ चयनविषयविचारो वक्ष्यते । तत्र कालं विधत्ते पौर्वाह्णिक्यापराह्णिक्योरुपसदोर्मध्ये चिनुयात् । तत्र साग्निकप्रकृतावग्नेष्टोमे तिस्र उपसदः साग्निकऽऐकाहिके क्रतौ तिस्र उपसदः द्वादशाहगवामयनतापश्चिदादिषु(!) अहीनसत्रसंवत्सरेषु द्वादशचतुर्विंशतिषष्ट्युत्तरत्रिशतसंख्या उपसद इति वक्ष्यते ताश्च त्रिवादिपक्षेष्वपि एकैकस्मिन्दिने पूर्वाह्णापराह्ण्योः उपसदः कार्याः ॥१॥ यावतीरुपसदः कुर्यात्तावद्भिः प्रवर्ग्यैश्चरितव्यम् उपसदः तापश्चिते चयने संवत्सरसंमिताः ॥३॥ उपसत्सु प्रवर्ग्यचरणं प्रशंसति अहोरात्राणि वाऽऽइति यतः संवत्सरमिता (?रश्चिता C. रश्चित्तः A.) उपसदः अतोऽहोरात्राणि तत्र चैकैकस्मिन्दिने द्वे-द्वेऽइति तयोरहोरात्रदूपत्वम् ॥४॥ न केवलमत्रैव तापश्चितीषु किं तु यत्र-यत्राधिका न्यूना वाऽउपसदः तत्र-तत्र प्रवर्ग्यचरणेनादित्यस्थापनं कृतं भवति । क्रतुविशेषे चतुर्विंशतिसंख्या उपसदः कार्याः ॥५॥ द्वादशाहे ॥६॥ सामान्येन षट् ॥७॥ प्रकृतौ तिस्रः ॥८॥ तत्रोपसदां मध्येऽनुष्ठातव्यस्य चयनस्येष्टकाचितिपुरीषनिवपनयोरनुष्ठानप्रकारा वक्ष्यन्तऽइति प्रतिज्ञानीते अथात इति । अग्नौ षडिष्टकाचितयः षट् पुरीषचितयः ताश्च तापश्चिते क्रतौ प्रतिमासमेकैका उपधेयाः तथा च वसन्तादिषु षट्स्वृतुषु यो-यः कामः तं सर्वमात्मानमभिलक्ष्य सम्पादितवान्भवति ॥१॥ असपत्नानामधेयाः पञ्च विराट्संज्ञकाश्चत्वारिंशदिष्टकाः प्रथमदिवसे उपदध्यात् स्तोमभागा नामेष्टका एकोनत्रिंशत् प्रतिदिवसमेकैकामिष्टकामुपदध्यात् मासान्ते सर्वासामेकवारं सादनं तया देवतयेति मन्त्रेण तथा ता अस्य सूददोहस इत्यनेनैतासां सकृदधिवदनम् ॥१३॥ नाकसत्पञ्चचूडादीष्टकाभिः षष्ठी चितिः सम्पादिता ॥१४॥ द्वादशस्य मासस्याष्टाविंशतिसंख्याकैरहोभिः पुरीषनिवपनम् तत उत्तमे द्वे ऽअहनी परिशिष्येते एकमेव सुत्यमहरावृत्त्या (?वृत्या) संवत्सरो भवतीति तदेकमहरतिरिच्यते (? तदेकमहरित्युच्यते A. तदेमद्धरित्यच्यते C1. तदेतदहस्त्रयमतिरिच्यते C2.) तानि त्रीण्यहानि पुरीषचितेरतिरिक्तानि भवन्ति तान्यहानि विशिनष्टि यदहरिति । तेष्वहस्सु यत्प्रवर्ग्योपसदामनुष्ठानं तेन तस्य संसपर्यीहस्पतिसंज्ञकस्य (?) त्रयोदशमासात्मकस्य सम्बन्धिष्वहोरात्रेषु आदित्यात्मकस्य सप्तमर्तोः स्थापनं कृतं भवति ॥१५॥ सुत्यानां संख्यां विधत्ते स संवत्सरमिति संवत्सरपर्यन्तं प्रसुतः सोमयागः स्यात् प्रतिदिवसमेकैकः सोमयाग इति षष्ट्युत्तरत्रिशतसंख्याकाः सोमयागा भवन्ति । तत्र तापश्चिते कर्तव्यमग्निविशेषं प्रदर्शयन्स्तौति

सर्वमेकशतविध इति अतः सर्वेण संवत्सरपर्यन्तं क्रियमाणेन एकशतविधाग्निमता सोमयागेन सर्वमाप्नवान्भवति । अतिरात्रसंस्थेन सर्वपृष्ठवता विश्वजिदाख्येन ॥ १६ ॥ ५ ॥ २ ॥

पूर्वं संवत्सरात्मकप्रजापतेरेकशतविधाग्नित्वमुक्तम् तस्यादित्यात्मकत्वं शतसंख्याकरश्मिभिर्मण्डलेनैकशतसंख्यापूरकेण सम्पन्नमिति चोक्तम् अधुना प्रकारान्तरेणैकशतसंख्याकत्वं सप्तविधाग्निना सम्पत्तिश्च वक्ष्यते चयनस्य अमृतत्वप्राप्तिः फलमिति च ॥ मलिम्लुचसाहित्येन त्रयोदश मासाः । द्वौ-द्वावृतूऽएकीकृत्य त्रय ऋतवः ॥ १ ॥ सप्तविधाग्नेकशतपर्यन्ताग्निचयनस्य सूर्यलोकः फलमिति दर्शयति तस्यैतस्येति एतस्य सवितुर्मण्डलस्य परस्ताद्बहिर्भागे सर्वकामपूर्णः मरणधर्मरहितो लोकोऽस्ति । यदेतदर्चिस्तेजो दीप्यते सोऽमृतलोकः ॥ ४ ॥ अर्चिषोऽमृतफलत्वं सवितृसम्बन्धित्वं च प्रदर्शयति तदेतदिति ॥ ५ ॥ एतदर्थज्ञातं पश्यन्ती विचारयन्ती वाक् दीर्घं तऽआयुरस्त्वित्यादिका वदति । शतायुता शतवर्षजीवनं लोक्या लोकहिता पुण्यलोकहेतुः यस्माच्छतायुर्जीवनं लोकहितं तस्मादायुषः पूर्वं स्वकामी स्वहितमिच्छन् स्वेच्छया न म्रियते तन्मरणमलोक्यममृतत्वरूपलोकसाधनं न भवति । शतादर्वाचीनेषु वर्षेषु मरणं पुण्यलोकसाधनं न भवति ॥ ७ ॥ ये विंशतिवर्षादर्वाचीनेषु वर्षेषु म्रियन्ते ते अहोरात्ररूपेषु लोकेषु सज्यन्ते सम्बध्यन्ते ॥ ८ ॥ एकदिनजीवनमेकरात्रिजीवनमपि बलयज्ञफलं किमुत शतं वर्षाणि जीवितवतः अमृतत्वप्राप्तिः । यः पुरुषः एनमुख्याग्निं संवत्सरपर्यन्तं बिभर्ति एष एकशतविधं चित्याग्निं विधातुं योग्यः । संवत्सरभृतमिव इवशब्दोऽप्यवधारणे वर्षपर्यन्तं भृतमेवाग्निं चिन्वीत ॥ १ ॥ विधाभिः पुरुषैरेकशतविधः । प्रतिचिति ऋतव्ये ॥ १० ॥ याः प्रथमाः प्रथमचितावुपहिताः प्राणभृतः पञ्चाशदिष्टकाः याश्चोत्तमचितावुपहिता विराड्नाकसत्पञ्चचूडाख्याः पञ्चाशत् ताः शतम् आसामाद्यन्तोपहितानां मध्ये या इष्टकाः उपधीयन्ते ताः सर्वा अपि एकशततमी विधा ॥ ११ ॥ उपधानमन्त्रसंख्ययाप्येकशतविधत्वम् । यजूंष्येव तेजो यस्याग्नेः स तथा यजुर्मन्त्रैरेकशतसंख्याकः ॥ १२ ॥ एवं सप्तविधस्यैकशतसम्पत्तिन्यायवदेकाहाहीनसत्त्रादिकाः अग्निहोत्रावसानाः सर्वेऽपि यज्ञा एकशतविधा भवन्ति एतदेव दर्शयति ऋग्भिर्यजुर्भिरिति एकस्मिन्पक्षे आदितः पञ्चाशदृचः अन्ते च पञ्चाशत्तन्मध्यवर्तिनः सर्वा अप्यृचः एकशततमी विधेति एवमेकस्य यज्ञस्यैकशतविधत्वमेवं सर्वेषां यज्ञानां यजुरादिभिरेकशतविधत्वमूह्यम् । तेषामेवमेकशतविधानां सर्वेषां यज्ञानां पूर्वमुक्तं फलमादिशति स य इति यज्ञेन-यज्ञेनेति वीप्सया सर्वैर्यज्ञैरपि उक्तं फलमाप्नोति ॥ १३ ॥ कल्कुषी मणिबन्धारत्नी । अक्तः अंसाग्रे वर्तमानं ग्रीवायामक्तवत्प्रोतमस्थि । एवमेकस्मिन्हस्ते पञ्चविंशतिः तथान्यस्मिन्हस्ते पादद्वये च । आत्मा मध्यदेहः ॥ १४ ॥ अध्यात्मं प्रकारान्तरेणैकशतविधत्वं निरूपयति ॥ १५ ॥ अधिदैवाधियज्ञाध्यात्मत्रयविषये संवत्सरचित्याग्निपुरुषाणां पञ्चविधत्वमाह ॥ १६ ॥ ६ ॥ २ ॥

चयने पक्वेष्टकाः किंचिदधिकैकादशसहस्रसंमिताः उपधेयाः । यद्यपि दर्भस्तम्बपुष्करपर्णरिक्तपुरुषाः स्रुगुलूखलपशुशीर्षकूर्मादयो यजुष्मदिष्टकामध्ये परिगणिताः तथापि ते पक्वेष्टका न भवन्तीति न तेषामत्र परिगणनम् तत्रोक्तसंख्यानां पक्वेष्टकानां मध्ये लोकम्पृणेष्टका अष्टशतोत्तरदशसहस्रसंख्याकाः शिष्टा यजुष्मत्यः । प्रथमा चितिः पञ्चाशदूनद्विसहस्रलोकम्पृणेष्टकायुक्ता एवमुत्तरास्तिस्रो द्वितीयाद्याः एवं चतसृणां चितीनां शतद्वयोनाष्टसहस्राणि पञ्चमी चितिः त्रिसहस्रर्जुसव्यदक्षिणोरोखावदिष्टकायुक्ता । ताश्च पञ्चम्यां चितावुपधेयाः त्रिस-

हस्रसंमिताः द्वितीयाध्याये (२. १. ८-११.) सुपर्णचित्याग्नेर्मध्यदक्षिणोत्तरभागत्रये लोमरूपत्वेन स्तुता इति तत्सहस्रत्रयं परित्यज्य अवशिष्टानां सप्तानां सहस्राणां शिरःप्रभृति पादपर्यन्तमुपहितानामेव शत्रुरूपत्वेन (? रशनुरू C1. शरोरू C2. शत्रुरू A.) स्थितानां गायत्र्यादिसप्तछन्दोवीर्यत्वेन स्तुतिः तृतीयाध्यायप्रथमब्राह्मणे क्रियते । यद्यप्यष्टौ शतान्यतिरिच्यते तथापि सहस्रत्वेन स्तोतुमयोग्यत्वात्तासां स्तुतिरत्र न क्रियते ॥ यद्वा अष्टमकाण्डे चरमचितौ छन्दस्या उपदधातीति (८. ६. २. १.) सप्तानां छन्दसामुपधानमुक्तं तेषां छन्दसां स्तुतिः क्रियते चित्याग्निरूपस्य प्रजापतेः प्राणो गायत्रीति । प्राणः प्राणसंचारस्थानं नासिकोच्यते शीर्षण्याः प्राणाश्चबार उक्ताः द्वावक्ष्णावाह य एवायमिति मनस्तु सर्वेन्द्रियसंगतमेकमिति सप्त प्राणाः पूर्वमपि प्रजापतिः सप्तभिः प्राणैः सप्तपुरुषात्मक एकः पुरुषः सृष्ट इति विवक्षया सप्तावयवा उक्ता इति तात्पर्यम् ॥१॥ एवं छन्दसां प्राणाद्यात्मकत्वमुक्तम् तत्र वियुज्यानुवदति प्राण इति ॥२॥ प्रजननः प्राण आलुभ्येदिति प्रजननशक्तिरहितो भवेत् एषोऽग्निर्न चोयेत नपुंसकस्य कर्मानधिकारात् ॥७॥ अवाङ् प्राण आलुभ्येदिति दुश्चिकित्समूलरोगाद्राजयक्ष्मादिगृहीतः पुरुषः कर्मणि नाधिक्रियते ॥८॥ यतः छन्दांसि परस्परमन्योऽन्यस्मिन्प्रतिष्ठितानि गायत्र्यां तावत्तस्याश्चतुर्विंशत्यक्षराणां सर्वछन्दःस्वनुगमात् तथा जगत्यामत्तिमछन्दसि सकलछन्दोऽक्षरसद्भावात् एवं मध्यमानि छन्दांस्यूह्यानि ॥१॥१॥३॥

एवं चित्याग्नेः चक्षुरादिसप्तावयवानां छन्दोमयत्वमुक्तम् अथ शिरोग्रीवादीनां छन्दोमयत्वं वेदवादिप्रश्नोत्तराभ्यां निरूपयति ॥१॥ यज्ञा यज्ञा वोऽग्नय इत्यत्रोत्पन्नं यज्ञायज्ञियम् तदेव छन्दः बृहतीत्यर्थः ॥८॥ विविधछन्दस्का ऋक् विछन्दाः ॥१२॥ आत्मविद्या आत्मनः उदीरितछन्दोदेवतासमष्टिरूपविराडात्मकस्य सम्बन्धिनः स्वस्य विद्या । स एतन्मयः अत्रोक्तानि (!) सवित्रादिदेवतास्वरूपः एतमात्मानमेवंविधं छन्दोदेवतारूपावयववयुक्तं शरीरमभिलक्ष्य सम्भवत्युत्पद्यते । अत्राग्नौ लोक्यतायै पुण्यलोकावाप्तये अन्या उक्तव्यतिरिक्ता आशीः प्रार्थना नास्ति ॥१३॥२॥३॥

तृतीयब्राह्मणेऽग्नेः सर्वदेवतासमष्टिरूपप्राणवाय्वात्मकत्वं (? वाद्या° AC.) धीरमहाशालनाम्नोर्महर्ष्योः प्रश्नप्रतिवचनाभ्यां प्रतिपाद्यते ॥ उपोत्ससाद समीपमभ्यागतः तस्मात्सकाशाद्विद्यां ग्रहीतुमुपसत्तिं कृतवान् ॥१॥ वागादिसर्वात्मकमग्निमज्ञानानो महाशालस्तस्माद्धीरात्सकाशादग्निं परिजिज्ञासितुमासनाडुपावरूढः भो धीर तं सर्वात्मकमग्निमधीहि अध्यापयेति उपसन्नः ॥५॥ अनुगकृति नश्यति । वायुमनुलक्ष्य उद्गाति नश्यति वायावधिकं वाति सति अग्निर्विनष्टो भवति । सा-सा देवता भूत्वा एलयति संचरति चेष्टते ॥८॥३॥३॥

उत्तरब्राह्मणे अग्निवाय्वादित्यपुरुषाणामोषधिवनस्पत्युदकचन्द्रपशूनां बङ्गविधनामव्यपदेश्यत्वेन स्तुतिः तत्रापि पुरुषस्य अर्करूपतया च स्तुतिरनेकैः प्रश्नप्रतिवचनैः प्रतिपद्यते ॥१॥ महान्ति सर्वेभ्योऽपि महान्ति वस्तूनि कः प्रजापतिः तस्मै हितानि कानि । अर्काः अर्चनीयाः ॥२॥ वेत्थार्कमिति श्वेतकेतुपित्रा पृष्टो होता स्वयमर्कस्वरूपमज्ञानानस्तस्मात्पितुः सकाशात्संजिज्ञासुराह अथ वै न इति ॥३॥ अर्ककोशयौ कोशयाकारे फले (A. पुटके C.) । अर्कमुद्गाविति अर्ककोशाग्रे विदलितौष्ठभागौ । धानापदेन अर्कवीजानि । अर्काष्ठीलामिति अर्ककोशमध्ये विस्तरेण वर्तमाना तूली (C. °ध्ये जिह्वास्तारणवर्तमानः । A.) ॥५॥४॥३॥ ॥

अत्र यजुस्तद्विधायकब्राह्मणयोर्निर्वचनपुरःसरमधिदैवाध्यात्मभेदेनार्थः (? त्मपत्रेनार्थं C1. त्मभेदेनार्थं C2. त्मप्रत्रवेनार्थ A.) मन्त्रब्राह्मणप्रसङ्गादुपनिषद् स्तुतिः तत्स्वरूपं तद्विदुषः फलमानन्दावाप्तिः फलं यजुषां चोपांश्वनुष्ठानं चेति पञ्चमब्राह्मणप्रतिपादितार्थसंग्रहः ॥ यजुषः शब्देन वायुं निर्ब्रूवन्नधिदैवमर्थमाह अयं वावेति ॥१॥ यजुर्मन्त्रः ऋक्सामयोः प्रतिष्ठितः मध्यस्थितः । अध्वर्युणा यानुषेण समानैरेव ग्रहैः प्रकृतिसोमयागगतैरैन्द्रवायवादिभिर्विकृतिष्वपि कर्म क्रियते सामगबहृवृचैः स्तुतशस्त्राणि स्तोत्रशस्त्राणि अन्यान्यन्यानि प्रकृतिगतव्यतिरिक्तानि क्रियन्ते यथा महाव्रतयज्ञे बृहद्रथन्तरयोर्विकल्पिकयोः प्राकृतयोः पृष्ठसाम्नोः स्थाने पञ्च सामानि निष्केवल्यस्थाने महदुक्थम् । यथा पूर्वाभ्यामश्वाभ्यां स्यवा (!) गवा आर्ता तौ विमुच्य पराभ्यामन्याभ्यां धावयेत्तादृक्तात् अन्यस्यान्यस्य स्तुतशस्त्रस्य कारणम् स्यवेति स्यन्दू प्रस्रवणे क्त्राप्रत्यये उदित्त्वादिडभावपक्षे (? उदिवादि उभावपक्षे Codd.) रूपम् (पा° ७. २. ५६.) छान्दसो नकारलोपः (पा° ६. ४. ३१.) ॥२॥ अथ ब्राह्मणापरनामधेयस्य पुरश्चरणशब्दस्य पूर्ववन्निर्वचनपुरःसरमधिदैवमर्थमाह अग्निरेवेति ॥३॥ प्रतिबुभूषति प्रातिकूल्यमाचरितुमिच्छति ॥९॥ न हि हिरण्यगर्भसूत्रात्मनः परस्ताड्ज्यायो वस्त्वस्ति तस्यैव सर्वज्ञगदाधारत्वात् ॥१०॥ अपूर्वं तस्मात्पूर्वो न विद्यते कारणरहितम् अपरवत्प्रष्टव्यज्ञगद्रूपापरवत् ॥११॥ यजुर्मन्त्रब्राह्मणप्रसङ्गादुपनिषदोऽर्थं तत्स्वरूपं वेदितुः फलं च दर्शयति तस्य वाऽइति रसः सारः । अवति तर्पयति भोगयोग्यं करोति अनुव्येति व्याप्नोति । अत उपनिषत्सकलं साङ्गं वेदं व्याप्नोति ॥१२॥ अस्य अन्नात्मकस्य यजुषस्तृप्तिरेव गतिः फलावाप्तिः यथा लोके अन्नेन तृप्तः पुरुषः गतः प्राप्तप्रयोजन-इव मन्यते । अस्य उपनिषदात्मकस्य रसस्य आनन्दो विज्ञानमेवात्मा सच्चिदानन्दैकरसमखण्डं वस्तु स्वरूपम् । एषा उपनिषत् अद्या अपरोक्षविद्या साक्षाद्ब्रह्मरसत्वात् ॥१३॥ उक्तं देवानामानन्दात्मत्वमुपजीव्य यजुरात्मकवायोरानन्त्यपरिज्ञानफलं पुरावृत्तकथनेन दर्शयति एतद्ध स्मेति एतदेवानामानन्दात्मत्वं यजूरसरूपाया उपनिषद आनन्दविज्ञानरूपं च विद्वान् । स वायुरपि स्वकीयानन्दलक्षणस्वरूपं वेदितुर्वाक्यमनतिलङ्घयन्निदानीमपि तथैव इतस्ततो वाति वायुवशीकरणं तस्य फलम् ॥१४॥ एवं वायुप्राणरूपत्वेन स्तुतस्य यजुष उपांश्वनुष्ठानं विधत्ते तदेतदिति । निर्वक्तुमनर्हमनिरुक्तम् । निर्ब्रूवन्नमुच्चैः पठन्नम् ॥१५॥ अग्नावुपांशु यजुषा कर्तव्यानि संगृह्णाति उपांशु यजुषेति । भृतं पक्वं निष्ठितं प्रयोगार्हमवदानार्हम् । आविदं प्रसिद्धिं गच्छति अयं महान्पुरुष इति ॥१६॥५॥३॥

उत्तरब्राह्मणे आहवनीयाग्निरूपप्रजापतेः (? ग्निरूपप्रक्षिपतेः C1. ग्नेरुषाप्रक्षेपतः C2.) चित्याग्निमन्त्रत्वेन परिकल्प्य (? कल्प्य Codd.) तयोर्भोक्तृभोग्ययोः अग्निचित्ययोर्द्वन्द्वस्यार्क्यमहाव्रतोक्थनामभिर्ऋग्यजुःसामवेदत्रयपरिभाषासिद्धैर्व्यवहार्यत्वेन स्तुतिः अथ रुक्मपुरुषयोरिष्टकापुरीषचित्योश्चित्याहवनीययोश्चेन्द्राग्न्यात्मना स्तुतिः पश्चात्प्रजापतिरूपाहवनीयस्य तत्र क्षयमानमहाव्रतोयग्रहरसस्य यद्द्वन्द्वं सम्पद्यते तस्यार्क्यव्रतोक्थनामभिर्व्यपदेश्यत्वम् कलाभिः सप्तदशात्मकस्य चित्याग्निरूपस्य प्रजापतेः सप्तदशात्मकः सोमयागोऽग्नं तयोरधिदैवमादित्यचन्द्रात्मना अध्यात्मं प्राणान्नात्मना च स्तुतिः त्रिष्वपि (? स्तुतिर्विष्वपि Codd.) स्थानेष्वर्क्यादिनामत्रयप्रतिपाद्यत्वमिति प्रतिपाद्यसंग्रहः ॥ अथादौ प्रजापतेर्भोक्तृत्वमाहवनीयरूप-

पवमाह प्रजापतिमिति । उख्योऽग्निः संवत्सरं धारयितव्यः पश्चादिष्टकाचयनम् ॥१॥ यथा पूर्वं देवैर्विस्रस्तस्य प्रजापतेरुखायां रेतोरूपेण सेकः तस्मै समुत्पन्नाय प्रजापतये चित्याग्नेरन्नत्वेन संस्कारः तस्य चान्नस्य शरीरेण परिहितत्वादात्मत्वम् तत्सर्वमधुनातनानुष्टातरि योजयति तथैवेति आत्मानं स्वरूपम् ॥२॥ चित्याग्नेरुपरि उख्याग्निधानमन्त्रो वौषडिति श्रूयते तस्याक्षरद्वयस्य यथाक्रममग्निचित्याग्निपरतां दर्शयति तमिति वौगिति पूर्वाक्षरेण एषोऽग्निरुच्यते वक्तोर्वौगिति पदनिष्पत्तिरूह्या षडित्यक्षरेण षट्चितिकोऽग्निः तथा सति वौषडित्यस्यायमर्थः सम्पद्यते अस्माऽआहवनीयाग्नये षट्चितिकमग्निमन्त्रं कृत्वा आत्मसंमितमपि दधाति कृतवान्भवति ॥३॥ अग्निचित्याग्निद्वन्द्वस्य ऋग्यजुःसामवेदत्रयपरिभाषासिद्धोक्थार्क्यमहाव्रतनामभिर्व्यपदेश्यत्वं तन्नन्नामावयवनिर्वचनेन दर्शयति । योऽग्निराहवनीयोऽत्र षट्चितिकेऽग्नावाह्रियते निधीयते स एषोऽर्क आदित्यः यस्योपरि निहितः स हि तस्यान्नं क्यम् कः प्रजापतिः तस्मै हितमन्नं चित्याग्निरूपं क्यं भवतीति कृत्वोक्तम् अत अर्कः क्यमिति पदद्वयं यजुष्टो यजुर्वदे अर्क्यमिति श्लिष्टोच्चारणेन व्यवस्कृतमित्यर्थः । सामतः सामवेदे । ऋक्तः ऋग्वेदे । बृहतीसहस्रस्योक्थमिति संज्ञा । तदेतदेकमग्निचित्याग्निद्वन्द्वं सत् त्रेधा वेदत्रये अर्क्यमहाव्रतोक्थनामभिराख्यायते ॥४॥ एतदग्निद्वयेन चेन्द्राग्न्यात्मना (?) स्तोतुमादावेन्द्राग्निसृष्टिमाह ॥५॥ प्रथमेष्टकाचितावुपधेयौ रुक्मपुरुषावेन्द्राग्न्यात्मना स्तौति ॥६॥ इष्टकापुरोषचितिद्वयमिन्द्राग्न्यात्मना स्तौति । ऐष्टकमिष्टकासमूहः ॥७॥ ऐकरूप्यमिष्टकासम्पत्त्या अक्षरसम्पत्त्या चोपपादयति ॥८॥ अक्षरस्यैकत्वं मन्त्रसंवादे दृढयति । इन्द्राग्न्योरवयवशो ब्रह्मक्षत्ररूपत्वात्तदुभयरूपस्याग्नेस्तत्तादात्म्यं तयोर्विश्वदेवात्मकत्वाच्च विड्रूपता इन्द्रः सर्वदेवानां परमः अग्निरवमः तयोराद्यत्ववर्तिनोर्ग्रहणेन सर्वे देवाः संगृहीता इति तयोस्तदात्मकत्वम् विश्वदेवानां विड्रूपमिन्द्रप्रजात्वात् अतस्तदेकमग्न्यात्मकमक्षरं ब्रह्मक्षत्रवैश्यरूपम् ॥९॥ उक्तं वर्णत्रयात्मकत्वमुपजीव्य कर्मणः) श्रीयशोऽन्नादबलक्षणं फलं पुरावृत्तकथनेन दर्शयति । एतदग्न्यात्मकमक्षरं वर्णत्रयात्मकं ज्ञानानः । सायकपुत्रः । यदुभयथेति तस्यार्थं श्रुतिः स्वयमाह एषोऽग्निः श्रीरूपः तद्धेतुः यशोऽन्नादरूपः तद्धेतुः ॥१०॥ उक्तं श्रीयशःप्रभृतिकं फलं संवादेन दृढयति ॥११॥ अथ प्रजापतिरूपाहवनीयाग्नेः तत्र क्ष्यमानमहाव्रतोयग्रहस्तस्य च यद्द्वन्द्वं तस्य पूर्ववदर्क्यमहाव्रतेोक्थनामत्रयेणाभिधेयत्वं वक्तुं ग्रहग्रहणं स्तुतशस्त्रपठनं तस्य रसस्य वषट्कारान्ते होमं च क्रमेण दर्शयति । संवत्सरान्ते संवत्सरसाध्यगवामयनादौ [गवामयनोपाख्यदिवसे] ॥१२॥ प्रथमाध्याये (१. १. ५.) व्याख्यातम् ॥१३॥ एषोऽग्निराहवनीयः । इदं महाव्रतग्रहस्तं मधुरादिभेदेन षट्प्रकारमन्नम् । अस्मै प्रजापतिरूपायाग्नये ॥१४॥ पूर्वमाहवनीयाग्नेरर्कत्वमुक्तम् (क॰ ४.) अत्र तु विशिष्टस्य चित्याहवनीयस्यार्कत्वमिति विशेषः । तदिदमग्निरसद्वयमेकं सत् ॥१५॥ अधियज्ञं प्रजापतिसौम्याध्वर्योर्द्वन्द्वस्य अधिदैवमादित्यचन्द्रद्वयस्य अध्यात्मं प्राणान्नद्वयस्य चार्क्यादिनामत्रयभाक्त्वं (? °भाक्त Codd.) प्रदर्शयिष्यते ॥ स एष प्रजापतिरूपोऽग्निः संवत्सरः सप्तदशावयवः । आदौ युञ्जानः प्रथमं मन इत्यादिभिर्यजुरष्टाभिर्ऋग्भिः क्रियमाणानि सावित्राण्यष्टौ तदेकमग्नेरर्धम् षोडशगृहीतस्यार्धेन य इमा विश्वा भुवनानीत्यष्टभिर्ऋग्भिरेकाकृतिः अवशिष्टेनार्धेन चक्षुषः पिता मनसेत्यष्टभिरपरा अतोऽष्टशो विगृहीतत्वादष्टावेव वैश्वकर्मणानि तदपरमर्धम् तयोः सावित्रवैश्वकर्मणहोमयोर्मध्ये

उखासम्भरणादि यत्कर्म क्रियते स एष सप्तदशोऽग्निः प्रजापतिः ॥१६॥ षोडशकलः पुरुष इति मनुष्यसंकेते देवैः षोडशात्मकः पुरुष इति व्यवह्रियते तान्येवात्मानि शरीरे दर्शयति ॥१७॥ यदा ताः कलाः अन्नमाहर्तुं न ध्रियन्ते न समर्थाः तदा प्राण एताः कलाः भक्षयित्वा देहान्निर्गच्छति तस्माल्लोक क्षुधितस्य पुरुषस्य तृप्रमिव भवति सं[दीप्त]तमिव (?) तृप्कि (!) संदीपे (धा° ३४. १३.) इति धातुः बुभुक्षितशरीरे धातुसंक्षयेण सदा व्यग्रो दृश्यते । यतः प्राणैरक्ष्यते तस्माल्लोके उपतापो ज्वरादितः कृशो भवति ॥१८॥ सप्तदश ऋत्विक् न कर्तव्यः सप्तदशसंख्यापूरकस्तु सोमरसपुरोडाशाज्याङ्गत्यात्मकः ॥२१॥ अत्रार्कशब्दो मुख्यः ॥२२॥ अधिदैवाध्यात्मद्वये समुदितमर्थमुपसंहरति स एष एवेति एष संतापक आदित्यो ऽधिदैवतमयं प्राणोऽध्यात्मम् ॥२३॥६॥३॥ [१॥४॥]

चतुर्थाध्याये प्रजापतिरूपचित्याग्नेः कालमन्त्रात्मकत्वं चयनफलं च मृत्युरूपत्वं सकलमुपधेयानामिष्टकानां संख्या तद्विभागश्च प्रतिपाद्यते ॥ तत्र प्रथमब्राह्मणेऽग्नेरिष्टकानां च संवत्सरतदवयवाहोरात्रमुहूर्तात्मकत्वं मन्त्ररूपत्वं च स्पष्टमाम्नायते । अथ प्रथमं संवत्सररूपप्रजापतेरग्नीषोमात्मकत्वमाह । तच्चन्द्रमसो वचनमुत्तरत्र प्रजापतेश्चन्द्रोक्तौ (क° २७.) उपयुज्यते ॥१॥ व्यौहत् व्यभजत् । परिश्रितामपि तया देवतयाङ्गरस्वदिति मन्त्रेणोपधानादिष्टकाशब्दव्यवहार्यत्वम् ॥४॥ सप्तधाविभागं न कृतवान् ॥८॥ द्वित्रिचतुरादयः चतुर्दश व्यूहाः पूर्वस्त्वेक इति पञ्चदश व्यूहाः ॥१७॥ एकस्याहोरात्रस्य षष्टिर्घटिकाः ते द्वे-द्वे एकैको मुहूर्तः क्षुद्राः अल्पपरिमाणाः ॥१८॥ सूर्य एव प्रथमं सर्वं वस्तु पचति पश्चादयमग्निरमुना सूर्येण पक्वां पचति । पक्वास्य पक्तेति हि भरद्वाजेनाग्निर्व्यवस्कृतः । अतोऽग्निसूर्ययोः प्रजापत्यात्मनोरभेदादहोरात्रमासादिभिः जगत्परिपाकनिमित्तत्वात्सूर्यगत्यधीनाः संवत्सराद्ययवा अहोरात्रसम्बन्धिनो मुहूर्ता एव चित्याग्ययवयवभूतलोकम्पृणेष्टका इति तात्पर्यार्थः ॥१९॥ पर्यैक्षत् (°क्त् pr. manu) अन्वियेष व्याप्तुमिति शेषः । अस्ति सर्वदा विद्यते । यच्च मर्त्यं मरणधर्मकं मनुष्यादि तदप्येतत्त्रयीरूपमेव । अतो मर्त्यामृतात्मकं सर्वं जगदत्रान्तर्भूतम् ॥२१॥ एवं त्रय्याः अष्टशताधिकदशसहस्रपङ्क्तिरूपत्वसम्पादनया संवत्सरस्य प्रजापतेर्मुहूर्तसंख्यासाम्येन त्रयीशरीरकत्वमुक्तम् ॥२४॥ पङ्क्तिश्चत्वारिंशदक्षरा पङ्क्तिद्वयमेकाशीतिर्भवति । अत उभयोः संख्यासाम्यान्मुहूर्तानामशीत्यात्मना सम्पत्तिः ॥२५॥ उक्तरीत्या प्रजापतेः संवत्सरात्मत्वं स्पष्टमुक्तमिति दर्शयति । त्रयीविद्यायां छन्दःस्तोमप्राणदेवाः सप्तेति प्रागुक्तम् (क° २१.) तन्मयमात्मानं सिक्तवान् । परोऽन्यः आत्मा द्वयीयसि दूरतरे मासतिथ्यात्मके वेदत्रयस्य त्रिंशद्भाविभागे चतुर्विंशतेर्दूरतरे ॥२६॥ यदुक्तं प्रजापतेः संवत्सरस्याहोरात्रमुहूर्तात्मकत्वं वेदत्रयरूपत्वं तत्सर्वं चित्याग्नौ विभज्य प्रजापतिकर्तृकोपधानवचनव्याजेन दर्शयति । परिश्रितं शर्कराम् । एकस्याः परिश्रितो यजुष्मत्याश्चोपधानेन रात्रिमहश्च त्रिंशल्लोकम्पृणोपधानेन तद्गतांस्त्रिंशन्मुहूर्तांस्त्रिंशतमशीतीश्चोपहितवान् एवं षष्ट्युत्तरत्रिशतसंख्याकानां परिश्रितां यजुष्मतीनां चोपधानेन संवत्सरगतानहोरात्रान् लोकम्पृणोपधानेन सर्वान्मुहूर्तान्सकलाशीतीश्च चित्याग्नावुपहितवान् । एवमग्निं चितवतः प्रजापतित्वं निदर्शयति स एतन्मय इति ॥७॥ रुक्मपुरुषात्मकादेतस्मात्सूर्यादुपर्यध्यचीयत अत एतस्मिन्नेवाधारे सर्वोऽग्निश्चितः ॥२८॥५ [२] ॥४॥

अथ संवत्सररूपप्रजापतेर्मर्त्यत्वनकरूपत्वं तद्रूपोपासनस्य फलम् अग्निचयनस्यामृतलक्षणं फलं परिश्रित्यज्ञुष्मतोलोकम्पृणेष्टकानां संख्या द्वितीयब्राह्मणे प्रदर्श्यते ॥१॥ गक्ति अन्तर्भावितण्यर्थः गमयति ॥२॥ शरीरेण व्यावृत्य शरीरं विहाय ॥३॥ धिष्ण्या अष्टौ होतृप्रशास्तृब्राह्मणाछंस्यक्षावाकपोत्नेतॄणां षट् आग्नीध्रीयमार्जालीयौ द्वौ ॥१३॥ दर्भस्तम्बस्य तूष्णीमुपधानात्कथं यज्ञुष्मदिष्टकानाम्ना व्यपदेशः सत्यम् अस्योपरि समन्त्रहोमकरणादस्य यज्ञुष्मत्वमुच्यते ॥१४॥ अष्टादश स्तोमाख्या इष्टकाः । दश स्पृतः सहस्र सहस्यश्चेति द्वे ऋतव्ये मिलित्वा अथ द्वादशेत्युक्तम् । सप्तदश सृष्टयः ॥१७॥ सुपर्णचिदसीति वषट्कारान्तमन्त्रेण निहितोऽग्निराहवनीयः इष्टका ॥१८॥ प्रतिमा प्रतिकृतयः । इन्द्रं विश्वः अवीवृधन्निति मन्त्रेण पुरीषमुपधीयते अतस्तस्यापि यज्ञुष्मत्वाद्यज्ञुष्मतीष्विष्टकासु मध्ये परिगणनम् ॥११॥ के चन आहवनीयऽएव सकला अपि लोकम्पृणा उपधेया इत्याशङ्क्यः । सम्पदं लोकम्पृणानां मुहूर्तरूपाणां सम्पत्तिम् । एते अग्नयः गार्हपत्यधिष्ण्यलक्षणाः । इहाहवनीयेऽग्नौ ॥२१॥ एतानि गार्हपत्यधिष्ण्यलक्षणानि रूपाणि । पृश्न्यश्मेति यज्ञुष्मतीमध्ये परिगणितः तस्याग्नीध्रीयेऽग्नावुपधानम् तं सम्पश्यति यज्ञुष्मतीषु मध्ये सम्भूय जानाति तद्वदितरधिष्ण्यगता अपि लोकम्पृणाः कथं न पश्येत् अन्यत्र स्थितानामपि पृश्न्यश्मवत्सम्पश्यत्यन्तर्भावो न विरुध्यते । येनाग्निना निर्ऋतिं पाप्मानमपहते स एकादशोऽग्निः एकादशसंख्यापूरकः ॥२२॥ यद्येवमन्यचितानामिष्टकानां सम्भूय परिगणनं तर्हि निर्ऋतिदेवत्यानां तिसृणामिष्टकानामप्यत्रैव संदर्शनं कर्तव्यम् तद्दूषयति आज्ञप्तिभिरिष्टकाः सम्पद्यन्ते नात्राज्ञप्तिरस्तीति इष्टकात्वमेव नास्ति कुतस्तासामिष्टकामध्ये परिगणनम् ॥२३॥ वीर्यं वीर्यरूपाः । अनतिरिक्तं वै पुरुष (!) इति पुरुषस्य वीर्यमनधिकम् ॥२४॥२ [३] ॥४॥

उत्तरेणाध्यायद्वयेन अग्निविषया उपासना वक्ष्यते । तत्र प्रथमब्राह्मणे संवत्सररूपाग्नेः तदवयवानां च सहस्ररूपत्वेनोपासनं तत्फलं च प्रदर्श्यते ॥ सहस्रप्रसङ्गं प्रजापतिवृत्तान्तेन प्रस्तौति । विज्ञिहासन् त्यक्तुमिच्छन् ॥१॥ सर्वोऽत्यपवत अत्यक्षरत् बङ्ग संक्षरितः ॥३॥ साहस्रीः सहस्रसंमिताः । मुहूर्तभाजमिति लोकम्पृणाभिप्रायम् । मैथुनान्तव्यापारेषु सर्वेष्वपि एतदुपासनं कर्तुं युज्यते ॥४॥ व्यर्थः श्रमो न भवति ॥५॥१॥५॥ [४॥४॥]

एवं प्रजापत्यात्मकसमष्टिरूपोपासनामभिधाय व्यष्टिरूपाग्निविषयामुपासनां (षष्टि° Cod.) प्रतिज्ञानीते अथात इति उपनिषदां रहस्यार्थानामुपदेशाः । चित्याग्निम् ॥१॥ संवत्सरे शिरःपक्षपुच्छावयवाग्न्युपासनां दर्शयति ॥२॥ स्वयमातृष्णा नाम सहस्रकृद्युक्तपाषाणेष्टकाः ताश्च तिसृषु प्रथममध्यमोत्तमासु चितिषूपधीयन्ते ॥३॥२॥५॥ [५॥४॥]

पूर्वमादित्योऽग्निरित्युक्तम् त(त्र) त्रयीमयादित्येऽग्न्युपासनास्मिन्ब्राह्मणे वक्ष्यते ॥ अथ तस्याग्नेस्त्रयीमयत्वं दर्शयति । उपनिषद्रहस्यं स्वरूपम् ॥१॥ तेनाग्निस्त्रेधा विहितः अग्निवायुसूर्यात्मनेत्यर्थः । पुंलिङ्गशब्दाभिधेयाः स्तोमाख्याः । नपुंसकशब्दाभिधेयाः शीर्षाख्याः ॥२॥ वाचः स्त्रीलिङ्गत्वं स्फुटम् ॥३॥ एवमग्नेर्वाग्रूपत्वमुक्तम् वाच आदित्यरूपत्वं चाह । अतः सूर्यादूर्ध्वं चयने मृत्युकर्तृकाक्रमणस्याभावात्पुनर्मृत्युजयः फलं भवति तत्कथं सूर्यादूर्ध्वं चयनमसम्भवं परोहतत्वादित्याशङ्क्य तत्राप्युपायं दर्शयति विद्ययाह वाऽइति यद्यपि वस्तुस्थित्या आदित्यस्योपरि चयनाभावः तथापि ज्ञानेनोर्ध्वं चयनं सम्पादयितुं शक्यते ॥४॥ तद्विशदय-

ति । सूर्यमण्डले वाव त्रीणि विद्यते ज्योतिर्मयमण्डलमर्चीष्यपि तदन्तर्वर्ती पुरुष इति चयनेऽपि वेदत्रयमस्ति तत्र मण्डलमेव ऋग्रूपवेनोपासनीयमर्चिरिव सामरूपवेनान्तर्वर्तिपुरुष एव यजूरूपवेन ॥५॥३ [१] ॥५॥

सूर्यमण्डलार्चिःपुरुषत्रयस्याधिदैवाधियज्ञाध्यात्मपरवेनार्थ उच्यते । तत्राधिदैवमयमर्थः चयनगतबृहदुक्थमहाव्रताग्नित्रयं क्रमेण मण्डलार्चिःपुरुषरूपवेनोपासनीयमिति अधियज्ञमयमर्थः चयनगतरुक्मपुष्करपर्णाहिरण्मयपुरुषाणां मण्डलादित्रयम् एवं दक्षिणाग्निगतशुक्लकृष्णवर्णतदन्तर्वर्तिपुरुषाणां मण्डलादित्रयरूपवेनोपासनमिति लोचने हि शुक्लरूपं कृष्णरूपं चास्ति तदन्तर्वर्ती पुरुषश्च दृश्यते एतत्प्रसङ्गेन सव्यलोचनगतपुरुषस्य मिथुनत्वसम्पादनम् अथ पुरुषस्य मृत्युत्वमुपन्योव्यं मृत्युगतैकत्वबङ्क्वालिकद्वयमीमांसा तस्यैव पुरुषस्य बङ्क्वधोपासनं तत्फलमिति मण्डलब्राह्मणप्रतिपादितार्थसंग्रहः ॥ उक्थमहाव्रतचित्याग्नीनां मण्डलार्चिःपुरुषात्मकत्वेन तस्य मण्डलादित्रयस्य ऋग्यजुःसामरूपत्वम् ॥१॥ उक्तमर्थस्वरूपं पश्यन्नो पर्यालोचयन्नो वाग्वदति त्रय्येव विद्या तपतीति ॥२॥ मण्डलस्थपुरुषस्य मृत्युरूपत्वमर्चिषोऽमृतरूपत्वं चाह ॥३॥ अमृतममृतरूपार्चिरधिकरणं मण्डलम् । अहोरात्रे विवासयति इदमह्नेषा रात्रिरिति विभजति पुनः-पुनः करोतीति वा विवस्वानादित्यः मण्डलमित्यर्थः । वस्ते आच्छादयति सर्वतः स्वतेजसा परिवृणोति । अवरमधस्ताद्भावम् ॥४॥ परस्मै शंसितारं होतारं लोके बङ्क निन्दन्ति ॥५॥ तदुक्तमपुरुषयोरधस्ताद्रूपहितं पुष्करपर्णम् । आपो ह्येताः अर्चिषो ह्यापः सूर्यकिरणानामेव वृष्टिकर्तृकत्वात्कार्यकारणयोरभेदेन अर्चिर्वाऽआप इत्युक्तम् पुष्करपर्णमपि अब्ज उत्पन्नत्वात्तदात्मकम् । एतदुक्तादित्रयं मण्डलाद्यात्मना संस्कृत्य भावयित्वा इहाग्नावुपधत्ते तदा यज्ञस्य समाप्तिमनु ऊर्ध्वमुत्क्रामन्यज्ञमानः एतं मण्डलादिरूपेण त्रिविधमादित्यमप्येति। यतोऽस्मिन्नग्नि चितवान्परत्रादित्यो भवति अतश्चितमग्निमिष्टकाविशेषेण नाशयितुमादरं न कुर्यात् कुतः एषोऽग्निरमुत्र भवति परलोके यज्ञमानशरीरात्मनोत्पद्यतऽइति यद्वा परिहर्तुं प्राप्तुं स्प्रष्टुम् चित्याग्निस्पर्शने दोषश्रवणात् ॥६॥ स एष सूर्यमण्डलगतपुरुष एव लोकम्पृणा इष्टका (८. ७. २. १.) तामभिलक्ष्य सर्वोऽग्निः सम्पद्यते लोकम्पृणाभिः सर्वोऽग्निः कृत्स्नः सम्पूर्यतऽइत्यर्थः । तस्य सूर्यपुरुषात्मकदक्षिणाग्निपुरुषस्य सव्याग्निगतः पुरुषो मिथुनं योषित् मिथुनं हि आत्मनोऽर्धमर्धभागः अर्धो वाऽएष आत्मनो यत्पत्नीति तैत्तिरीयश्रुतेः ॥७॥ विधृतिं व्यवधायकत्वस्थानीयाम् ॥९॥ देवव्रतं देवकल्पितं व्रतम् ॥१०॥ लोके मानुषस्य मैथुनस्यान्तं गत्वा असंविदा (!) अज्ञानानेवात्र स्त्री भवति ॥११॥ धुरेव पोडयेव सहसा ॥१२॥ एवं प्रासङ्गिकं परिसमाप्य मण्डलस्य पुरुषात्मनोपासनीयस्य दक्षिणाग्निपुरुषस्य मृत्यरूपत्वमाह । अभिहतौ व्याप्तौ कीलितौ । तौ यदा पादावाक्रियोत्क्रामति पुरुषशरीरात् ॥१३॥ प्राणनिर्गमादनन्तरमेव शरीरपात इत्याशङ्क्य तस्यैवाग्निपुरुषस्य प्राणात्मकतामाह ॥१४॥ वाचा रसनया प्राणेन नासिकया ॥१५॥ असावमुत्र द्युलोके आदित्यमण्डलवर्ती पुरुषः एकः ॥१६॥ अपश्रितः स्थितः ॥१८॥ यः पुरुषः परमात्मा ध्येयत्वेनोक्तः तस्य प्रशंसार्थं नानारूपैरुपासनं दर्शयति । अध्वर्यवः याजुषाः एतं पुरुषमग्निमिष्टकाचयनेन दिव्यादित्येऽग्निरित्युपासते यजुरिति च । सर्पविदः आहितुण्डिकाः ॥२०॥ रुक्मपुष्करपर्णयोः पुरुषाधारत्वमृक्सामयोश्च यजुरधीनत्वं तस्मादेकेष्टकोऽग्निः ॥२२॥४ [२] ॥५॥

उत्तरब्राह्मणे सकलपुरुषवर्तिमनोवाक्प्राणचक्षुःश्रोत्रकर्माग्निवृत्तिसम्पाद्यचित्याग्निविषया उपासना वक्ष्यते ॥ सर्वेषामिन्द्रियाणां मनसः प्रामुख्यात्तत्सम्पाद्यमग्निं प्रस्तोतुं मनसः स्वरूपं तत्सृष्टिं चाह ॥१॥ तन्मन आत्मानं स्वकारणं परमात्मानं स्वस्वरूपं वा अन्वैक्षत् । ततः पर्यालोचनं कृत्वा प्रामूर्छत् मूर्छा मोहसमुच्छ्रययोः (! धा° ७. ३२.) समुच्छ्रितं बभूव । [पुरुषस्य शतसंवत्सरमितऽआयुषि षट्त्रिंशत्सहस्राणि दिनानि भवन्ति तत्रैकैकस्मिन्नग्नेया मनोवृत्तिः तासु चाग्निवमारोप्यते] तन्मनः कर्तृ एतावत्संख्याकानर्कानर्चनीयान् मनोमयान्मनउपादानकान् मनश्चितः मनसा चीयमानान्मनःसम्पाद्यानात्मनोऽग्नीनपश्यत् । एतस्य मनश्चितोऽग्नेः क्रियामयाग्निप्रकारणमुपमृद्य (? मृदूय Cod.) स्वातन्त्र्यं प्रतिपत्तुं मनोव्यापारक्रियावयवमनुबध्नाति त मनसेत्यादिना तेऽग्नयो मनसैवाधीयन्त आधाने मनोव्यापार एव कारणम् एवं चयनग्रहणस्तुतशस्त्रादिकारणं केवलं मनोव्यापारसिद्धम् । तेषामग्नीनां सा कृतिः तत्कारणं भवति तानग्नीनेवाद्धति भूतानीति सर्वत्र सम्बध्यते । एतावतो वै मनस इति मनोमयषट्त्रिंशत्सहस्रसंख्याकाग्नय एव मनसो विभूतिः महिमा विसृष्टिर्विविधा विभक्ता सृष्टिः । पुनरप्यस्य मनश्चितोऽग्नेः (ग्निः Cod.) केवलविद्यामयत्वेन स्वातन्त्र्यं वक्तुं क्रियामयस्याग्नेर्माहात्म्यं (त्म्य Cod.) मनोमयेऽतिदिशति तेषामेकैक एवेति असौ पूर्व इति पदाभ्यामिष्टकाचितोऽग्निर्विवक्ष्यते स यावान् परिश्रिग्यशुष्मतीलोकम्पृणाभेदेनाहोरात्रतन्मुहूर्तध्यानेन च यत्परिमाणः तेषां षट्त्रिंशत्सहस्रसंमितानामग्नीनां मध्ये एकैकोऽग्निरपि तावान् तत्परिमाणो ध्येयः अनेन क्रियामयस्याग्नेर्माहात्म्यस्य ज्ञानं (न Cod.) यन्मनोमयऽएवेति सूत्रितम् (सूचितम्?) । एवमुत्तरे वाक्चिदादयोऽग्निचित्पर्यन्ताः षट् पर्याया व्याख्येयाः तत्र वागादिसम्पाद्यानग्नीन्दर्शयितुं तत्तत्पर्यायादौ तस्य-तस्योत्पत्तिरुक्ता ॥१॥ श्रोत्रेण सृष्टं कर्म प्राणानभिसममूर्छत् अभिव्याप्नोत् इदं संदेह्यमत्रप्राणाश्रयं शरीरमुद्दिश्य समुच्छ्रितं बभूव स्वयमसंदेह्यमशरीरं सत् कर्मप्राणयोरन्योऽन्यसाहचर्यादभिवृद्धिं व्यतिरेकमुखेनाह अकृत्स्नं वाऽइति ॥८॥ कर्मसकाशादाविस्तरां स्पष्टः ॥१०॥ एतेषां मनश्चित्प्रमुखाग्नीनां सर्वेषां स्वतन्त्रविद्यामयत्वोपोद्बलकानि श्रुतिलिङ्गवाक्यान्युदाहरति । विद्याचित एव विद्ययैव धीयमानाः एवकारश्रुतिः कर्माङ्गत्वं व्यावर्तयति ॥१२॥५[३]॥५॥

उत्तरब्राह्मणे भूम्यादिलोकत्रयादित्यनक्षत्रकन्दःसंवत्सरात्मा[पः] चित्याग्निरूपत्वेनोपासनीया उच्यन्ते । अत एव लोकादेः परिश्रिग्यशुष्मतीपशुपुरीषसमिदादिसामान्यधर्मवर्णनम् । अत्र केवलविद्याविधित्वे शब्दस्य तात्पर्यं लक्ष्यते न शुद्धकर्माङ्गविधित्वे तथा हि अस्मिन्नेव ब्राह्मणे विद्यया तदारोहन्तीत्यनेन श्लोकेन (क° १६.) केवलकर्मनिन्दापुरःसरं विद्याप्रशंसा ॥ अग्निना सर्वे सम्पन्नाः स्वव्यापारदक्षा भवन्ति यथा चित्याग्नेर्लोकम्पृणेष्टकाभिः सम्पूर्णः । य एवं भूलोकं चित्याग्निरूपं वेद स लोकम्पृणाभूतमेनं लोकाधिष्ठातारमग्निमेव सम्पद्यते तदात्मको भवति ॥१॥ अन्तरिक्षं परेण परस्तादनऽइत्यर्थः द्यावापृथिवी संयुक्ते (!) भवतः ॥२॥ कोशः पेटिका समुज्झितः सम्पिहितः ॥३॥ त्रिंशन्नक्षत्रः स आत्मा मध्यदेहः । द्वे नक्षत्रे प्रतिष्ठा पादरूपेण । द्वे नक्षत्रे प्राणाः चक्षुरादिप्राणानां द्वन्द्वशोऽवस्थानात् । द्वे नक्षत्रे शिरोरूपम् षट्त्रिंश्यावितिं स्त्रीलिङ्गवचनमिष्टकाभिप्रायेण ॥५॥ नक्षत्रोपनक्षत्रसंख्यां बृहत्यात्मना स्तौति । स्वर्गस्त्वादित्य इति गम्यते एकविंशतिसंख्यापूरकः । एकविंशतिस्तोत्रि-

यात्मकः एकविंश उच्यते ॥६॥ एवमधिकानां षट्त्रिंशदक्षराणां विभागमुक्त्वा तावद्भिरक्षरैर्ब्रह्महतीसम्पाद्यतां नानाछन्दोमयत्वेन सम्पादयति ॥८॥ अथोपासकेन स्वशरीरमेवाग्निरूपत्वेनोपासनीयमिति विधत्ते ॥१२॥ अथाप्सु अग्नित्वेनोपासनं विधित्सुरपां सर्वदेवभूतात्मकत्वमाह । आदित्यमण्डलं परिसरवर्तिन्यो नाड्या नाड्या तार्याः । अयं हिरण्मयः पुरुषः अधिदैवं मण्डलान्तर्वर्ती पुरुषोऽधियज्ञं प्रथमचितावुपहितः पुरुषोऽग्निरूपाणामपामात्मा ॥१४॥ तद्विभागमाह तस्याधियज्ञं रुक्मपुष्करपर्णाख्ये अधिदैवमापश्चादित्यमण्डलात्मके (!) द्वे इष्टके प्रतिष्ठे पादरूपेण ध्येये । बाहुरूपेण ध्येये द्वे स्रुचौ । भूम्यन्तरिक्षात्मके द्वे स्वयमातृष्णे इष्टके । अग्निवाय्वादित्यात्मना ध्येयास्तिस्रो विश्वज्योतिषः । द्वादशसंख्या ऋतव्येष्टकाः संवत्सररूपात्मत्वेन ध्येयाः । यज्ञात्मना देवात्मना च स्तुताः पञ्च नाकसदः पञ्च पञ्चचूडाः । एवमेकत्रिंशद्ज्ञाताः । एवं षट्त्रिंशदिष्टकामयो हिरण्मयः पुरुष आत्मा सर्वभूतदेवात्मनामपामध्यात्मना ध्येयानां मध्ये वर्तत इत्याह सोऽस्यैष सर्वस्येति । सर्वात्मनामपां मध्यवर्ती आत्मा सर्वकामसम्पन्नः स्वयमकामः ॥१५॥ तादृग्रूप आत्मा सर्वैर्ज्ञानेन लभ्यो न कर्मशतैरिति मन्त्रसंवादेन प्रतिपादयति ॥१६॥ अब्रूपाग्नेः पुरीषाङ्गतिसमिल्लोकम्पृणाः सम्पादयति । सर्वाणि भूतानि सर्वे देवा एषोऽग्निश्चित इत्यस्य पर्यायस्यादौ (क° १४) उक्तम् अतो देवा इत्याख्यातं लोकम्पृणेष्टका अतः सर्वं परिश्रियत्युष्मत्यादिकं देवा इत्युच्यत इत्यर्थः ॥१७॥ अधिदैवाध्यात्मादिभेदेन यद्यद्रूपात्मकं ब्रह्म प्रागुक्तमतस्तदात्मकाः सर्वे देवाः भवन्ति ॥१८॥ ६ [४] ॥५॥

उत्तरब्राह्मणे चित्याग्नेः सर्वदिगभिमुखत्वं (तिमुखत्व Cod.) पृथक् शिरसो निरूहणाभावः (पणा° Cod.) प्रतिपाद्यते ॥ तत्रैकैकदिगभिमुखत्वे दोषमुद्भावयितुं तान्पक्षान्पुरावृत्तेनानुवदति । कौशयः कुशगोत्रजः ॥१॥ पक्षिरूपस्य चित्याग्नेरिष्टकोपधानक्रमेण कूर्मपशुशिरोऽपरोक्षमाहवनीयाग्निरेव प्रत्यक्षं शिरः न तु पक्षपुक्षवत्पृथक् शिरसः कारणम् । कोषा नामर्षयः धावयन्तः आर्विड्याय गक्षन्तः याजयन्तः अग्निं निरूढशिरसमुपाधावयां चक्रुः यस्य कस्य चन यजमानस्य गृहे शिरः पृथक् चितवन्तः ॥८॥ शिरोरहितः स्यादिति मीमांसाशङ्कां परिहर्तुमिष्टकाभिरव परोक्षं शिरः सम्पादयति । एता इष्टकाः यथावयवरूपाः कल्पनीयाः कूर्मो मूर्धस्थानीयः ॥१०॥७ [५] ॥५॥

षष्ठाध्यायप्रथमब्राह्मणे वैश्वानरविद्या द्वितीयब्राह्मणे पुरुषस्याग्निविधार्कविधोक्थविधनिरूपणा तृतीये शाण्डिल्यविद्या चतुर्थऽउषा वाऽअश्वस्येत्यस्मिन्नश्वस्योपासनम् एवमर्काश्युकथोपासना (? मकश्युक्थो° Cod.) विद्यासम्प्रदायप्रवर्तकमुनिवंशकथनमिति प्रतिपाद्यसंग्रहः ॥ न समियाय संगतः शक्तो नाभवत् ॥१॥ सम्प्रति इदानीम् । आवसथान्गृहान् अपचितीः पूजाः । सहस्रदक्षिणकेषु सोमयज्ञेषु युष्मानृत्विजो वृत्वा तत्रैकैकस्य ऋषेः सहस्रं ददामीत्यर्थः । असंविदानाः संकेतमकुर्वाणाः राज्ञे स्वाशयमनाविष्कुर्वन्त एव ॥२॥ अनूचानाः साङ्गवेदाध्यायिनोऽनुष्ठातारः तादृशानां पुत्राः । त्वा इति समुदाय एकार्थवाची तु वा ऽइति तुशब्दस्योकारं वैशब्दे परतो याज्ञुषा लुम्पन्ति (? नु वा इति नु वा स्योभारं वैश-परतो याक्नुषा लुयंति Cod.) ॥३॥ ओमित्यङ्गीकारः । वा इति निपातद्वयं तुशब्दोकारं वैशब्दे त्वचोतो यज्ञुषा लुम्पति (!) । म्लानौ गमनासमर्थावभविष्यताम् । पादौ ते विदितावितिः

वैश्वानरस्य पादमात्रं वया विदितं न तु कृत्स्नो वैश्वानरः ॥४॥ एष रयिरूपोऽब्रात्मको वैश्वानरः वैश्वानरस्यावयविन ईश्वरस्य वस्तिर्मूत्राशय एव न समस्तमित्यर्थः ॥५॥ आत्मा मध्यशरीरम् ॥६॥ नाना वर्त्म मार्गो यस्य वायोः आवहोद्वहादिभेदेन वर्तमानस्य सोऽयं पृथग्वर्त्मा । रथश्रेणयो रथपङ्क्तयः ॥७॥ सुततेजा इति सुतमभिषुतसोमरूपं तेजो यस्य । सुतोऽभिषुतः सोमरसोऽध्वमानः एतद्रूपलक्षणं पुरोडाशादि पच्यमानः सर्वदा विनाशरहितस्तिष्ठति ॥८॥ अतीत्य सर्वमतिक्रम्य तिष्ठतीत्यतिष्ठाः । समानान्ज्ञातीन् ॥१॥ यदेवं यथोक्तावयवैः पृथिवीपादादिभिः द्युमूर्धान्तैरवयवैः विशिष्टमेकं वस्तु तत्प्रादेशमात्रं प्रादेशप्रमाणमिव देवाः सुविदिताः सम्यक् ज्ञातवन्तोऽभिसम्पन्नाः प्राप्तफला बभूवुः । एनान्वैश्वानरावयवान् ॥१०॥ अस्य वैश्वानराग्नेः व्यत्ययेन कर्मणि षष्ठी ब्रुवाणमुपदेष्टारम् ॥१२॥१॥६॥

द्वितीये पुरुषस्यैवाग्निविधत्वमर्कविधत्वमुकथविधत्वमुच्यते ॥ समागङ्कति युक्तमेकीभूतं भवति ॥१॥ कं सुखहेतवः ॥५॥ वायुनादित्योऽवष्टम्भमात्रेण तद्दीपनम् ॥११॥२॥६॥

तृतीये शाण्डिल्यविद्योच्यते ॥ सत्यं ब्रह्मेति वक्ष्यमाणैर्मनोमयत्वादिभिर्गुणैरुपेतमात्मानमुपासीत । क्रतुर्निश्चयोऽध्यवसायः ॥१॥३॥६॥

उषा वाऽश्वस्यादिकमश्वावयवेषु विराडवयवोपासनापरं ब्राह्मणम् नैवेह किं चनाग्र ऽआसीदित्यादिकमुपास्यहिरण्यगर्भस्वरूपप्रतिपादनपरं ब्राह्मणं चेत्येतद्द्वयं काण्वशाखानुसारेण बृहदारण्यकोपनिषदादौ प्रपञ्चेन वार्त्तिककारेणोपबृंहितं व्याख्यातमिति नेह पुनरुच्यते पाठसाम्यात् ॥ उत्तरत्र बृहदारण्यके वंशब्राह्मणसमाम्नास्यमानानां विद्यासम्प्रदायप्रवर्तकानामृषीणां मध्येऽग्निरहस्यविद्याप्रवर्तकमृषिप्रवाहमनुक्रामति अथ वंश इति ॥१॥५॥६॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनीयशतपथब्राह्मणभाष्ये दशमकाण्डव्याख्या समाप्ता ॥१०॥ ॥

VARIOUS READINGS.

Adhyâya १. २. १ बृहदुक्थं Sây. (and thus often alternately with महदुक्थ). — २ अधिदैवतं Sây. (thus also २, ६, १. १६. - ३, ३, ७. - ४, १, २३.). — ४. २ Read. तदमृतममृतꣳ. - ४ हि स्राव A. - १० साप्तरथवाहणि° A. B 1. B 2. see पाणि° ८. ४. ८. - १४ पुनर्मृत्युमपजयतीत्य° A. —

Adhy. २. १. १ विसृज्जन्ति Sây. - ६ निर्नाम° Sây. - ८ अथ रूपमुपमं करोति A. — २. २ लोकꣳ सचंते ये A. pr. m. B 1. pr. m. - ६ तत्रोप यन्प्र° A. यत्प्र°

B 1. पत्प्रप° B 2. — 8. ८ पञ्चाशदिष्टकाः पञ्चाश° A. - ibid. इति नु विधानामथातश्चयनस्यैव ॥ ८ ॥ निरवसानब्राह्मणं ॥ १ ॥ B 1. B 2. Thus also in A., at the margin. the end of this brahmaṇa and the beginning of the next are joined together: इति नु विधानामथातश्चयनस्यैव. — ६. ७ °विधं विधत्ते A. - ibid. चैतद्विदुर्ये च न लोक्या A. - १ य एवैकशतविधं विधत्ते A. - ibid. संवत्सरभृतमिव Say. - १२ यजुरेकशतविधो A. - १३ Read: यज्ञेन-यज्ञेन. —

Adhy. ३. ३. १ °साद् स होवाच Sây. — ५. २ स्यत्वा A. B 1. B 2. According to Sâyaṇa's explanation read स्यत्वा. - ibid. पराभ्यां Sây. - ३ °श्चयजुः पुरश्चरणा° Sây. - १ स्वेषु प्रतिबुभूषति Sây. - १६ यजुर्षिवैनमाचक्षते Sây. - Sâyaṇa closes this adhyâya with the next brâhmaṇa. —

Adhy. 8. १. १६ प्रजापतिर्यो वै A. - १८ आकर्तुं न म्रियन्ते Sây. - १९ एतत्सप्तदशमन्नꣳ सप्त - here B 1. ends. — २. १३ अष्टाचत्वारिꣳशदिष्ट° A. - १8 पञ्चचत्वारिꣳशदिष्ट° A. - १५ °कान्नविꣳशतिधा A. B 2. - १८? °न्मुङ्क त्रायन्ते A. मुङ्क्तायन्ते B. 2. मुङ्क्त्रायन्ते Sây. - २१ °मेतद्वाऽअस्त्येतद्यमृतं यद्यमृतं तद्यास्त्येतद् A. - २८ एवैनं तंनिरृमि° A. — ३. ६? द्रुपाण्युपधत्तात्ति A. B. 2. Sây. - १० ते सम्भवन्त एवामृ° A. - १8 लोकेष्टकाः Sây. - १५ एकचत्वारिꣳशद्धितीया A. - १६ एकसप्ततिस्तृतीया A. - १७ सप्तचत्वारिꣳशच्चतुर्थी A. - २8 पुरुषे Sây. (? पुरुष इति). - ibid. Sâyaṇa closes here the fourth adhyâya. — 8. २ सकृत्संवत्सरस्य A. - ३ सकृत्संवत्सरमवरुंधीत A. —

Adhy. ५. २. १३ अभिकृतौ Sây. - २१ त्रीष्टकः ॥ A. - २२ यजुरुपीत A. — ३. ८? °दिमꣳ संदेक्ष्यमसंदेक्ष्यमकृत्स्नं Sây. — 8. १६ तपसानेवंविद् A. — ५. १ कौश्यो Sây. - ३ °त्पुरुमकार्षीः A. —

Adhy. ६. १. ४-१ अविदित° Sây. against the accent. - ८ चक्षुस्त्वा° and चक्षुस्ते A. — ३. २ सत्यधृतिꣳ A. - ibid. विचिकित्सास्तीति A. — ५. ५ इममभि-मꣳस्ये A. - १ समानमा A. M. - ibid. ब्रह्मणे नमः A. M. The accentuation of the proper names too shows some irregularities: we read here कुश्रि instead of कुश्रि (१०. ५. ५. १.), कावषेय instead of कावषेय (१. ५. २. १५.), राजस्तम्बायन instead of राजस्तम्बायन (१०. ४. २. १.), वामकक्षायण instead of वामकक्षायण (७. १. २. ११. १०. ४. १. ११.).

ओम् । संवत्सरो वै यज्ञः प्रजापतिः । तस्यैतद्द्वारं यदमावास्या चन्द्रमा एव द्वारपिधानः ॥१॥ स यो ऽमावास्यायामग्नीऽआधत्ते । यथा विवृतायां द्वारि द्वारा पुरं प्रपद्येत स तत एव स्वर्गं लोकमियादेवं तद्यो ऽमावास्यायामाधत्ते ॥२॥ अथ यो नक्षत्रऽआधत्ते । यथापिहितायां द्वार्यद्वारा पुरं प्रपित्सेत्स निष्क्रामः पुरः स्यादेवं तद्यो नक्षत्रऽआधत्ते तस्मान्न नक्षत्रऽआदधीत ॥३॥ यदक्रेर्वैषः । न पुरस्तान्न पश्चाद्दृश्येत तदक्रुरुपवसेत्तर्हि ह्येष इमं लोकमागच्छति तस्मिन्निह वसति ॥४॥ सर्वे देवा वसन्ति । सर्वाणि भूतानि सर्वा देवताः सर्वऽऋतवः सर्वे स्तोमाः सर्वाणि पृष्ठानि सर्वाणि छन्दाꣳसि ॥५॥ सर्वेषु ह वाऽअस्य देवेषु । सर्वेषु भूतेषु सर्वासु देवतासु सर्वेष्वृतुषु सर्वेषु स्तोमेषु सर्वेषु पृष्ठेषु सर्वेषु छन्दःस्वग्नीऽआहितौ भवतो योऽमावास्यायामाधत्ते तस्मादमावास्यायामेवाग्नीऽआदधीत ॥६॥ योऽसौ वैशाखस्यामावास्या तस्यामादधीत सा रोहिण्या सम्पद्यतऽआत्मा वै प्रजा पशवो रोहिण्यात्मन्येवैतत्प्रजायां पशुषु प्रतितिष्ठत्यमावास्या वाऽअग्न्याधेयरूपं तस्मादमावास्यायामेवाग्नीऽआदधीत पौर्णमास्यामन्वारभेतामावास्यायां दीक्षेत ॥७॥ ब्राह्मणम् ॥१॥ ॥

घ्नन्ति वाऽएतद्यज्ञम् । यदेनं तन्वते यन्त्रेव राजानमभिषुण्वन्ति तत्तं घ्नन्ति यत्पशुꣳ संज्ञपयन्ति विशासति तत्तं घ्नन्त्युलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ क्रविर्यज्ञं घ्नन्ति ॥१॥ तꣳ कृत्वा यज्ञम् । अग्नावेव योनौ रेतो भूतꣳ सिञ्चत्यग्निर्वै योनिर्यज्ञस्य स ततः प्रजायते तद्दृशं ता आकृतीः सम्पादयेत्याभ्यो वषट्क्रियते ॥२॥ अयं वै यज्ञो योऽयं पवते । सोऽयमेक-इवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टो

दशधाविकृतः स एवं कृतैः प्राणैरग्नेर्योनेरधिजायते सैषा दशाक्षरा विराट् सैषा सम्पत्स यज्ञः ॥३॥ अथोऽअपि नव स्युः । तन्यूनां विराजं करोति प्रजननाय न्यूनाद्वाऽइमाः प्रजाः प्रजायन्ते सैषा सम्पत्स यज्ञः ॥४॥ अथोऽअप्येकातिरिक्ता स्यात् । सा प्रजापतिमभ्यतिरिच्यते सैषा सम्पत्स यज्ञः ॥५॥ अथोऽअपि द्वेऽअतिरिक्ते स्याताम् । द्वन्द्वं वै मिथुनं प्रजननं मिथुनमेवैतत्प्रजननं क्रियते सैषा सम्पत्स यज्ञः ॥६॥ अथोऽअपि तिस्रोऽतिरिक्ताः स्युः । द्वन्द्वमह्न मिथुनं प्रजननमथ यज्जायते तत्तृतीयꣳ सैषा सम्पत्स यज्ञः ॥७॥ अथोऽअपि चतस्रोऽतिरिक्ताः स्युः । तद्यथैकैवं चतस्रस्त्रयो वाऽइमे लोकास्तदिमानेव लोकांस्तिसृभिराप्नोति प्रजापतिर्वाऽअतीमांल्लोकांश्चतुर्थस्तत्प्रजापतिमेव चतुर्थ्याप्नोति सैषा सम्पत्स यज्ञः ॥८॥ स यद्वाभ्यामूनं तदूनꣳ । सोऽयज्ञो यत्पञ्चभिरतिरिक्तं तदतिरिक्तꣳ सोऽयज्ञः सैषैव दशत्यधि सम्पदेषा विꣳशत्यामेषा सक्तस्तात् ॥९॥ आज्ञिं वाऽएते धावन्ति । ये दर्शपूर्णमासाभ्यां यजन्ते स वै पञ्चदश वर्षाणि यजेत तेषां पञ्चदशानां वर्षाणां त्रीणि च शतानि षष्टिश्च पौर्णमास्यश्चामावास्याश्च त्रीणि च वै शतानि षष्टिश्च संवत्सरस्य रात्रयस्तद्रात्रीराप्नोति ॥१०॥ अथापराणि पञ्चदशैव वर्षाणि यजेत । तेषां पञ्चदशानां वर्षाणां त्रीणि चैव शतानि षष्टिश्च पौर्णमास्यश्चामावास्याश्च त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि तदहान्याप्नोति तद्वै संवत्सरमाप्नोति ॥११॥ मर्त्या ह वाऽअग्रे देवा आसुः । स यदैव ते संवत्सरमापुरथामृता आसुः सर्वं वै संवत्सरः सर्वं वाऽअद्मन्यमेतेनो ह्यास्याद्मन्यꣳ सुकृतं भवत्यद्मन्यो लोकः ॥१२॥ स आज्ञिसृतामेकः । य एवं विद्वांस्त्रिꣳशतं वर्षाणि यजते तस्माद्व त्रिꣳशतमेव वर्षाणि यजेत यद्यु दाक्षायणयज्ञी स्यादथोऽअपि पञ्चदशैव वर्षाणि यजेतात्र क्वैव सा सम्पत्सम्पद्यते द्वे हि पौर्णमास्यौ यजते द्वेऽअमावास्येऽअत्रोऽएव खलु सा सम्पद्भवति ॥१३॥ ब्राह्मणम् ॥२॥

पौर्णमासेनेष्ट्वा । इन्द्राय विमृधेऽनुनिर्वपति तेन यथेष्ट्वैवं यजतेऽमावास्येनेष्ट्वादित्यै चरुमनुनिर्वपति तेन यथेष्ट्वैवं यजते ॥ १ ॥ स यत्पौर्णमासेनेष्ट्वा । इन्द्राय विमृधेऽनुनिर्वपतीन्द्रो वै यज्ञस्य देवताथैदग्नीषोमीयं पौर्णमासꣳ ह्विर्भवति तत्र नेन्द्राय वेति किं चन क्रियतेऽतेनो ह्यस्यैतत्सेन्द्रꣳ ह्विर्भवत्येतेन सेन्द्रो यज्ञोऽथ यद्विमृधे वेति सर्वा ऽ हि मृधो नाष्ट्राः पौर्णमासेनं ह्न्ति ॥ २ ॥ अथ यदामावास्येनेष्ट्वा । अदित्यै चरुमनुनिर्वपत्येष वै सोमो राज्ञा देवानामन्न यच्चन्द्रमाः स यत्रैष एताꣳ रात्रिं न पुरस्तान्न पश्चाद्दृशे तेनैतदनद्वेव ह्विर्भवति तेनाप्रतिष्ठितमियं वै पृथिव्यदितिः सेयमद्भ्य सेयं प्रतिष्ठितैतेनो ह्यस्यैतद्द्वेव ह्विर्भवत्येतेन प्रतिष्ठितमेतन्नु तद्यस्मादनुनिर्वपत्यथ यस्मान्नानुनिर्वपेत् ॥ ३ ॥ स यत्पौर्णमासेनेष्ट्वा । इन्द्राय विमृधेऽनुनिर्वपति सेन्द्रो मे यज्ञोऽसदिति सर्वो वै यज्ञ इन्द्रस्यैव स यत्सर्वो यज्ञ इन्द्रस्यैवैतेनो ह्यस्यैतत्सेन्द्रꣳ ह्विर्भवत्येतेन सेन्द्रो यज्ञः ॥ ४ ॥ अथ यदामावास्येनेष्ट्वा । अदित्यै चरुमनुनिर्वपत्यामावास्यं वाऽअनुनिर्वाप्यं पौर्णमासेन वाऽइन्द्रो वृत्रमहंस्तस्माऽएतद्वृत्रं जघ्नुषे देवा एतद्ध विरनुनिरवपन्यदामावास्यं किमनुनिर्वाप्येऽनुनिर्वपेदिति तस्मान्नानुनिर्वपेत् ॥ ५ ॥ स यत्पौर्णमासेनेष्ट्वा । अथान्यद्ध विरनुनिर्वपत्यामावास्येनेष्ट्वाथान्यद्ध विरनुनिर्वपति द्विषन्तꣳ ह्न स भ्रातृव्यं प्रत्युक्ष्यतेऽथ यः पौर्णमासेनैव पौर्णमासीं यजतेऽमावास्येनामावास्यामसपत्ना ह्वैवास्यानुपबाधा श्रीर्भवति ॥ ६ ॥ पौर्णमासेन वै देवाः । पौर्णमासीं यजमाना अमावास्येनामावास्यां क्षिप्रꣳ एव पाप्मानमपाघ्नत क्षिप्रे प्राजायन्त स यो ह्वैवं विद्वान्पौर्णमासेनैव पौर्णमासीं यजतेऽमावास्येनामावास्यां क्षिप्रꣳ एव पाप्मानमपहते क्षिप्रे प्रजायते स यद्यनुनिर्वपेद्द्यादक्षिणां नादक्षिणꣳ ह्विः स्यादिति स्याद्दर्शपूर्णमासयोर्ह्येवैषा दक्षिणा यदन्वाहार्य इति न्वनुनिर्वाप्यस्याथाभ्युदितस्य ॥ ७ ॥ ब्राह्मणम् ॥ ३ ॥

तद्वैके दृष्ट्वोपवसन्ति । श्वो नोदेतेत्यभ्रस्य वा केतोरनिर्ज्ञाय वाथोतोपवसन्त्यथैनमुताभ्युदेति स यद्यगृहीतꣳ हविरभ्युदियात्प्रज्ञातमेव तदेषैव व्रतचर्या यत्पूर्वेद्युर्दुग्धं दधि हविरातञ्चनं तत्कुर्वन्ति प्रतिप्रमुञ्चन्ति वत्सांस्तान्पुनरपाकुर्वन्ति ॥१॥ तानपराह्णे पर्णशाखयापाकरोति । तद्यथैवादः प्रज्ञातमामावास्यꣳ हविरेवमेव तद्यद्यु व्रतचर्या वा नोदाशꣳसेत गृह्णीतं वा हविरभ्युदियादितरथो तर्हि कुर्यादेतानेव तण्डुलान्त्सुफलीकृतान्कृत्वा स येऽणीयाꣳसस्तानग्नये दात्रेऽष्टाकपालं पुरोडाशꣳ श्रपयति ॥२॥ अथ यत्पूर्वेद्युः । -दुग्धं दधि तदिन्द्राय प्रदात्रेऽथ तदानींदुग्धे विष्णवे शिपिविष्टायैतांस्तण्डुलाञ्छृते चरूꣳ श्रपयति चरूरु क्षेव स यत्र क्व च तण्डुलानावपन्ति ॥३॥ तद्यदेवं भवति । एष वै सोमो राज्ञा देवानामन्नं यच्चन्द्रमास्तमेतदुपैत्सीत्तमपारात्सीत्तमस्माऽअग्निर्दाता ददातीन्द्रः प्रदाता प्रयच्छति तस्माऽइन्द्राग्नी यज्ञं दत्तस्तेनेन्द्राग्निभ्यां दत्तेन यज्ञेन यजतेऽथ यद्विष्णवे शिपिविष्टायेति यज्ञो वै विष्णुरथ यच्छिपिविष्टायेति यमुपैत्सीत्तमपारात्सीत्तच्छिपितमिव यज्ञस्य भवति तस्माच्छिपिविष्टायेति तत्रो यच्छृतꣳ स्यात्तद्भ्यान्नादक्षिणꣳ हविः स्यादिति ब्याद्धरथ यदेव नोदियादथोपवसेत् ॥४॥ ब्राह्मणम् ॥४॥ ॥

अथ्यामावास्येति मन्यमान उपवसति । अथैष पश्चाद्दृशे स एष दिव्यः श्वा स यजमानस्य पशून्भ्यवेक्षते तदपशव्यꣳ स्यात्प्रायश्चित्तिकृत एतस्माद्वै केतद्वीषावचन्द्रमसादिति ॥१॥ छायामुपसर्पन्ति । एतेनो केतदुपतपदाचक्षते श्वलुचितमित्येतमु केवैतदाचक्षते ॥२॥ शशश्चान्द्रमस इति । चन्द्रमा वै सोमो देवानामन्नं तं पौर्णमास्यामभिषुण्वन्ति सोऽपरपक्षेऽप ओषधीः प्रविशति पशवो वाऽअप ओषधीरद्धि तदेनमेताꣳ रात्रिं पशुभ्यः संनयति ॥३॥ सोऽमावास्येति मन्यमान उपवसति । अथैष पश्चाद्दृशे तद्यजमानो यज्ञपथादेति तदाहुः कथं कुर्यादिवा यज्ञपथाद्यजेताऽ३ न यजेताऽ३ इति यजेत क्वैव न ब्रूयन्यदपक्रमणं भवति श्वः-श्व

एवैष ज्यायानुदेति स आमावास्यविधेनैवेष्ट्वाथेष्टिमनुनिर्वपति तदकृर्वैव श्वो वा ॥४॥ तस्य त्रीणि कृवीꣳषि भवन्ति । अग्नये पथिकृतेऽष्टाकपालं पुरोडाशमिन्द्राय वृत्रघ्नऽएकादशकपालमग्नये वैश्वानराय द्वादशकपालं पुरोडाशꣳ ॥५॥ स यदग्नये पथिकृते निर्वपति । अग्निर्वै पथः कर्ता स यस्माद्वादो यजमानो यज्ञपथादेति तमेनमग्निः पन्थानमापादयति ॥६॥ अथ यदिन्द्राय वृत्रघ्ने । पाप्मा वै वृत्रो यो भूतेर्वारयिवा तिष्ठति कल्याणात्कर्मणः साधोस्तमेतदिन्द्रेणैव वृत्रघ्ना पाप्मानं वृत्रꣳ हन्ति तस्मादिन्द्राय वृत्रघ्ने ॥७॥ अथ यदग्नये वैश्वानराय । द्वादशकपालं पुरोडाशं निर्वपति यत्र वाऽइन्द्रो वृत्रमहंस्तमग्निना वैश्वानरेण समदहत्तदस्य सर्वं पाप्मानꣳ समदहत्तथोऽएवैष एतदिन्द्रेणैव वृत्रघ्ना पाप्मानं वृत्रꣳ हत्वा तमग्निना वैश्वानरेण संदहति तदस्य सर्वं पाप्मानꣳ संदहति स यो हैवं विद्वानेतयेष्या यजते न हास्याल्पश्चन पाप्मा परिशिष्यते ॥८॥ तस्यै सप्तदश सामिधेन्यो भवन्ति । उपाꣳशु देवता यजति याः कामयते ता याज्यानुवाक्याः करोत्येवमाज्यभागावेवꣳ संयाज्ये ॥९॥ तिसृधन्वं दक्षिणां ददाति । धन्वना वै श्वानं बाधन्ते तदेतमेवैतद्बाधते यत्तिसृधन्वं दक्षिणां ददाति ॥१०॥ दण्डं दक्षिणां ददाति । दण्डेन वै श्वानं बाधन्ते तदेतमेवैतद्बाधते यद्दण्डं दक्षिणां ददात्येषा न्वादिष्टा दक्षिणा दद्याद्विवास्यामप्यन्यस्याऽइतरा दक्षिणास्तासां यत्सम्पद्येत सा कैषा पशव्येष्टिस्तयाप्यनभ्युद्दृष्टो यजतेव ॥११॥ ब्राह्मणम् ॥५॥ ॥

आपो ह वाऽइदमग्रे सलिलमेवास । ता अकामयन्त कथं नु प्रजायेमहीति ता अश्राम्यंस्तास्तपोऽतप्यन्त तासु तपस्तप्यमानासु हिरण्मयमाण्डꣳ सम्बभूवाजातो ह तर्हि संवत्सर आस तदिदꣳ हिरण्मयमाण्डं यावत्संवत्सरस्य वेला तावत्पर्यप्लवत ॥१॥ ततः संवत्सरे पुरुषः समभवत् । स प्रजापतिस्तस्माद्व संवत्सरऽएव स्त्री वा गौर्वा वडबा वा विजायते संवत्सरे हि प्रजापतिरजायत स इदꣳ

हिरण्मयमाण्डं व्यरुजन्नाह तर्हि का चन प्रतिष्ठास तदेनमिदमेव हिरण्मयमाण्डं यावत्संवत्सरस्य वेलासीत्तावद्बिभर्त्पर्यप्लवत ॥२॥ स संवत्सरे व्याजिहीर्षत् । स भूरिति व्याहरत्सेयं पृथिव्यभवद्भुव इति तदिदमन्तरिक्षमभवत्स्वरिति सासौ द्यौरभवत्तस्माद्व संवत्सरꣳएव कुमारो व्याजिहीर्षति संवत्सरे हि प्रजापतिर्व्याहरत् ॥३॥ स वाꣳएकाक्षरद्व्यक्षराण्येव । प्रथमं वदन्प्रजापतिरवदत्तस्मादेकाक्षरद्व्यक्षराण्येव प्रथमं वदन्कुमारो वदति ॥४॥ तानि वाꣳएतानि । पञ्चाक्षराणि तान्यꣳऋतूनकुरुत तꣳइमे पञ्चꣳऋतवः स एवमिमांल्लोकान्जातात्संवत्सरे प्रजापतिरभ्युदतिष्ठत्तस्माद्व संवत्सरꣳएव कुमार ऽत्तिष्ठासति संवत्सरे हि प्रजापतिरुदतिष्ठत् ॥५॥ स सप्तक्षायुर्जज्ञे । स यथा नद्यै पारं परापश्येदेवꣳ स्वस्यायुषः पारं पराचख्यौ ॥६॥ सोꣳर्चञ्छ्राम्यंश्चचार प्रजाकामः । स आत्मन्येव प्रजातिमधत्त स आस्येनैव देवानसृजत ते देवा दिवमभिपद्यासृज्यन्त तद्देवानां देवत्वं यद्दिवमभिपद्यासृज्यन्त तस्मै ससृज्ञानाय दिवेवास तद्देव देवानां देवत्वं यदस्मै ससृज्ञानाय दिवेवास ॥७॥ अथ योꣳयमवाङ् प्राणः । तेनासुरानसृजत तꣳइमामेव पृथिवीमभिपद्यासृज्यन्त तस्मै ससृज्ञानाय तम-इवास ॥८॥ सोꣳवेत् । पाप्मानं वाꣳअसृक्षि यस्मै मे ससृज्ञानाय तम-इवाभूदिति तांस्तत एव पाप्मनाविध्यत्ते तत एव पराभवंस्तस्मादाङ्कुर्नैतदस्ति यद्देवासुरं यदिदमन्वाख्याने ब्रुव्यतꣳइतिकासे वत्ततो क्वेव तान्प्रजापतिः पाप्मनाविध्यत्ते तत एव पराभवन्निति ॥९॥ तस्मादेतदृषिणाभ्यनूक्तम् । न वं युयुत्से कतमच्चनाकुर्न तेऽमित्रो मघवन्कश्चनास्ति मायेत्सा ते यानि युद्धान्याङ्कुर्नाथ शत्रुं न नु पुरा युयुत्सꣳइति ॥१०॥ स यदस्मै देवान्ससृज्ञानाय । दिवेवास तदकुरुताथ यदस्माꣳअसुरान्ससृज्ञानाय तम-इवास ताꣳ रात्रिमकुरुत तेꣳअहोरात्रे ॥११॥ स ऐक्षत प्रजापतिः । सर्वं वाꣳअत्सारिषं य इमा देवता असृक्षीति स सर्वत्सरोऽभवत्सर्वत्सरो ह वै ना-

मैतद्यत्संवत्सर इति स यो ह्येवमेतत्संवत्सरस्य सर्वत्सरत्वं वेद यो हैनं पाप्मा मायया त्सरति न हैनꣳ सोऽभिभवत्यथ यमभिचरत्यभि ह्येवैनं भवति य एवमेतत्संवत्सरस्य सर्वत्सरत्वं वेद ॥ १२ ॥ स ऐक्षत प्रजापतिः । इमं वाऽआत्मनः प्रतिमामसृक्षि यत्संवत्सरमिति तस्मादाहुः प्रजापतिः संवत्सर इत्यात्मनो ह्येतं प्रतिमामसृजत यद्वै व चतुरक्षरः संवत्सरश्चतुरक्षरः प्रजापतिस्तेनो ह्येवास्यैष प्रतिमा ॥ १३ ॥ ता वाऽएताः । प्रजापतेरधि देवता असृज्यन्ताग्निरिन्द्रः सोमः परमेष्ठी प्राजापत्यः ॥ १४ ॥ ताः सहस्रायुषो ऽजिरे । ता यथा नद्यै पारं परापश्येदेवꣳ स्वस्यायुषः पारं पराचख्युः ॥ १५ ॥ ता अर्चन्त्यः श्राम्यन्त्यश्चेरुः । तत एतं परमेष्ठी प्राजापत्यो यज्ञमपश्यद्यद्दर्शपूर्णमासौ ताभ्यामयजत ताभ्यामिष्ट्वाकामयताकृमेवेदꣳ सर्वꣳ स्यामिति स आपोऽभवदापो वाऽइदꣳ सर्वं ता यत्परमे स्थाने तिष्ठन्ति यो ह्येवाभिखनेदप एवाभिविन्देत्परमाद्वाऽएतत्स्थानाद्वर्षति यद्दिवस्तस्मात्परमेष्ठी नाम ॥ १६ ॥ स परमेष्ठी प्रजापतिं पितरमब्रवीत् । कामप्रं वाऽअकृं यज्ञमदर्शं तेन वा यानयानीति तथेति तमयाजयत्स इष्ट्वाकामयताकृमेवेदꣳ सर्वꣳ स्यामिति स प्राणोऽभवत्प्राणो वाऽइदꣳ सर्वमयं वै प्राणो योऽयं पवते स प्रजापतिस्तस्य दृष्टिर्यदेव वेदेत्याद्वातीति यद्वै किं च प्राणि स प्रजापतिः स यो ह्येवमेतां प्रजापतेर्दृष्टिं वेदाविरिव ह्येव भवति ॥ १७ ॥ स प्रजापतिरिन्द्रं पुत्रमब्रवीत् । अनेन वा कामप्रेण यज्ञेन यानयानि येन मामिदं परमेष्ठ्ययीयजदिति तथेति तमयाजयत्स इष्ट्वाकामयताकृमेवेदꣳ सर्वꣳ स्यामिति स वागभवद्वाग्वाऽइदꣳ सर्वं तस्मादाहुरिन्द्रो वागिति ॥ १८ ॥ स इन्द्रोऽग्नीषोमौ भ्रातरावब्रवीत् । अनेन वां कामप्रेण यज्ञेन यानयानि येन मामिदं पिता प्रजापतिरयीयजदिति तथेति तावयाजयत्तावित्वाकामयेतामावमेवेदꣳ सर्वꣳ स्यावेति तयोरन्नाद एवान्यतरोऽभवदन्नमन्यतरोऽन्नाद एवाग्निरभवदन्नꣳ सोमोऽन्नादश्च वाऽइदꣳ सर्वमन्नं च ॥ १९ ॥

ता वाऽएताः । पञ्च देवता एतेन कामप्रेण यज्ञेनायजन्त ता यत्कामा अयजन्त स आभ्यः कामः समार्ध्यत यत्कामो ह वाऽएतेन यज्ञेन यजते सोऽस्मै कामः समृध्यते ॥ २० ॥ तऽइष्ट्वा प्राचीं दिशमपश्यन् । तां प्राचीमेवाकुर्वत सेयं प्राच्येव दिक्तस्मादिमाः प्रजाः प्राच्यः सर्पन्ति प्राचीꣳ ह्येतामकुर्वतोपैनामितः कुर्वीमहीति तामूर्ज्जमकुर्वतेमां खलूर्ज्जं पश्येमेति सासौ द्यौरभवत् ॥ २१ ॥ अथ दक्षिणां दिशमपश्यन् । तां दक्षिणामेवाकुर्वत सेयं दक्षिणैव दिक्तस्माद्दु दक्षिणत एव दक्षिणा उपतिष्ठन्ते दक्षिणतोऽभ्यवायन्ति दक्षिणाꣳ ह्येतामकुर्वतोपैनामितः कुर्वीमहीति तं लोकमकुर्वतेमं खलु लोकं पश्येमेति तद्दमन्तरिक्षमभवदेष वै लोकः सा यथा ह्येवेयं प्रतिष्ठाविरस्मिंल्लोके पृथिव्येवमु ह्येवैषा प्रतिष्ठाविरमुष्मिंल्लोकऽइदमन्तरिक्षꣳ स यदिह सन्नमुं लोकं न पश्यति तस्मादाहुः परोऽक्षमसौ लोक इति ॥ २२ ॥ अथ प्रतीचीं दिशमपश्यन् । तामाशामकुर्वत तस्माद्यत्प्राङ् सृत्वा विन्दतऽएतामेव तेन दिशमेत्याशाꣳ ह्येतामकुर्वतोपैनामितः कुर्वीमहीति ताꣳ श्रियमकुर्वतेमां खलु श्रियं पश्येमेति सेयं पृथिव्यभवद्भूर्वाऽइयं तस्माद्यो ऽस्यै भूयिष्ठं विन्दते स एव श्रेष्ठो भवति ॥ २३ ॥ अथोदीचीं दिशमपश्यन् । तामपोऽकुर्वतोपैनामितः कुर्वीमहीति तं धर्ममकुर्वत धर्मो वाऽआपस्तस्माद्यदेमं लोकमाप आगृह्णन्ति सर्वमेवेदं यथाधर्मं भवत्यथ यदावृष्टिर्भवति बलीयानेव तर्ह्यबलीयस आदत्ते धर्मो ह्यापः ॥ २४ ॥ ता वाऽएताः । एकादश देवताः पञ्च प्रयाजा द्वावाज्यभागौ स्विष्टकृत्तयोऽनुयाजाः ॥ २५ ॥ ता एकादशाकृतयः । एताभिर्वाऽआकृतिभिर्देवा इमांल्लोकानजयन्नेता दिशस्तथोऽएवैष एताभिराकृतिभिरिमांल्लोकान्जयत्येता दिशः ॥ २६ ॥ चतस्रोऽवान्तरदिशः । तऽएव चत्वारः पत्नीसंयाजा अवान्तरदिशो वै देवाश्चतुर्भिः पत्नीसंयाजैरजयन्नवान्तरदिश ऽएवैष एतैर्जयति ॥ २७ ॥ अथेडा । अन्नाद्यमेवैतया देवा अजयंस्तथोऽएवैष एतयान्नाद्यमेव

ज्ञयत्येषा नु देवत्रा दर्शपूर्णमासयोः सम्पत् ॥२८॥ अथाध्यात्मम् । पञ्चेमे पुरुषे प्राणा ऋते चक्षुर्भ्यां तऽएव पञ्च प्रयाजा चक्षुषीऽआज्यभागौ ॥२९॥ अयमेवावाङ् प्राणः स्विष्टकृत् । स यत्तमभ्यर्ध-ऽएतराभ्य आकृतिभ्यो जुहोति तस्मादेतस्मात्प्राणात्सर्वे प्राणा बीभत्सन्तेऽथ यत्स्विष्टकृते सर्वेषाꣳ हविषामवद्यति तस्माद्यत्किं चेमान्प्राणानापद्यतऽएतमेव तत्सर्वꣳ समवैति ॥३०॥ त्रीणि शिश्नानि । तऽएव त्रयोऽनुयाजाः स यो ऽयं वर्षिष्ठोऽनुयाजस्तदिदं वर्षिष्ठमिव शिश्नं तं वाऽअनवानन्यऽइदित्याकुस्तथो ह्यस्यैतदमृधं भवतीति ॥३१॥ स वै सकृद्वान्यात् । एकꣳ ह्येतस्य पर्वाथ यद्पर्वकꣳ स्यात्प्रतृष्णं वैव तिष्ठेल्लम्बेत वा तस्मादेतदुच्च तिष्ठति पद्यते च तस्मात्सकृद्वान्यात् ॥३२॥ द्वौ बाहू द्वाऽऊरू । तऽएव चत्वारः पत्नीसंयाजाः प्रतिष्ठायमेव प्राण इडा यत्तां नाभौ जुहोति यत्साप्रदग्धेव तस्मादयमनवतृप्तः प्राणः ॥३३॥ अस्थ्येव याज्यानुवाक्याः । माꣳसꣳ हविस्तन्मितं छन्दो यद्याज्यानुवाक्यास्तस्माद्यु समावत्त्येवास्थीनि मेद्यतश्च कृश्यतश्च भवत्यथ यद्भूय-ऽइव च हविर्गृह्णाति कनीय-ऽइव च तस्माद्यु माꣳसान्येव मेद्यतो मेदन्ति माꣳसानि कृश्यतः कृश्यन्ति तेनैतेन यज्ञेन यां कामयते देवतां तां यजति यस्यै हविर्भवति ॥३४॥ ता वाऽएताः । अनपोद्धार्या आकृतयो भवन्ति स यद्धैतासामपोद्धरेद्यथैकमङ्गꣳ शृणीयात्प्राणं वा निर्हण्यादेवं तदन्यान्येव हवीꣳष्युप चाक्रियन्तेऽप च क्रियन्ते ॥३५॥ ता वाऽएताः । षोडशाकृतयो भवन्ति षोडशकलो वै पुरुषः पुरुषो यज्ञस्तस्मात्षोडशाकृतयो भवन्ति ॥३६॥ ब्राह्मणम् ॥६॥ ॥

तद्वाऽआदो व्रतोपायनऽउच्यते । यदि नाश्नाति पितृदेवत्यो भवति यद्युऽअश्नाति देवानत्यश्नातीति तदारण्यमश्नीयादिति तत्र स्थापयन्ति ॥१॥ स यदि ग्राम्या ओषधीरश्नाति । पुरोडाशस्य मेधमश्नाति यद्यारण्या ओषधीरश्नाति बर्हिषो मेधमश्नाति यदि वानस्पत्यमश्नातीध्मस्य मेधमश्नाति यदि पयः पिबति सांनाय्यस्य

चाऽज्यस्य च मेधमश्नाति यद्यपः पिबति प्रणीतानां मेधमश्नाति यदि नाश्नाति पितृदेवत्यो भवति ॥२॥ तदाहुः । किमयनमिति स्वयꣳ हैवैते रात्रीऽअग्निहोत्रं जुहुयात्स यदुवा प्राश्नाति तेनापितृदेवत्यो भवत्याकृतिर्वाऽएषा स यदेवैतामात्मन्नाकृतिं जुहोति तेनोऽएतेषां मेधानां नाश्नाति ॥३॥ एते ह वै रात्री । सर्वा रात्रयः समवयन्ति या आपूर्यमाणपक्षस्य रात्रयस्ताः सर्वाः पौर्णमासीꣳ समवयन्ति या अपक्षीयमाणपक्षस्य रात्रयस्ताः सर्वा अमावास्याꣳ समवयन्ति स यो हैवं विद्वान्त्स्वयमुपवसथे जुहोति सर्वदा हैवास्य स्वयꣳ हुतं भवति ॥४॥ ब्राह्मणम् ॥७॥

देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततोऽसुरा अतिमानेनैव कस्मिन्नु वयं जुहुयामेति स्वेष्वेवास्येषु जुह्वतश्चेरुस्तेऽतिमानेनैव पराबभूवुस्तस्मान्नातिमन्येत पराभवस्य हैतन्मुखं यदतिमानः ॥१॥ अथ देवाः । अन्योऽन्यस्मिन्नेव जुह्वतश्चेरुस्तेभ्यः प्रजापतिरात्मानं प्रददौ यज्ञो हैषामास यज्ञो हि देवानामन्नꣳ ॥२॥ स देवेभ्य आत्मानं प्रदाय । अथैतमात्मनः प्रतिमामसृजत यद्यज्ञं तस्मादाहुः प्रजापतिर्यज्ञ इत्यात्मनो ह्येतं प्रतिमामसृजत ॥३॥ स एतेन यज्ञेन । देवेभ्य आत्मानं निरक्रीणीत स यद्व्रतमुपैति यथैव तत्प्रजापतिर्देवेभ्य आत्मानं प्रायच्छदेवमेवैष एतद्देवेभ्य आत्मानं प्रयच्छति तस्माद्व संयत एवैताꣳ रात्रिं चिचरिषेद्यथा ह्विषा चरेदेवꣳ ह्विर्ह्येष देवानां भवति ॥४॥ अथ यद्यज्ञं तनुते । यज्ञेनैवैतद्देवेभ्य आत्मानं निष्क्रीणीते यथैव तत्प्रजापतिर्निरक्रीणीतेवमथ यद्धविर्निर्वपति ह्विषैवैतद्यज्ञं निष्क्रीणाति ह्विरनुवाक्ययानुवाक्यामवदानेनावदानं याज्यया याज्यां वषट्कारेण वषट्कारमाकृत्या तस्याकृतिरेवानिष्क्रीता भवति ॥५॥ स यथाग्रप्रशीर्णो वृक्षः । एवमस्येष यज्ञो भवत्याकृतिमेवान्वाह्वर्येण निष्क्रीणाति तद्यदेतद्धीनं यज्ञस्यान्वाह्वरति तस्मादन्वाह्वर्यो नामैवमु ह्यस्यैष सर्व

एव यज्ञो निष्क्रीतो भवत्येष ह वै यजमानस्यामुष्मिंल्लोकऽआत्मा भवति यद्यज्ञ स ह सर्वतनूरेव यजमानोऽमुष्मिंल्लोके सम्भवति य एवं विद्वान्निष्क्रीत्या यजते ॥ ६ ॥ ब्राह्मणम् ॥ ८ ॥ प्रथमोऽध्याय [६७.] ॥ ॥

त्रिर्ह वै पुरुषो ज्ञायते । एतन्त्रेव मातुश्चाधि पितुश्चाग्रे ज्ञायतेऽथ यं यज्ञ उपनमति स यद्यजते तद्द्वितीयं ज्ञायतेऽथ यत्र म्रियते यत्रैनमग्नावभ्यादधति स यत्ततः सम्भवति तत्तृतीयं ज्ञायते तस्मात्त्रिः पुरुषो ज्ञायतऽइत्याहुः ॥ १ ॥ ता वाऽएताः । एकादश सामिधेनीरन्वाह दश वाऽइमे पुरुषे प्राणा आत्मैकादशो यस्मिन्नेते प्राणाः प्रतिष्ठिता एतावान्वै पुरुषस्तदेनं कृत्स्नं जनयत्यथ यद्ऋर्ध्व सामिधेनीभ्यः सा प्रतिष्ठा तदेनं जनयित्वा प्रतिष्ठापयति ॥ २ ॥ नव प्रसवस्य व्याहृतयः । नवेमे पुरुषे प्राणास्तदेनं द्वितीयं जनयत्याश्रावणं प्रत्याश्रावणꣳ सा प्रतिष्ठाय यदेवादः सृष्टौ जन्योच्यते तदेनं तृतीयं जनयति पत्नीसंयाजा एव तत्र प्रतिष्ठा ॥ ३ ॥ त्रिर्ह वै पुरुषो ज्ञायते । एवमेवैनमेतद्यज्ञात्त्रिर्जनयति तासामेकादशानां त्रिः प्रथमामन्वाह त्रिरुत्तमाम् ॥ ४ ॥ ताः पञ्चदश सामिधेन्यः । द्वावाघारौ पञ्च प्रयाजा इडा त्रयोऽनुयाजाः सूक्तवाकश्च शस्योर्वाकश्च तास्त्रयोदशाकृतयोऽथ यदेवादः पत्नीसंयाजेषु सम्प्रगृह्णाति समिष्टयजुश्च ॥ ५ ॥ ताः पञ्चदशाकृतयः । तासां पञ्चदशानामाकृतीनामिता अनुवाक्या एताः पञ्चदश सामिधेन्य एतासामनुवाक्यानामेता याज्या य एवात्र मन्त्रो यो निगदस्तद्याज्यान्नूपमेतेनो ह्यस्यैता आकृतयोऽनुवाक्यवत्यो भवन्त्येताभिः सामिधेनीभिरेताभिराकृतिभिरेता अनुवाक्या याज्यवत्यश्चाकृतिवत्यश्च भवन्ति ॥ ६ ॥ ब्राह्मणम् ॥ १ [२. १.] ॥ ॥

गायत्रीमनुवाक्यामन्वाह । त्रिपदा वै गायत्री त्रय इमे लोका इमानेवैतल्लोकान्देवाः प्रत्यष्ठापयन् ॥ १ ॥ अथ त्रिष्टुभा यजति । चतुष्पदा वै त्रिष्टुप्चतुष्पादाः पशवस्तत्पशूनेवैतदेषु लोकेषु प्रतिष्ठितेषु देवाः प्रत्यष्ठापयन् ॥ २ ॥ द्य-

न्नरो वषट्कारः । द्विपादै पुरुषस्तत्पुरुषमेवैतद्द्विपादमेषु पशुषु प्रतिष्ठितेषु प्रत्यष्ठापयन् ॥३॥ सोऽयं द्विपात्पुरुषः । पशुषु प्रतिष्ठित एवमेवैष एतल्लोकान्प्रतिष्ठापयति लोकेषु प्रतिष्ठितेषु पशून्प्रतिष्ठापयति पशुषु प्रतिष्ठितेष्वात्मानं प्रतिष्ठापयत्येवमेष पुरुषः पशुषु प्रतिष्ठितो यऽएवं विद्वान्यजते ॥४॥ अथ यद्वषट्कृते जुहोति । एष वै वषट्कारो य एष तपति स एष मृत्युस्तदेनमुपरिष्टान्मृत्योः संस्करोति तदेनमतो जनयति स एतं मृत्युमतिमुच्यते यज्ञो वाऽअस्यात्मा भवति तस्मिन्न एव भूयैतन्मृत्युमतिमुच्यतऽएतेनो ह्यस्य सर्वे यज्ञक्रतव एतं मृत्युमतिमुक्ताः ॥५॥ ॥शतम्५६००॥ ॥ अथ यामेतामाकूतिं जुहोति । एषा ह वाऽअस्याकूतिरमुष्मिंल्लोकऽआत्मा भवति स यदेवंविदस्माल्लोकात्प्रैत्यथैनमेषाकूतिरेतस्य पृष्टे सत्याक्षयत्येक्षकं वै तऽइहात्मास्मीति तस्मादाक्षयति तस्मादाकूतिर्नाम ॥६॥ ब्राह्मणम् ॥१० [२. २.] ॥ ॥

ब्रह्म वाऽइदमग्रऽआसीत् । तद्देवानसृजत तद्देवाःसृष्टेषु लोकेषु व्यारोहयदस्मिन्नेव लोकेऽग्निं वायुमन्तरिक्षे दिव्येव सूर्यम् ॥१॥ अथ येऽत ऊर्ध्वा लोकाः । तथा अत ऊर्ध्वा देवतास्तेषु ता देवता व्यारोहयत्स यथा हैवमऽआवर्लोकाइमाश्च देवता एवमु हैव तऽआवर्लोकास्ताश्च देवता येषु ता देवता व्यारोहयत् ॥२॥ अथ ब्रह्मैव परार्धमगच्छत् । तत्परार्धं गत्वैक्षत कथं न्विमांल्लोकान्प्रत्यवेयामिति तद्वाभ्यामेव प्रत्यवेदूपेण चैव नाम्ना च स यस्य कस्य च नामास्ति तन्नाम यस्योऽपि नाम नास्ति यद्वेद रूपेणेदꣳ रूपमिति तद्रूपमेतावद्वाऽइदं यावद्रूपं चैव नाम च ॥३॥ ते हैते ब्रह्मणो महतीऽभ्वे । स यो हैते ब्रह्मणो महतीऽभ्वे वेद महद्ह्वाभ्वं भवति ॥४॥ ते हैते ब्रह्मणो महती यन्ने । स यो हैते ब्रह्मणो महती यन्ने वेद महद्ह्व यन्नं भवति तयोरन्यतरज्ज्यायो रूपमेव यद्यपि नाम रूपमेव तत्स यो हैतयोर्ज्यायो वेद ज्यायान्ह तस्माद्भवति

यस्माऽन्यायान्बुभूषति ॥५॥ मर्त्या ह वाऽअग्रे देवा आसुः । स यदैव ते ब्रह्मणापुरयामृता आसुः स यं मनसऽआधारयति मनो वै रूपं मनसा हि वेदेदꣳ रूपमिति तेन रूपमाप्नोत्यथ यं वाचऽआधारयति वाग्वै नाम वाचा हि नाम गृह्णाति तेनो नामाप्नोत्येतावद्वाऽइदꣳ सर्वं यावद्रूपं चैव नाम च तत्सर्वमाप्नोति सर्वं वाऽअद्मयमेतेनो ह्यस्याद्मयꣳ सुकृतं भवत्यद्मयो लोकः ॥६॥ तद्वाऽअद् आग्नेय्यामिष्टाऽउच्यते । यथा तदृषिभ्यो यज्ञः प्रारोचत तं यथातन्वत तद्यज्ञं तन्वानानृषीन्गन्धर्वाऽउपनिषेदुस्ते ह स्म संनिदधतीदं वाऽअत्यरीरिचन्निदमून्नमक्रान्निति स यदेषां यज्ञः संतस्थेऽथैनांस्तदर्शयां चक्रुरिदं वाऽअत्यरीरिचतेदमून्नमकर्तेति ॥७॥ स यदतिरेचयां चक्रुः । यथा गिरिरेवं तदासाथ यदूनं चक्रुर्यथा श्वभ्राः प्रदरा एवं तदास ॥८॥ स यत्र शम्योराह । तदभिमृशति यज्ञ नमश्च तऽउप च यज्ञस्य शिवे संतिष्ठस्व स्विष्टे मे संतिष्ठस्वेति स यदतिरेचयति तन्नमस्कारेण शमयत्यथ यदूनं करोत्युप चेति तेन तदून्यूनं भवति यज्ञस्य शिवे संतिष्ठस्वेति यद्वै यज्ञस्यान्यूनातिरिक्तं तद्धिवं तेन तदुभयꣳ शमयति स्विष्टे मे संतिष्ठस्वेति यद्वै यज्ञस्यान्यूनातिरिक्तं तत्स्विष्टं तेनो तदुभयꣳ शमयत्येवमु ह्यस्यैतेन यज्ञेनान्यूनातिरिक्तेनैवेष्टं भवति य एवं विद्वानेवमभिमृशति तस्मादेवमेवाभिमृशेत्ते ह ते गन्धर्वा आसुः शूर्पं यवमान्कृषिरुद्वालवान्धानान्तर्वान् ॥९॥ ब्राह्मणम् ॥११ [२. ३.] ॥ ॥

एष वै पूर्णमाः । य एष तपत्यक्षरꣳ ह्येवैष पूर्णोऽथैष एव दर्शो यच्चन्द्रमा ददृशऽइव ह्येषः ॥१॥ अथोऽइतरथाऽहुः । एष एव पूर्णमा यच्चन्द्रमा एतस्य ह्यनु पूरणं पौर्णमासीत्याचक्षतेऽथैष एव दर्शो य एष तपति ददृशऽइव ह्येषः ॥२॥ इयमेव पूर्णमाः । पूर्णेव ह्येयमसावेव द्यौर्दर्शो ददृशऽइव ह्यसौ द्यौः ॥३॥ रात्रिरेव पूर्णमाः । पूर्णेव ह्येषा रात्रिरक्षरेव दर्शो ददृश इव ह्येदमक्षरेषा

नु देवत्रा दर्शपूर्णमासयोर्मिमाꣳसा ॥४॥ अथाध्यात्मम् । उदान एव पूर्णमा उदानेन ह्ययं पुरुषः पूर्यतऽइव प्राण एव दर्शो ददृशऽइव ह्ययं प्राणस्तदेतावन्नादश्चान्नप्रदश्च दर्शपूर्णमासौ ॥५॥ प्राण एवान्नादः । प्राणेन ह्येदमन्नमद्यतऽउदान एवान्नप्रद उदानेन ह्येदमन्नं प्रदीयते स यो हैतावन्नादं चान्नप्रदं च दर्शपूर्णमासौ वेदान्नादो हैव भवति प्र ह्यस्माऽअन्नाद्यं दीयते ॥६॥ मन एव पूर्णमाः । पूर्णमिव ह्येदं मनो वागेव दर्शो ददृशऽइव ह्येयं वाक्तदेतावध्यात्मं प्रत्यक्षं दर्शपूर्णमासौ स यदुपवसथे व्रतोपायनीयमश्नाति तेनैतावध्यात्मं प्रत्यक्षं दर्शपूर्णमासौ प्रीणाति यज्ञेन प्रातर्दैवौ ॥७॥ तदाहुः । यन्न पूर्णमासायेति ह्यविर्गृह्यते न दर्शायेति ह्यविर्गृह्यते न पूर्णमासायानुब्रूहि न दर्शायानुब्रूहि न पूर्णमासं यज्ञ न दर्शं यजेत्यथ केनास्य दर्शपूर्णमासाविष्टौ भवत इति स यं मनसऽआधारयति मनो वै पूर्णमास्तेन पूर्णमासं यजत्यथ यं वाचऽआधारयति वाग्वै दर्शस्तेनो दर्शं यजत्येतेनो ह्यस्य दर्शपूर्णमासाविष्टौ भवतः ॥८॥ तद्धैके । चत्रू निर्वपन्ति पौर्णमास्याꣳ सरस्वतेऽमावास्यायाꣳ सरस्वत्याऽएतत्प्रत्यक्षं दर्शपूर्णमासौ यज्ञामरुꣳ इति वदन्तस्तदु तथा न कुर्यान्मनो वै सरस्वान्वाक्सरस्वती स यदेवैतावाघारावाघारयति तदेवास्य दर्शपूर्णमासाविष्टौ भवतस्तस्मादेतौ चत्रू न निर्वपेत् ॥९॥ तदाहुः आगूर्तौ वाऽएष भवति यो दर्शपूर्णमासाभ्यां यजते पौर्णमासेन ह्येष्ट्वा वेदामावास्येन यक्ष्यऽइत्यामावास्येनेष्ट्वा वेद पुनः पौर्णमासेन यक्ष्यऽइति स आगूर्त्येवामुं लोकमेति यदामुं लोकमेति कथमनागूर्तौ भवतीति स यदेवैताऽउभयत्राघारावाघारयति तदेवास्य दर्शपूर्णमासौ संतिष्ठते स सꣳस्थितयोरेव दर्शपूर्णमासयोरथामुं लोकमेति तथानागूर्तौ भवति ॥१०॥ ब्राह्मणम् ॥१२ [२.४.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या१११ ॥ ॥

अपि ह वाऽएतर्हि । देवेभ्योऽश्वमेधमालभन्ते तदाहुः प्राकृतोऽश्वमेध इती-

तर इन्नून७ स तद्वाऽएष एवाश्वमेधो यच्चन्द्रमाः ॥१॥ तदाहुः । पदे-पदेऽश्वस्य मेध्यस्याहुतिं जुहोतीति स यत्सायंप्रातरग्निहोत्रं जुहोति द्वे सायमाहुती जुहोति द्वे प्रातस्ताश्चतस्र आहुतयश्चतुष्पाद्वाऽअश्वस्तदस्य पदे-पदऽएवाहुतिर्हुता भवति ॥२॥ तदाहुः । विवृत्तेऽश्वस्येष्टिं निर्वपतीत्येष वै सोमो राज्ञा देवानामन्नं यच्चन्द्रमाः स यत्रैष एता७ रात्रिं न पुरस्तान्न पश्चाद्ददृशे तदिमं लोकमागच्छति सोऽस्मिंल्लोके विवर्तते ॥३॥ स यदामावास्येन यजते । विवृत्तऽएवास्यैतदिष्टिं निर्वपत्यथ यत्पौर्णमासेन यजतेऽश्वमेधमेवैतदालभते तमालभ्य देवेभ्यः प्रयच्छति संवत्सरे वाऽइतरमश्वमेधमालभन्तऽएष वै मासः परिप्लवमानः संवत्सरं करोति तदस्य संवत्सरे-संवत्सरऽएवाश्वमेध आलब्धो भवति ॥४॥ तं वाऽएतम् । मासि-मास्येवाश्वमेधमालभन्ते स यो हैवं विद्वानग्निहोत्रं च जुहोति दर्शपूर्णमासाभ्यां च यजते मासि-मासि हैवास्याश्वमेधेनेष्टं भवत्येतद्ध स्माग्निहोत्रं च दर्शपूर्णमासौ चाश्वमेधमभिसम्पद्येते ॥५॥ ब्राह्मणम् ॥१ [२. ५.] ॥॥

शिरो ह वाऽएतद्यज्ञस्य यत्प्रणीताः । स यत्प्रणीताः प्रणयति शिर एवैतद्यज्ञस्य संस्करोति स विद्याद्धिर एव मऽएतत्संस्क्रियतऽइति ॥१॥ प्राण एवास्येध्मः । प्राणेन ह्येद७ सर्वमिद्धं यत्प्राणभृन्निमिषद्यदेजति स विद्यादेमेवैष इध्म इति ॥२॥ अनूकमेवास्य सामिधेन्यः । तस्मात्ता ब्रूयात्संतन्वन्निव मेऽनुब्रूहीति संततमिव ह्येदमनूकं मनश्चैवास्य वाक्चाघारौ सरस्वांश्च सरस्वती च स विद्यान्मनश्चैव मे वाक्चाघारौ सरस्वांश्च सरस्वती चेति ॥३॥ पञ्च प्रयाजाः । इमऽएवास्य ते शीर्षण्याः पञ्च प्राणा मुखमेवास्य प्रथमः प्रयाजो दक्षिणा नासिका द्वितीयः सव्या नासिका तृतीयो दक्षिणः कर्णश्चतुर्थः सव्यः कर्णः पञ्चमोऽथ यच्चतुर्थे प्रयाजे समानयति तस्मादिद७ श्रोत्रमन्तरतः संतृणं चक्षुषीऽआज्यभागौ स विद्याच्चक्षुषीऽएव मऽएताविति ॥४॥ अथ य आग्नेयः पुरोडाशः । अयमेवास्य स

दक्षिणोऽर्धो हृदयमेवास्योपाꣳशुयाजः स यत्तेनोपाꣳशु चरति तस्मादिदं गुहेव हृदयम् ॥५॥ अथ योऽग्नीषोमीयः पुरोडाशः । अयमेवास्य स उत्तरोऽर्ध ऐन्द्रं वा सांनाय्यमन्तराꣳसमेवास्य स्विष्टकृदिषं प्राशित्रꣳ ॥६॥ स यत्प्राशित्रमवद्यति । यथैव तत्प्रजापतेराविद्धं निरकृन्तन्नेवमेवैतस्यैतद्यद्दुष्टं यद्वथितं यद्वरुण्यं तन्निष्कृन्तति स विद्याद्यथैव तत्प्रजापतेराविद्धं निरकृन्तन्नेवमेव मऽइदं यद्दुष्टं यद्वथितं यद्वरुण्यं तन्निष्कृन्ततीति ॥७॥ उदरमेवास्येडा । तद्यथैवाद इडायाꣳ समवद्यत्येवमेवेदं विश्वन्नपमन्नमुदरे समवधीयते ॥८॥ त्रयोऽनुयाजाः । इमऽएवास्य तेऽवाश्चस्त्रयः प्राणा बाहूऽएवास्य सूक्तवाकश्च शम्योर्वाकश्च चत्वारः पत्नीसंयाजाश्चतस्रो वै प्रतिष्ठा ऊरू द्वावष्ठीवन्तौ द्वौ पादावेवास्य समिष्टयजुः ॥९॥ ता एकविꣳशतिराकृतयः । द्वावाघारौ पञ्च प्रयाजा द्वावाज्यभागावाग्नेयः पुरोडाशस्तद्दशाग्नीषोमीय उपाꣳशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदिडा त्रयोऽनुयाजाः सूक्तवाकश्च शम्योर्वाकश्चाथ यदेवादः पत्नीसंयाजेषु सम्प्रगृह्णाति समिष्टयजुश्च ॥१०॥ ता एकविꣳशतिराकृतयः । द्वादश वै मासाः संवत्सरस्य पञ्चर्तवस्त्रयो लोकास्तद्विꣳशतिरेष एवैकविꣳशो य एष तपति सैषा गतिरेषा प्रतिष्ठा तदेतां गतिमेतां प्रतिष्ठां गच्छति ॥११॥ तद्ध स्मैतदारुणिराह । अर्धमासशो वाऽअहममुनादित्येन सलोको भवामि तामꣳ दर्शपूर्णमासयोः सम्पदं वेदेति ॥१२॥ तदाहुः । आत्मयाज्ञी श्रेयाꣳन्देवयाज्ञीऽइत्यात्मयाज्ञीति ह ब्रूयात्स ह वाऽआत्मयाज्ञी यो वेदेदं मेऽनेनाङ्गꣳ संस्क्रियतऽइदं मेऽनेनाङ्गमुपधीयतऽइति स यथाहिस्त्वचो निर्मुच्येतैवमस्मान्मर्त्याद्धरीरात्पाप्मनो निर्मुच्यते स ऋङ्मयो यजुर्मयः साममय आकृतिमयः स्वर्गं लोकमभिसम्भवति ॥१३॥ अथ ह स देवयाज्ञी यो वेद । देवानेवाहमिदं यज्ञे देवात्सपर्यामीति स यथा श्रेयसे पापीयान्बलिꣳ हरेद्वैश्यो वा राज्ञे बलिꣳ हरेदेवꣳ स स ह न तावन्तं लोकं जयति या-

वन्तमितरः ॥ १४ ॥ ब्राह्मणम् ॥ २ [२. ६.] ॥ ॥

संवत्सरो यज्ञः । स यो ह वै संवत्सरो यज्ञ इति वेदान्ते हैवास्य संवत्सरस्येष्टं भवत्यथो यत्किं च संवत्सरे क्रियते सर्वꣳ हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥ १ ॥ ऋतव ऋत्विजः । स यो ह वाऽऋतव ऋत्विज इति वेदान्ते हैवास्य ऽर्तूनामिष्टं भवत्यथो यत्किं चऽर्तुषु क्रियते सर्वꣳ हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥ २ ॥ मासा ह्वीꣳषि । स यो ह वै मासा ह्वीꣳषीति वेदान्ते हैवास्य मासानामिष्टं भवत्यथो यत्किं च मासेषु क्रियते सर्वꣳ हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥ ३ ॥ अर्धमासा ह्विष्यान्नाणि । स यो ह वाऽअर्धमासा ह्विष्यान्नाणीति वेदान्ते हैवास्यार्धमासानामिष्टं भवत्यथो यत्किं चार्धमासेषु क्रियते सर्वꣳ हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥ ४ ॥ अहोरात्रे परिवेष्ट्री । स यो ह वाऽअहोरात्रे परिवेष्ट्रीऽइति वेदान्ते हैवास्याहोरात्रयोरिष्टं भवत्यथो यत्किं चाहोरात्रयोः क्रियते सर्वꣳ हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥ ५ ॥ इयमेव प्रथमा सामिधेनी । अग्निर्द्वितीया वायुस्तृतीयादित्यश्चतुर्थी द्यौष्पञ्चम्यादित्यः षष्ठी चन्द्रमाः सप्तमी मनोऽष्टमी वाङ्नवमी तपो दशमी ब्रह्मैकादश्येता हि वाऽइदꣳ सर्वꣳ समिन्धतऽएतमिरिदꣳ सर्वꣳ समिद्धं तस्मात्सामिधेन्यो नाम ॥ ६ ॥ स वै त्रिः प्रथमामन्वाह । स यत्प्रथममन्वाह प्राचीं तेन दिशं जयति यद्द्वितीयं दक्षिणां तेन दिशं जयति यत्तृतीयमूर्ध्वामिव तेन दिशं जयति ॥ ७ ॥ त्रिर्वैवोत्तमामन्वाह । स यत्प्रथममन्वाह प्रतीचीं तेन दिशं जयति यद्द्वितीयमुदीचीं तेन दिशं जयति यत्तृतीयमिमामेव तेन प्रतिष्ठां जयत्येवमु हाभिरिमांल्लोकान्जयत्येता दिशः ॥ ८ ॥ ऋतमेव पूर्व आधारः । सत्यमुत्तरोऽव ह वाऽऋतसत्ये रुन्द्धेऽथो यत्किं चऽर्तसत्याभ्यां जय्यꣳ सर्वꣳ हैव तज्जयति ॥ ९ ॥ ब्रिषिरेव प्रथमः प्रयाजः । अपचितिर्द्वितीयो यशस्तृतीयो ब्रह्मवर्चसं चतुर्थोऽन्नाद्यं पञ्चमः ॥ १० ॥ स प्रथमं प्र-

याज्ञमनुमन्त्रयेत । विषिमान्भूयासमित्युपचितिमान्भूयासमिति द्वितीयं यशस्वी भूयासमिति तृतीयं ब्रह्मवर्चसी भूयासमिति चतुर्थमन्नादो भूयासमिति पञ्चमं विषिमान्ह वाऽअपचितिमान्यशस्वी ब्रह्मवर्चस्यन्नादो भवति य एवमेतद्वेद ॥ ११ ॥ एतद्ध स्म वै तद्विद्वानाह । श्वेतकेतुरारुणेयः कꣳ स्विदेवापरीषु महानागमिवाभिसꣳसारं दिदृक्षितारो य एवमेतत्प्रयाजानां यशो वेदितेति ॥ १२ ॥ भूतमेव पूर्व आज्यभागः । भविष्यदुत्तरोऽव ह वै भूतं च भविष्यच्च रुन्द्धेऽथो यत्किं च भूतेन च भविष्यता च ज्ञप्यꣳ सर्वꣳ हैव तज्ज्ञपयति ॥ १३ ॥ ब्रह्माग्नेयः पुरोडाशः । स यो ह वै ब्रह्माग्नेयः पुरोडाश इति वेदाव ह ब्रह्म रुन्द्धेऽथो यत्किं च ब्रह्मणा ज्ञप्यꣳ सर्वꣳ हैव तज्ज्ञपयति ॥ १४ ॥ क्षत्रमुपाꣳशुयाजः । स यो ह वै क्षत्रमुपाꣳशुयाज इति वेदाव ह क्षत्रꣳ रुन्द्धेऽथो यत्किं च क्षत्रेण ज्ञप्यꣳ सर्वं हैव तज्ज्ञपयति तस्यदुपाꣳशुयाजं कुर्वन्त्येके नैके तस्मादुच्चैश्चोपाꣳशु च क्षत्रायाचक्षते ॥ १५ ॥ विदुत्तरः पुरोडाशः । स यो ह वै विदुत्तरः पुरोडाश इति वेदाव ह विशꣳ रुन्द्धेऽथो यत्किं च विशा ज्ञप्यꣳ सर्वꣳ हैव तज्ज्ञपयति तस्यदाग्नेयश्च पुरोडाश ऽपाꣳशुयाजश्च पूर्वौ भवतस्तस्मादुभे ब्रह्म च क्षत्रं च विशि प्रतिष्ठिते ॥ १६ ॥ राष्ट्रꣳ सांनाय्यꣳ । स यो ह वै राष्ट्रꣳ सांनाय्यमिति वेदाव ह राष्ट्रꣳ रुन्द्धेऽथो यत्किं च राष्ट्रेण ज्ञप्यꣳ सर्वꣳ हैव तज्ज्ञपयति तस्यत्संनयत्येके नैके तस्माद्राष्ट्रꣳ सं चैति वि च ॥ १७ ॥ तपः स्विष्टकृत् । स यो ह वै तपः स्विष्टकृदिति वेदाव ह तपो रुन्द्धेऽथो यत्किं च तपसा ज्ञप्यꣳ सर्वꣳ हैव तज्ज्ञपयति ॥ १८ ॥ लोकः प्राशित्रꣳ । स यो ह वै लोकः प्राशित्रमिति वेदाव ह लोकꣳ रुन्द्धेऽथो यत्किं च लोकेन ज्ञप्यꣳ सर्वꣳ हैव तज्ज्ञपयति नो ह लवेन लोकाद्यथते लवेन ह वाऽअमुष्मिंल्लोके लोकाद्यथत्येऽथ य एवं वेद न ह बकु चन पापं कृत्वा लोकाद्यथते ॥ १९ ॥ अड्डेडा । स यो ह वै अड्डेडेति वेदाव ह अड्डाꣳ रुन्द्धेऽथो यत्किं च अड्डया

ज्ञय्यꣳ सर्वꣳ ह्येव तज्जयति ॥२०॥ अशनिरेव प्रथमोऽनुयाज्ञः । ह्राडुनिर्द्वितीय उल्कुषी तृतीयः ॥२१॥ स प्रथममनुयाज्ञमनुमन्त्रयेत । अशन्यमुं जुहोति यं द्विष्याद्ह्राडुन्यमुं जुहोति द्वितीयमुल्कुष्यमुं जुहोति तृतीयम् ॥२२॥ स य एष द्विप्रं म्रियते । अशनिर्ह तमनुयाज्ञो हन्त्यथ यो विस्रवन्मिश्रꣳइव ह्राडुनिर्ह तमनुयाज्ञो हन्त्यथ योऽभ्युष्टमिश्रꣳइवोल्कुषी ह तमनुयाज्ञो हन्ति ॥२३॥ सैषा यज्ञमेनिः । एतया वै मेन्या देवा असुरान्पराभावयां चक्रुस्तथोऽएवैवंविद्यज्ञमानः पाप्मानं द्विषन्तं भ्रातृव्यं पराभावयति ॥२४॥ स यदनुयाज्ञान्तो यज्ञः स्यात् । अशन्यन्तः स्याद्ह्राडुन्यन्त उल्कुष्यन्तस्तस्माद्वै देवानां यज्ञ इडान्तो वैव शम्व्वन्तो वा ॥२५॥ प्रयाज्ञैर्वै देवाः । स्वर्गं लोकमायंस्तानसुरा अन्वाजिगाꣳसंस्ताननुयाज्ञैः प्रत्यौहंस्तद्यदनुयाज्ञा इज्यन्ते पाप्मानमेव तद्द्विषन्तं भ्रातृव्यं यजमानः प्रत्यूहति ॥२६॥ प्राणा वै प्रयाज्ञाः । अपाना अनुयाज्ञास्तस्मात्प्रयाज्ञाः प्राञ्चो ह्रियन्ते तद्धि प्राणानूपं प्रत्यञ्चोऽनुयाज्ञास्तदपानानूपमेता ह वै दर्शपूर्णमासयोरुपसदो यदनुयाज्ञास्तस्मात्तऽउपसदूपेण प्रत्यञ्चो ह्रियन्ते ॥२७॥ सꣳस्था सूक्तवाकः । स यो ह वै सꣳस्था सूक्तवाक इति वेदाव ह सꣳस्थाꣳ रुन्द्धेऽथो यत्किं च सꣳस्थया ज्ञय्यꣳ सर्वꣳ ह्येव तज्जयति गच्छति वयसः सꣳस्थाम् ॥२८॥ प्रतिष्ठा शम्योर्वाकः । स यो ह वै प्रतिष्ठा शम्योर्वाक इति वेदाव ह प्रतिष्ठाꣳ रुन्द्धेऽथो यत्किं च प्रतिष्ठया ज्ञय्यꣳ सर्वꣳ ह्येव तज्जयति गच्छति प्रतिष्ठाम् ॥२९॥ ते देवाः । एतान्यन्नीसंयाज्ञान्यश्चात्यौंहन्त मिथुनमेवैतदुपरिष्टाद्दधत प्रज्ञात्यै तद्यत्यन्नीसंयाज्ञा इज्यन्ते मिथुनमेवैतदुपरिष्टाद्धत्ते प्रज्ञात्यै देवानाꣳ ह वै प्रज्ञातिमनु प्रजायते मिथुनेन-मिथुनेन ह प्रजायते य एवमेतद्वेद ॥३०॥ अन्नꣳ समिष्टयजुः । स यो ह वाऽअन्नꣳ समिष्टयजुरिति वेदाव हान्नꣳ रुन्द्धेऽथो यत्किं चान्नेन ज्ञय्यꣳ सर्वꣳ ह्येव तज्जयति ॥३१॥ संवत्सरो यजमानः । तमृतवो याज्ञयन्ति वसन्त आग्नीध्रस्तस्मा-

द्वसन्ते दावाश्चरन्ति तद्यग्निरूपं ग्रीष्मोऽर्धर्युस्तप्त-इव वै ग्रीष्मस्तप्तमिवार्धर्युर्निष्क्रामति वर्षा उद्गाता तस्माद्यदा बलवद्वर्षति साम्न-इवोपब्दिः क्रियते शरद्ब्रह्मा तस्माद्यदा सस्यं पच्यते ब्रह्मणवत्यः प्रजा इत्याङ्हेमन्तो होता तस्माद्धेमन्वषट्कृताः पशवः सीदन्त्येता ह वाऽएनं देवता याजयन्ति स यद्येनमेषावीरा याजयेयुरेता एव देवता मनसा ध्यायेदेता ह्येवैनं देवता याजयन्ति ॥३२॥ अथ ह्येषैव तुला । यद्दक्षिणो वेश्यन्तः स यत्साधु करोति तदन्तर्वेश्यथ यदसाधु तद्बहिर्वेदि तस्माद्दक्षिणं वेश्यन्तमधिस्पृश्येवासीत तुलायाꣳ ह वाऽअमुष्मिंल्लोकऽआदधति यतरद्यꣳस्यति तदन्वेष्यति यदि साधु वासाधु वेत्यथ य एवं वेदास्मिन्ह्येव लोके तुलामारोहत्यत्यमुष्मिंल्लोके तुलाधानं मुच्यते साधुकृत्या ह्येवास्य यछति न पापकृत्या ॥३३॥ ब्राह्मणम् ॥३ [२. ७.] ॥ द्वितीयोऽध्यायः [६८.] ॥ ॥

वाग्घ वाऽएतस्याग्निहोत्रस्याग्निहोत्री । मन एव वत्सस्तदिदं मनश्च वाक्च समानमेव सन्नानेव तस्मात्समान्या रुज्वा वत्सं च मातरं चाभिदधति नेज्ञ एव श्रद्धा सत्यमाज्यम् ॥१॥ तद्धैतज्जनको वैदेहः । याज्ञवल्क्यं पप्रछ वेत्याग्निहोत्रं याज्ञवल्क्याꣳइति वेद सम्राडिति किमिति पय एवेति ॥२॥ यत्पयो न स्यात् । केन जुह्वया इति व्रीहियवाभ्यामिति यद्व्रीहियवौ न स्यातां केन जुह्वया इति या अन्या ओषधय इति यदन्या ओषधयो न स्युः केन जुह्वया इति या आरण्या ओषधय इति यदारण्या ओषधयो न स्युः केन जुह्वया इति वानस्पत्येनेति यद्वानस्पत्यं न स्यात्केन जुह्वया इत्यद्भिरिति यदापो न स्युः केन जुह्वया इति ॥३॥ स होवाच । न वाऽइह तर्हि किं चनासीद्यैतदब्रूयतैव सत्यꣳ श्रद्धायामिति वेत्याग्निहोत्रं याज्ञवल्क्य धेनुशतं ददामीति होवाच ॥४॥ तदप्येते श्लोकाः । किꣳ स्विद्विद्वान्प्रवसत्यग्निहोत्री गृहेभ्यः कथꣳ स्विदस्य काव्यं कथꣳ संततो ऽग्निभिरिति कथꣳ स्विदस्यानपप्रोषितं भवतीत्येवैतदाह ॥५॥ यो ज्ञविष्ठो भु-

वनेषु । स विद्वान्प्रवसन्विदे तथा तदस्य काव्यं तथा संततोऽग्निभिरिति मन एवैतदाह मनसैवास्यानपप्रोषितं भवतीति ॥ ६ ॥ यत्स दूरं परेत्य । अथ तत्र प्रमाद्यति कस्मिन्त्सास्य कृताकृतिर्गृहे यामस्य जुह्वतीति यत्स दूरं परेत्याथ तत्र प्रमाद्यति कस्मिन्नस्य साकृतिर्कृता भवतीत्येवैतदाह ॥ ७ ॥ यो जागार भुवनेषु । विश्वा जातानि योऽबिभः तस्मिन्त्सास्य कृताकृतिर्गृहे यामस्य जुह्वतीति प्राणमेवैतदाह तस्मादाकूः प्राण एवाग्निहोत्रमिति ॥ ८ ॥ ब्राह्मणम् ॥ ४ [३. १.] ॥ ॥

यो ह वाऽअग्निहोत्रे । षण्मिथुनानि वेद मिथुनेन-मिथुनेन ह प्रजायते सर्वाभिः प्रजातिभिर्यज्ञमानश्च पत्नी च तदेकं मिथुनं तस्मादस्य पत्नीवदग्निहोत्रꣳ स्यादेतन्मिथुनमुपाप्नवानीति वत्सश्चाग्निहोत्री च तदेकं मिथुनं तस्मादस्य पुंवत्साग्निहोत्री स्यादेतन्मिथुनमुपाप्नवानीति स्थाली चाङ्गाराश्च तदेकं मिथुनꣳ स्रुक्च स्रुवश्च तदेकं मिथुनमाहवनीयश्च समिच्च तदेकं मिथुनमाकूतिश्च स्वाहाकारश्च तदेकं मिथुनमेतानि ह वाऽअग्निहोत्रे षण्मिथुनानि तानि य एवं वेद मिथुनेन-मिथुनेन ह प्रजायते सर्वाभिः प्रजातिभिः ॥ १ ॥ ब्राह्मणम् ॥ ५ [३. २.] ॥ ॥

ब्रह्म वै मृत्यवे प्रजाः प्रायच्छत् । तस्मै ब्रह्मचारिणमेव न प्रायच्छत्सोऽब्रवीदस्तु मह्यमप्येतस्मिन्भाग इति यामेव रात्रिꣳ समिधं नाहरताऽइति तस्माद्यꣳ रात्रिं ब्रह्मचारी समिधं नाहरत्यायुष एव तामवदाय वसति तस्माद्ब्रह्मचारी समिधमाहरेन्नेदायुषोऽवदाय वसानीति ॥ १ ॥ दीर्घसत्त्रं वाऽएष उपैति । यो ब्रह्मचर्यमुपैति स यामुपयन्त्समिधमादधाति सा प्रायणीया याꣳ स्नास्यन्त्सोदयनीयाय या अन्तरेणा सत्त्या एवास्य ता ब्राह्मणो ब्रह्मचर्यमुपयन् ॥ २ ॥ चतुर्धा भूतानि प्रविशति । अग्निं पदा मृत्युं पदाचार्यं पदात्मन्येवास्य चतुर्थः पादः परिशिष्यते ॥ ३ ॥ स यदग्नये समिधमाहरति । य एवास्याग्नौ पादस्तमेव तेन परिक्रीणाति तꣳ संस्कृत्यात्मन्धत्ते स एनमाविशति ॥ ४ ॥ अथ यदात्मानं दरिद्रीकृत्येव । अङ्क्तीर्भूत्वा

भिन्नते य एवास्य मृत्यौ पादस्तमेव तेन परिक्रीणाति तꣳ संस्कृत्यात्मन्धत्ते स एनमाविशति ॥५॥ अथ यदाचार्यवचसं करोति । यदाचार्याय कर्म करोति य एवास्याचार्ये पादस्तमेव तेन परिक्रीणाति तꣳ संस्कृत्यात्मन्धत्ते स एनमाविशति ॥६॥ न ह वै स्नावा भिन्नेत । अप ह वै स्नावा भिन्नां ज्ञयत्यप ज्ञातीनामशनायामप पितॄणाꣳ स एवं विद्वान्यस्या एव भूयिष्ठꣳ श्नाघेत तां भिन्नेतेत्याऽऽहुस्तल्लोक्यमिति स यद्यन्यां भिन्नितव्यां न विन्देदपि स्वामेवाचार्यज्ञायां भिन्नेताथो स्वां मातरं नैनꣳ सप्तम्यभिन्नितातीयात्तमेवं विद्वाꣳसमेवं चरन्तꣳ सर्वे वेदा आविशन्ति यथा ह वाऽग्निः समिद्धो रोचतऽएवꣳ ह वै स स्नावा रोचते य एवं विद्वान्ब्रह्मचर्यं चरति ॥७॥ ब्राह्मणम् ॥६ [३. ३.] ॥ तृतीयोऽध्यायः [६१.] ॥ ॥

उद्दालको हारुणिः । उदीच्यान्वृतो धावयां चकार तस्य निष्क उपाहित आसितद्ध स्म वै तत्पूर्वेषां वृतानां धावयतामेकधनमुपाहितं भवत्युपवल्हाय बिभ्यतां तान्होदीच्यानां ब्राह्मणान्भीर्विवेद ॥१॥ कौरुपञ्चालो वाऽयं ब्रह्मा ब्रह्मपुत्रः । यद्वै नोऽयमर्धं न पर्यादद्दीत हन्तैनं ब्रह्मोद्यमाह्वयामहाऽइति केन वीरेणेति स्वैदायनेनेति शौनको ह स्वैदायन आस ॥२॥ ते होचुः । स्वैदायन वया वीरेणेमं प्रतिसंयतामहाऽइति स होवाचोपात्र खलु रमताꣳ न्वेनं वेदानीति तꣳ होभिप्रपेदे तꣳ होभिप्रपन्नमभ्युवाद स्वैदायनाऽइति होऽ गौतमस्य पुत्रेतीतरः प्रतिशुश्राव तꣳ ह तत एव प्रष्टुं दध्रे ॥३॥ स वै गौतमस्य पुत्र वृतो ज्ञनं धावयेत् । यो दर्शपूर्णमासयोरष्टौ पुरस्तादाज्यभागान्विद्यात्पञ्च मध्यतो हविर्भागान्षट् प्राजापत्यानष्टाऽउपरिष्टादाज्यभागान् ॥४॥ स वै गौतमस्य पुत्र वृतो ज्ञनं धावयेत् । यस्तद्दर्शपूर्णमासयोर्विद्याद्यस्मादिमाः प्रजा अदत्तका ज्ञायन्ते यस्मादासां ज्ञायन्ते यस्मादासां प्रभियन्ते यस्मादासाꣳ संतिष्ठन्ते यस्मादासां पुनरुत्तमे

वयसि सर्वऽएव प्रभिद्यन्ते यस्माद्धरऽएवाग्रे जायतेऽथोत्तरे यस्मादणीयाꣳस एवाधरे प्रथीयाꣳस उत्तरे यस्माद्दꣳष्ट्रा वर्षीयाꣳसो यस्मात्समा एव जम्भ्याः ॥५॥ स वै गौतमस्य पुत्र वृतो जनं धावयेत् । यस्तद्दर्शपूर्णमासयोर्विद्याद्यस्मादिमाः प्रजा लोमशा जायन्ते यस्मादासां पुनरिव श्मश्रूण्यौपपक्ष्याणि दुर्बीरिणानि जायन्ते यस्माद्दीर्घणखेवाग्रे पलितो भवत्यथ पुनरुत्तमे वयसि सर्व एव पलितो भवति ॥६॥ स वै गौतमस्य पुत्र वृतो जनं धावयेत् । यस्तद्दर्शपूर्णमासयोर्विद्याद्यस्मात्कुमारस्य रेतः सिक्तं न सम्भवति यस्मादस्य मध्यमे वयसि सम्भवति यस्मादस्य पुनरुत्तमे वयसि न सम्भवति ॥७॥ यो गायत्रीꣳ हरिणीम् । ज्योतिष्मद्वां यजमानꣳ स्वर्गं लोकमभिवहन्तीं विद्यादिति तस्मै ह निष्कं प्रददावनूचानः स्वैदायनासि सुवर्णं वाव सुवर्णविदे ददतीति तꣳ होपगुह्य निश्चक्राम तꣳ ह पप्रच्छुः किमिवैष गौतमस्य पुत्रोऽभूदिति ॥८॥ स होवाच । यथा ब्रह्मा ब्रह्मपुत्रो मूर्धास्य विपतेद्य एनमुपवल्हेतेति ते ह तत एव विप्रेयुस्तꣳ ह तत एव समित्पाणिः प्रतिचक्रमऽउप त्वायानीति किमध्येष्यमाण इति यानेव मा प्रश्नानप्राक्षीस्तानेव मे विब्रूहीति स होवाचानुपतायैव तऽएनान्ब्रवाणीति ॥९॥ तस्माऽउ हैतदुवाच । द्वावाघारौ पञ्च प्रयाजा आग्नेय आज्यभागोऽष्टम एतेऽष्टौ पुरस्तादाज्यभागाः सौम्य आज्यभागो हविर्भागाणां प्रथमो हविर्हि सोम आग्नेयः पुरोडाशोऽग्नीषोमीय उपाꣳशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदेते पञ्च मध्यतो हविर्भागाः ॥१०॥ प्राशित्रं चेडा च । यच्चाग्नीधऽआदधाति ब्रह्मभागो यजमानभागोऽन्वाहार्य एते षट् प्राजापत्यास्त्रयोऽनुयाजाश्चत्वारः पत्नीसंयाजाः समिष्टयजुरष्टममेतेऽष्टाऽउपरिष्टादाज्यभागाः ॥११॥ अथ यदपुरोऽनुवाक्यकाः प्रयाजा भवन्ति । तस्मादिमाः प्रजा अदन्तका जायन्तेऽथ यत्पुरोऽनुवाक्यवन्ति हवीꣳषि भवन्ति तस्मादासां जायन्तेऽथ यदपुरोऽनुवाक्यका अनुयाजा भवन्ति तस्मादा-

सां प्रभिन्धन्तेऽथ यत्पुरोऽनुवाक्यवन्तः पत्नीसंयाजा भवन्ति तस्मादासाꣳ संतिष्ठन्तेऽथ यदपुरोऽनुवाक्यकꣳ समिष्टयजुर्भवति तस्मादासां पुनरुत्तमे वयसि सर्वऽएव प्रभिन्धन्ते ॥ १२ ॥ ॥ शमम्५७०० ॥ ॥ अथ यदनुवाक्यामनूच्य । याज्यया यजति तस्माद्धरऽएवाग्रे जायन्तेऽथोत्तरेऽथ यद्गायत्रीमनूच्य त्रिष्टुभा यजति तस्मादणीयाꣳस एवाधरे प्रथीयाꣳस उत्तरेऽथ यत्प्राञ्चावाघारावाघारयति तस्माद्दꣳष्ट्रा वर्षीयाꣳसोऽथ यत्सक्न्दसावेव संयाज्ये भवतस्तस्मात्समा एव ज्ञम्याः ॥ १३ ॥ अथ यद्बर्हिः स्तृणाति । तस्मादिमाः प्रजा लोमशा जायन्तेऽथ यत्पुनरिव प्रस्तरꣳ स्तृणाति तस्मादासां पुनरिव श्मश्रूण्यौपपक्ष्याणि डुर्बीरिणानि जायन्तेऽथ यत्केवलमेवाग्रे प्रस्तरमनुप्रहरति तस्माद्दीर्षण्येवाग्रे पलितो भवत्यथ यत्सर्वमेव बर्हिरनुप्रहरति तस्मात्पुनरुत्तमे वयसि सर्व एव पलितो भवति ॥ १४ ॥ अथ यदाज्यहविषः प्रयाजा भवन्ति । तस्मात्कुमारस्य रेतः सिक्तं न सम्भवत्युदकमिवैव भवत्युदकमिव ह्याज्यमथ यन्मध्ये यज्ञस्य दध्ना पुरोडाशेनेति यजन्ति तस्मादस्य मध्यमे वयसि सम्भवति द्रप्सीवैव भवति द्रप्सीव हि रेतोऽथ यदाज्यहविष एवानुयाजा भवन्ति तस्मादस्य पुनरुत्तमे वयसि न सम्भवत्युदकमिवैव भवत्युदकमिव ह्याज्यम् ॥ १५ ॥ वेदिरेव गायत्री । तस्यै येऽष्टौ पुरस्तादाज्यभागाः स दक्षिणः पक्षो येऽष्टाऽउपरिष्टादाज्यभागाः स उत्तरः पक्षः सैषा गायत्री कुरिणी ज्योतिष्पक्षा यजमानꣳ स्वर्गं लोकमभिवहति य एवमेतद्वेद ॥ १६ ॥ ब्राह्मणम् ॥ ७ [8. १.] ॥ ॥

अथातः स्रुचोरादानम्य । तद्वैतदेके कुशला मन्यमाना दक्षिणेनैव स्रुक्समादत्ते सव्येनोपभृतं न तथा कुर्याद्यो वैनं तत्र ब्रूयात्प्रतिप्रतिं न्वाऽअयमध्वर्युर्यजमानस्य द्विषन्तं भ्रातृव्यमकत्प्रत्युद्यामिनमितीश्वरो ह तथैव स्यात् ॥ १ ॥ इत्थमेव कुर्यात् । उभाभ्यामेव पाणिभ्यां स्रुचं परिगृह्योपभृत्यधिनिदध्यात्तस्य नोपमीमाꣳसास्ति

तत्पशव्यमायुष्यं तेऽसꣳशꣳसयन्नाद्दीत यत्सꣳशꣳसयेद्योगक्षेमो यजमानमृच्छेत्तस्मादसꣳशꣳसयन्नाद्दीत ॥२॥ अथातोऽतिक्रमणस्य । वज्रेण ह वाऽअन्योऽध्वर्युर्यजमानस्य पशून्विधमति वज्रेण ह्यस्माऽअन्य उपसमूहत्येष ह वाऽअध्वर्युर्वज्रेण यजमानस्य पशून्विधमति य आश्रावयिष्यन्दक्षिणेनातिक्रामति सव्येनाश्रावयाथ ह्यस्माऽएष उपसमूहति य आश्रावयिष्यत्सव्येनातिक्रामति दक्षिणेनाश्रावयैष ह्यस्माऽउपसमूहति ॥३॥ अथातो धारणस्य । तद्धैतदेके कुशला मन्यमानाः प्रगृह्य बाहू स्रुचौ धारयन्ति न तथा कुर्याद्यो हैनं तत्र ब्रूयाद्भूलौ न्वाऽअयमध्वर्युर्बाहूऽअकृत शूलबाहुर्भविष्यतीतीश्वरो ह तथैव स्यादथ हैष मध्यमः प्राणस्तस्माद्व तमुपन्यच्चेवैव धारयेत् ॥४॥ अथात आश्रावणस्य । षड्वा वाऽआश्रावितानि न्यक्तिर्यगूर्ध्वं कृपणं बहिःष्यन्तःश्रि ॥५॥ एतद्ध वै न्यक् । योऽयमुच्चैरादाय शनैर्निदधाति स यमिक्षित्यापीयान्त्स्यादिति तस्योच्चैरादाय शनैर्निदध्यात्तेन स पापीयान्भवति ॥६॥ अथ हैतत्तिर्यक् । योऽयं यावतैवादत्ते तावता निदधाति स यमिक्षैनैव श्रेयान्त्स्यान्न पापीयानिति तस्य यावतैवाद्दीत तावता निदध्यात्तेन स नैव श्रेयान्न पापीयान्भवति ॥७॥ अथ हैतदूर्ध्वम् । योऽयꣳ शनैरादायोच्चैर्निदधाति स यम्मिक्षैक्षेयान्त्स्यादिति तस्य शनैरादायोच्चैर्निदध्यात्तेन स श्रेयान्भवति ॥८॥ अथ हैतत्कृपणम् । योऽयमणु दीर्घमस्वरमाश्रावयति यो हैनं तत्र ब्रूयात्कृपणं न्वाऽअयमध्वर्युर्यजमानमकद्विषतो भ्रातृव्यस्योपावसायिनमितीश्वरो ह तथैव स्यात् ॥९॥ अथ हैतद्बहिःश्रि । योऽयमपव्यादायौष्ठाऽउच्चैरस्वरमाश्रावयति श्रीर्वै स्वरो बाह्यत एव तच्छ्रियं धत्तेऽशनायुको भवति ॥१०॥ अथ हैतदन्तःश्रि । योऽयꣳ संधायौष्ठाऽउच्चैः स्वरवदाश्रावयति श्रीर्वै स्वरोऽन्तरत एव तच्छ्रियं धत्तेऽन्नादो भवति ॥११॥ स वै मन्द्रमिवोरसि । परास्तभ्योभयतोबार्हतमुच्चैरन्ततो निदध्यात्तस्य नोपमीमाꣳसास्ति तत्पशव्यमायुष्यम् ॥१२॥ अथातो होमस्य । तद्वै-

तदेके कुशला मन्यमानाः प्राचीꣳ स्रुचमुपावकृत्य क्रुत्वा पर्याकृत्योपभृत्यधिनिद्-धति न तथा कुर्याद्यो हैनं तत्र ब्रूयादनुयुवं न्वाऽअयमध्वर्युर्यज्ञमानमकद्विषतो भ्रातृव्यस्यान्ववसायिनमितीश्वरो ह तथैव स्यात् ॥१३॥ पार्श्वत ऽ हैके । स्रुच-मुपावकृत्य क्रुत्वा पर्याकृत्योपभृत्यधिनिद्धति न तथा कुर्याद्यो हैनं तत्र ब्रूयाद्-तीर्थेन न्वाऽअयमध्वर्युराकृतीः प्रारौत्सीत्सं वा शरिष्यते घृणिर्वा भविष्यतीतीश्व-रो ह तथैव स्यात् ॥१४॥ इत्यमेव कुर्यात् । प्राचीमेव स्रुचमुपावकृत्य क्रुत्वा तेनैवाधिकृत्योपभृत्यधिनिद्ध्यात्तस्य नोपमीमाꣳसास्ति तत्पशव्यमायुष्यम् ॥१५॥ प्रद्ग्धाकृतिर्ह वाऽअन्योऽध्वर्युः । आकृतीर्हान्यः संतर्पयत्येष ह वै प्रद्ग्धाकृतिर्-ध्वर्युर्योऽयमाज्यꣳ क्रुत्वावदानानि जुहोत्येतꣳ ह वै तद्दृश्यमाना वाग्भ्युवाद प्रद्-ग्धाकृतिर्वाऽअयमध्वर्युरित्यथ हैना एष संतर्पयति योऽयमाज्यं क्रुत्वावदानानि जुहोत्यथ पुनरुत्तत आज्येनाभिजुहोत्येष हैनाः संतर्पयति तासाꣳ संतृप्तानां देवा हिरण्मयांश्चमसान्पूरयन्ते ॥१६॥ तदु होवाच याज्ञवल्क्यः । यद्वाऽउपस्तीर्यावदा-याभिघारयति तदेवैनाः संतर्पयति तासाꣳ संतृप्तानां देवा हिरण्मयांश्चमसान्पूर-यन्तेऽयस्थूणागृहपतीनां वै शौल्बायनोऽध्वर्युरास ॥१७॥ स होवाच । इदमहेदꣳ सत्त्रं कृशपश्वल्पाज्यमथायं गृहपतिरस्मीति मन्यतऽइति ॥१८॥ स होवाच । अ-ध्वर्यवा वै नोऽक्रुत्त एते वै ते स्रुचौ ये त्वꣳ संवत्सरं नाशक आदातुं यद्वै त्वाहु-मेतयोरनुशिष्यां प्र प्रज्ञया पशुभिर्जायेथा अभि स्वर्गं लोकं वहेरिति ॥१९॥ स होवाच । उप त्वायानीति स होवाचात्र वाव खल्वर्हसि यो नः संवत्सरेऽध्-र्युरभूरनुपेतायैव तऽएतद्ब्रवाणीति तस्माऽउ हैतदेव स्रुचोरादानमुवाच यदेतद्वा-ख्याम तस्मादेवंविदमेवाध्वर्युं कुर्वीत नानेवंविदम् ॥२०॥ ब्राह्मणम् ॥८ [४. २.]

॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या१०४ ॥ ॥

प्रजापतिर्वै प्रजाः सृजमानोऽतप्यत । तस्माच्छ्रान्तात्तपानाच्छ्रीरुद्क्रामत्सा दीप्य-

माना भ्राज्ञमाना लेलायत्यतिष्ठत्तां दीप्यमानां भ्राज्ञमानां लेलायत्तीं देवा अभ्यध्यायन् ॥ १ ॥ ते प्रजापतिमब्रुवन् । कृनामेमामेदमस्या ददामहाऽइति स होवाच स्त्री वाऽएषा यद्भूर्न वै स्त्रियं घ्नन्त्युत त्वाऽअस्या ज्ञोवल्याऽएवाददतऽइति ॥ २ ॥ तस्या अग्निरन्नाद्यमादत्त । सोमो राज्यं वरुणः साम्राज्यं मित्रः क्षत्रमिन्द्रो बलं बृहस्पतिर्ब्रह्मवर्चसꣳ सविता राष्ट्रं पूषा भगꣳ सरस्वती पुष्टिं त्वष्टा रूपाणि ॥ ३ ॥ सा प्रजापतिमब्रवीत् । आ वै मऽइदमदिषतेति स होवाच यज्ञेनैनान्पुनर्याचस्वेति ॥ ४ ॥ सैतां दशहविषमिष्टिमपश्यत् । आग्नेयमष्टाकपालं पुरोडाशꣳ सौम्यं चरुं वारुणं दशकपालं पुरोडाशं मैत्रं चरुमैन्द्रमेकादशकपालं पुरोडाशं बार्हस्पत्यं चरुꣳ सावित्रं द्वादशकपालं वाष्टाकपालं वा पुरोडाशं पौष्णं चरुꣳ सारस्वतं चरुं त्वाष्ट्रं दशकपालं पुरोडाशम् ॥ ५ ॥ तानेतयानुवाक्यया न्ववदत् । अग्निः सोमो वरुणो मित्र इन्द्रो बृहस्पतिः सविता यः सहस्री पूषा नो गोभिर्वसा सरस्वती त्वष्टा रूपाणि समनक्तु यज्ञैरिति ते प्रत्युपातिष्ठन्त ॥ ६ ॥ तानेतया याज्यया । परस्तात्प्रतिलोमं प्रत्येत्वष्टा रूपाणि ददती सरस्वती पूषा भगꣳ सविता मे ददातु बृहस्पतिर्ददिन्द्रो बलं मे मित्रः क्षत्रं वरुणः सोमोऽग्निरिति ते पुनर्दानायाधियन्त ॥ ७ ॥ सैतानुपहोमानपश्यत् । अग्निरन्नादोऽन्नपतिरन्नाद्यमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकृतिमेवादायाग्निरुदक्रामत्पुनरस्याऽअन्नाद्यमददात् ॥ ८ ॥ सोमो राजा राजपतिः । राज्यमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकृतिमेवादाय सोम उदक्रामत्पुनरस्यै राज्यमददात् ॥ ९ ॥ वरुणः सम्राट् सम्राट्पतिः । साम्राज्यमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकृतिमेवादाय वरुण उदक्रामत्पुनरस्यै साम्राज्यमददात् ॥ १० ॥ मित्रः क्षत्रं क्षत्रपतिः । क्षत्रमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकृतिमेवादाय मित्र उदक्रामत्पुनरस्यै क्षत्रमददात् ॥ ११ ॥ इन्द्रो बलं बलपतिः । बलमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकृतिमेवादायेन्द्र उदक्रामत्पुनरस्यै बलमददात् ॥ १२ ॥ बृहु-

स्पतिर्ब्रह्म ब्रह्मपतिः । ब्रह्मवर्चसमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकूतिमेवादाय बृहस्पतिरुदक्रामत्पुनरस्यै ब्रह्मवर्चसमददात् ॥१३॥ सविता राष्ट्रꣳ राष्ट्रपतिः । राष्ट्रमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकूतिमेवादाय सवितेदक्रामत्पुनरस्यै राष्ट्रमददात् ॥१४॥ पूषा भगं भगपतिः । भगमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकूतिमेवादाय पूषोदक्रामत्पुनरस्यै भगमददात् ॥१५॥ सरस्वती पुष्टिं पुष्टिपतिः । पुष्टिमस्मिन्यज्ञे मयि दधातु स्वाहेत्याकूतिमेवादाय सरस्वत्युदक्रामत्पुनरस्यै पुष्टिमददात् ॥१६॥ त्वष्टा रूपाणां रूपकृद्रूपपतिः । रूपेण पशूनस्मिन्यज्ञे मयि दधातु स्वाहेत्याकूतिमेवादाय त्वष्टोदक्रामत्पुनरस्यै रूपेण पशूनददात् ॥१७॥ ता वा ऽएताः । दश देवता दश ऋचोऽषि दशाकूतयो दश दक्षिणा दशदशिनी विराट् श्रीर्विराट् श्रियाꣳ ह्येतद्विराज्यन्नाद्ये प्रतितिष्ठति ॥१८॥ तस्यै पञ्चदश सामिधेन्यो भवन्ति । उपाꣳशु देवता यजति पञ्च प्रयाजा भवन्ति त्रयोऽनुयाजा एकꣳ समिष्टयजुः पुष्टिमत्तावाज्यभागावग्निना रयिमश्नवत्पोषमेव दिवे-दिवे यशसं वीरवत्तमम् ॥ गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः सुमित्रः सोम नो भवेति ॥ सहस्रवत्यौ संयाज्ये नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु द्युमद्ग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम् ॥ उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः शं नः शोचा मरुद्वृधोऽग्ने सहस्रसातम इति ॥११॥ ताꣳ ह्येतां गोतमो राहूगणः । विद्यां चकार सा ह जनकं वैदेहं प्रत्युत्ससाद ताꣳ होवाच सहस्रं भो याज्ञवल्क्य दद्मो यस्मिन्वयं वयि मित्रविन्दामन्वविदामिति विन्दते मित्रꣳ राष्ट्रमस्य भवत्यप पुनर्मृत्युं जयति सर्वमायुरिति य एवं विद्वानेतयेष्या यजते यो वैतदेवं वेद ॥२०॥ ब्राह्मणम् ॥ १ [४. ३.] ॥॥

अथातो ऋविषः समृद्धिः । षड्वै ब्रह्मणो द्वारोऽग्निर्वायुरापश्चन्द्रमा विद्युदादित्यः ॥१॥ स य उपदग्धेन ऋविषा यजते । अग्निना ह स ब्रह्मणो द्वारेण

प्रतिपद्यते सोऽग्निना ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यꣳ सलोकतां जयति ॥२॥ अथ यो विपतितेन हविषा यजते । वायुना हꣳ स ब्रह्मणो द्वारेण प्रतिपद्यते स वायुना ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यꣳ सलोकतां जयति ॥३॥ अथ योऽशृतेन हविषा यजते । अद्भिर्हꣳ स ब्रह्मणो द्वारेण प्रतिपद्यते सोऽद्भिर्ब्रह्मणो द्वारेण प्रतिप° ॥४॥ अथ य उपरक्तेन हविषा यजते । चन्द्रमसा हꣳ स ब्रह्मणो द्वारेण प्रतिपद्यते स चन्द्रमसा ब्रह्मणो द्वारेण प्रतिप° ॥५॥ अथ यो लोहितेन हविषा यजते । विद्युता हꣳ स ब्रह्मणो द्वारेण प्रतिपद्यते स विद्युता ब्रह्मणो द्वारेण प्रतिप° ॥६॥ अथ यः शृतेन हविषा यजते । आदित्येन हꣳ स ब्रह्मणो द्वारेण प्रतिपद्यते स आदित्येन ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यꣳ सलोकतां जयति सैषा हविषः समृद्धिः स यो हैवमेतꣳ हविषः समृद्धिं वेद सर्वसमृद्धेन हैवास्य हविषेष्टं भवति ॥७॥ अथानो यज्ञस्य समृद्धिः । यद्वै यज्ञस्य न्यूनं प्रज्ञाननमस्य तदथ यदतिरिक्तं पशव्यमस्य तदथ यत्संकसुकꣳ श्रियाऽस्य तदथ यत्सम्पन्नꣳ स्वर्ग्यमस्य तत् ॥८॥ स यदि मन्येत । न्यूनं मे यज्ञेऽभूदिति प्रज्ञाननं मऽएतत्प्रज्ञानिष्यऽइत्येव तदुपासीत ॥९॥ अथ यदि मन्येत । अतिरिक्त मे यज्ञेऽभूदिति पशव्यं मऽएतत्पशुमान्भविष्यामीत्येव तदुपासीत ॥१०॥ अथ यदि मन्येत । संकसुकं मे यज्ञेऽभूदिति श्रिये मऽएतदा मा श्रीस्तेजसा यशसा ब्रह्मवर्चसेन परिवृता गमिष्यतीत्येव तदुपासीत ॥११॥ अथ यदि मन्येत । सम्पन्नं मे यज्ञेऽभूदिति स्वर्ग्यं मऽएतत्स्वर्गलोको भविष्यतीत्येव तदुपासीत सैषा यज्ञस्य समृद्धिः स यो हैवमेतां यज्ञस्य समृद्धिं वेद सर्वसमृद्धेन हैवास्य यज्ञेनेष्टं भवति ॥१२॥ ब्राह्मणम् ॥२ [४. ४.] ॥ चतुर्थोऽध्यायः [७०.] ॥ ॥

उर्वशी हाप्सराः । पुरूरवसमैडं चकमे तꣳ हꣳ विन्दमानोवाच त्रिः स्म माङ्गो

वैतसेन दण्डेन कृतादकामाꣳ स्म मा निपद्यासै मो स्म वा नग्नं दर्शमेष वै न स्त्रीणामुपचार इति ॥१॥ सा ह्यास्मिन्योगुवास । अपि ह्यास्माद्गर्भिण्यास तावद्योग्यास्मिन्नुवास ततो ह गन्धर्वाः समूदिरे ऽयोग्वाऽयमुर्वशी मनुष्येष्ववात्सीदुपजानीत यथेयं पुनरागच्छेदिति तस्यै ह्याविर्घुरणा शयनऽउपबद्धास ततो ह गन्धर्वा अन्यतरमुरणं प्रमेथुः ॥२॥ सा होवाच । अवीरऽइव बत मेऽजनऽइव पुत्रꣳ हरन्तीति द्वितीयं प्रमेथुः सा ह तथैवोवाच ॥३॥ अथ ह्यायमीक्षां चक्रे । कथं नु तद्वीरं कथमजनꣳ स्याद्यत्राहꣳ स्यामिति स नग्न एवानूत्पपात चिरं तन्मेने यद्वासः पर्यधास्यत ततो ह गन्धर्वा विद्युतं जनयां चक्रुस्तं यथा दिवैवं नग्नं ददर्श ततो हैवेयं तिरोबभूव पुनरैमीत्येत्तिरोभूताꣳ स आध्या जल्पन्कुरुक्षेत्रꣳ समया चचारान्यतःप्लक्षेति बिसवती तस्यै ह्याध्यक्षेन वव्राज तꣳ ह ता अप्सरस आतयो भूत्वा परिपुप्लुविरे ॥४॥ तꣳ हैयं ज्ञात्वोवाच । अयं वै स मनुष्यो यस्मिन्नहमवात्समिति ता होचुस्तस्मै वाऽआत्मिरसामेति तथेति तस्मै ह्याविरासुः ॥५॥ ताꣳ ह्यायं ज्ञात्वाभिपरोवाद । हये जाये मनसा तिष्ठ घोरे वचाꣳसि मिश्रा कृणावावहै नु न नौ मन्त्रा अनुदितास एते मयस्करन्परतरे चनाहन्नित्युप नु रम सं नु वदावहाऽइति हैवैनां तदुवाच ॥६॥ तꣳ हेतरा प्रत्युवाच । किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव पुनरवः पुनरस्तं परेहि दुरापना वात-इवाहमस्मीति न वै वं तदकरोर्यदहमब्रवं दुरापा वाऽअहं त्वयैतर्ह्यस्मि पुनर्गृहानिहीति हैवैनं तदुवाच ॥७॥ अथ ह्यायं परिप्लून ऽवाच । सुदेवोऽअद्य प्रपतेदनावृत्परावतं परमां गन्तवाऽउ अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासोऽअद्युरिति सुदेवोऽद्योद्वा बध्नीत प्र वा पतेत्तदेनं वृका वा श्वानो वाद्युरिति हैव तदुवाच ॥८॥ तꣳ हेतरा प्रत्युवाच । पुनरवो मा मृथा मा प्रपप्तो मा त्वा वृकासोऽअशिवास उ क्षन् न वै स्त्रैणानि सख्यानि

सन्ति सालावृकाणाꣳ हृदयान्येतेति मैतदादृथा न वै स्त्रैणꣳ सख्यमस्ति पुनर्गृहानिहीति हैवैनं तदुवाच ॥ ९ ॥ यद्विद्वपाचरम् । मर्त्येष्ववसꣳ रात्रीः शरदश्चतस्रः घृतस्य स्तोकꣳ सकृदङ्क आश्नां तादृवेदं तातृपाणा चरामीति तदेतदुक्तप्रत्युक्तं पञ्चदशर्चं बह्वृचाः प्राहुस्तस्यै ह हृदयमाव्ययां चकार ॥ १० ॥ सा होवाच । संवत्सरतमीꣳ रात्रिमागछतात्तन्मऽएकाꣳ रात्रिमत्ते शयितासे ज्ञात उ ते ऽयं तर्हि पुत्रो भवितेति स ह संवत्सरतमीꣳ रात्रिमाजगामेङ्गिरण्यविमितानि ततो हैनमेकमूचुरेतत्प्रपद्यस्वेति तद्धास्मै तामुपप्रजिघ्युः ॥ ११ ॥ सा होवाच । गन्धर्वा वै ते प्रातर्वरं दातारस्तं वृणासाऽइति तं वै मे त्वमेव वृणीष्वेति युष्माकमेवैकोऽसानीति ब्रूतादिति तस्मै ह प्रातर्गन्धर्वा वरं ददुः स होवाच युष्माकमेवैकोऽसानीति ॥ १२ ॥ ते होचुः । न वै सा मनुष्येष्वग्नेर्यज्ञिया तनूरस्ति यथेष्ट्वास्माकमेकः स्यादिति तस्मै ह स्थाल्यामोप्याग्निं प्रददुरनेनेष्ट्वास्माकमेको भविष्यसीति तं च ह कुमारं चादायावव्राज सोऽरण्यऽएवाग्निं निधाय कुमारेणैव ग्राममेयाय पुनरैमीत्येत्तिरोभूतं योऽग्निरश्वत्थं तं या स्थाली शमीं ताꣳ स ह पुनर्गन्धर्वानेयाय ॥ १३ ॥ ते होचुः । संवत्सरं चातुष्प्राश्यमोदनं पच स एतस्यैवाश्वत्थस्य तिस्रस्तिस्रः समिधो घृतेनान्वज्य समिद्भतीभिर्घृतवतीभिर्ऋग्भिरभ्याधत्तात्स यस्ततोऽग्निर्जनिता स एव स भवितेति ॥ १४ ॥ ते होचुः । परोऽक्षमिव वाऽएतदाश्वत्थीमेवोत्तरारणिं कुरुष्व शमीमयीमधरारणिꣳ स यस्ततोऽग्निर्जनिता स एव स भवितेति ॥ १५ ॥ ते होचुः । परोऽक्षमिव वाऽएतदाश्वत्थीमेवोत्तरारणिं कुरुष्वाश्वत्थीमधरारणिꣳ स यस्ततोऽग्निर्जनिता स एव स भवितेति ॥ १६ ॥ स आश्वत्थीमेवोत्तरारणिं चक्रे । आश्वत्थीमधरारणिꣳ स यस्ततोऽग्निर्जज्ञे स एव स आस तेनेष्ट्वा गन्धर्वाणामेक आस तस्मादाश्वत्थीमेवोत्तरारणिं कुर्वीताश्वत्थीमधरारणिꣳ स यस्ततोऽग्निर्जायते स एव स भवति तेनेष्ट्वा गन्धर्वाणामेको भवति

॥ १७ ॥ ब्राह्मणम् ॥ ३ [५. १.] ॥ ॥

प्रजापतिर्ह चातुर्मास्यैरात्मानं विदधे । स इममेव दक्षिणं बाहुं वैश्वदेवꣳ हविरकुरुत तस्यायमेवाङ्गुष्ठ आग्नेयꣳ हविरिदꣳ सौम्यमिदꣳ सावित्रꣳ ॥ १ ॥ स वै वर्षिष्ठः पुरोडाशो भवति । तस्मादियमासां वर्षिष्ठेदꣳ सारस्वतमिदं पौष्णमथ य एष उपरिष्टाद्धस्तस्य संधिस्तन्मारुतमिदं वैश्वदेवं द्यौर्द्यावापृथिवीयं तद्वाऽअनिरुक्तं भवति तस्मात्तदनिरुक्तम् ॥ २ ॥ अयमेव दक्षिण ऊरुर्वरूणप्रघासाः । तस्य यानि पञ्च हवीꣳषि समायोनि ता इमाः पञ्चाङ्गुलयः कुल्फावैवेन्द्राग्नꣳ हविस्तद्वै द्विदेवत्यं भवति तस्मादिमौ द्वौ कुल्फाविदं वारुणमिदं मारुतमनूकं कायस्तद्वाऽअनिरुक्तं भवति तस्मात्तदनिरुक्तम् ॥ ३ ॥ मुखमेवास्यानीकवतीष्टिः । मुखꣳ हि प्राणानामनीकमुरः सांतपनीयोरसा हि समिव तप्यतऽउदरं गृहमेधीया प्रतिष्ठा वाऽउदरं प्रतिष्ठित्याऽएव शिश्नान्येवास्य क्रैडिनꣳ हविः शिश्नैर्हि क्रीडतीवायमेवावाङ् प्राण आदित्येष्टिः ॥ ४ ॥ अयमेवोत्तर ऊरुर्महाहविः । तस्य यानि पञ्च हवीꣳषि समायोनि ता इमाः पञ्चाङ्गुलयः कुल्फावैवेन्द्राग्नꣳ हविस्तद्वै द्विदेवत्यं भवति तस्मादिमौ द्वौ कुल्फाविदं माहेन्द्रमिदं वैश्वकर्मणं तद्वाऽअनिरुक्तं भवति तस्मात्तदनिरुक्तमथ यदिदमत्तरुदरे तत्पितृयज्ञस्तद्वाऽअनिरुक्तं भवति तस्मात्तदनिरुक्तम् ॥ ५ ॥ अयमेवोत्तरो बाहुः शुनासीरीयम् । तस्य यानि पञ्च हवीꣳषि समायोनि ता इमाः पञ्चाङ्गुलयोऽथ य एष उपरिष्टाद्धस्तस्य संधिस्तकुनासीरीयमिदं वायव्यं दोः सौर्यं तद्वाऽअनिरुक्तं भवति तस्मात्तदनिरुक्तम् ॥ ६ ॥ तानि वाऽएतानि । चातुर्मास्यानि त्रिषंधीनि द्विसमस्तानि तस्मादिमानि पुरुषस्याङ्गानि त्रिषंधीनि द्विसमस्तानि तेषां वै चतुर्णां द्वयोस्त्रीणि-त्रीणि हवीꣳष्यनिरुक्तानि भवन्ति द्वे-द्वे द्वयोः ॥ ७ ॥ तेषां वै चतुर्धाग्निं मन्थन्ति । तस्माच्चतुर्भिरङ्गैरायुते द्वयोः प्रणयन्ति तस्माद्बाभ्यामेत्येवमु ह प्रजापतिश्चातुर्मास्यैरात्मानं विदधे

तथोऽएवैवंविद्यज्ञमानश्चातुर्मास्यैरात्मानं विधत्ते ॥८॥ तदाहुः । सर्वगायत्रं वैश्वदेवꣳ हविः स्यात्सर्वत्रैष्टुभं वरुणप्रघासाः सर्वज्ञागतं महाहविः सर्वानुष्टुभꣳ शुनासीरीयं चतुष्टोमस्यात्याऽइति तꣳ तथा न कुर्याद्यद्वाऽएतान्यभिसम्पद्यन्ते तेनैवास्य स काम उपाप्तो भवति ॥९॥ तानि वाऽएतानि । चातुर्मास्यानि द्वाषष्टानि त्रीणि शतानि बृहत्यः सम्पद्यन्ते तदेभिः संवत्सरꣳ च महाव्रतं चाप्नोत्यथो द्विप्रतिष्ठो वाऽअयं यज्ञमानो यज्ञमानमेवैतत्स्वर्गे लोकऽआयातयति प्रतिष्ठांपयति ॥१०॥ ब्राह्मणम् ॥४ [५. २.] ॥ ॥

शौचेयो ह प्राचीनयोग्यः । उद्दालकमारुणिमाजगाम ब्रह्मोद्यमग्निहोत्रं विविदिषामीति ॥१॥ स होवाच । गौतम का तेऽग्निहोत्री को वत्सः किमुपसृष्टा किꣳ संयोजनं किं दुह्यमानं किं दुग्धं किमाक्रियमाणं किमधिश्रितं किमवद्योत्यमानं किमद्भिः प्रत्यानीतं किमुद्वास्यमानं किमुद्वासितं किमुन्नीयमानं किमुन्नीतं किमुद्यतं किꣳ ह्रियमाणं किं निगृहीतम् ॥२॥ काꣳ समिधमाद्धासि का पूर्वाहुतिः किमुपासीषदः किमपैद्धिष्ठाः कोत्तराहुतिः ॥३॥ किꣳ हुत्वा प्रकम्पयसि । किꣳ स्रुचं परिमृज्य कूर्चे न्यमार्ङ्क्षीः किं द्वितीयं परिमृज्य दक्षिणातो हस्तमुपासीषदः किं पूर्वं प्राशीः किं द्वितीयं किमुत्सृष्यापाः किꣳ स्रुच्यप आनीय निरौक्षीः किं द्वितीयं किं तृतीयमेतां दिशमुदौक्षीः किं ह्यघनेनाहवनीयमपो न्यनैषीः किꣳ समतिष्ठिपो यदि वाऽएतद्विद्वानग्निहोत्रमहौषीरथ ते हुतं यद्यु वाऽअविद्वानहुतमेव तऽइति ॥४॥ स होवाच । इडैव मे मानव्यग्निहोत्री वायव्यो वत्सः सञ्जूरुपसृष्टा विराड् संयोजनमाश्विनं दुह्यमानं वैश्वदेवं दुग्धं वायव्यमाक्रियमाणमाग्नेयमधिश्रितमैन्द्राग्नमवद्योत्यमानं वारुणमद्भिः प्रत्यानीतं वायव्यमुद्वास्यमानं द्यावापृथिव्यमुद्वासितमाश्विनमुन्नीयमानं वैश्वदेवमुन्नीतं महादेवायोद्यतं वायव्यꣳ ह्रियमाणं वैष्णवं निगृहीतम् ॥५॥ अथ याꣳ समिधमाद्धामि । आहुतीनाꣳ सा प्र-

तिष्ठा या पूर्वाऽऽहुतिर्देवांस्तयाप्रैषं यदुपासीषदं बार्हस्पत्यं तमदैक्षिषीमं चामुं च लोकौ तेन समधां योत्तराऽऽहुतिर्मा तया स्वर्गे लोकेऽधाम् ॥ ६ ॥ अथ यद्धुवा प्रकम्पयामि । वायव्यं तमत्स्रुचं परिमृज्य कूर्चे न्यमार्ङ्क्षमोषधिवनस्पतींस्तेनाप्रैषं यद्द्वितीयं परिमृज्य दक्षिणतो हस्तमुपासीषदं पितॄंस्तेनाप्रैषं यत्पूर्वं प्राशिषं मां तेनाप्रैषं यद्द्वितीयं प्रजां तेनाथ यदुत्सृप्यापां पशूंस्तेनाप्रैषं यत्स्रुच्यप आनीय निरौक्षिषꣳ सर्पदेवजनांस्तेनाप्रैषं यद्द्वितीयं गन्धर्वाप्सरसस्तेनाथ यत्तृतीयमेतां दिशमुदौक्षिषꣳ स्वर्गस्य लोकस्य तेन द्वारं व्यवारिषं यज्जघनेनाहवनीयमपो न्यनैषमस्मै लोकाय तेन वृष्टिमदां यत्समतिष्ठिपं यत्पृथिव्या ऊनं तत्तेनापूपुरमित्येतन्नौ भगवत्सकेति होवाच ॥ ७ ॥ शौचेयो ज्ञप्तः । प्रद्यामि त्वेव भगवन्तमिति पृच्छैव प्राचीनयोग्येति स होवाच यस्मिन्काल ऽउद्धृतास्तेऽग्नयः स्युरुपावहृतानि पात्राणि होष्यन्त्स्या अथ तऽआहवनीयोऽनुगच्छेद्वेत्थ तद्वयं यदत्र जुह्वतो भवतीति वेदेति होवाच पुरा चिरादस्य ज्येष्ठः पुत्रो म्रियेत यस्यैतद्विदितꣳ स्याद्विद्याभिस्त्वेवाहमतारिषमिति किं विदितं का प्रायश्चित्तिरिति प्राण उदानमप्यगादिति गार्हपत्यऽआहुतिं जुहुयाꣳ सैव प्रायश्चित्तिर्न तदागः कुर्वीयेत्येतन्नौ भगवत्सकेति होवाच ॥ ८ ॥ शौचेयो ज्ञप्तः । प्रद्यामि त्वेव भगवन्तमिति पृच्छैव प्राचीनयोग्येति स होवाच यत्र तऽएतस्मिन्नेव काले गार्हपत्योऽनुगच्छेद्वेत्थ तद्वयं यदत्र जुह्वतो भवतीति वेदेति होवाच पुरा चिरादस्य गृहपतिर्म्रियेत यस्यैतद्विदितꣳ स्याद्विद्याभिस्त्वेवाहमतारिषमिति किं विदितं का प्रायश्चित्तिरित्युदानः प्राणमप्यगादित्याहवनीयऽआहुतिं जुहुयाꣳ सैव प्रायश्चित्तिर्न तदागः कुर्वीयेत्येतन्नौ भगवत्सकेति होवाच ॥ ९ ॥ शौचेयो ज्ञप्तः । प्रद्यामि त्वेव भगवन्तमिति पृच्छैव प्राचीनयोग्येति स होवाच यत्र तऽएतस्मिन्नेव कालेऽन्वाहार्यपचनोऽनुगच्छेद्वेत्थ तद्वयं यदत्र जुह्वतो भवतीति वेदेति होवाच पुरा चिरादस्य सर्वे पशवो

म्रियेरन्यस्यैतद्विदितꣳ स्याद्विद्याभिस्त्वेवाकृमतारिषमिति किं विदितं का प्रायश्चित्तिरिति व्यान ऽदानमप्यगादिति गार्हपत्यऽआकृतिं जुहुयाꣳ सैव प्रायश्चित्तिर्न तदागः कुर्वीयेत्येतन्नौ भगवत्सकृेति होवाच ॥१०॥ शौचयो ज्ञप्तः । प्रव्याम्येव भगवन्तमिति पृच्छैव प्राचीनयोग्येति स होवाच यत्र तऽएतस्मिन्नेव काले सर्वेऽग्नयोऽनुगच्छेयुर्वेत्थ तद्वयं यदत्र जुहुतो भवतीति वेदेति होवाच पुरा चिरादस्यादायादं कुलꣳ स्याच्चस्यैतद्विदितꣳ स्याद्विद्याभिस्त्वेवाकृमतारिषमिति किं विदितं का प्रायश्चित्तिरिति पुरा चिरादग्निं मथित्वा यां दिशं वातो वायात्तां दिशमाहवनीयमुद्धृत्य वायव्यामाकृतिं जुहुयाꣳ स विद्याꣳ समृद्धं मेऽग्निहोत्रꣳ सर्वदेवत्यं वायुꣳ होव सर्वाणि भूतान्यपियन्ति वायोः पुनर्विसृज्यन्ते सैव प्रायश्चित्तिर्न तदागः कुर्वीयेत्येतन्नौ भगवत्सकृेति होवाच ॥११॥ शौचेयो ज्ञप्तः । प्रव्याम्येव भगवन्तमिति पृच्छैव प्राचीनयोग्येति स होवाच यत्र तऽएतस्मिन्नेव काले निवाते सर्वेऽग्नयोऽनुगच्छेयुर्वेत्थ तद्वयं यदत्र जुहुतो भवतीति वेदेति होवाचाप्रियमेवास्मिंल्लोके पश्येताप्रियममुष्मिन्यस्यैतद्विदितꣳ स्याद्विद्याभिस्त्वेवाकृमतारिषमिति किं विदितं का प्रायश्चित्तिरिति पुरा चिरादग्निं मथित्वा प्राञ्चमाहवनीयमुद्धृत्य ज्ञघनेनाहवनीयमुपविश्याकृमेवैनत्पिबेयꣳ स विद्याꣳ समृद्धं मेऽग्निहोत्रꣳ सर्वदेवत्यं ब्राह्मणꣳ होव सर्वाणि भूतान्यपियन्ति ब्राह्मणात्पुनर्विसृज्यन्ते सैव प्रायश्चित्तिर्न तदागः कुर्वीयेत्यथ वाऽब्रूमेतन्नावेदिषमिति होवाच ॥१२॥ शौचेयो ज्ञप्तः । इमानि समित्काष्ठान्युपायानि भगवन्तमिति स होवाच यदेवं नावद्यो मूर्धा ते व्यपतिष्यदेकधुपेकृीति तथेति तꣳ होपनिन्ये तस्मै हैताꣳ शोकतरां व्याकृतिमुवाच यत्सत्यं तस्माद्ध सत्यमेव वदेत् ॥१३॥ ब्राह्मणम् ॥५ [५. ३.] ॥ ॥

ब्रह्मचर्यमागामित्याह । ब्रह्मणऽएवैतदात्मानं निवेदयति ब्रह्मचार्यसानीत्याह

ब्रह्मणऽएवैतदात्मानं परिददात्यथैनमाह को नामासीति प्रजापतिर्वै कः प्राजापत्यमेवैनं तत्कृत्वोपनयते ॥१॥ अथास्य हस्तं गृह्णाति । इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासावित्येते वै श्रेष्ठे बलिष्ठे देवते एताभ्यामेवैनꣳ श्रेष्ठाभ्यां बलिष्ठाभ्यां देवताभ्यां परिददाति तथा हास्य ब्रह्मचारी न कां चनार्तिमार्छति न स य एवं वेद ॥२॥ अथैनं भूतेभ्यः परिददाति । प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददामीत्येते वै श्रेष्ठे वर्षिष्ठे देवतेऽएताभ्यामेवैनꣳ श्रेष्ठाभ्यां वर्षिष्ठाभ्यां देवताभ्यां परिददाति तथा हास्य ब्रह्मचारी न कां चनार्तिमार्छति न स य एवं वेद ॥३॥ अद्भ्यस्त्वौषधीभ्यः परिददामीति । तदेनमद्भ्यश्चौषधिभ्यश्च परिददाति द्यावापृथिवीभ्यां त्वा परिददामीति तदेनमाभ्यां द्यावापृथिवीभ्यां परिददाति ययोरिदꣳ सर्वमधि विश्वेभ्यस्त्वा भूतेभ्यः पारददाम्यरिष्ट्या ऽइति तदेनꣳ सर्वेभ्यो भूतेभ्यः परिददात्यरिष्ट्यै तथा हास्य ब्रह्मचारी न कां चनार्तिमार्छति न स य एवं वेद ॥४॥ ॥ शतम्५८०० ॥ ॥ ब्रह्मचार्यसीत्याह । ब्रह्मणऽएवैनं तत्परिददात्यपोऽशानेत्यमृतं वाऽआपोऽमृतमशानित्येवैनं तदाह कर्म कुर्विति वीर्यं वै कर्म वीर्यं कुर्वित्येवैनं तदाह समिधमाधेहीति समित्स्वात्मानं तेजसा ब्रह्मवर्चसेनेत्येवैनं तदाह मा सुषुप्था इति मा मृषा इत्येवैनं तदाहापोऽशानेत्यमृतं वाऽआपोऽमृतमशानेत्येवैनं तदाह तदेनमुभयतोऽमृतेन परिगृह्णाति तथा हास्य ब्रह्मचारी न कां चनार्तिमार्छति न स य एवं वेद ॥५॥ अथास्मै सावित्रीमन्वाह । ताꣳ हास्मैतां पुरा संवत्सरेऽन्वाहुः संवत्सरसंमिता वै गर्भाः प्रजायन्ते जातऽएवास्मिंस्तद्दधं दध्म इति ॥६॥ अथ षट्सु मासेषु । षड्वाऽऋतवः संवत्सरस्य संवत्सरसंमिता वै गर्भाः प्रजायन्ते जातऽएवास्मिंस्तद्दधं दध्म इति ॥७॥ अथ चतुर्विꣳशत्यक्षे । चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाः संवत्सरसंमिता वै गर्भाः प्रजायन्ते जातऽएवास्मिंस्तद्दधं दध्म इति

॥ ८ ॥ अथ द्वादशाहे । द्वादश वै मासाः संवत्सरस्य संवत्सरसं° ॥ ९ ॥ अथ षडहे । षड्वाऽऋतवः संवत्सरस्य संवत्सरसं° ॥ १० ॥ अथ त्र्यहे । त्रयो वाऽऋतवः संवत्सरस्य संवत्सरसं° ॥ ११ ॥ तदपि श्लोकं गायन्ति । आचार्यो गर्भी भवति हस्तमाधाय दक्षिणम् तृतीयस्याꣳ स जायते सावित्र्या सह ब्राह्मण इति सद्यो ह वाव ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मणः सद्यो वाऽअग्निर्जायते तस्मात्सद्य एव ब्राह्मणायानुब्रूयात् ॥ १२ ॥ ताꣳ हैतामेके । सावित्रीमनुष्टुभमन्वाहुर्वाग्वाऽअनुष्टुप्तद्स्मिन्वाचं दध्म इति न तथा कुर्याद्यो हैनं तत्र ब्रूयादा न्वाऽअयमस्य वाचमदित मूको भविष्यतीतीश्वरो ह तथैव स्यात्तस्मादेतां गायत्रीमेव सावित्रीमनुब्रूयात् ॥ १३ ॥ अथ हैके दक्षिणतः । तिष्ठते वासीनाय वान्वाहुर्न तथा कुर्याद्यो हैनं तत्र ब्रूयाद्बुल्बं न्वाऽअयमिममज्ञीज्ञनत बुल्बो भविष्यतीतीश्वरो ह तथैव स्यात्तस्मात्पुरस्तादेव प्रतीचे समीक्षमाणायानुब्रूयात् ॥ १४ ॥ तां वै पङ्क्तो ऽन्वाह । त्रयो वै प्राणाः प्राण उदानो व्यानस्तानेवास्मिंस्तद्दधात्यथार्धर्चशो द्वौ वाऽइमौ प्राणौ प्राणोदानाविव प्राणोदानाविवास्मिंस्तद्दधात्यथ कृत्स्नामेको वाऽअयं प्राणः कृत्स्न एव प्राणमेवास्मिंस्तत्कृत्स्नं दधाति ॥ १५ ॥ तदाहुः । न ब्राह्मणं ब्रह्मचर्यमुपनीय मिथुनं चरेद्भीरु वाऽएष भवति यो ब्रह्मचर्यमुपैति नेदिमं ब्राह्मणं विषिक्ताद्रेतसो जनयानीति ॥ १६ ॥ तदु वाऽआहुः । काममेव चरेद्बुध्नो वाऽइमाः प्रजा दैव्यश्चैव मानुष्यश्च ता वाऽइमा मानुष्यः प्रजाः प्रजननात्प्रजायन्ते छन्दाꣳसि वै दैव्यः प्रजास्तानि मुखतो जनयते तत एतं जनयते तस्मादु काममेव चरेत् ॥ १७ ॥ तदाहुः । न ब्रह्मचारी सन्मधञ्चीयादोषधीनां वाऽएष परमो रसो यन्मधु नेदन्नाद्यस्यान्तं गछानीत्यथ ह स्माह श्वेतकेतुरारुणेयो ब्रह्मचारी सन्मधञ्जस्त्र्यै वाऽएतद्विद्यायै शिष्टं यन्मधु स तु रसो यस्येदृक्शिष्टमिति यथा ह वाऽऋचं वा यजुर्वा साम वाभिव्याहरेत्तादृक्तस्य एवं विद्वान्ब्रह्मचारी स-

न्मधश्चाति तस्माद्ध काममेवाश्नीयात् ॥१८॥ ब्राह्मणम् ॥ ६ [५. ४.] ॥ ॥

देवान्वाऽऊर्ध्वात्स्वर्गं लोकं यतः । असुरास्तमसात्तरदधुस्ते होचुर्न वाऽअस्यान्येन सत्त्रादपघातोऽस्ति हन्त सत्त्रमासामहाऽइति ॥१॥ ते शताग्निष्टोमꣳ सत्त्रमुपेयुः । ते यावदासीनः परापश्येत्तावतस्तमोऽपाघ्नतेवमेव शतोक्थ्येन यावत्तिष्ठन्परापश्येत्तावतस्तमोऽपाघ्नत ॥२॥ ते होचुः । अप वाव तमो हन्महे न वेव सर्वमिव हन्त प्रजापतिं पितरं प्रत्ययामेति ते प्रजापतिं पितरं प्रतीत्योचुरसुरा वै नो भगव ऊर्ध्वात्स्वर्गं लोकं यतस्तमसात्तरदधुः ॥३॥ ते शताग्निष्टोमꣳ सत्त्रमुपैम । ते यावदासीनः परापश्येत्तावतस्तमोऽपाहन्मक्षेवमेव शतोक्थ्येन यावत्तिष्ठन्परापश्येत्तावतस्तमोऽपाहन्महि प्र नो भगवञ्ज्ञाधि यथासुरांस्तमोऽपहत्य सर्वं पाप्मानमपहत्य स्वर्गं लोकं प्रज्ञास्याम इति ॥४॥ स होवाच । असर्वक्रतुभ्यां वै यज्ञाभ्यामगन्त यदग्निष्टोमेन चोक्थ्येन च शतातिरात्रꣳ सत्त्रमुपेत तेनासुरांस्तमोऽपहत्य सर्वं पाप्मानमपहत्य स्वर्गं लोकं प्रज्ञास्यथेति ॥५॥ ते शतातिरात्रꣳ सत्त्रमुपेयुः । तेनासुरांस्तमोऽपहत्य सर्वं पाप्मानमपहत्य स्वर्गं लोकं प्रजज्ञुस्तेषामर्वाक्पञ्चाशेषेवाहःस्वहरभि रात्रिसामानि परीयू रात्रिमभ्यहःसामानि ॥६॥ ते होचुः । अमुहाम वै न प्रजानीमो हन्त प्रजापतिमेव पितरं प्रत्ययामेति ते प्रजापतिमेव पितरं प्रतीत्योचुरहन्नो रात्रिसामानि रात्र्यामक्षो भवन्ति नः विपश्चिद्यज्ञान्मुग्धान्विद्वान्धीरोऽनुशाधि न इति ॥७॥ तान्हैतदुपजगौ । महाहिमिव वै ह्रदाद्बलीयानन्ववेत्य अनुत्त स्वादास्थानात्ततः सत्त्रं न तायतऽइति ॥८॥ आश्विनं वै वः शस्यमानम् । प्रातरनुवाकमास्थानादनुत्त यमास्थानादनुद्ध धीराः सन्तोऽअधीरवत् प्रशास्त्रा तमुपेत शनैरप्रतिशꣳसतेति ॥९॥ ते होचुः । कथं नु भगवः शस्तं कथमप्रतिशस्तमिति स होवाच यत्र होताश्विनꣳ शꣳसन्नाग्नेयस्य क्रतोर्गायत्रस्य छन्दसः पारं गछात्तत्प्रतिप्रस्याता

वसतीवरीः परिहृत्य मैत्रावरुणस्य हविर्धानयोः प्रातरनुवाकमुपाकुरुताऽच्चैर्होता शꣳसति शनैरितरो ज्ञप्यमान-श्वान्वाह तन्न वाचा वाचं प्रत्येति न छन्दसा छन्दः ॥१०॥ परिहिते प्रातरनुवाके । यथायतनमेवोपाꣳश्वत्तर्यामौ कृत्वा द्रोणकलशे पवित्रं प्रपीड्य निदधाति तिरोऽक्ष्यैश्वरित्वा प्रत्यञ्चः प्रतिपरेत्य तिरोऽक्ष्यानिव भक्षयाधाऽथानुपूर्वं यज्ञपुꣳ सꣳस्थाप्य यऽऊर्ध्वा अत्तर्यामाद्वहास्तान्गृहीत्वा विप्रुषाꣳ होमꣳ कृत्वा संतनिं च बर्हिष्यवमानेन स्तुवाहरेव प्रतिपद्याधाऽइति ॥११॥ तदेतेऽभि श्लोकाः । चतुर्भिः सैन्धवैर्युक्तैर्धीरा व्यजहुस्तमः विद्वाꣳसो ये शतक्रतु देवाः सत्रमतन्वतेति ॥१२॥ चत्वारो वाव यत्र युक्ता भवन्ति । द्वौ होतारौ द्वावध्वर्यू पवेर्नु शक्वेव हनूनि कल्पयन्नक्षोरुत्तौ व्यतिषजन्त धीराः न दानवा यन्नियं तन्तुमेषां विज्ञानीमो वितनं मोहयन्ति नः ॥ पूर्वस्याङ्गः परिशिꣳषन्ति कर्म तदुत्तरेणाभिवितन्वतेऽङ्का दुर्विज्ञानं काव्यं देवतानाꣳ सोमाः सोमैर्व्यतिषक्ताः प्लवन्ते ॥ समानात्सदमुन्नन्ति हयान्काष्ठभृतो यथा पूर्णान्परिस्रुतः कुम्भान्जनमेजयसादनऽइत्यसुररक्षसान्यपेयुः ॥१३॥ ब्राह्मणम् ॥ ७ [५. ५.] ॥ ॥

पञ्चैव महायज्ञाः । तान्येव महासत्त्राणि भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति ॥१॥ अहरहर्भूतेभ्यो बलिꣳ हरेत् । तथैतं भूतयज्ञꣳ समाप्नोत्यहरहर्दद्यादोदपात्रात्तथैतं मनुष्ययज्ञꣳ समाप्नोत्यहरहः स्वधाकुर्यादोदपात्रात्तथैतं पितृयज्ञꣳ समाप्नोत्यहरहः स्वाहाकुर्यादा काष्ठात्तथैतं देवयज्ञꣳ समाप्नोति ॥२॥ अथ ब्रह्मयज्ञः । स्वाध्यायो वै ब्रह्मयज्ञस्तस्य वाऽएतस्य ब्रह्मयज्ञस्य वागेव स्रुग्मन उपभृच्चक्षुर्ध्रुवा मेधा स्रुवः सत्यमवभृथः स्वर्गो लोक उदयनं यावत्तꣳ ह वाऽइमां पृथिवीं वित्तेन पूर्णां ददल्लोकं जयति त्रिस्तावन्तं जयति भूयाꣳसं चाक्षय्यं य एवं विद्वानहरहः स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्यः ॥३॥

पयआकृतयो ह वाऽएता देवानाम् । यदृचः स य एवं विद्वानृचोऽहरहः स्वाध्यायमधीते पयआकृतिभिरेव तद्देवांस्तर्पयति तऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः सम्पद्भिर्घृतकुल्या मधुकुल्याः पितॄंस्स्वधा अभिवहन्ति ॥ ४ ॥ आज्याकृतयो ह वाऽएता देवानाम् । यद्यजूꣳषि स य एवं विद्वान्यजूꣳष्यहरहः स्वाध्यायमधीतऽआज्याकृतिभिरेव तद्देवांस्तर्पयति तऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रे° ॥ ५ ॥ सोमाकृतयो ह वाऽएता देवानाम् । यत्सामानि स य एवं विद्वान्त्सामान्यहरहः स्वाध्यायमधीते सोमाकृतिभिरेव तद्देवांस्तर्पयति तऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रे° ॥ ६ ॥ मेदआकृतयो ह वा एता देवानाम् । यदथर्वाङ्गिरसः स य एवं विद्वानथर्वाङ्गिरसोऽहरहः स्वाध्यायमधीते मेदआकृतिभिरेव तद्देवांस्तर्पयति तऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रे° ॥ ७ ॥ मधाकृतयो ह वाऽएता देवानाम् । यदनुशासनानि विद्या वाकोवाक्यमितिहासपुराणं गाथा नाराशꣳस्यः स य एवं विद्वाननुशासनानि विद्या वाकोवाक्यमितिहासपुराणं गाथा नाराशꣳसीरित्यहरहः स्वाध्यायमधीते मधाकृतिभिरेव तद्देवांस्तर्पयति तऽएनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रे° ॥ ८ ॥ तस्य वाऽएतस्य ब्रह्मयज्ञस्य । चत्वारो वषट्कारा यद्वातो वाति यद्विद्योतते यत्स्तनयति यद्वस्फूर्जति तस्मादेवंविद्वाते वाति विद्योतमाने स्तनयत्यवस्फूर्जत्यधीयीतैव वषट्काराणामहम्बषट्कारायाति ह वै पुनर्मृत्युं मुच्यते गच्छति ब्रह्मणः सात्मताꣳ स चेदपि प्रबलमिव न शक्नुयादप्येकं देवपदमधीयीतैव तथा भूतेभ्यो न क्षीयते ॥ १ ॥ ब्राह्मणम् ॥ ८ [५. ६.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या १११ ॥ ॥

अथातः स्वाध्यायप्रशꣳसा । प्रिये स्वाध्यायप्रवचने भवतो युक्तमना भवत्यपराधीनोऽहरहरर्थान्साधयते सुखꣳ स्वपिति परमचिकित्सक आत्मनो भवतीन्द्रि-

यसंयमश्चैकारामता च प्रज्ञावृद्धिर्यशो लोकपक्तिः प्रज्ञा वर्धमाना चतुरो धर्मान्ब्राह्मणमभिनिष्पादयति ब्राह्मणं प्रतिरूपचर्या यशो लोकपक्तिं लोकः पच्यमानश्चतुर्भिर्धर्मैर्ब्राह्मणं भुनक्त्यर्चया च दानेन चाज्येयतया चावध्यतया च ॥१॥ ये ह वै के च श्रमाः । इमे द्यावापृथिवीऽअन्तरेण स्वाध्यायो हैव तेषां परमता काष्ठा य एवं विद्वान्त्स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्यः ॥२॥ यद्ध वाऽअयं छन्दसः । स्वाध्यायमधीते तेन-तेन हैवास्य यज्ञक्रतुनेष्टं भवति य एवं विद्वान्त्स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्यः ॥३॥ यदि ह वा अप्यभ्यक्तः । अलंकृतः सुकृतः सुखे शयने शयानः स्वाध्यायमधीतऽआ हैव स नखाग्रेभ्यस्तप्यते य एवं विद्वान्त्स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्यः ॥४॥ मधु ह वाऽऋचः । घृतꣳ ह सामान्यमृतं यजूꣳषि यद्ध वाऽअयं वाकोवाक्यमधीते क्षीरौदनमाꣳसौदनौ हैव तौ ॥५॥ मधुना ह वाऽएष देवांस्तर्पयति । य एवं विद्वानृचोऽहरहः स्वाध्यायमधीते तऽएनं तृप्तास्तर्पयन्ति सर्वैः कामैः सर्वैर्भोगैः ॥६॥ घृतेन ह वाऽएष देवांस्तर्पयति । य एवं विद्वान्त्सामान्यहरहः स्वाध्यायमधीते तऽएनं तृप्ता° ॥७॥ अमृतेन ह वाऽएष देवांस्तर्पयति । य एवं विद्वान्यजूꣳष्यहरहः स्वाध्यायमधीते तऽएनं तृप्ता° ॥८॥ क्षीरौदनमाꣳसौदनाभ्याꣳ ह वाऽएष देवांस्तर्पयति । य एवं विद्वान्वाकोवाक्यमितिहासपुराणमित्यहरहः स्वाध्यायमधीते तऽएनं तृप्ता° ॥९॥ यन्ति वाऽआपः । एत्यादित्य एति चन्द्रमा यन्ति नक्षत्राणि यथा ह वाऽएता देवता नेयुर्न कुर्युरेवꣳ हैव तद्यहर्ब्राह्मणो भवति यदहः स्वाध्यायं नाधीते तस्मात्स्वाध्यायोऽध्येतव्यस्तस्माद्ऋचं वा यजुर्वा साम वा गाथां वा कुर्व्यां वाभिव्याहरेद्व्रतस्याव्यवच्छेदाय ॥१०॥ ब्राह्मणम् ॥१ [५.७.] ॥॥

प्रजापतिर्वाऽइदमग्रऽआसीत् । एक एव सोऽकामयत स्यां प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्माच्छ्रान्तात्तेपानात्त्रयो लोका असृज्यन्त पृथिव्यन्तरिक्षं

द्यौः ॥ १ ॥ स इमांस्त्रींल्लोकानभितताप । तेभ्यस्तप्तेभ्यस्त्रीणि ज्योतीꣳष्यजायन्ताग्निर्योऽयं पवते सूर्यः ॥ २ ॥ स इमानि त्रीणि ज्योतीꣳष्यभितताप । तेभ्यस्तप्तेभ्यस्त्रयो वेदा अजायन्ताग्नेर्ऋग्वेदो वायोर्यजुर्वेदः सूर्यात्सामवेदः ॥ ३ ॥ स इमांस्त्रीन्वेदानभितताप । तेभ्यस्तप्तेभ्यस्त्रीणि शुक्राण्यजायन्त भूरित्यृग्वेदाद्भुव इति यजुर्वेदात्स्वरिति सामवेदात्तद्ऋग्वेदेनैव होत्रमकुर्वत यजुर्वेदेनाध्वर्यवꣳ सामवेदेनोद्गीथं यदेव त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमथोच्चक्राम ॥ ४ ॥ ते देवाः प्रजापतिमब्रुवन् । यदि न ऋक्तो वा यजुष्टो वा सामतो वा यज्ञो क्लृप्तः कथमेनं भिषज्येमेति ॥ ५ ॥ स होवाच । यद्यृक्तो भूरिति चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुहुवथ यदि यजुष्टो भुव इति चतुर्गृहीतमाज्यं गृहीत्वाग्नीध्रीये जुहुवथान्वाहार्यपचने वा हविर्यज्ञे यदि सामतः स्वरिति चतुर्गृहीतमाज्यं गृहीत्वाहवनीये जुहुवथ यद्युꣳश्रविज्ञातमसत्सर्वाण्यनुद्रुत्याहवनीये जुहुवथ तदृग्वेदेनैवऽर्ग्वेदं भिषज्यति यजुर्वेदेन यजुर्वेदꣳ सामवेदेन सामवेदꣳ स यथा पर्वणा पर्व संदध्यादेवꣳ हैव स संदधाति य एताभिर्भिषज्यत्यथ यो ह्यतोऽन्येन भिषज्यति यथा शीर्णेन शीर्णꣳ संधित्सेद्यथा वा शीर्णे गर्तमभिनिदध्यादेवं तत्तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदम् ॥ ६ ॥ तदाहुः । यदृचा होत्रं क्रियते यजुषाध्वर्यवꣳ साम्नोद्गीथोऽथ केन ब्रह्मत्वमित्यनया त्रय्या विद्ययेति ह ब्रूयात् ॥ ७ ॥ ब्राह्मणम् ॥ २ [५. ८.] ॥ ॥

प्रजापतिर्ह वाऽएष यदꣳशुः । सोऽस्यैष आत्मैवात्मा ह्ययं प्रजापतिर्वागेवादाभ्यः स यदꣳशुं गृहीत्वादाभ्यं गृह्णात्यात्मानमेवास्यैतत्संस्कृत्य तस्मिन्नेतां वाचं प्रतिष्ठापयति ॥ १ ॥ अथ मनो ह वाऽअꣳशुः । वागदाभ्यः प्राण एवाꣳशुरुदानोऽदाभ्यश्चक्षुरेवाꣳशुः श्रोत्रमदाभ्यस्तद्यदेतौ ग्रहौ गृह्णन्ति सर्वत्वायैव कृत्स्नतायै ॥ २ ॥ अथ देवाश्च ह वाऽअसुराश्च । उभये प्राजापत्या अस्पर्धन्त तऽएतस्मिन्नेव यज्ञे प्रजापतावस्पर्धन्तास्माकमयꣳ स्यादस्माकमयꣳ स्यादिति ॥ ३ ॥ ततो देवाः ।

अर्चन्तः आभ्यन्तश्चेरुस्तꣳएतं ग्रहं ददृशुरेतमदाभ्यं तमगृह्णत ते सवनानि प्रावृ-
ह्रन्त ते सर्वं यज्ञꣳ समवृञ्जतान्तरायन्नसुरान्यज्ञात् ॥४॥ ते होचुः । अद्भाम वा
ꣳएनानिति तस्माद्दाभ्यो न वै नोऽद्भन्निति तस्माद्दाभ्यो वाग्वाऽअदाभ्यः से-
यमदब्धा वाक्तस्माद्वैवादाभ्य एवꣳ ह वै द्विषतो भ्रातृव्यस्य सर्वं यज्ञꣳ संवृङ्क्तꣳएवं
द्विषन्तं भ्रातृव्यꣳ सर्वस्माद्यज्ञान्निर्भजति बहिर्धा करोति य उꣳएवमेतद्वेद ॥५॥
स येनैव पात्रेणाꣳशुं गृह्णाति । तस्मिन्नेव पात्रे निग्राभ्याभ्योऽप आनीय तस्मिन्ने-
तानꣳशून्गृह्णाति ॥६॥ उपयामगृहीतोऽसि । अग्नये त्वा गायत्रछन्दसं गृह्णामीति
गायत्रं प्रातःसवनं तत्प्रातःसवनं प्रवृहतीन्द्राय त्वा त्रिष्टुप्छन्दसं गृह्णामीति त्रै-
ष्टुभं माध्यन्दिनꣳ सवनं तन्माध्यन्दिनꣳ सवनं प्रवृहति विश्वेभ्यस्त्वा देवेभ्यो ज-
गच्छन्दसं गृह्णामीति जागतं तृतीयसवनं तत्तृतीयसवनं प्रवृहत्यनुष्टुप्तेऽभिगर
इति यद्वाऽऊर्धꣳ सवनेभ्यस्तदानुष्टुभं तदेवैतत्प्रवृहति तन्नाभिषुणोति वज्रो वै
ग्रावा वाग्दाभ्यो नेद्वज्रेण वाचꣳ हिनसानीति ॥७॥ अꣳशूनेवाधूनोति । व्रेशी-
नां त्वा पत्मन्नाधूनोमि कुकूननानां त्वा पत्मन्नाधूनोमि भन्दनानां त्वा पत्मन्नाधू-
नोमि मदिन्तमानां त्वा पत्मन्नाधूनोमि मधुन्तमानां त्वा पत्मन्नाधूनोमीत्येता वै दे-
वीरापस्तस्याश्चैव दैवीरापो याश्चेमा मानुष्यस्ताभिरेवास्मिन्नेतदुभयीभी रसं दधाति
॥८॥ शुक्रं त्वा शुक्रꣳआधूनोमीति । शुक्रꣳ ह्येतच्छुक्रꣳआधूनोत्यङ्को वै रूपे सूर्यस्य
रश्मिष्विति तदङ्कश्चैवैनमेतद्रूपे सूर्यस्य च रश्मिष्वाधूनोति ॥९॥ ककुभꣳ रूपं वृ-
षभस्य रोचते-बृहदिति । एतद्वै ककुभꣳ रूपं वृषभस्य रोचते बृहत्य एष तपति
शुक्रः शुक्रस्य पुरोगाः सोमः सोमस्य पुरोगा इति तच्छुक्रमेवैतच्छुक्रस्य पुरोगां क-
रोति सोमꣳ सोमस्य पुरोगां यत्ते सोमादाभ्यं नाम जागृवि तस्मै त्वा गृह्णामी-
त्येतद्ध वाऽअस्यादाभ्यं नाम जागृवि यद्वाक्तद्वाचमेवैतद्वाचि गृह्णाति ॥१०॥ अथो-
पनिष्क्रम्य जुहोति । तस्मै ते सोम सोमाय स्वाहेति तत्सोममेवैतत्सोमाय जु-

क्रोति तथो वाचमग्नौ न प्रवृणात्त्यथ क्रिरण्यमभिव्यनित्यसाविव बन्धुस्तस्य तावतीरेव दक्षिणा यावतीरुशोः ॥११॥ अथाऽशून्पुनरुप्यर्जति । उशिक्कं देव सोमाग्नेः प्रियं पाथोऽपीहि वशी त्वं देव सोमेन्द्रस्य प्रियं पाथोऽपीह्यस्मत्सखा त्वं देव सोम विश्वेषां देवानां प्रियं पाथोऽपीक्रोति सवनानि वाऽअदः प्रवृक्ति तान्येवैतत्पुनरुप्यायत्यायतयामानि करोति तेरुयातयामैर्यज्ञं तन्वते ॥१२॥ ब्राह्मणम् ॥ ३ [५. १.] ॥ ॥ पञ्चमोऽध्यायः [७१.] ॥ ॥

भृगुर्ह वै वारुणिः । वरुणं पितरं विद्ययातिमेने तद्ध वरुणो विदां चकारेति वै मा विद्यया मन्यतऽइति ॥१॥ स क्रोवाच । प्राङ् पुत्रक व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वा दक्षिणा व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वा प्रत्यग्व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वोदग्व्रजतात्तत्र यत्पश्येस्तद्दृष्ट्वैतयोः पूर्वयोरुत्तरमन्ववात्तरदेशं व्रजतात्तत्र यत्पश्येस्तन्मऽआचक्षीथा इति ॥२॥ स ह तत एव प्राङ् प्रवव्राज । एडु पुरुषैः पुरुषान्पर्वाण्येषां पर्वशः संव्रश्च पर्वशो विभज्यमानानिदं तवेदं ममेति स क्रोवाच भीष्मं बत भोः पुरुषान्वाऽएतत्पुरुषाः पर्वाण्येषां पर्वशः संव्रश्च पर्वशो व्यभक्तेति ते क्रोचुरित्थं वाऽइमेऽस्मानमुष्मिंल्लोकेऽसचन्त तान्वयमिदमिह प्रतिसचामहाऽइति स क्रोवाचास्तीह प्रायश्चित्तीरित्यस्तीति का-ति पिता ते वेदेति ॥३॥ स ह तत एव दक्षिणा प्रवव्राज । एडु पुरुषैः पुरुषान्पर्वाण्येषां पर्वशः संकर्त पर्वशो विभज्यमानानिदं तवेदं ममेति स क्रोवाच भीष्मं बत भोः पुरुषान्वाऽएतत्पुरुषाः पर्वाण्येषां पर्वशः संकर्त पर्वशो व्यभक्तेति ते क्रोचुरित्थं वा इमेऽस्मानमुष्मिंल्लोकेऽसचन्त तान्वयमिदमिह प्रतिसचामहाऽइति स क्रोवाचास्तीह प्रायश्चित्तीरित्यस्तीति का-ति पितेव ते वेदेति ॥४॥ स ह तत एव प्रत्यङ् प्रवव्राज । एडु पुरुषैः पुरुषांस्तूष्णीमासीनांस्तूष्णीमासीनैरद्यमानान्स क्रोवाच भीष्मं बत भोः पुरुषान्वाऽएतत्पुरुषास्तूष्णीमासीनांस्तूष्णीमासीना अदन्तीति ते क्रोचुरित्थं

वाऽइमेऽस्मानमुष्मिंल्लोकेऽसचन्त तान्वयमिदमिह प्रतिसचामहाऽइति स होवाचास्तीह प्रायश्चित्तीरित्यस्तीति का-ति पितेव ते वेदेति ॥५॥ स ह तत एवोदङ् प्रवव्राज । एडु पुरुषैः पुरुषानाक्रन्दयत आक्रन्दयद्भिरम्यमानान्स होवाच भीष्मं बत भोः पुरुषान्वा एतत्पुरुषा आक्रन्दयत आक्रन्दयन्तोऽद्मीति ते होचुरित्थं वाऽइमेऽस्मानमु° ॥६॥ स ह तत एवैतयोः पूर्वयोः । उत्तरमन्ववावान्तरदेशं प्रवव्राजेडु स्त्रियौ कल्याणी चातिकल्याणीं च तेऽअन्तरेण पुरुषः कृष्णः पिङ्गाक्षो दण्डपाणिस्तस्थौ तꣳ हैनं दृष्ट्वा भीर्विविद स हेत्य संविवेश तꣳ ह पितोवाचाधीष्व स्वाध्यायं कस्मान्नु स्वाध्यायं नाधीषऽइति स होवाच किमध्येष्ये न किं चनास्तीति तद्ध वरुणो विदां चकाराद्राग्वाऽइति ॥७॥ स होवाच । यान्वै तत्प्राच्यां दिश्यद्राक्षीः पुरुषैः पुरुषान्पर्वाण्येषां पर्वशः संव्रश्च्यं पर्वशो विभज्यमानानिदं तवेदं ममेति वनस्पतयो वै तेऽअभूवन्स यद्वनस्पतीनाꣳ समिधमाद्धाति तेन वनस्पतीनवरुन्द्धे तेन वनस्पतीनां लोकं जयति ॥८॥ अथ यानेतद्दक्षिणायां दिश्यद्राक्षीः । पुरुषैः पुरुषान्पर्वाण्येषां पर्वशः संकर्तं पर्वशो विभज्यमानानिदं तवेदं ममेति पशवो वै तेऽअभूवन्स यत्पयसा जुहोति तेन पशूनवरुन्द्धे तेन पशूनां लोकं जयति ॥९॥ अथ यानेतत्प्रतीच्यां दिश्यद्राक्षीः । पुरुषैः पुरुषांस्तूष्णीमासीनांस्तूष्णीमासीनैरम्यमानानोषधयो वै ता अभूवन्स यत्तूष्णीनावज्योतयति तेनौषधीरवरुन्द्धे तेनौषधीनां लोकं जयति ॥१०॥ अथ यानेतदुदीच्यां दिश्यद्राक्षीः । पुरुषैः पुरुषानाक्रन्दयत आक्रन्दयद्भिरम्यमानानापो वै ता अभूवन्स यदपः प्रत्यानयति तेनापोऽवरुन्द्धे तेनापां लोकं जयति ॥११॥ अथ येऽएते । स्त्रियावद्राक्षीः कल्याणीं चातिकल्याणीं च सा या कल्याणी सा श्रद्धा स यत्पूर्वामाहुतिं जुहोति तेन श्रद्धामवरुन्द्धे तेन श्रद्धां जयत्यथ यातिकल्याणी साश्रद्धा स यदुत्तरामाहुतिं जुहोति तेनाश्रद्धामवरुन्द्धे तेनाश्रद्धां जयति ॥१२॥

अथ य एनं सोऽन्तरेण पुरुषः । कृष्णः पिङ्गाक्षो दण्डपाणिरुत्थात्क्रोधो वै सो ऽभूत्स यत्स्रुच्यप आनीय निनयति तेन क्रोधमवरुन्द्धे तेन क्रोधं जयति स य एवं विद्वानग्निहोत्रं जुहोति तेन सर्वं जयति सर्वमवरुन्द्धे ॥ १३ ॥ ब्राह्मणम् ॥ ४ [६. १.] ॥ ॥

जनको ह वै वैदेहो । ब्राह्मणौर्धावयद्भिः समाजगाम श्वेतकेतुनारुणेयेन सोमशुष्मेण सात्ययज्ञिना याज्ञवल्क्येन तान्होवाच कथं-कथमग्निहोत्रं जुहुथेति ॥ १ ॥ स होवाच । श्वेतकेतुरारुणेयो धर्मावेव सम्राडहमजस्रौ यशसा विष्यन्द-मानावन्योऽन्यस्मिन्जुहोमीति कथं तदित्यादित्यो वै धर्मस्तꣳ सायमग्नौ जुहोम्य-ग्निर्वै धर्मस्तं प्रातरादित्ये जुहोमीति किꣳ स भवति य एवं जुहोत्यजस्र एव श्रिया यशसा भवत्येतयोश्च देवतयोः सायुज्यꣳ सलोकतां जयतीति ॥ २ ॥ अथ होवाच सोमशुष्मः सात्ययज्ञिः । तेज एव सम्राडहं तेजसि जुहोमीति कथं तदित्यादित्यो वै तेजस्तꣳ सायमग्नौ जुहोम्यग्निर्वै तेजस्तं प्रातरादित्ये जुहोमीति किꣳ स भवति य एवं जुहोतीति तेजस्वी यशस्व्यन्नादो भवत्येतयोश्चैव देवतयोः सा-युज्यꣳ सलोकतां जयतीति ॥ ३ ॥ अथ होवाच याज्ञवल्क्यः । यदहमग्निमुद्धरामि-ग्निहोत्रमेव तदुद्धरामीत्यं वाऽस्तं यन्तꣳ सर्वे देवा अनुयन्ति ते मऽएतम-ग्निमुद्धृतं दृष्ट्वोपावर्तन्तेऽथाहं पात्राणि निर्णिज्योपवाप्याग्निहोत्रीं दोहयित्वा पश्य-न्पश्यतस्तर्पयामीति वं नेदिष्ठं याज्ञवल्क्यागिहोत्रस्यामीमाꣳसिष्ठा धेनुशतं ददा-मीति होवाच न वेवैनयोस्त्वमुत्क्रान्तिं न गतिं न प्रतिष्ठां न तृप्तिं न पुनरावृत्तिं न लोकं प्रत्युत्थायिनमित्युक्त्वा रथमास्थाय प्रधावयां चकार ॥ ४ ॥ ते होचुः । अति वै नोऽयꣳ राजन्यबन्धुरवादीद्यनेनं ब्रह्मोद्यमाक्रियामहाऽइति स होवाच याज्ञवल्क्यो ब्राह्मणा वै वयꣳ स्मो राजन्यबन्धुरसौ यद्यमुं वयं जयेम कमजैष्मे-ति ब्रूयामाथ यद्यसावस्मान्जयेद्ब्राह्मणान्राजन्यबन्धुरजैषीदिति नो ब्रूयुर्मेदमाद्धꣳ-

मिति तद्वास्य जघ्नुरथ ह याज्ञवल्क्यो रथमास्थायानुप्रधावयां चकार तꣳ ह्यान्वाजगाम स ह्येवाचाग्निहोत्रं याज्ञवल्क्य वेदितूꣳमित्यग्निहोत्रꣳ सम्राडिति ॥५॥ ते वाऽएते । ऽआहुती हुतेऽउत्क्रामतः तेऽअन्तरिक्षमाविशतस्तेऽअन्तरिक्षमेवाहवनीयं कुर्वाते वायुꣳ समिधं मरीचीरेव शुक्रामाहुतिं तेऽअन्तरिक्षं तर्पयतस्ते तत उत्क्रामतः ॥६॥ ते दिवमाविशतः । ते दिवमेवाहवनीयं कुर्वातेऽआदित्यꣳ समिधं चन्द्रमसमेव शुक्रामाहुतिं ते दिवं तर्पयतस्ते तत आवर्तेते ॥७॥ तेऽइमामाविशतः । तेऽइमामेवाहवनीयं कुर्वातेऽअग्निꣳ समिधमोषधीरेव शुक्रामाहुतिं तेऽइमां तर्पयतस्ते तत उत्क्रामतः ॥८॥ ते पुरुषमाविशतः । तस्य मुखमेवाहवनीयं कुर्वाते ह्रिह्वाꣳ समिधमन्नमेव शुक्रामाहुतिं ते पुरुषं तर्पयतः स य एवं विद्वानश्नात्यग्निहोत्रमेवास्य हुतं भवति ते तत उत्क्रामतः ॥९॥ ते स्त्रियमाविशतः । तस्या उपस्थमेवाहवनीयं कुर्वाते धारकाꣳ समिधं धारका ह वै नामैषैतया ह त्रै प्रजापतिः प्रजा धारयां चकार रेत एव शुक्रामाहुतिं ते स्त्रियं तर्पयतः स य एवं विद्वान्मिथुनमुपैत्यग्निहोत्रमेवास्य हुतं भवति यस्ततः पुत्रो जायते स लोकः प्रत्युत्थाय्येतदग्निहोत्रं याज्ञवल्क्य नातः परमस्तीति होवाच तस्मै ह याज्ञवल्क्यो वरं ददौ स होवाच कामप्रश्न एव मे वयि याज्ञवल्क्यासदिति ततो ब्रह्मा जनक आस ॥१०॥ ब्राह्मणम् ॥५ [६. २.] ॥ ॥

जनको ह वैदेहो । बहुदक्षिणेन यज्ञेनेजे स ह गवाꣳ सहस्रमवरुन्धनुवाचैता वो ब्राह्मणा यो ब्रह्मिष्ठः स उदजतामिति ॥१॥ स होवाच याज्ञवल्क्यो । ऽर्वाचीरेता इति ते होचुस्त्वꣳ स्विन्नो याज्ञवल्क्य ब्रह्मिष्ठोऽसीऽइति स होवाच नमोऽस्तु ब्रह्मिष्ठाय गोकामा एव वयꣳ स्म इति ॥२॥ ते होचुः । को न इमं प्रच्यतीति स होवाच विदग्धः शाकल्योऽहमिति तꣳ ह प्रतिष्ठायोवाच त्वाꣳ स्विद्शाकल्य ब्राह्मणा उल्मुकावज्ञयणमक्रताऽइति ॥३॥ स होवाच । कति

देवा याज्ञवल्क्येति त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिꣳशदित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रय इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्यध्यर्ध इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्येक इत्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥४॥ स होवाच । महिमान एवैषामेते त्रयस्त्रिꣳशत्वेव देवा इति कतमे ते त्रयस्त्रिꣳशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्तऽएकत्रिꣳशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिꣳशाविति ॥५॥ कतमे वसव इति । अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एते होदꣳ सर्वं वासयन्ते ते यदिदꣳ सर्वं वासयन्ते तस्माद्वसव इति ॥६॥ कतमे रुद्रा इति । इमे पुरुषे प्राणा आत्मैकादशास्ते यदास्मान्मर्त्याच्छरीरादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति ॥७॥ कतमऽआदित्या इति । द्वादश मासाः संवत्सरस्यैतऽआदित्या एते होदꣳ सर्वमाददाना यन्ति ते यदिदꣳ सर्वमाददाना यन्ति तस्मादादित्या इति ॥८॥ कतम इन्द्रः कतमः प्रजापतिरिति । स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति कतम स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति ॥९॥ कतमे ते त्रयो देवा इति । इमऽएव त्रयो लोका एषु होमे सर्वे देवा इति कतमौ तौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्ध इति योऽयं पवतऽइति कतम एको देव इति प्राण इति ॥१०॥ स होवाच । अनतिप्रश्यां मा देवतामत्यप्राक्षीः पुरेतिथ्यै मरिष्यसि न तेऽस्थीनि चन गृह्यान्प्राप्स्यन्तीति स ह तथैव ममार तस्य ह्याप्यन्यन्मन्यमानाः परिमोषिणोऽस्थीन्यपजह्रुस्तस्मान्नोपवादी स्याद्वृत्त्यै वैवैवित्परो भवति ॥११॥ ब्राह्मणम् ॥ ६ [६. ३.] ॥ षष्ठोऽध्यायः [७२.] ॥ ॥

पशुबन्धेन यजते । पशवो वै पशुबन्धः स यत्पशुबन्धेन यजते पशुमानसानीति तेन गृहेषु यजेत गृहेषु पशून्बध्नाऽइति तेन सुयवसे यजेत सुयवसे पशून्बध्नाऽइति जीर्यन्ति ह वै जुह्वतो यजमानस्याग्नयोऽग्नीन्जीर्यतोऽनु यजमानो यजमानमनु गृहाश्च पशवश्च ॥ १ ॥ ॥ शतम्५१०० ॥ ॥ स यत्पशुबन्धेन यजते । अग्नीनेवैतत्पुनर्णवान्कुरुतेऽग्नीनां पुनर्णवतामनु यजमानो यजमानमनु गृहाश्च पशवश्चायुष्यो ह वाऽअस्यैष आत्मनिष्क्रयणो भवति माऽसीयन्ति ह वै जुह्वतो यजमानस्याग्नयस्ते यजमानमेव ध्यायन्ति यजमानꣳ संकल्पयन्ति पचन्ति वाऽअन्येष्वग्निषु वृथामाऽसमर्थैतेषां नातोऽन्या माऽसाशा विद्यते यस्यो चैते भवन्ति ॥ २ ॥ स यत्पशुबन्धेन यजते । आत्मानमेवैतन्निष्क्रीणीते वीर्येण वीरं वीरो हि पशुर्वीरो यजमान एतद्ध ह वै परममन्नाद्यं यन्माऽसꣳ स परमस्यैवान्नाद्यस्यात्ता भवति तं वै संवत्सरो नानीजानमतीयादायुर्वै संवत्सर आयुरेवैतदमृतमात्मन्धत्ते ॥ ३ ॥ ब्राह्मणम् ॥ ७ [७. १.] ॥ ॥

ह्विर्यज्ञविधो ह वाऽअन्यः पशुबन्धः । सवविधोऽन्यः स ह्येष ह्विर्यज्ञविधो यस्मिन्व्रतमुपनयति यस्मिन्नपः प्रणयति यस्मिन्पूर्णपात्रं निनयति यस्मिन्विष्णुक्रमान्क्रमयत्यथ ह्येष सवविधो यस्मिन्नेतानि न क्रियन्ते ॥ १ ॥ तदाहुः । इष्टिः पशुबन्धाऽ३ महायज्ञाऽ३ इति महायज्ञ इति ह ब्रूयादिष्टिं वै तर्हि पशुबन्धमकर्व्यैनमकृत्था इत्येनं ब्रूयात् ॥ २ ॥ तस्य प्रयाजा एव प्रातःसवनम् । अनुयाजास्तृतीयसवनं पुरोडाश एव माध्यन्दिनꣳ सवनम् ॥ ३ ॥ तद्धैके । वपायाꣳ हुतायां दक्षिणा नयन्ति तदु तथा न कुर्याद्यो ह्येनं तत्र ब्रूयाद्बर्ह्यो न्वाऽअयं प्राणेभ्यो दक्षिणा अनैषीन्न प्राणानददद्वदन्धो वा स्रामो वा बधिरो वा पङ्गुको वा भविष्यतीतीश्वरो ह तर्हैव स्यात् ॥ ४ ॥ इत्थमेव कुर्यात् । पुरोडाशेडायामेवोपक्रान्तायां दक्षिणा नयेदिन्द्रो वाऽअयं मध्यतः प्राण इममेवैतदिन्द्रं मध्यतः प्राणं द-

क्षिणाभिर्दक्षयत्येन्द्रं वै माध्यन्दिनꣳ सवनं माध्यन्दिने वै सवने दक्षिणा नीयन्ते तस्मात्पुरोडाशेडायामेवोपहृतायां दक्षिणा नयेत् ॥५॥ तदाहुः । अध्वर्यो यद्दीक्षितस्य नानवभृथोऽवकल्पते क्वैनमदिदीक्षन्त इत्यावभृथादनूद्गꣳहेयुरध्वर्युश्च प्रतिप्रस्थाता च होता च मैत्रावरुणश्च ब्रह्मा चाग्नीध्रश्चैतैर्वाऽएष षड्भिर्होता तमनुद्रुत्य षड्भिर्होतारं जुहोत्येकामाहुतिं कृत्वा पञ्च वाक्या द्यौष्पृष्टमन्तरिक्षमात्माऽग्निर्यज्ञं पृथिवीꣳ शरीरैः वाचस्पतेऽहिद्रया वाचाहिद्रया जुह्वा देवि देवावृधꣳ होत्रा-मैरयत्स्वाहेति सैव दीक्षा ॥६॥ तदाहुः । अध्वर्यो यद्दीक्षितस्य नानवभृथोऽवकल्पते क्वैनमवभृथमवनेष्यसीति स यद्धृदयशूलेन चरन्ति स ह्येवैतस्यावभृथः ॥७॥ मधुको ह स्माह पैङ्ग्यः । विसोमेन वाऽएके पशुबन्धेन यजन्ते ससोमेनैके दिवि वै सोम आसीत्तं गायत्री वयो भूत्वाहरत्तस्य यत्पर्णमह्रियत तत्पर्णस्य पर्णत्वमिति न्वाऽएतद्ब्राह्मणमुद्यते विसोमेन वाऽएके पशुबन्धेन यजन्ते ससोमेनैके स ह्येष विसोमेन पशुबन्धेन यजते योऽन्यं पालाशाद्यूपं कुरुतेऽथ ह्येष ससोमेन पशुबन्धेन यजते यः पालाशं यूपं कुरुते तस्मात्पालाशमेव यूपं कुर्वीत ॥८॥ ब्राह्मणम् ॥८ [७. २.] ॥ ॥

स य एष बभ्रुसारः । स ह्यपशव्यस्तस्मात्तादृशं पशुकामो यूपं न कुर्वीताथ य एष फल्गुप्रासहः स ह पशव्यस्तस्मात्तादृशं पशुकामो यूपं कुर्वीत ॥१॥ अथ यस्यैतद्वक्रस्य सतः । शूल-इवाग्रं भवति स ह कपोती नाम स यो ह तादृशं यूपं कुरुते पुरा ह्यायुषोऽमुं लोकमेति तस्मात्तादृशमायुष्कामो यूपं न कुर्वीत ॥२॥ अथ य एष आनतः । उपरिष्टादुपनतो मध्ये सोऽशनाये रूपꣳ स यो ह तादृशं यूपं कुरुतेऽशनायुका ह्यस्य भार्या भवति तस्मात्तादृशमन्नाद्यकामो यूपं न कुर्वीताथ य एष आनत उपरिष्टादुपनतो मध्ये सोऽन्नाद्यस्य रूपं तस्मात्तादृशमन्नाद्यकामो यूपं कुर्वीत ॥३॥ ब्राह्मणम् ॥९ [७. ३.] ॥ ॥

स यत्पशुना यज्यमाणः । एकारत्निं यूपं कुरुतऽइममेव तेन लोकं जयत्यथ यद्द्व्यरत्निमन्तरिक्षलोकमेव तेन जयत्यथ यत्त्र्यरत्निं दिवमेव तेन जयत्यथ यच्चतुररत्निं दिश एव तेन जयति स वाऽएष त्र्यरत्निर्वैव चतुररत्निर्वा पशुबन्धयूपो भवत्यथ योऽत ऊर्धः सौम्यस्यैव सोऽधरस्य ॥ १ ॥ तदाहुः । यज्ञेदाज्यभागौ नाऽइति यज्ञेदित्याहुश्चत्वारो वाऽऋते यज्ञस्य यदाज्यभागौ किमृते पुरुषश्चत्वार्याः स्यादिति यावद्वै भागिनꣳ स्वेन भागधेयेन न निर्भजत्यनिर्भक्तो वै स तावन्मन्यतेऽथ यदेव तꣳ स्वेन भागधेयेन निर्भजत्यथैव स निर्भक्तो मन्यते स यत्रैतद्धोतान्वाहाह्वा ऋतः सꣳसृजतादिति तदेनꣳ स्वेन भागधेयेन निर्भजति ॥ २ ॥ एतद्वै पशोः संज्ञप्यमानस्य । हृदयꣳ शुक्समवैति हृदयाकूलं तग्वे सह हृदयेन पशुꣳ श्रपयन्ति पुनः पशुꣳ शुगनुविष्यन्देत पार्श्वत एवैनत्काष्ठे प्रतृत्य श्रपयेत् ॥ ३ ॥ उपस्तृणीताऽआज्यम् । तत्पृथिव्यै रूपं करोति हिरण्यशकलमवदधाति तदग्नेरूपं करोति वपामवदधाति तदन्तरिक्षस्य रूपं करोति हिरण्यशकलमवदधाति तदादित्यस्य रूपं करोत्यथ यदुपरिष्टादभिघारयति तद्दिवो रूपं करोति सा वाऽएषा पञ्चावत्ता वपा भवति पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्तवः संवत्सरस्य तस्मात्पञ्चावत्ता वपा भवति ॥ ४ ॥ ब्राह्मणम् ॥ १० [७. ४.] ॥ सप्तमोऽध्यायः [७. ३.] ॥ ॥

तद्यथा ह वै । इदꣳ रथचक्रं वा कौलालचक्रं वाप्रतिष्ठितं क्रन्देदेवꣳ ह्येवेमे लोका अध्रुवा अप्रतिष्ठिता आसुः ॥ १ ॥ स ह प्रजापतिरीक्षां चक्रे । कथं न्विमे लोका ध्रुवाः प्रतिष्ठिताः स्युरिति स एभिश्चैव पर्वतैर्नदीभिश्चेमामदृꣳहद्धयोभिश्च मरीचिभिश्चान्तरिक्षं क्षीमूतैश्च नक्षत्रैश्च दिवम् ॥ २ ॥ स मरुत इति व्याहरत् । पशवो वै मरुतस्तस्माद्यस्यैते बहवो भवन्ति भूयिष्ठमस्य कुले मरीयन्ते बहवो ह वाऽअस्यैते भवन्ति भूयिष्ठꣳ ह्यस्य कुले मरीयन्ते तस्माद्यद्येनमायतनाद्बिभरन्वा प्र वा यापयेयुरग्निहोत्रꣳ हुत्वा मरुत इत्युपतिष्ठेत प्रति प्रज्ञया

पशुभिस्तिष्ठति नायतनाच्च्यवते ॥ ३ ॥ ब्राह्मणम् ॥ ११ [८. १.] ॥ ॥

चत्वारो ह वाऽग्नयः । आहित उद्धृतः प्रकृतो विकृतोऽयमेव लोक आहितोऽन्तरिक्षलोक उद्धृतो द्यौष्प्रकृतो दिशो विकृतोऽग्निरेवाहितो वायुरुद्धृत आदित्यः प्रकृतश्चन्द्रमा विकृता गार्हपत्य एवाहित आहवनीय उद्धृतोऽथ यमेतमाहवनीयात्प्राञ्चं प्रणयन्ति स प्रकृतोऽथ यमेतमुदञ्चं पशुश्रपणायाहरन्ति यं चोपयड्भ्यः स विकृतस्तस्मात्प्रकृर्येऽग्नौ पशुबन्धेन यजेत ॥ १ ॥ ब्राह्मणम् ॥ १२ [८. २.] ॥ ॥

तदाहुः । किंदेवत्य एष पशुः स्यादिति प्राजापत्यः स्यादित्याहुः प्रजापतिर्वाऽएतमग्रेऽभ्यपश्यत्तस्मात्प्राजापत्य एवैष पशुः स्यादिति ॥ १ ॥ अथोऽअप्याहुः । सौर्य एवैष पशुः स्यादिति तस्मादेतस्मिन्नस्तमिते पशवो बध्यन्ते बध्नन्त्येकान्यथा गोष्ठमेकऽउपसमायन्ति तस्मात्सौर्य एवैष पशुः स्यादिति ॥ २ ॥ अथोऽअप्याहुः । ऐन्द्राग्न एवैष पशुः स्यादित्येते वै देवतेऽअन्वन्ये देवा यद्यार्तो यजते पारयतऽएव यदि मक्षसा यजते पारयतऽएव तस्मादैन्द्राग्न एवैष पशुः स्यादिति ॥ ३ ॥ प्राण एव पशुबन्धः । तस्माद्यावज्जीवति नास्यान्यः पशूनामीष्टे बद्धा ह्यस्मिन्नेते भवन्ति ॥ ४ ॥ स ह प्रजापतिरग्निमुवाच । यज्ञे त्वया त्वा लभाऽइति नेति होवाच वायुं ब्रूहीति स ह वायुमुवाच यज्ञे त्वया त्वा लभाऽइति नेति होवाच पुरुषं ब्रूहीति स ह पुरुषमुवाच यज्ञे त्वया त्वा लभा इति नेति होवाच पशून्ब्रूहीति स ह पशूनुवाच यज्ञे युष्माभिरा वो लभाऽइति नेति होचुश्चन्द्रमसं ब्रूहीति स ह चन्द्रमसमुवाच यज्ञे त्वया त्वा लभाऽइति नेति होवाचादित्यं ब्रूहीति स ह्यादित्यमुवाच यज्ञे त्वया त्वा लभाऽइति तथेति होवाच यऽउ तऽएते नाचीकमन्त किमु मऽएतेषु स्यादिति यद्यत्कामयेथा इति तथेति तमालभत सोऽस्यायं पशुरालब्धः संज्ञप्तोऽश्नयत्तमेताभिराप्रीभिराप्रीणात्तद्यदेनमेताभिराप्रीभिराप्रीणात्त-

स्मादाप्रियो नाम तस्माद्ध पशुꣳ संज्ञप्तं ब्रूयाद्धितां नु मुहूर्तमिति स यावत्तमश्वमेधेनेष्ट्वा लोकं जयति तावत्तमेतेन जयति ॥५॥ तं प्राची दिक् । प्राणेत्यनुप्राणत्प्राणमेवास्मिंस्तद्दधात्तं दक्षिणा दिग्व्यानेत्यनुप्राणद्व्यानमेवास्मिंस्तद्दधात्तं प्रतीची दिगपानेत्यनुप्राणदपानमेवास्मिंस्तद्दधात्तमुदीची दिगुदानेत्यनुप्राणदुदानमेवास्मिंस्तद्दधात्तमूर्ध्वा दिक्समानेत्यनुप्राणत्समानमेवास्मिंस्तद्दधात्तस्माद्ध पुत्रं जातमकृत्तनाभिं पञ्च ब्राह्मणान्ब्रूयादित्येनमनुप्राणितेति यद्यु तान्न विन्देद्पि स्वयमेवानुपरिक्राममनुप्राण्यात्स सर्वमायुरेत्या हैव जरायै जीवति ॥६॥ स प्राणमेवाग्नेरादत्त । तस्मादेष नानुपध्मातो नानुपज्वलितो ज्वलत्यात्तो ह्यस्य प्राण आ ह वै द्विषतो भ्रातृव्यस्य प्राणं दत्ते य एवं वेद ॥७॥ रूपमेव वायोरादत्त । तस्मादेतस्य लेलयत-इवैवोपशृण्वन्ति न वेनं पश्यन्त्यात्तꣳ ह्यस्य रूपमा ह वै द्विषतो भ्रातृव्यस्य रूपं दत्ते य एवं वेद ॥८॥ चित्तमेव पुरुषस्यादत्त । तस्मादाहुर्देवचित्तं बावतु मा मनुष्यचित्तमित्यात्तꣳ ह्यस्य चित्तमा ह वै द्विषतो भ्रातृव्यस्य चित्तं दत्ते य एवं वेद ॥९॥ चक्षुरेव पशूनामादत्त । तस्मादेते चाकश्यमाना-इवैव न जानन्त्यथ यदैवोपजिघ्रत्यथ जानन्त्यात्तꣳ ह्येषां चक्षुरा ह वै द्विषतो भ्रातृव्यस्य चक्षुर्दत्ते य एवं वेद ॥१०॥ भामेव चन्द्रमस आदत्त । तस्मादेतयोः सदृशयोः सतोर्नेतरां चन्द्रमा भात्यात्ता ह्यस्य भा आ ह वै द्विषतो भ्रातृव्यस्य भां दत्ते य एवं वेद तद्यदादत्त तस्मादादित्यः ॥११॥ ब्राह्मणम् ॥१३ [८. ३.] ॥ ॥

केशिगृहपतीनामु ह । सम्राड्ड्घाꣳ शार्ङ्गलो जघान स ह सप्तत्रिणं आमल्लयां चक्रे केह प्रायश्चित्तिरिति ते होचुर्नेह प्रायश्चित्तिरस्ति खण्डिक एवोद्गारिरस्य प्रायश्चित्तिं वेद स उ तꣳएतादृक्चैव कामयतेऽतश्च पापीय इति ॥१॥ स होवाच । संयद्धोतर्युङ्ग्धि मे स्यत्स्यामि स यद्यह मे वक्ष्यति समाप्स्यामि यद्यु

मा मारयिष्यति यज्ञं विकृष्टमनु विक्रक्ष्यऽइति ॥ २ ॥ स ह युक्ता ययावाजगाम । तꣳ ह प्रतिख्यायोवाच यन्त्वेतान्येवाङ्गिनानि मृगेषु भवन्त्यथैषां पृष्टीरपिशीर्य पचामहै कृष्णाङ्गिनं मे ग्रीवास्वाबद्धमित्येव मेदमधृषोऽभ्यवस्यन्तू३मिति ॥ ३ ॥ नेति होवाच । सम्राड्वुघां वै मे भगवः शार्ङ्गो वधीत्स यद्यु ह मे वक्ष्यसि समाप्स्यामि यद्यु मा मारयिष्यसि यज्ञं विकृष्टमनु विक्रक्ष्यऽइति ॥ ४ ॥ स होवाच । आमल्लणीयान्वामल्लयाऽइति तान्होमल्ल्योवाच यद्यस्मै वक्ष्याम्यमुष्यैवेदं प्रज्ञा भविष्यति न मम लोकी वक्ꣳ भविष्यामि यद्यु वाऽअस्मै न वक्ष्यामि ममैवेदं प्रज्ञा भविष्यति नामुष्य लोकी वसौ भविष्यतीति ते होचुर्भा भगवो वोचोऽयं वाव क्षत्रियस्य लोक इति स होवाच वक्ष्याम्येवामूर्वै रात्रयो भूयस्य इति ॥ ५ ॥ तस्माऽउ हैतदुवाच । स्तृतीर्ह्यन्यामाज्ञतेति ब्रूतात्सा ते सम्राड्वुघा स्यादिति चन्द्रात्ते मन स्तृणोमि स्वाहा सूर्यात्ते चक्षु स्तृणोमि स्वाहा वातात्ते प्राणान्स्तृणोमि स्वाहा दिग्भ्यस्ते श्रोत्रꣳ स्तृणोमि स्वाहाद्भ्यस्ते लोहितꣳ स्तृणोमि स्वाहा पृथिव्यै ते शरीरꣳ स्तृणोमि स्वाहेत्यथान्यामाज्ञतेति ब्रूतात्सा ते सम्राड्वुघा स्यादिति ततो हैव स उत्ससाद कैशिनोरेवेमा अप्येतर्हि प्रज्ञा ज्ञायन्ते ॥ ६ ॥ ब्राह्मणम् ॥ १४ [८. ४.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या १०२ ॥ अष्टमोऽध्यायः [७४.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या ४३७ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणेऽष्टाध्यायीनामेकादशं काण्डं समाप्तम् ॥ ११ ॥ ॥

EXTRACTS FROM THE COMMENTARY OF SÂYANÂCÂRYA.

इत्थं काण्डदशात्मकः शतपथपूर्वभागो व्याख्यातस्तत्र प्रथमद्वितीयकाण्डाभ्यां दर्शपूर्णमासाधानाग्निहोत्रतदुपस्थानादीनि चातुर्मास्यानानि प्रतिपादितानि तृतीयचतुर्थाभ्यामेकाहाहीनसत्त्रात्मकसकलसोमयागप्रकृतिभूतश्चतुःसंस्थो ज्योतिष्टोमः प्रत्यपादि पञ्चमेन वाजपेयराजसूयौ षष्ठादिकाण्डचतुष्टयेन प्रकृतिविकृतिभूतसोमयागाश्रितमग्निचयनाख्यं (? योमिया Cod.) कर्म विस्तरेण प्रतिपादितम् दशमे तत्प्रशंसार्थमुखेन तदाश्रितान्युपशमनानि विहितानीति

पूर्वभागार्थसंक्षेपः ॥ उत्तरभागे अष्टाध्यायिसौत्रामण्यश्वमेधाख्यास्त्रयः काण्डाश्चतुर्थस्तु ब्रह्मप्रतिपादको बृहदारण्यकाख्यः (कार्थः Cod.) ॥ तत्र प्रथमे काण्डे पूर्वोक्तमाधानादिकं कर्मानूद्य प्राग्विहितकालाद्यवशिष्टाङ्गकलापविधिः तत्प्रशंसा च क्रियते । तत्र तावदग्निहोत्रदर्शपूर्णमासाग्निष्टोमानां मूलप्रकृतीनां तद्विकृतीनां मासाग्निहोत्रसौर्ययागविश्वजिदादीनां सर्वेषां श्रौतकर्मणां गार्हपत्याद्यग्निसाध्यत्वात्तस्य चाधानपवमानेष्टिभ्यामग्निसिद्धिरिति न्यायेन अनाधानानिष्पाद्यत्वादाधानमेवादौ वक्तव्यम् । तस्य च स्वाभिमतं कालं विसृजन्यज्ञादीन्संवत्सराद्यात्मना निरूपयति । दर्शपूर्णमासादियज्ञात्मकः प्रजापतिः । श्रोश्रावयेत्यादिसप्तदशाक्षरसाध्यत्वाद्यज्ञस्य प्रजापतित्वम् संवत्सरस्यापि सप्तदशावयवत्वं यस्मात् प्रजापतेस्तस्य च तादात्म्यम् । प्रतिपदादिषु तिथिषु मध्ये यस्यां तिथौ अमा सूर्येण सह चन्द्रो वसति सामावास्या ॥१॥ गार्हपत्याहवनीयाख्यौ अग्नी आदधीत आयतनेषु विधानेन स्थापयेत् । तदिपधायकचन्द्रादर्शनेन विवृतत्वात् । स्वर्गं लोकम् लोक्यतऽइति लोकः सुष्ठु अर्ज्यते शोभनेनार्जनेन गम्यतऽइति वा स्वर्गः ॥२॥ चन्द्रदर्शनिनामावास्यानूपस्य द्वारस्य पिहितत्वात् ॥३॥ तस्मिन्भूम्यां वसति सति तदुपजीविनो देवाद्याः इमं लोकमधिवसन्ति ॥४॥ विशाखानक्षत्रयुक्ता पौर्णमासी यस्मिन्मासे स वैशाखः । रोहिण्या सम्पद्यते रोहिणीनक्षत्रयुक्ता भवति । वैशाख्यां पौर्णमास्यां तावद्विशाखा नक्षत्रं ततः पञ्चदशसु नक्षत्रेषु परिगणितेषु अमावास्यायां रोहिणी भवति । अमावास्यायां पवमानेष्टिभिः सहाधाने परिसमाप्ते यद्यपि दर्शयागः प्राप्तावसरस्तथाप्यागामिन्यां पौर्णमास्यामन्वारभेत अन्वारम्भणीयेष्टिं कृत्वा पूर्णमासयागेनेष्ट्वा आगामिन्याममावास्यायां दर्शयागमपि कृत्वा तस्यामेवामास्यायां दीक्षेत सोमयागं प्रारभेत ॥७॥१॥१॥

एवमाधानस्य अमावास्यालक्षणं प्रारम्भकालं नियम्य (? लानेमम्य Cod.) दर्शपूर्णमासयोरप्युपवसथकालं निर्णेष्यन् आदौ च तत्रत्यानामाज्यतीनां संख्याविशेषमुपजीव्य स्तोतुमुपोद्घातयति (ठयति Cod.) ॥१॥ दशसंख्यापन्नो वर्गो दशत् वषट्कारप्रदानास्ता आज्यतीर्दशतः दशकसंघातरूपाः सम्पादयेत् न न्यूनाधिकसंख्याः ॥२॥ तत्र दर्शपूर्णमासयोः प्रथमं पञ्च (यत्र Cod.) प्रयाजास्ततो द्वावाज्यभागौ आग्नेयोऽग्नीषोमीय उपांशुयाजश्चेति पौर्णमास्यां त्रीणि दर्शे तु (दर्शो नु Cod.) आग्नेयोऽष्टाकपालो वैष्णव उपांशुयाज ऐन्द्रं पय इति त्रीणि एवं दश वषट्कारप्रदाना आज्यतयः पशुसोमयोरित्यनेन न्यायेन दशसंख्यासम्पत्तिर्दृष्टव्या । असोमयाजिनस्तु पौर्णमासे अग्नीषोमीययागो नास्ति अतस्तदपेक्षया नवसंख्योपजीवनेन स्तौति ॥४॥ प्रधानानन्तरभाविस्विष्टकृद्यागापेक्षया स्तौति । वषट्काराज्यतिदशकानन्तरं स्विष्टकृद्यागरूपा एका स्विष्टकृदाज्यतिरूपा अतिरिक्ता ॥५॥ इत्थमिष्टिविषये स्विष्टकृतः सम्पत्तिमभिधाय पशुयागविषयो विशेषो वक्तव्यऽइत्यभिप्रेत्य प्रतिपादयति । तत्र हि वनस्पतियागः स्विष्टकृद्यागश्चेति द्वे आज्यतो अधिके स्याताम् ॥६॥ दर्शपूर्णमासयोरनुयाजसंख्योपजीवनेन सम्पत्तिमाह अनुयाजयागरूपास्तिस्र आज्यतयः प्रकृतादाज्यतिदशकादधिकाः ॥७॥ स्विष्टकृदनुयाजान्सम्भूय चतस्र आज्यतयोऽतिरिक्ता भवेयुः । यद्वा सोमः वष्टा देवपत्न्योऽग्निर्गृहपतिरिति चत्वारः पत्नीसंयाजास्तेऽप्युक्तादशकादतिरिच्यन्ते ॥८॥ विंशतिप्रभृतिषु दशकेषु आ सहस्रात् एकैकं दशकं विभज्य एषा विराट्सम्पत्तिर्ज्ञातव्या ॥९॥ यावज्जीवं दर्शपूर्णमासाभ्यां

यजेतेत्येकः पक्षः त्रिंशतं वा वर्षाणीति पक्षान्तरम् तदिदानीं प्रतिपाद्यते ॥१०॥ अतः संवत्सरप्राप्तिरेवामृतत्वप्राप्तिः ॥११॥ स च आदित्यसृतां जगद्व्यापारनिर्वाहार्थमुदयाचलादिस्थानविशेषं नियमेन प्राप्नुवतां सूर्यादीनां मध्ये स्वयमप्येको भवति । संवत्सररूपप्राप्तिज्ञानाय त्रिंशद्वर्षपर्यन्तं यजेत । दर्शपूर्णमासारम्भकाले आवृत्तिगुणविशिष्टो तावारभमाणो दाक्षायणयज्ञयाजी । एवं प्रतिपर्व द्विरावृत्त्यानुष्ठिते सति त्रिंशद्वर्षानुष्ठानेन या सम्पद्भवति अत्र दाक्षायणयज्ञयागे पञ्चदशवर्षानुष्ठानेऽपि सा सम्पत्सिध्यति ॥१३॥२॥१॥

पौर्णमासयागे दर्शयागे च वृत्तक्रमेणानुनिर्वाप्यं हविर्विधत्ते ॥ अनु पौर्णमासयागानन्तरमेकादशकपालं पुरोडाशं निर्वपेत् तेन हविषा यथेष्टि येन प्रकारेण प्रयोगकलापेन पूर्णमासेष्टिः क्रियते एवमनेनैव प्रकारेण यजेत ॥१॥ अथानुनिर्वाप्याभावपक्षमभिधत्ते अथ यस्मादिति ॥३॥ उक्तस्य प्रयोजनस्यानुनिर्वाप्यमन्तरेणापि सिद्धिं वक्तुं तदनुवदति स यदिति ॥४॥ इममेव पक्षमुपोद्बलयितुमनुनिर्वाप्यपक्षे दोषमाह ॥६॥ इत्थं पक्षद्वयप्रतिपादनेनानुनिर्वाप्यस्य हविषो विकल्पोऽयं षोडशिप्रहरणवत्सिद्धः स यदीति । दर्शपूर्णमासयोरेव दक्षिणा न त्वनुनिर्वाप्यस्य हविषः तस्य बहिस्तन्त्रवर्तित्वेन प्रयाजादिवैलक्षण्यात् । वर्तिष्यमाणप्रयोगज्ञातस्य हविषो नैमित्तिकप्रयोग इतः परं विक्रियतऽइति वृत्तवर्तिष्यमाणसौकर्यपरिहारार्थो विभागनिर्देशः ॥७॥३॥१॥

अभ्युदयनिमित्तं कर्म विधित्सुस्तस्य निमित्तस्य सम्भवमादौ कथयति । चतुर्दशीमिश्रितपर्वणि प्रभातसमये प्राच्यां दिशि चन्द्रं दृष्ट्वा । श्वः परस्मिन्दिवसे यागकाले चन्द्रो नोदेष्यति । मेघचरणनिमित्तात् तिथिनिर्णयमशक्तौ वा अकाले यद्यपवसथं कर्माङ्गमन्वाधानादिकं करोति अथानन्तरं यागदिवसे एनं यजमानं चन्द्रोऽभ्युदेति चतुर्दशीमिश्रतया चन्द्रकलादर्शनं तस्य भवति । परदिवसे हविर्निर्वापात्पूर्वमकाले कर्म प्रक्रान्तमिति यदि ज्ञायेत तदा प्रज्ञातमेव तावन्तं प्रयोगज्ञातं कृतमिति निश्चित्य ततस्तूष्णीमासीत एषा वक्ष्यमाणैव व्रतचर्या व्रतस्य नियमस्याचरणं कार्यम् । प्रातर्दोहार्थं येऽपाकृता वत्सास्तान्पुनर्मातृभिः संसृजेयुः एवं कृत्वा पुनः सायंदोहार्थे तान्मातृभ्यः पृथक्कुर्युः ॥१॥ उक्तव्रतचर्याकरणाशक्तौ हविर्निर्वापोत्तरकाले च कर्तव्यमुपदिशति यद्यु इति । नेक्षेत् आङः शसिरिक्षायाम् (धा° १६. २८.) ॥२॥ यस्मिन्कस्मिन्द्यनि क्षीरे वा तण्डुलाः प्रक्षिप्यन्ते चरुरेव स भवति ॥३॥ उपाशुमैक्षत् । तमपारात्सीत् अकाले कर्मणः प्रारम्भादपराद्धं (भातपराधं Cod.) प्रच्युतमकार्षीत् । तेनान्नभूतस्य चन्द्रमसो ग्रहणाभावान्निरूढं हविर्विकलमेव स्यात् तं तथाविधमन्नरूपं चन्द्रमसं दातृगुणविशिष्टोऽग्निरस्मै यजमानाय ददाति । अकाले निरूढं हविः शिपितं तदाश्रितो (?°तस्तदा° Cod.) दोषविशेषः तद्युक्तमिव यज्ञस्य शरीरं भवति । यदा चन्द्रो नोदियात् पूर्वस्यां दिशि नाविर्भवति चतुर्दशीसंस्पर्शो यस्मिन्दिने नास्ति तस्मिन्दिवसे ॥४॥४॥१॥

दर्शयागे पुरस्ताच्चन्द्रदर्शनप्र[य]श्चित्तेष्टिरुक्ता अथ पश्चात्तद्दर्शने नैमित्तिकामिष्टिं विधित्सुराह । अथानन्तरं सायंकाले एष चन्द्रमाः पश्चात्प्रतीच्यां दिशि ददृशे दृश्यते । अभ्यवेक्षते अभ्यवहर्तुं पश्यति यथा शालावृको वने संचरतो मेषादीन्पशूनभ्यवजिहीर्षति । एतस्मादेव खलु चन्द्रसम्बन्धिस्वरूपेण पूर्वोक्तात् अतयेनाकारः (?) समासान्तः तस्माच्चन्द्रादिति भीषा

उक्तरूपया भीत्या क्षायामुपगच्छन्ति गवाद्याः पशवः तिरोहिता यज्ञमानस्य भवन्तीत्यर्थः पशूनामुपतापकारि यदेतच्चन्द्रदर्शनं तत् श्लक्ष्णचित्तं मुना रिक्तीकृतमित्याचक्षते ॥ २ ॥ एतमेव चन्द्रगतं दोषमेवमाचक्षते चन्द्रमसः सम्बन्धी तन्मण्डलमध्यवर्ती शश इति अत एव तस्य शशाङ्क इति प्रसिद्धिः । उपवसथकाष्ठां गतं देवान्नरूपं चन्द्रमसं पौर्णमासीकाले द्रवीकुर्वन्ति । पशव ओषधीर्जग्ध्वा अपश्च पीत्वात्मनि नं चान्द्रमसं कृत्स्नं समामावास्यायां धारयन्ति तत एनं समामावास्यासम्बन्धिन्यां रात्रौ पशुभ्यः सकाशात्संनयति सम्यक्प्रापयति तत्संनयनं प्रतिपच्चन्द्रदर्शने सति नोपपद्यते ॥ ३ ॥ दर्शयागस्यातिक्रान्तकालत्वे दोषमुपन्यस्य तन्नानुष्ठानप्रकारमाह । प्रकृतो दर्शयागः शीघ्रं समापनीयः अनन्तरमेवैतद्दोषपरिहाराय प्रायश्चित्तेष्टिः कर्तव्या । स आमावास्यविधेनैवेति यश्चोदितकालेऽनुष्ठितोऽमावास्यायागस्तत्प्रकारेणैव प्रतिपदि प्रक्रान्तां दर्शेष्टिं समाप्य ॥ ४ ॥ अथास्यामिष्टौ प्रकृतिवद्विकृतिः कर्तव्येति चोदकप्राप्तेषडङ्गेषु विशेषं विधत्ते । प्रकृतौ पञ्चदश अत्र चोदकप्राप्तास्ताः पृथुवाऽवत्यौ धाय्ये द्वेऽइति सप्तदश भवन्ति । प्रकृतौ प्रधानयागे उच्चैश्चैधर्मः । प्रकृतदेवतालिङ्गयुक्ताश्चतुःषष्ट्यां दाशतय्यां समाम्नाता या ऋचः कामयते । आज्यभागयोः स्विष्टकृद्यागे च याथाकाम्यम् ॥ ५ ॥ तिसृभिरिषुभिर्युक्तं धन्व तिसृधन्वम् पूर्ववदकारः समासान्तः । एत चन्द्रात्मकं दिव्यं आनम् ॥ १० ॥ अदृश्यमानचन्द्रोऽपि ॥ ११ ॥ ५ ॥ १ ॥

अथ दर्शपूर्णमासयोः सर्वात्मकलक्षणवैराजपदप्राप्तिसाधनतां वक्ष्यन् तदुपोद्घातत्वेनाख्यायिकया सृष्टिं प्रतिपादयति ॥ १ ॥ विज्ञायते विविधशरीरद्वयरूपेणोत्पद्यते । तस्य प्रजापतेः आस्पदं किमपि न बभूव स (!) च निराधारत्वात्स्थातुमशक्नुवन्निदमेव भिन्नं हिरण्मयाण्डं पुनः संवत्सरपर्यन्तं बिभ्रद्वायन् (!) तास्त्वेवाप्सु पर्यप्लवत् ॥ २ ॥ आण्डं विहाय इमान्सृष्टान्पृथिव्यादिलोकान्विलङ्घ्य ऊर्ध्वं स्थितवान् ॥ ५ ॥ पारमवसानं परागच्छौ परागतेन दूरगमनशीलेन मनसा ददर्श ॥ ६ ॥ द्युलोकमभिपद्यावष्टभ्य । दिवेवास आकाश-इव बभूव ॥ ७ ॥ यत एवं प्रजापतिना सृष्टिसमयऽएव तिरस्कृता असुरास्तस्मादभिज्ञा एव कथयन्ति नैतदस्तीति यद्दैवासुरं देवांश्चासुरांश्चाधिकृत्य प्रवृत्तं (कृतप्रवृत्त Cod.) युद्धादिकं यदस्ति तन्नैवास्ति ॥ ९ ॥ उक्तार्थदार्ढ्याय ऋचमपि संवादयति । हे इन्द्र युद्धं न कृतवान् प्रतिभटानामसुराणामभावात् किमपि शत्रुसैन्यं नाहः नावधोः तव शत्रुः कोऽपि नास्ति वृत्रादिभिरसुरैः सह यानि तव युद्धान्याहुः तन्मायामात्रं न तु पारमार्थिकम् ॥ १० ॥ त्सर कृच्छ्रगत्याम् त्सरति कौटिल्येन गच्छति ॥ १२ ॥ अधिदेवताः आधिक्यगुणोपताः सर्वोत्कृष्टा देवताः ॥ १४ ॥ ता आपो यस्मात्परमे उत्कृष्टे स्थाने व्योम्नि तिष्ठन्ति । परमात्स्थानात्खल्वेष (!) पर्जन्यो वर्षति ॥ १६ ॥ कामान्पूरयतीति कामप्रः पॄ प्रापण (! धा° २४. ५३.) ऽइति आतोऽनुपसर्गे कः (पा° ३. २. ३.) । प्राणो वाऽइदं सर्वमिति सूत्रात्मतया सर्वाधारत्वात्तस्य सर्वात्मकत्वम् । तस्य प्रजापतेर्दृष्टिः प्राणवायुः शब्दस्पर्शादिविषयसाक्षात्कारहे[तु]त्वात् । यत्खलु वस्तु इत्थात् अनेन प्रकारेणासौ प्राणो वायुर्वाति वर्ततऽइति जानाति किमपि तत्सर्वं प्राणवद्भवति अतः प्राणिसंघः प्रजापतिः । आविर्भवति प्रकाशतऽएव ॥ १७ ॥ प्राच्यः पूर्वदिगभिमुखाः स्वस्तिपुरःसरा एव सर्पन्ति गच्छन्ति । एनां प्राचीं दिशमुपेत्य इतः परं कुर्वीमहि कार्यान्तरं सृजेमहि । पश्येम साक्षात्कुर्याम ॥ २१ ॥ ऋत्विक्परिक्रयहेतुतया गन्तव्या गावो दक्षिणाशब्देनाभिधेयाः

॥२२॥ अप्राप्तफलविषयोऽभिलाष आशा । यस्मात्प्राङ्मुखो गत्वा इष्टं फलं लभते तस्मात्प्रतीच्यां दिशि यथास्थानमवस्थितस्य फलप्राप्तिविरहादाशैव केवलम् । उपकुर्वीमहि उपेत्य चूपान्तरेण कुर्याम । अस्याः(!) पृथिव्याः सम्बन्धि बङ्गतरस्थानं यो लभते ॥२३॥ यदा भूर्लोकमापः वृष्ट्यात्मना प्राप्नुवन्ति ॥२४॥ ता अनुक्रान्ताः प्राचो दिग्भूलोकः दक्षिणा दिग्गन्तरिक्षलोकः प्रतीचो दिगाशा श्रोः पृथिवी च उदीचो दिगापो धर्म इत्येकादशसंख्याका देवताः एता एव प्रयाजाद्या एकादशात्मतया वर्तन्ते ॥२५॥ आग्नेय्याद्यवान्तरदिशां ज्ञयोपायः ॥२७॥ इतराभ्य आङ्गतिभ्यः प्रधानहविर्भ्यः सकाशादभ्यर्धे अभिगतो अर्धो देशः यथा प्रधानहविर्भिः संसर्गो न भवति तथाभूतदेशे ॥३०॥ आण्डाभ्यां सह त्रिवम् । तं वाऽअनवानमिति (!) अनवानमनुक्रुसयन् । अमृध्रमविक्षिन्नम् ॥३१॥ प्रतृष्णमूर्ध्वमुखमेवावातिष्ठेत् । यस्मादेतत्सुपर्वकम् तदात्मकस्य तृतीयानुयाजस्य याज्यामध्ये विक्षेदः अवसानं कृतम् ॥३२॥ अप्रदग्धेव प्रदाहरहितेव । अनवतृष्णः अविक्षिन्नः ॥३३॥ याज्यानुवाक्या ऋच इति यत् तन्मितं परिमितं छन्दः कदाचिदपि न्यूनाधिकभावो न भवति । समावत्ति समपरिमाणानि ॥३४॥ एषां प्रयाजादीनामध्यात्ममुक्तेष्वङ्गेषु मध्ये यथैकमङ्गं (यप्येक° Cod.) हिंस्यात् । तस्मादेतानि प्रयाजानुयाजादीनि प्राच्योदीच्यान्यङ्गजातानि तत्प्रतिनियतावयवचूपतया यज्ञशरीरनिष्पादकानीति सर्वेष्टि[षु] तत्र साधारणानि । अन्यप्रधानहविषामावापोद्धारयोग्यतां (षायावायोद्धार) चाह अन्यान्येवेति उपाह्रियन्ते आज्यभागानन्तरं स्विष्टकृद्यागात्पूर्वं प्रधानयागस्थाने प्रक्षिप्यन्ते प्रयोगान्ते अपह्रियन्ते च उद्गार्यन्ते ॥३५॥ पञ्च प्रयाजाः द्वावाज्यभागौ स्विष्टकृदिडा त्रयोऽनुयाजाः चत्वारः पत्नीसंयाजा इति षोडश सर्वत्र साधारण्येन भवन्ति ॥३६॥६॥१॥

अथ तत्रैव दर्शपूर्णमासयोः (योङ्गे Cod.) व्रतोपायनविषयां मीमांसां कर्तुं प्रतिज्ञानीते । अदः अमुष्मिन्व्रतमुपैष्यन्नित्यादौ (१. १. १. १.) । स्थापयन्ति केचिन्निर्णयं कुर्वन्ति ॥१॥ एतदारण्याशनं पूर्वपक्षीकुर्वन्सम्भवत्पक्षान्तराण्युपन्यस्य दूषयति । मेधं यज्ञियं सारम् ॥२॥ पर्वरात्रौ यजमानः स्वयमेवाग्निहोत्रं हुनुयात् ॥३॥ समवयन्ति सम्प्राप्नुवन्ति एकीभवन्ति । एवंविदुषः स्वयं पर्वणि हुन्वतो यजमानस्य अन्यासु रात्रिषु ऋत्विजा क्रियमाणोऽपि होमः स्वयंहोमः सम्पद्यते ॥४॥७॥१॥

उक्तविधं व्रममुपेयुषो यजमानस्य हविरुपब्रुवंस्तस्मिन्निष्क्रयणाहुतां (°पलब्रुवंस्तस्मिन्निमय° Cod.) दर्शपूर्णमासयागस्य प्रतिपादयितुमाख्यायिकया यज्ञोत्पत्तिमाह ॥ ५. १. १. १. ॥१॥ एतामैापवसथीयदिवसस्य रात्रिं संयत एव संयतेन्द्रियव्यापार एव सन् वर्तितुमिक्षेत् । व्रतमुपेयिवान्यजमानः औपवसथदिवसे देवानां स्वयमेव हविर्भवति ॥४॥ अथानन्तरं परस्मिन्दिवसे यदा दर्शपूर्णमासादियज्ञं तनुते ॥५॥ भग्नाग्रो वृक्ष-इव यज्ञो भवति उपर्यवस्थिताया आङ्गतेरनिष्क्रीतत्वात् । अन्वाहरति पुनः संदधाति दोषजातमनेन शमयतीति करणसाधनो ण्यत् । आत्मा देहो भवति । सर्वतनूरेव सर्वावयवसम्पूर्ण एव । निष्क्रीत्या निष्क्रयणेन दर्शपूर्णमासाभ्याम् ॥६॥८॥१॥

अथ विशिष्टजन्महेतुतया सामिधेनीः प्रशिष्यन् (?) पुरुषस्य जन्मत्रयमाह ॥१॥ त्रीणि जन्मानि प्रदर्श्य यज्ञादेव पुनर्जन्मत्रयं प्रदर्शयन् (? °दशन Cod.) सामिधेनीसंख्याद्वारा प्रथमं जन्म समर्थयति । ताः प्रसिद्धाः प्र वो वाजा इत्याद्याः । सप्त शीर्षण्याः द्वावन्वाधौ

नाभिर्दशमोति दश शरीरे प्राणाः तेषामात्मा मन (!) एव एकादशसंख्यापूरकः । प्रतिष्ठा जीवनास्पदम् ॥२॥ द्वितीयं जन्म प्रतिपादयति । प्रसवः सामिधेन्यनुवचनप्रेरणम् तथेन समिध्यमानायानुब्रूहीत्येवंरूपेण वाक्येन क्रियते तदत्र प्रसवशब्दाभिधेयम् तस्य नवाक्षराणि भवन्ति । यद्वा अग्निं होतावे अग्नेरिति (!) प्रयाजाङ्गभूतो यः स्रुगादापननिगदः सोऽत्र प्रसवशब्दाभिधेयः तत्र विद्यमानानि नव वाक्यानि नव व्याहृतयः । अदःशब्देन प्रथमकाण्डे प्रस्तरप्रहरणविधायकं (८. ३. ११.) ब्राह्मणं परामृश्यते तत्र सृष्टौ यजमानसंस्तुतस्य प्रस्तरस्य स्वर्गलोकात्मके आहवनीये प्रहरणविधानायाऽऽजन्म प्रतिपाद्यते तन्तृतीयं जन्म ॥३॥ एतद्यज्ञसम्बन्धि जन्मत्रयं पूर्वोक्तजन्मत्रयदृष्टान्तेन निगमयति ॥४॥ इडोपह्वानमपि याग इडाया देवतासम्बन्धिप्रतिपादकत्वादाङ्गत्यात्मकः । तक्म्योरावृणीमहऽइति शम्युवाकोऽपि परिधिप्रहरणसमकालीनत्वात् (लोमनत्वात्त) आङ्गतिरूपः । अदः प्रथमकाण्डे पत्नीसंयाजेषु कर्तव्येषु सत्सु यदाहवनीयस्योपरि स्रुचोः सम्प्रग्रहणं विहितं सा संस्रवरूपा एका आङ्गतिः ॥५॥ तासां पञ्चदश सामिधेन्यः क्रमेणानुवाक्यास्थानीयाः । अत्राऽऽयाङ्गातषु य एव कारणमन्त्रो यश्चेडोपह्वानादिनिगदः ता एवासां याड्याः तथा सति आड्याङ्गतिषु याड्यानुवाक्यवत्त्वं लक्षणं रूपमितरयागवत्सम्पन्नम् । एता[स्त्व]नुवाक्या एताः (सुताः Cod.) सामिधेन्यः एताभिः कारणमन्त्रनिगदसिद्धाभिराङ्गतिभिः याड्योपेता आङ्गत्युपेताश्च भवन्ति ॥६॥१॥२॥

अथ प्रसङ्गादनुवाक्यायाड्ययोश्छन्दोविशेषं विधाय स्तौति ॥१॥ वषट्कारानन्तरभाविनं होमविधिमनूद्य प्रशंसति अथ यदिति । अतोऽस्माद्धोमाज्जनयति । आत्मा शरीरम् । यतः सर्वेषु यज्ञक्रतुषु वषट्क्रते होमः तेनैव हेतुना अस्य यजमानस्य सर्वे यज्ञक्रतवः वषट्कारात्मकं मृत्युमतिक्राम्यावस्थिताः ॥५॥ पृष्ठे पश्चाद्भागे ॥६॥२॥२॥

इत्थं सामिधेनीप्रसङ्गेनागतानुवाक्या[याड्या]वषट्काराङ्गतिरूपान्पदार्थानुक्त्वा (? नूक्त्वा Cod.) सामिधेन्यनन्तरं भाविनावाघारौ नामरूपात्मकत्वेन (कान Cod.) स्तोतुं तत्सृष्टिमाख्यायिकया प्रतिपादयति ॥ तानेषु पृथिव्यादिलोकेषु विभज्यारोहयत् ॥१॥ एवमुपरितनदेवानामप्यधिष्ठातृदेवतासम्बन्धसद्भावात् लोकत्रयवत्प्रकाशमानत्वं साधारणमित्याह स यथा हैवेति यथैव खल्वेते पृथिव्यादिलोकाः इमा अग्न्यादयो देवता आविः प्रकाशमाना अस्माकमपरोक्षा भवन्ति एवमेव खल्वेते ऊर्ध्वादिलोकाः ता अधिष्ठातृदेवताश्च आविः प्रकाशन्त ॥२॥ परार्धम् उत्कृष्टसर्वलोकावधिभूतं सत्यलोकाख्यं स्थानम् । प्रत्यवेया प्रत्येकं प्राप्नुयाम् ॥३॥ ब्रह्मणा नामरूपाभ्यामापुर्व्याप्ताः ॥६॥ अदः अमुत्राधानकरणे (१. ६. २, ३.) । संनिदधति स्म संनिधानं प्रत्यवेक्षणं कृतवन्तः ॥७॥ ततस्ते ऋषयः एतस्य न्यूनातिरिक्तस्य दोषशमनाय यदभिमर्शनं कृतवन्तः तदिदानीमपि कर्तव्यमिति विधत्ते ॥१॥३॥२॥

अथेमावाघारौ दर्शपूर्णमासनामात्मना स्तोष्यन् अधिदैवमध्यात्मं च दर्शपूर्णमासौ प्रतिपादयति । य एष सूर्यस्तपति एष खलु पूर्णमाः संपूर्णमानः । दृशऽइव अमावास्यायामविद्यमानः प्रतिपदि पश्चाद्दृश्यमान-इव भवति ॥१॥ एतस्य पूर्णमनुलक्ष्य तं कालं पौर्णमासीत्याचक्षते ॥२॥ अध्यात्ममात्मनि शरीरमध्ये ॥५॥ एतौ मनोवाग्रूपौ अपरोक्षेण भासमानौ दर्शपूर्णमासौ । तेनाशनेन एतावध्यात्ममवस्थितौ मनोवाग्रूपौ अपरोक्षौ (अपण्येनोपक्षौ Cod.) दर्शपूर्णमासौ तर्पयति परेद्युः प्रातःकाले (लंनिन) क्रियमाणेन यज्ञेन दैवौ अधिदैवं

प्रागुत्तौ दर्शपूर्णमासौ तर्पयति ॥७॥ आगूर्तोव आगूर्तमागुरणं संकल्पः तद्वानिव । उभयत्र दर्शपूर्णमासयोः । संतिष्ठेते समाप्नौ भवतः ॥१०॥४॥२॥

अथ दर्शपूर्णमासयागमश्वमेधात्मना स्तौति ॥ एतर्हि एतस्मिन्समये । आलभ्ते दर्शपूर्णमासयाज्ञिन इति शेषः । अयमेव दर्शपूर्णमासयागः प्राकृतः प्रकृतिभूतोऽश्वमेधः प्रसिद्धोऽश्वमेधस्तु इतर इत् वैकृत एव नूनमित्यवधारणे । दर्शपूर्णमासकालविभागनिमित्तभूतश्चन्द्रमाः ॥१॥ मेध्याश्वसादृश्यं चन्द्रमसः प्रश्नपूर्वकं सम्पादयति ॥२॥ अश्वस्य विवृत्ते निवर्तने सति । विवर्तते स्थानान्तरं प्राप्नोति ॥३॥ चन्द्रात्मकमश्वमेधमश्वरूपं पशुमुपवसथे दिवसे आलभ्य संज्ञप्य हवीरूपेण देवेभ्यः प्रातः प्रयक्षति । दीक्षानन्तरमश्वमुत्सृज्य संवत्सरपरिमितकाले समाप्ते इतरं प्रसिद्धमश्वमेधमारभन्ते (!) ॥४॥ मासि-मासि प्रतिपौर्णमासम् ॥५॥५॥२॥

अथोपासनार्थं यज्ञशरीरावयवत्वेन प्रणीतादीनामनुष्ठेयपदार्थानामधियज्ञमध्यात्मं च सम्पत्तिं कथयति ॥१॥ हे होतः वं ताः सामिधेनीः परस्परं संयोजयन्निव मन्त्यमनुब्रूहि । इदं शरीरमध्यावयवसम्बन्धि अनूकं परस्परं संसक्तामिव दृश्यते ॥३॥ समानयति औपभृतमाज्यस्यार्धं जुह्वामानयति । मध्ये संतृष्णं सक्थिद्वम् ॥४॥ सांनाय्यं दधिपयोलक्षणम् । अन्तरांसमंसमध्यम् । द्विषन् (!) शत्रोरेव प्राशित्रं प्राशित्रे शत्रुबुद्धिः कार्या ॥६॥ अतस्तदवदानं शत्रुनिरसनार्थमिति प्रतिपादयति । आविद्धं शल्यं निरगमयन् । यद्वेष्टितं द्वेषणशीलम् (!) ॥७॥ यथैव खल्विडायां चरुपुरोडाशादीनि सांनाय्यादीनि सर्वाणि हवींषि सहावद्यन्ति । समवधीयते सह धार्यते ॥८॥ अवाङ्मुखास्त्रयः प्राणाः नाभिपायुगुदरूपाः । इदं द्यावापृथिवी भद्रमभूदित्यादि सूक्तवाकः । सोमवष्टदेवपत्न्यग्निगृहपतिदेवताश्चवारः पत्नीसंयाजाः । ऊर्ध्वधोभागावष्टीवक्रब्द्वाच्यौ । चरमवर्ती समिष्टयजुराख्यो होमः कृत्स्नाधारत्वं तस्य पादयोश्च साम्यम् ॥१॥ तत्संख्याद्वारेण सूर्यलोकप्राप्तिरूपं फलं वक्ष्यन् ता आकृतीः परिगणयति । अदः अमुत्र पौरोडाशिककाण्डे [१. १. २. ११.] पत्नीसंयाजेषु कर्तव्येषु सत्सु शम्युवाकानन्तरं यत्सुचोः सम्प्रग्रहणं विहितं सा संस्रवाकृतिः परिगणनीया ॥१०॥६॥२॥

अथ यज्ञादीनां संवत्सरात्मनोपासनं विधाय एतद्वैशिष्ट्येन (द्वेतत्तद्वै Cod.) दर्शपूर्णमासयागस्य विशिष्टफलसाधनतां प्रतिपादयति ॥१॥ परिवेषणसाधने धृष्टी ॥४॥ विषिः शरीरकान्तिः । ब्रह्मवर्चसं श्रुताध्ययनज्ञानितसम्पत्तिः ब्राह्मं तेजः ॥१०॥ वेदिता वेदिष्यति । कांस्विदेव किंचिदेव [ब]ह्वनां (ह्वमां) मध्ये ज्ञानप्रभावेनासाधारणं सन्तं महानागमभ्युद्धृतं (त्युद्धुतं) महासर्पमिव (सयमिव) अभिसंसारमभिगम्याभिगम्य दिदृक्षितारः दिदृक्ष्यन्ते ॥१२॥ उत्तरः अग्नीषोमीयः ॥१६॥ दधिपयोलक्षणं सांनाय्यम् । परस्परं संगक्षति विश्लेष्यति च ॥१७॥ कृच्छ्रचान्द्रायणादि अन्यमदृष्टं (!) तपः ॥१८॥ लवो लेशः, अल्पीयस्त्वम् । लोकात् लोक्यमानात्कर्मफलात् । व्यथते कम्पते बिभेति ॥१९॥ अशनिर्दम्भोलिः ह्रादुनिर्विद्युत् उल्कुषी उल्का ॥२१॥ विश्रवन्मिश्र-इव (!) विश्रवन् (!) भयकम्पादिभिर्मिश्र-इव । अभ्युष्टमिश्र-इव अभित ओषणमभ्युष्टं सर्वतो दाहः तेन मिश्र-इव ॥२३॥ यज्ञरूपा मेनिः आयुधम् ॥२४॥ अनुयाजान्तत्वं यज्ञस्य निषेधति ॥२५॥ अन्वाजिबांसन् (!) देवाननुहिंसितुमैच्छन् । प्रत्यौहन् प्रत्यक्षिपन् ॥२६॥ अग्निसोमविष्णुदेवताकाः तिस्र उपसदः सोमयागे

प्रसिद्धाः ॥२७॥ संस्था समाप्तिः । वयसः आयुषः ॥२८॥ पश्चात् प्रतीच्यां दिशि गार्हपत्यसमीपे पर्य्याहृत परिप्रापयन् एतेन उपरिष्टात् यज्ञस्योपरिभागे मिथुनं स्त्रीपुंसात्मकं प्रजातिहेतुं स्थापितवन्तः । वीप्सया गवाश्वादिसर्वमिथुनस्वीकारः ॥३०॥ अध्वर्युरपि व्यापारबाङ्ल्यात् अग्निसमीपे संचरन् तापयुक्तं यथा भवति तथा विहारान्निर्गच्छति । साम्न-इवोपघोषः । अन्नवत्त्वहेतुना ब्राह्मणवत्यः ब्राह्मणज्ञातिविदा वा (?) तद्वत्यो भवन्ति । वषट्कृताः वषट्कारवत् पुरुषस्वनयुक्ताः (पुरु° Cod.) सन्तः सोदन्ति विशीर्णाङ्गा भवन्ति । ऐषावीराः एषवीरो नाम निन्दितो ब्राह्मणज्ञातिविशेषः तत्सम्बन्धिन ऋषिजः । वसन्तायां देवता ऋषिकेन मनसा ध्यायेत् ॥३२॥ अथ यजमानस्य वेदेर्दक्षिणभागे उपवेशनं विधित्सुः दक्षिणवेद्यन्तस्य तुलादण्डरूपतामाह । तत्र स्थितो यजमानो यत्साधु शोभनं विहितं कर्म करोति । सुकृतदुःकृतयोराधिक्यज्ञानार्थम् । यतरत् अनयोर्मध्ये एकतरं यंस्यति उत्थत्वेन नियमनं करिष्यति तदनुगमिष्यति । दक्षिणवेद्यन्तस्य तुलारूपतां जानतो यजमानस्य तु नैतदित्याह अथ य एवं वेदेति ॥३३॥७॥२॥

इत्थं दर्शपूर्णमासावनूद्य (चलव्य Cod.) तत्प्रशंसाव्याजेन तदङ्गावबद्धान्युपासनानि विहितानि ॥ अग्निहोत्रमिति कर्मनामधेयम् अग्नये होत्रं होमोऽस्मिन्निति तद्व्युत्पत्तिः उपचारात्तदर्थं पयोऽप्यग्निहोत्रं तस्य दोग्ध्री धेनुरपि अग्निहोत्रीत्युच्यते । अभिदधति बध्नन्ति । दामाधिकरणभूतं यन्त्रेतः तक्रद्रात्मकत्वेन ध्यातव्यम् ॥१॥ अथ प्रवसद्विषयेऽग्निहोत्रहोमस्य मनःप्राणात्मना सांतत्यं श्लोकमन्त्रैः प्रतिपादयति । तत् तस्मिन्नग्निहोत्रविषये । अग्निहोत्री यावज्जीवं संकल्पिताग्निहोत्रवान्यजमानः । काव्यं कविकर्म यावज्जीवमग्निहोत्रं जुहुयादिति वाक्यम् । अग्निभिः गार्हपत्यादिभिः संततः सम्बन्धः (°म्बद्धः ?) । अनपप्रोषितं प्रवासदोषाभावः ॥५॥ यो यजमानः भुवनेषु लोकेषु अनुष्ठेयपदार्थेषु ज्ञविष्ठः अतिशयेन ज्ञववान् यः कृत्स्नं (मसा कृत्स्न Cod.) दूरवर्त्यपि (त्यमपि Cod.) प्रयोगज्ञातमनुसंधातुं कुशल इत्यर्थः । स विद्वान् विदे लाभाय प्रवसन् प्रवासकारी भवति तथा तेन वेदनेन अस्य तद्यावज्जीववाक्यमपि सार्थकं भवति संततः अव्यवहितसम्बन्धः ॥६॥ प्रमाद्यति अनवधानयुक्तो भवति । यजमानस्य गृहे यामाङ्गतिमृत्विजो जुह्वति ॥७॥१॥३॥

अथ तस्मिन्नेवाग्निहोत्रे मिथुनवेदनं विधत्ते ॥ पत्नीयुक्तमेव स्यात् न कदाचित्तया विरहितम् । उपाप्नवानि उपगच्छानि ॥१॥२॥३॥

अथाग्निहोत्रादिनियमप्रसङ्गादागतं ब्रह्मचारिधर्मं निरूपयितुमाख्यायिकामाह ॥१॥ दीर्घश्चिरकालसाध्यः सत्रयागो दीर्घसत्रः । ब्रह्मचार्याश्रमविहितं कर्म ब्रह्मचर्यम् । उपयन् गुरुसमीपमुपगच्छन् उपनयनकाले । ताः सत्रियाः (!) सत्रयागसम्बन्धिन्यः ॥२॥ आचार्यं सावित्रीप्रदानपुरःसरमध्यापयितारम् ॥३॥ भिक्षेत (!) वृत्त्यर्थं याचेत ॥५॥ स्नात्वा स्नानेन गुरुकुलात्प्रतिनिवृत्य । यद्धि भूयिष्ठमन्नं भिक्षातो लब्धं तदेव हि स्नानाद्ध्वमनिबद्धं (!) सत् लोक्यं लोकहितं भवति । सप्तमी रात्रिः भिक्षाचरणरहिता नातिक्रामेत् । स्नात्वा समावर्तनं कृत्वा ॥७॥३॥३॥

इत्थं तृतीयेऽग्निहोत्रं प्रशस्य तत्प्रसङ्गाद्ब्रह्मचारिधर्माश्च निरूपिताः अथ चतुर्थे दर्शपूर्णमासयागस्यैव भावनाविशिष्टाः के चन धर्माः मित्रविन्देष्टादयश्च प्रतिपाद्यन्ते । तत्र प्र-

थमं विज्ञिगोपुकथारूपेण प्रश्नप्रतिवचनाभ्यां दर्शपूर्णमासकर्मैव (? कामेव) सर्वोत्पत्तिनिमित्तत्वेन स्तोतुकामस्तत्र प्रतिप्रश्नोपायिकां (? पग्निनां Cod.) आख्यायिकामवतारयति ॥ आर्बिज्याय वृतः सन् उदग्देशान्जगाम । तस्य निष्कः हिरण्मयो दोनारः उपायनत्वेन क्षिप्तो (? क्षिंता Cod.) बभूव । पुरातनानामार्बिज्याय वृतानां जनपदं गक्तां ब्राह्मणानां ग्रीष्मपरीक्षार्थं (?) एकधनं मुख्यं धनं निक्षिप्तं भवति स्म । बह्वनां मध्ये कस्यचिज्ज्ञानाधिक्यतारतम्येन जयपराजयाध्यवसानहेतुकं प्राधान्यमुपवल्हः तत्कर्तुं बिभ्यतां भीतिं प्राप्नुवतामुदीच्यानां केवलं निष्क एवोपहित आस तद्ग्रहणाय परस्परं विवदमानानां ज्ञानाधिक्यं स्वयमेव ज्ञास्यतऽइत्यनेनाभिप्रायेण ॥१॥ अस्मत्समीपदेशं प्राप्य निष्कं न पर्याददीत ॥२॥ उपपक्षो बाङ्मूलं तत्सम्बन्धीनि । दुर्वीरणानि (!) वीरणास्तृणविशेषः लुप्तोपमानमेतत् दुष्टानि वीरणानीव ॥६॥ स्वस्योपायनत्वेन कल्पितं निष्कं तस्मै स्वैदायनाय प्रददौ । सुष्ठु वर्णनीयमर्थं जानते पुरुषाय । उपगृह्य (!) आलिङ्ग्य ॥८॥ उपवल्हेत प्रधानश्रैष्ठ्यं कुर्यात् वर्ह वल्ह प्राधान्ये (धा° १६. ३८.) ॥१॥१॥४॥

इत्थं दर्शपूर्णमासयोः प्रयाजादियागान् (प्रयजातिगा° Cod.) शरीरोत्पत्तिनित्यत्वेन प्रतिपाद्य अथ तेषां यागानां स्रुगादानप्रभृतिहोमान्ताः के चन धर्माः विचार्यन्ते । तत्र स्रुगादानस्य प्रकारविशेषं दर्शयितुं प्रस्तौति ॥ दक्षिणवाभहस्ताभ्यां युगपत्स्रुक्चपभृतौ गृह्णन्ति । एनमध्वर्युम् । प्रति[प्रतिं] प्रतिकूलाचरणेन प्रतिपदम् । अकृत् (!) कृतवान् ॥१॥ उपमीमांसा उदीरितदोषोक्तिः नास्ति अपि तु तदादानं पशुवृद्धिकरमायुःकरम् । शिक्षि अव्यक्तशब्दे परस्परं संघटनजनितं शब्दमकुर्वन् ॥२॥ अतिक्रमणविचारं प्रस्तौति । विधमति विगमयति यजमानाद्वियोजयति । उपसमूहति समीपं प्रापयति । दक्षिणेन पदा । सव्येन पादेन ॥३॥ अथ स्रुग्धारणविषयं धर्मविशेषं विधातुं प्रस्तौति । प्रगृह्य प्रकर्षेण समुद्यम्य (? प्रकामेणार्धमुन्नस्य Cod.) । अतो यजमानः शूलबाङ्भविष्यति । वाय्वाधारत्वात् (? वाय्याधार° Cod.) प्राणो नाभिः । नीचैःकृत्येव तं मध्यमधा[र]णमुप तस्य मध्यमप्राणस्य समीपे धारयेत् ॥४॥ उच्चैः ऊर्ध्वस्वरेणादाय आश्रावणं प्रारभ्य शनैर्नीचैःस्वरेण निदधाति परिसमापयति । पापीयान् अतिशयेन दरिद्रः ॥६॥ यावत्परिमाणेन स्वरेण ॥७॥ अणु अल्पं कण्ठस्याल्पता यथा भवति तथा । अस्वरं स्वररहितं क्षीणस्वरम् । कृपणं नु वै कृपणं दीनमिव । अकृत् (!) कृतवान् ॥१॥ अस्वरमुदात्तादिस्वररहितम् केवलमुच्चैर्घोषेण । उदात्तादिलक्षणो यः स्वरः स श्रीः वेदवाक्यस्य सम्पद्रूपः ॥१०॥ स्वरवत् उदात्तादिविविक्तस्वरयुक्तम् ॥११॥ अस्मिन्नेवाश्रावणे स्वरविशेषं विधत्ते । उरःप्रदेशे मन्द्रमिव परास्तभ्य गम्भीरध्वनियुक्तमिव पराचीनं (वानं Cod.) संस्तभ्य (स्तंन्य Cod.) । उभयतः आद्यन्तयोः बार्हतं बृहत्सामसम्बन्धी मध्यमस्वरो यथा भवति तथा अन्ततः आश्रावणस्यावसाने उच्चैर्निदध्यात् निक्षिपेत् । त्रीणि हि वाचः स्थानानि मन्द्रमध्यताराख्यानि तत्र मन्द्रस्वरेण (मंण्डलस्व° Cod.) आश्रावणं प्रारभ्य मध्यमस्वरगर्भितेन (!) तारस्वरेण परिसमापयेत् ॥१२॥ स्रुक्चं प्रागग्रामुपभृतोऽग्रदेशात्प्रागवरोप्य । पर्याहृत्य उपभृन्मूलदेशादुपरि नीवा । अनुयुवत्रा (!) इति तुशब्द (!) उपमार्थः (उपसायार्थः Cod.) अनुयुयन्निव (!) भ्रातृव्येण संमिश्रयन्निव (यतिच Cod.) अयमध्वर्युः शत्रोः अनुगमनशीलं यजमानमकत् (!) अकार्षीत् ॥१३॥ पार्श्वतः उपभृतः पार्श्वदेशा-

देव शुङ्गमवरोप्य आहवनीये ज्ञत्वा पुनस्तेनैव पर्याहृत्य । अतोर्थेन अमार्गेण । संशीर्णो वा भविष्यति घृणिर्वा (!) भ्रान्तो वा भविष्यति ॥१४॥ तेनैव उपभृतोऽग्रदेशेनैव अधिहृत्य ॥१५॥ प्रकर्षेण दग्धा भस्मसात्कृता आज्ञतयो येन स । पूर्वमेवाज्यस्य ज्ञतवाक्कुष्कस्यैव पुरोडाशादेः प्रकर्षेण दह्यमानत्वात् । वाग्देवता स्व[य]मदृश्यमाना सती ॥१६॥ अपस्थूणो (!) गृहपतिर्येषां ते ॥१७॥ हीनद्रव्यकत्वाद्गृहपत्यधिक्षेपः ॥१८॥ आक्रुत्तः आक्रोशं कृतवानसि । ईदृशं स्वदोषमपश्यन्किमित्यस्मदीयं सत्रं निन्दसि ॥१९॥ अर्हसि विद्योपदेशार्हो भवसि ॥१०॥२॥४॥

अथ मित्रविन्दाख्यां काम्यामिष्टिं विधास्यन् तत्र हविरुत्पत्तिक्रममन्त्राद्यादिकामेन [त]स्यामधिकारिविशेषं च दर्शयिष्यन् आख्यायिकां रचयन् (? ख्यत् Cod.) आदौ श्रिय उत्पत्तिमुत्पन्नायाश्च तस्या देवैरभिधानमाह (नं वाह Cod.) ॥ श्रीः सौभाग्यलक्ष्मीः ॥१॥ आददामहै स्वीकुर्वाम ॥२॥ भगं सौभाग्यम् ॥३॥ अग्न्यादयो देवाः मदीयैर्यज्ञैः यज्ञसाधनैर्हविर्भिः प्रीताः सन्तः अन्नाद्यादिभिर्मां प्रत्येकं समनक्तु संयोजयतु । सहस्री सहस्रसंख्याकधनवान् । पशुसम्बन्धीनि रूपाणि विबुर्वन् त्वष्टा ॥६॥ पुरस्तादन्ततस्त्वष्टारमारभ्य प्रतिलोमं प्रातिलोम्येन अवरोहक्रमेण अग्निपर्यन्तं प्रत्येत् प्रत्यगच्छत् । ददतो पुष्टेः पुनर्दात्री भवतु । पुनः प्रदानायाधियन्त अङ्गीकृतवन्तः ॥७॥ प्रधानयागसमीपे स्विष्टकृतः पूर्वं होतव्या होमा उपहोमाः ॥८॥ दशंदशिनीति प्रतिपादं दशभिरक्षरैर्दशसंख्यावतो विराट् ॥९॥ तस्यामिष्टौ चोदकप्राप्तेष्वङ्गेषु क्वाचिद्विशेषं दर्शयितुं तान्यनुक्रामति । विकृतिषु अनारभ्याधीतेन सप्तदश सामिधेनीरित्यादिना (दिति Cod.) वाक्येन सामिधेनीसाप्तदश्यं नियमितम् तस्य साप्तदश्यस्य नियमे प्राप्तदश्यमेव प्रतिप्रसवार्थं निधीयते । तद्वाचिनोऽग्न्यादिशब्दानुपांशूच्चरेत् । संयाज्ये स्विष्टकृद्यागस्य याज्यानुवाक्ये ॥१॥ विदां चकार प्रथमं ददर्श । उत्ससाद उत्सन्ना बभूव । तां वेदाङ्गाभिज्ञेषु (°ङ्गानिज्ञेयु Cod.) ब्राह्मणेषु अन्विष्टवान् ॥२०॥३॥४॥

दाहविपतनादिदोषदुष्टस्यापि हविषः समृद्ध्युपायमुपासनां (? यमुपासां Cod.) विधित्सुः प्रतिज्ञानीते ॥ ब्रह्मणो ब्रह्मलोकस्य द्वाराणि ॥१॥ उपरक्तेन उपान्तस्थितरक्तिमगुणेन ॥५॥ लोहितेन सर्वतो रक्तवर्णेन ॥६॥ सुष्ठु सम्यक् शृतेन ॥७॥ अथ तत्साध्यस्य यज्ञस्यापि न्यूनत्वादिदोषपरिहाराय समृद्धिं वक्तुं प्रतिज्ञानीते । सम्पन्नं सम्यगनुष्ठितम् ॥८॥४॥४॥

इत्थं दर्शपूर्णमासौ प्रशस्य तद्विकृतिभूतांश्चातुर्मास्यादीन्प्रशसिष्यन् तत्राग्निमन्थनसद्भावात्तत्साधनभूतयोररण्योरध्वत्थविकृतिवं विधित्सुस्तदर्थमाख्यायिकां रचयति ॥ शापवशान्मानुषीभावं प्राप्ता उर्वश्याख्या देवस्त्री । दिवसस्य त्रिर्वारं मां वैतसेन दण्डेन पुण्यञ्जनस्य नाम । अकामां कामरहितां सुरताभिलाषरहितां च मां मा (मस Cod.) निपद्यासै निगृह्य मा प्राप्नुयाः । अस्माकं खलु नोऽस्माकं स्त्रीणां परिचर्या ॥१॥ द्वावुरणौ बालकौ मेषौ उर्वश्या पुत्रत्वेन पालितौ । प्रमेषुः अपजह्रुः ॥२॥ सा खलूर्वशी । वीरपुरुषरहिते देशे यथा चोरादयो गवादिधनमपहरन्ति तथा मदीयं पुत्रत्वेन स्वीकृतमुरणद्वयं गन्धर्वा अपजह्रुः ॥३॥ पुनरैम्यागवनमिति (?) वाचा (? वाणां Cod.) एत् (यन् Cod.) स्वर्गलोकमागच्छत् (केत् Cod.) । विरहजनिता मनःपीडा आधिः तया प्रलपन् कुरुक्षेत्रस्य समीपे उवशीं द्रष्टुकामो भ्रमणं कृतवान् । विसवती पद्मिनी (ह्मीना Cod.) सरसी तस्यै ह्राधि तस्याः समीपदेशे

अन्तेन अन्तिकेन तदुदेशे (? तदुशेदेने) गतवान् । आतयः जलचरपक्षिविशेषस्यैषा संज्ञा तद्रूपा भूत्वा जलक्रीडां कृतवत्यः ॥४॥ आविरासुः पक्षिरूपं विहाय स्वकीयेन रूपेण प्रादुर्बभूवुः ॥५॥ तामभिलक्ष्य परावृत्तः सन्नुवाद ॥६॥ एता एतया वदीयया अर्थशून्यया वाचा । समयभङ्गान्निमित्तात्प्रस्थानमकार्षम् सूर्योदये निवर्त्यानामुषसां (नवित्र्यां° Cod.) मध्ये अग्र्या (!) अग्रे भवा पूर्वा उषाः यथा प्रक्रामति न पुनरावर्तते ॥७॥ परिप्लुतः प्राप्तपरिदेवनः (? वेदनाः Cod.) । सुदेवो सुक्रीडोऽयं जनः देहत्यागार्थं पाशेन (? वाशेन Cod.) उदूबन्धनं वा कुर्यात् प्रपतेद्वा प्रपतनं (प्रयपंतनं Cod.) महाप्रस्थानं वा कुर्यात् ॥८॥ एता एतदीयानि स्त्रीसम्बन्धीनि मनांसि शालावृकानां (!) हृदयानि तदृक्षूराणि ॥९॥ इत्थं सहसा प्राप्तुकामं पुत्रत्वसं निराकृत्य उर्वशी स्वप्राप्त्युपायान्तरमुपदेष्टुं तत्कृतमुपकारमाविःकरोति । विद्रूपा मानुषसंसर्गाद्विगतदेवरूपा सती । लवमप्यल्पभूतं घृतमपिबम् । इदमिदानीं देवान्नेऽपि सति तात् वर्णलोपश्छान्दसः तस्मादेव घृतस्तोकात् तृप्ता सती वसामि अतस्त्वां न विस्मरामि । आव्ययां चकार विगतकाठिन्यं बभूव ॥१०॥ हिरण्यनिर्मितानि सद्मानि (साधानि Cod.) आगमत् तत एनं तत्रत्या जना इदमेकमूचुः तत्सद्म (? त्स्कर्यं Cod.) आरोहेति । तत्र तस्य एतामुर्वशीमुपप्रजिग्युः (!) प्रेषितवन्तः हि गतौ वृद्धौ ॥११॥ आवत्राज स्वस्थानमाजगाम । अन्तर्हितमग्निमा इत् (मा पत् Cod.) आगकृत् । तमश्वत्थमपश्यत् ॥१३॥ घृतेनाभ्यज्य (!) मूलादारभ्याग्रपर्यन्तमाज्येनाक्ता ॥१४॥ ते पुनर्गन्धर्वा विचार्योचुः । यदेतदश्वत्थसमिदाधानेनाग्नेः पुनःसम्पादनम् एतत्पोऽन्तमिव व्यवहितमिव खलु भवति तस्मादन्य उपायः कथ्यते ॥१५॥१॥५॥

यथा ह दर्शपूर्णमासयाजिनः आत्मयाजित्वं देवयाजित्वं वेति (वेदिति Cod.) द्वैविध्यं दर्शितमेवं चातुर्मास्ययाजिनोऽपि तथात्वं दर्शयितुं तत्रत्यैर्यागैः शरीरावयवकल्पनमाख्यायिकया रचयति ॥ इदं सौम्यमित्यादिना अङ्गुलीनामभिनयेन निर्देशः ॥१॥ तृतीयस्य हविषो मध्यमाङ्गुलेश्च सारूप्यमाह । द्वादशसु कपालेषु संस्कार्यतया संख्याधिक्यात् इदं कूर्परस्थानं वैश्वदेवं सप्तमं हविः । तदुपरि दोर्दण्डः ॥२॥ ऊरुशब्दः कृत्स्नस्य पादस्योपलक्षकः । समायोनि पर्वचतुष्टयसंचारोणि आग्नेयादीनि पञ्च हवींषि । जङ्घापादतलयोः संधिः गुल्फः । इदं जङ्घारूपमङ्गं वारुणम् ऊर्वात्मकमिदमङ्गं मारुतम् ॥३॥ साकमेधेषु । अण्डौ लिङ्गं चेति त्रीणि शिश्नानि ॥४॥ महाहविरिति वैश्वदेववरुणप्रघासशब्दवत् साकमेधाख्यस्य प्रधानस्य पर्वणो नामधेयम् ॥५॥ त्रयः संधयोऽन्तरालकालाश्चत्वारश्चत्वारो मासा येषां तानि त्रिसंधीनि (!) । द्विसमस्तानि शुनासीरीयवैश्वदेवयोः फाल्गुनशुक्लचतुर्दश्यां पौर्णमास्यां च पौर्वापर्येणाव्यवहितानुष्ठानात् द्वाभ्यां पर्वभ्यां समस्तानि संश्लिष्टानि (? स्तिष्ठानि) पादतलादधस्तनोपरितनसंध्ययोरुभयोः (?) प्रत्यासन्नत्वादूद्विसमस्तत्वम् । वरुणप्रघाससाकमेधयोः त्रीणि-त्रीणि हतोंषि उपांशुप्रचरणीयानि भवन्ति वैश्वदेवशुनासीरीययोः आग्नेयपर्वणोः द्वे-द्वे हविषी अनिरुक्ते चतुर्ष्वपि पर्वसु एककपालस्य हविषः सावित्रस्य चोपांशु[त्वं] सिद्धम् मध्यमयोः पर्वणोरन्यदप्येकं हविः उपांशु प्रचरितव्यम् ॥७॥ चतुर्भिः हस्तपादलक्षणैरङ्गैः आयुते समानपरिमाणैः संयुज्यते यु मिश्रणामिश्रणयोः वैश्वदेवशुनासीरीययोर्द्वयोः पर्वणोरन्तरवेदिनिवपनं परित्यज्य केवलमाग्नेयमेव प्रणयन्ति ॥८॥ अथ गायत्र्यादिसम्पत्तिमेषु पर्वसु दर्शयितुं पूर्वपक्षयति

। सर्वगायत्रम् सर्वैर्याज्यानुवाक्यादिभिर्मन्त्रैर्गायत्रीक्रन्दस्कैरेव कार्यम् । चतुष्टोमस्य त्रिवृदादिस्तोमचतुष्टयोपेतस्य सोमयागस्य प्राप्त्यै सम्पत्तये । यद्वै (!) यस्मात्खल्वेतानि क्रमेण गायत्र्यादिसूक्तेन सम्पद्यन्ते तस्मात्तेषां सर्वगायत्र्यादिकं न कार्यम् ॥१॥ अथ चातुर्मास्येषु संख्याविशेषवादिना (वदित Cod.) बृहतीसम्पत्तिं दर्शयन् संवत्सरात्मकचित्याग्नेः महाव्रतसाम्नश्च प्राप्तिरूपफलं दर्शयति । द्वाषष्टानि द्विषष्ट्यधिकानि । षष्ट्युत्तरत्रिशतयजुष्मतोष्टकात्मकं संवत्सररूपं चित्याग्निम् ॥१०॥२॥५॥

अथ प्रश्नप्रतिवचनाभ्यां अग्निहोत्रहोमस्य सर्वदेवतातृप्तिकरत्वं प्रतिपादयिष्यन् प्रष्टृप्रतिवक्तारौ दर्शयति । शुचिनाम्नः पुत्रः ॥१॥ उपसृष्टा दोहनार्थं वत्सेन संगता धेनुः । संयोजनं वत्सबन्धनार्थं दाम । गोष्ठाद्गार्हपत्यसमीपं प्रति ष्टुभ्यस्य (? दुग्धस्य ?) पयस आनयनमाहरणम् । गार्हपत्यसमीपाडुद्यतम् । निगृहीतमाहवनीयस्य पश्चात्सादितम् ॥२॥ यां समिधं होमात्पूर्वमग्नावादधासि सा किमर्था । या पूर्वाङ्गतिरग्निर्ज्योतिरिति ह्रूयमाना सा कस्य देवस्य प्रीत्यर्था । उपासीषदः पूर्वाङ्गत्यनन्तरं स्रुचमुपसादितवानसि । अपैच्चिष्टाः गार्हपत्यस्येक्षणं कृतवानसि ॥३॥ द्वितीयामाङ्गतिं हुत्वा किंकारणं स्रुचं दोलयसि (वोल Cod.) । स्रुक्मुखलेपस्य परिमार्जनं कृत्वा कुशमयकूर्चे निमृष्टवानसि । दक्षिणवेदेः दक्षिणभागे हस्तमुपसादितवानसि । उत्सृप्य वेदिसमीपाडुत्सर्पनं कृत्वापां पानं कृतवानसि । निरौक्षीः निष्कृष्योक्षणं सेचनं कृतवानसि ॥४॥ वायव्यो वायुदेवताकः । सञ्जूर्वायुना संसृष्टा यौः । दशाक्षरा विराट् । महादेवो रुद्रः ॥५॥ प्रतिष्ठा आधारः समिदभावे ष्याङ्गतिर्द्रव्यं भूमौ पतेत् । अप्रैषं तृप्तानकार्षम् ॥६॥ सर्पदेवजनान् सर्पणशीलानां प्राणिनां मध्ये ये देवजनाः उत्कृष्टाः तान् । एतामुदीचीं दिशम् ॥७॥ उक्ताग्निहोत्रप्रश्ने ज्ञप्तो (ज्ञमे Cod.) विषये बोधितः । गार्हपत्याडुद्धृताः । पात्राणि स्रुक्स्रुवादीनि उपाक्रुतानि (!) स्वस्वस्थाने आसादितानि । अनुगक्षेत् शाम्येत् । पुरा आगामिनि काले अचिरात् (!) अचिरलंनैवव (° रंतनेऽवसरे ?) । आगोऽपराधम् ॥८॥ पुरा पूर्वस्मिन् आगामिनि काले अचिरात् (!) क्षिप्रं भस्मसमारोपणपूर्वमग्निं मथित्वा । तां दिशमभिलक्ष्य आहवनीयमुद्धृत्य ॥११॥ निवाते वातरहिते देशे । एनत् अग्निहोत्रार्थं पयः ॥१२॥ शोकतरणसमर्थाम् ॥१३॥३॥५॥

तं होपनिन्यऽइत्युपनयनस्य प्रस्तुतत्वात् तद्धर्मा अस्मिन्ब्राह्मणे निरूप्यन्ते ॥ तत्र गुरुं प्रत्युपनयनप्रार्थनपरमुपनेतव्यस्य मन्त्रं विधाय स्तौति । उपनयते स्वसमीपं प्रापयति ॥१॥ असाविति मन्त्रगतादःशब्दस्थाने सम्बुद्ध्यन्तं ब्रह्मचारिणो नाम ग्राह्यम् ॥२॥ सावित्रीं सवितृदेवताकाम् तत्सवितुर्वरेण्यमित्यादिना गायत्रीमाचार्योऽनुब्रूयात् । पुरा पूर्वस्मिन्नुपनयनादूर्ध्वं भाविनि संवत्सरकालेऽतीते सति ॥६॥ तत् तत्र ऋहपत्ते श्लोकरूपमन्त्रमपि पठन्ति । तृतीयस्यां रात्रौ । सद्यो ह वावेति तुशब्दः प्रागुक्तं कालं च व्यावर्तयति । सद्य उपनयनानन्तरमेव ॥१२॥ अयमाचार्य इमं शिष्यमथ बुल्वं तिरश्चीनं (स्त्रीनं Cod.) प्राङ्मुखमज्ञीज्ञनत् तथा चायमुल्वः (!) पराङ्मुखो भविष्यतीति । आचार्यात्पूर्वभागे प्रत्यङ्मुखायोपविष्टाय आचार्य समीक्षमाणाय ॥१४॥४॥५॥

अथ शतातिरात्रं सत्रं विधास्यन्नाख्यायिकामाह ॥१॥ शतसंख्याकाः अग्निष्टोमसंज्ञाः सोमयागा यस्मिन् तत्कताग्निष्टोमं सत्रम् । अग्निष्टोमादप्यधिकसंख्यारूपेण शतोक्थ्यं सत्रम्

॥२॥ अग्निष्टोमोक्थ्यसंस्थौ सोमयागौ असर्वक्रतू अधिकयोः षोडश्यतिरात्रयोरिविद्यमानत्वात् (!) ॥५॥ रात्रिसामानि रात्रौ प्रयोज्यानि बहिष्पवमानादीनि । अतिरात्रसंस्थे हि सोमयागे पर्दिवसे सूर्योदयादनन्तरमेवाश्विनशस्त्रपरिसमाप्तिः ततस्तिरोऽह्न्यसोमयागः ततो यज्ञपुक्छमिति त्रिचतुर्मुहूर्तकर्तव्यं प्रयोगज्ञातं भवति तथा चैकस्मिन्नहन्यभावात्कालोत्कर्षे सति अहःकर्तव्यं रात्रिं प्राप्नोति रात्रिकर्तव्यमहः ॥६॥ आश्विनेन प्रातरनुवाकस्य स्वस्थानात्प्रच्यावितत्वात्कालोत्कर्षात् युष्माकं सत्रं न विस्तार्यते अतः सत्रवर्तिनामङ्गां परस्परसांतत्यविरहात्कालोत्कर्षेण भवतामहोरात्रकर्तव्यविपर्ययो ज्ञात इति भावः ॥८॥ तं प्रातरनुवाकं होत्राश्विनशस्त्रे शस्यमानऽएव प्रशास्त्रा मैत्रावरुणेन उपगृह्य शनैः नीचैःस्वरेण अप्रतिशंसता आश्विनस्य प्रतिशंसनं प्रतिध्वनिः पराहतिः यथा न भवति तथा ॥१॥ परस्याङ्गः सोमाभिषवार्थी वसतीवर्याख्या आपः । अध्वर्योराश्विनशस्त्रप्रतिगरे व्यापृतत्वात्प्रतिप्रस्थातृग्रहणम् । होता उच्चैराश्विनं शस्त्रं शंसति इतरो मैत्रावरुणः अत्यर्थं ज्ञपन्निव उपांशुस्वरेण अन्वाह प्रातरनुवाकम् तथा सति तत्र मैत्रावरुणः स्वकीयया वाचा ध्वनिना होतुर्वाचं ध्वनिं न प्रतिगृह्णति तथा छन्दसा स्वप्रयोज्येन गायत्र्यादिना होत्रा प्रयुज्यमानं छन्दो न प्रत्येति होतुर्गायत्रस्य छन्दसः परिसमाप्तावुष्णिक्छन्दःप्रारम्भे सत्येव मैत्रावरुणस्य प्रातरनुवाकादिभूतस्य गायत्रछन्दसः प्रारम्भविधानात् ॥१०॥ तिरोऽह्न्यैः तिरोऽहसम्बन्धिभिः सोमैश्चमसगणैः आश्विनशस्त्रानन्तरं भाविभिः । तिरोऽह्न्यान् ज्ञतशिष्टान्पात्रे पर्युषितान्सोमान्भक्षयत । अथानन्तरमनुपूर्वं प्रकृतिवत् यज्ञपुक्छं पूर्वस्याङ्गः शेषं समाप्य ऐन्द्रवायवादीन्ग्रहान्गृहीत्वा विप्रुड्डोमं प्रकृतिवदेव कृत्वा अग्निः (!) प्रातःसवने संतन्याख्यं होमं कुर्यात् अथ बहिष्पवमानाख्येन स्तोत्रेण स्तुत्वा उत्तरमह्नेव प्रतिपद्यध्वम् एवं पूर्वोत्तरयोरङ्गोः आद्यन्तवर्तिनामसपाठांन (?) व्यतिषज्य सत्रानुष्ठाने सति अहरभि रात्रिसामानि परीयुरिति प्रागुक्तो दोषो न प्रसज्यते ॥११॥ चतुर्भिः सैन्धवैः होत्रध्वर्युप्रशास्तृप्रतिप्रस्थातृलक्षणैरश्वैः धीरा देवाः तमो विशेषेण त्यक्तवन्तः । शतं क्रतवः सोमयागा यस्मिन् तथाविधं सत्रं समतन्वत (!) अन्ततः परस्परसम्बन्धैरहोभिरकुर्वत ॥१२॥ पवेर्वज्रस्य शक्रोव प्रहरणशक्तां (!) प्रातेर्वर्तिनीधोमिव (!) हनूनि हनुवदहःपार्श्ववर्तीनि प्रातरनुवाकाश्विनादीनि कल्पयन् विभक्तिव्यत्ययः कल्पयन्तः कर्तृद्वयेव (!) सह (संह Cod.) प्रयुञ्जानाः पूर्वापरवर्तिनोरङ्गोरन्तौ धीमन्तो देवाः व्यतिषक्तौ परस्परं संसृष्टावकुर्वन् । देवानां वाक्यम् यज्ञसम्बन्धं विस्तृतमेषामङ्गां परस्परसंतानप्रकारं प्रजापत्युपदेशाद्वयमिदानीं विशेषेण ज्ञानीमः अस्मान्दनोः पुत्रा असुरा इतः परं न मोहयन्ति । एकविधान् आशिधावनं कृतवतोऽश्वान्यथा सदा सिञ्चन्ति ज्ञनमेजयो नाम राज्ञा तस्य गृहे परिस्रवणशीलस्य मधुनः कुम्भान् । अयमभिप्रायः यत्कृतकार्या अश्वाः स्वादुभिः मधुकुम्भैरासिच्यमानाः स्वाभीष्टं लभन्ते एवं देवा अपि शतातिरात्रं प्रजापत्युपदिष्टमार्गेण सम्यगनुष्ठाय स्वर्लोकान्तरायमासुरं तमो निरस्य अमृतसेवारूपं स्वर्गफलं प्रापुः ॥१३॥५॥५॥

अथ सत्रप्रसङ्गाद्यावज्जीवमनुष्ठेयान्पञ्च महायज्ञान्महासत्रवन निरूपयितुं प्रस्तौति ॥१॥ उदवसानीयेष्टिपर्यन्तम् । प्रत्यहं स्वाहाकारेण देवानुद्दिश्य यत्कामपर्यन्तं (!) विदध्यात् (? °दधान) तेनेनं देवयज्ञमाप्नोति ॥२॥ स्वाध्यायः स्वशाखाध्ययनम् । उदयनं यज्ञस्य समापनम् ॥३॥ सर्वश्चासावात्मा च सर्वात्मा चक्षुरादीन्द्रियसहितः कृत्स्नो देहः । प्रशस्याभिः धनसम्पद्भिः

। स्वधारूपेण वहन्ति अन्नात्मना प्रवहन्ति ॥४॥ अथर्वणा ऋषिणा आङ्गिरसा च दृष्टाः शाखा अथर्वाङ्गिरसः ॥७॥ अनुशिष्यते व्युत्पाद्यतेऽभिरिति अनुशासनानि व्याकरणनिरुक्तादीनि षडङ्गानि न्यायमीमांसादयो विद्याः उक्तिप्रत्युक्तिरूपं प्रकरणं वाक्योवाक्यम् इति (!?) इतिहासः पुरावृत्तप्रतिपादकं पुराणं वैष्णवादि नरा मनुष्याः तत्प्रशंसा[प्रति]-पादकाः श्लोकाः (का श्लोको Cod.) नाराशंस्यो गाथाः । अन्ये त्वेवं व्याकुर्वन्ति मन्त्रब्राह्मणवेदभागो द्विविधः तत्र ऋगादिशब्दैर्मन्त्रभागस्याध्ययनं प्रतिपादितम् अधुना ब्राह्मणभागस्याध्ययनं प्रतिपाद्यते तत्र स वै सम्भारात्सम्भरतीत्यादीनि विधिवाक्यान्यनुशासनानि उपासनविधिवाक्यानि विद्याः स वै गौतमस्य पुत्र वृतो ज्ञानं धावयेदित्युक्तिप्रत्युक्तिरूपं ब्राह्मणं वाक्योवाक्यम् आपो ह वाऽइदमग्रे सलिलमेवासेत्यादिकं सृष्टिप्रतिपादकं ब्राह्मणमितिहासः उर्वश्यप्सराः पुरूरवसमैडं चकमऽइत्यादीनि पुरातनपुरुषवृत्तान्तप्रतिपादकानि पुराणम् महाहिमिव वै ह्रदादित्यादयो मन्त्रा गाथाः समानात्सदमुच्यन्ति ह्यानित्यादिका मनुष्यप्रशंसापरा नाराशंस्यः ॥८॥ विद्योतनं विद्युत् स्तनयित्नुर्मेघगर्जनम् अवस्फूर्जनसानिः (?) । एषां वषट्काराणां वषट्कारं (?) वैयर्थ्यं (र्थ्ये Cod.) तत्परिहाराय । स चाधीयानः पुरुषो यदि प्रबलमिव अधिकमध्येतुं न शक्नुयात् तथापि देवतावाच्येकं वैदिकपदमधीयीतैव न तूष्णीमासीत ॥१॥६॥५॥

अथास्मिन्ब्राह्मयज्ञस्वाध्याये पुरुषाणामादरातिशयं ज्ञनयितुं प्रशंसां कर्तुं प्रतिज्ञानीते । फलान्यनुक्रामति । स्वाध्यायः स्वाध्ययनम् प्रवचनमन्यस्याध्ययनम् । युक्तमवित्तिप्तमेकाग्रं मनो यस्य स युक्तमनाः । आत्मनः स्वस्य परमचिकित्सको भवति अन्ये हि भिषज्य औषध्यादिना शरीरस्यैव तात्कालिकोमेव उदराशिरोरोगादिपीडां निवर्तयन्ति विद्वांस्तु देहव्यतिरिक्तस्यात्मन उक्तेन स्वाध्यायेन पुनर्मृत्युरूपां पीडां सर्वदैव निवर्तयति । एक एव सन् आसमन्ताद्भवतीत्येकाराम[स्तस्य (°दुम°?) भावः । यशः कीर्तिः तद्युक्तो यो लोकः तस्य पक्तिः परिपाको भवति । ब्राह्मण्यं ब्राह्मणभावम् प्रतिरूपचर्यां तदनुरूपमाचरणम् । पच्यमानः यशसा युक्तः । भुनक्ति पालयति । अर्चा अर्चनं पूजनम् इष्टसाधनादेः समर्पणं दानम् ज्यानिर्हानिस्तद्विषयत्वमज्येयता । वधं हननमर्हतीति वध्यः ॥१॥ श्रमाः श्रमसाध्यास्तपोविशेषाः । परमता परमत्वमुत्कर्षः तस्यावधिभूमिः ॥२॥ वेदाध्ययनशीलस्य कायिकव्यापारं निवर्त्य यागहोमादिफलमप्ययत्नतः सिध्यति । यद्यत् यस्य-यस्य यज्ञक्रतोः प्रतिपादकं (क Cod.) छन्दसो वेदस्य सम्बन्धिनं स्वाध्यायं स्वशाखासम्बन्धिस्वाध्यायानुवाकादिकमधीते ॥३॥ अध्ययनं कृच्छ्रचान्द्रायणादितपोरूपवेन स्तौति । सुहितो यथेष्टभोजनेन तृप्तः सुखे सुखकरे शयने शय्यायां शयानः ॥४॥ क्षीरमिश्रमोदनं क्षीरौदनम् मांसेन मिश्रं शाल्योदनं मांसौदनम् ॥५॥ इतिशब्दः प्रकारवाची कार्यादीनां (?) संग्रहार्थः ॥१॥ कुंयाशब्देन (?) एकार्थस्य प्रतिपादकं (परिपदकं Cod.) विध्यर्थवादात्मकं ब्राह्मणवाक्यमुच्यते ॥१०॥७॥५॥

इत्थं सत्रप्रसङ्गात्तत्सारभूताभिर्व्याहृतिभिः सर्वप्रायश्चित्तहोमं विधास्यन् तासामुत्पत्तिमाख्यायिकया प्रतिपादयति ॥१॥ शुक्राणि व्याहृतिरूपाणि तेजांसि । होत्रं होतृकर्म सामिधेन्यनुवचनयाज्यानुवाक्यापाठरास्त्रसंशनादिकम् (शस्त्रशंस°?) आध्वर्यवं हविःप्रचारादिकम् उद्गीथमुद्गातृकर्म । वेदत्रयस्य यदेव शुक्रं निर्मलं रूपं सारन्वतांशः (?) तेन ब्रह्मणः कर्माकुर्वत ।

अनन्तरं कृत्स्नयज्ञात्मकः सन्प्रजापतिरुत्क्रान्तवान् ॥४॥ सर्वाण्येतान्यनुद्रुत्य उच्चार्य । शीर्णेन भग्नेन ॥६॥ अत एव यजुर्वेदसूत्रवत्सर्वसूत्रेषु परस्परानैरपेक्ष्येण तद्भेदोक्तं ब्रह्मत्वं सूत्रितम् ॥७॥८॥५॥

अथांशुदाभ्याख्यौ सोमग्रहौ विधित्सुस्तयोरा[त्मवागा]दिरूपतया समुच्चित्यानुष्ठानं प्रतिपादयति ॥ आत्मैव मध्यशरीरमेव ॥१॥ प्रावृहन्त असुरेभ्यः सकाशात्स्वीकृतवन्तः ॥४॥ अदभाम अहिंसिष्म ॥५॥ निग्राभ्या इति वसतीवरीणां सोमासेकार्थानामपां (सोमसका°) ग्रहणम् । अंशून् सोमलतासंज्ञान् (? सज्ञान् Cod.) ॥६॥ त्रिभ्यः सवनेभ्य ऊर्ध्वमुक्थ्यषोऽग्निसंस्थादिरूपम् । ग्रहान्तरवत्प्राप्तमभिषवं निषेधति ॥७॥ अभिषवस्थाने आधूननं विधत्ते । ग्रहस्योपरि निहितांस्त्रीनंशूनेवाधूनोति कम्पयति । त्रेश्यादयः शब्दा देवलोकस्थानामपां संज्ञाः वृश्च्यते सिच्यते आभिरिति त्रेश्यः तासां पतने मार्गे हे सोम कम्पयामि कुत्सितं कूनन्ति शब्दायन्तऽइति कुकूननाः भन्दन्ते भद्रा भवन्तीति भन्दनाः अत्यर्थं मादयन्ति तर्पयन्तीति मादयितृतमा मदिन्तमाः अतिशयेन मा[धु]र्यापेता मधुन्तमाः । तथा सति दैवीभिरद्भिः पात्रगृहीताभिर्मानुषीभिरद्भिश्च एतस्मिन्ग्रहे रसं स्थापयति ॥८॥ सूर्यास्तमयात्पूर्वमेवोपवसथ्ये अहनि वसतीवरीणां ग्रहणादेवमुच्यते ॥९॥ ककुभं प्रशस्यम् । शुक्रो दीप्यमानः सोमः शुक्रस्य दीप्यमानस्य सूर्यस्य पुरोगाः पुरतो गन्ता तथानन्तरं सोमः अमृतेयो (!) भूत्वा सोमस्य दिवि चन्द्रात्मना वसानस्य पुरोगामी भवति ॥१०॥ हविर्धानान्निर्गत्याहवनीयदेशं गत्वाहवनीये जुह्वयात् । न प्रवृणक्ति न दहति । अथास्य ग्रहस्य होमकाले क्रियमाणस्य प्रमाणवायो (?) यदि बलान्निःक्रमणं स्यात्तदा हिरण्यस्योपरि प्रश्वासः कार्यः अभिव्यनिति उपर्युपस्थानं करोति । यश्चतुर्थकाण्डे (६. १. ६.) हिरण्यस्यापर्युक्कुसनस्य स्तावको वाक्यशेषः सोऽत्रापि द्रष्टव्यः । तावतीर्वत्सतर्यः ॥११॥ होमानन्तरमेनानंशून्प्रतिमन्त्रं राज्ञांशंगते (नाराशं°?) सोमे पुनः संसृजेत् । अदः अदाभ्यग्रहस्य ग्रहणकाले अंशुत्रयरूपेण त्रीण्येव सवनानि गृह्णाति आदत्ते ॥१२॥१॥५॥

अथ समिदाधानादीनां वनस्पत्यादिरूपफलप्राप्तिसाधनतां विवक्षुराख्यायिकां रचयति ॥१॥ इत् उ इक्ष्वो (? इतनुदुक्ष्वो Cod.) ऽवधारणे उशब्दश्चार्थे । एषां पुरुषाणां सम्बन्धीनि पर्वाणि वपूंषि अवयवसंधीन् पर्वशः संव्रश्च्य पर्वणि-पर्वणि संवृश्च्य संक्ष्येय पर्वश एकैकं पर्व तवेदं ममेदमित्यन्यैः पुरुषैः विभज्यमानान्पुरुषान् । भीष्मं भयंकरं खल्वेतत् भो पुरुषाः यूयं अन्यान्पुरुषान्पर्वशः विभक्तवन्तः स्थ एषां पुरुषाणां पर्वाणि पर्वशः संवृश्च्य । सर्वे ते विभक्तार ऊचुः इमे विभज्यमानाः पुरुषाः इत्थमेवास्मान्परस्मिन्लोके सम्प्राप्तवन्तः अतस्तान्वै निर्यातनार्थमिदानीं वयमिहास्मिन्लोके प्रतिसचामहै कृतसंव्रश्चनप्रत्यर्पणेन सम्प्राप्नुमः । पुनः पृक्षति क्षातोति ॥३॥ कृतो क्षेदने पर्वणि-पर्वणि सम्यक्कर्तनं कृत्वा ॥४॥ आक्रन्दनमाक्रोशनम् ॥६॥ कल्याणीं शोभनाम् अतिकल्याणीमशोभनाम् । पितृगृहं प्राप्य संवेशनं कृतवान् । कस्य वेदस्याध्ययनं करिष्यामि किमपि अनधीतमध्येतव्यं मम नास्ति । विदां चकार ज्ञातवान् । अदृष्टः आश्रितः (?) खलु बभसि ॥७॥ पयसाग्निहोत्रं जुहोति यत् ॥१॥ स यजमानः अग्निहोत्रे कर्मणि तत्साधनं द्रव्यं तृणेन दर्भात्मकेनावद्योतयति (°द्योत° Cod.) अवाङ्मुखं हविष उपरि द्योतनं (!) करोति ॥१०॥ अग्निहोत्रहोमसाधने तप्ते पयसि

उदकमुपर्यासिञ्चति यत् ॥११॥ अद्या अतिस्मृत्युदितकर्मस्वभिरतिरूपा देवता । अग्निहोत्रकर्मणि या पूर्वा आङ्गतिः । निन्दितकर्मविषयामश्रद्धाम् ॥१२॥ अग्निहोत्रकर्मणि आहवनीयहोमानन्तरमग्निहोत्रहवण्यामप आसिच्य निनयति सिञ्चति यत् ॥१३॥१॥६॥

तथा अग्निहोत्रहोमे पूर्वोक्तयोराङ्गत्योरुत्क्रान्तिगत्यादिविषये (? त्योरूर्वगत्या° Cod.) विद्यां वक्तुमाख्यायिका प्रस्तूयते ॥ धावयद्भिर्देशान्तरादागतैः ॥१॥ विष्पन्दमानौ कृत्स्नं जगदुव्याप्नुवतौ ॥२॥ नूनमसावग्निहोत्रं होष्यतीत्यभिप्रायेण पुनरावर्तते । निर्विड्य प्रक्षाल्य उपवाप्य निधाय । अग्निहोत्रस्य स्वरूपं विचारितवानसि ॥३॥ अस्योक्तार्थज्ञातस्य अवगमनकारणं ज्ञातव्यः ॥५॥ एते सायम्प्रातःकालीने अग्निहोत्राङ्गतो । शुक्रां निर्मलाम् ॥६॥ उपस्थं स्त्रीसम्बन्धि यत्प्रजननमाहवनीयोऽग्निः तस्य प्रजननस्य धारका श्रोणिः तां समिधं कुर्वाते । एषेत्यभिनयोक्तिः । कामप्रश्नः यथाकामं प्रश्नः । ततो याज्ञवल्क्यवरप्रदानादनन्तरं स जनको ब्रह्मा ब्रह्मिष्ठः सम्बभूव ॥१०॥२॥६॥

अथाग्निहोत्रदर्शपूर्णमासादियागदेवतानां तत्वतः प्राणशब्दाभिधेयपरमात्मरूपतां विज्ञिगीषुकथामुखेन विवक्षुराख्यायिकां प्रस्तौति ॥१॥ अर्वाचीरस्मदभिमुखीरेता गा उदजतामित्यनुषङ्गः ॥२॥ प्रतिष्ठाय प्रत्यवेक्षया । अर्धदग्धकाष्ठमुल्मुकम् तस्य वहिर्निरसनमवक्षयणं विनाशः ॥३॥३॥६॥

अथ दर्शपूर्णमासवन्नित्यं प्रतिसंवत्सरमेष्टव्यं पशुयागं (प्रतियागं Cod.) विधत्ते । शोभनानि यवसानि तृणानि यस्मिन्नृतौ स कालः सुयवसः ॥१॥ मांसीयन्ति मांसं खादितुमिच्छन्ति । संकल्पयन्ति भक्षयितुमध्यवस्यन्ति । वृथामांसेनैव क्रयलब्धेनाग्नयः न तोषणीयाः । अन्येषु लौकिकाग्निषु वृथामांसं अवैधहिंसायां (?) सम्पादितं मांसं पचन्ति तेन लौकिकाग्नयस्तृप्ता भवन्ति एतेषां तु गार्हपत्यादीनां वैदिकानामग्नीनामतोऽस्माद्वैवाकहविषो (?) ऽन्या मांसकामना न भवति अतस्तं यजमानं हविष्टेन स्वीकर्तुमुद्युक्ता भवन्ति ॥२॥१॥७॥

अथेष्टिविधवं सोमविधवं चेति पशुबन्धस्य द्वैविध्यं दर्शयति । हविर्यज्ञः दर्शपूर्णमासेष्टिः तत्प्रकारः । सवः अभिषवयुक्तः सोमयागस्तत्प्रकारः ॥१॥ सवविधवं सिद्धान्तयितुं मीमांसामाह । महायज्ञः सोमयागः । तर्हि पशुबन्धस्येष्टिरूपवे पशुबन्धं पशुयागं चरुपुरोडाशसाध्यामिष्टिमेव अकः कृतवान्भवसि उतशब्दस्तुशब्दार्थे (!) अपि वेनं पशुबन्धमकृत्थाः (!) आकृष्टवानसि इति एवमेव खलु एनमिष्टिविधं पशुबन्धं कुर्वाणं ब्रूयात् अतो महायज्ञ एव पशुबन्ध इति साधीयान्पक्षः ॥२॥ एकादश प्रयाजाः पशुयागात्पुरस्तादनुष्ठेयन्ते । एकादशानुयाजाः पशुयागस्योपरिष्टात् । प्रयाजादनन्तरमङ्गयाजात्पूर्वं क्षिप्रविधानार्थं यद्देवत्यः पशुस्तद्देवत्यः पुरोडाशः कार्यः ॥३॥ वपायां ज्ञतायां सत्यां मार्जनं कृत्वा पशुपुरोडाशनिर्वापात्प्रागेव ॥४॥ वपायागानन्तरं क्षिप्रविधानार्थोऽनिरुक्तो यः पुरोडाशस्तस्य या इडा तस्यामेवोपक्षतायां मार्जनाक्ते ॥५॥ अथ षड्ढोतृहोमं विधित्सुस्तस्य दीक्षान्वयतां (? क्षान्यतां Cod.) सम्पादयितुं प्रश्नमुद्भावयति । हे अध्वर्यो दीक्षया संस्कृतस्य अवभृथाभावो नावकल्पते अवभृथस्य दीक्षामोचनार्थत्वात् (? नयत्वात् Cod.) एनं पशुबन्धयाज्ञिनं च कुत्र दीक्षया संस्कृतवानसि यस्मादेव पशुबन्धयाज्ञिनोऽध्वर्युकृता दीक्षा नास्ति (? दीनस्ति Cod.) तस्मान्नन्मोचनं क्व (? नक्व Cod.) षड्विधिभिः (? षड्नविद्भिः) एष वक्ष्यमाणो मन्त्रः षड्ढोता षड् य-

ज्ञहोतारो होमनिष्पादका यस्मिन्नियान् (त् Cod.) अवभृथादेनमनूद्गृह्णीयुः सर्वे जना इति शेषः । अनुद्रुत्य पठित्वा । पञ्चगृहीतेनाज्येन एकैकेन स्रुवेणौत्तौका आज्यतिरिति पञ्च वा आज्याज्यतयो होतव्याः । एषैवाज्यतिः पशुबन्धस्य दीक्षा अतः पशुबन्धात्मकस्य महायज्ञस्य दीक्षाभावादवभृथो न युक्त इति न चोद्यमित्यर्थः ॥६॥ कः पुनरवभृथ इत्याशङ्क्य उद्गावयति । हृदयलक्षणमवदानं यस्मिन्काष्ठे प्रतृण्य पच्यते तद्धृदयशूलं तेन चरन्ति तस्योद्गासनं कुर्वन्ति ॥७॥ निरूढपशुबन्धयूपस्य पलाशवृक्षत्वं विधित्सुरुपोद्घातयति । पलाशवृक्षस्य सोमविकृतित्वम् । एवमेव खलु पुरा एतद्ब्राह्मणं पलाशोत्पत्तिप्रतिपादकं वाक्यमुच्यते (!) पठ्यते (१. ७. १. १. ३. ३. ४. १०.) ॥८॥२॥७॥

इत्थं यूपस्य पालाशत्वं प्रतिपाद्य तत्रापि बङ्गसारस्य पशुविरोधित्वमल्पसारस्य पशुसमृद्धिकारणत्वं क्रमेण प्रतिपादयति । प्रकर्षेण सहते अभिभवतीति प्रसहो बलम् फल्गवति (? फलति) नुक्नाम (?) अल्पवाचक इत्यर्थः । वक्रः सन्नतोन्नताग्रश्च भवति स कपोतो कपोताख्यस्त्रीपक्षिसंनिवेशसाम्यात् ॥ २ ॥ ३ ॥ ७ ॥

इत्थं यूपार्हवाज्ञोतस्वरूप (?) चाभिधायाथ यूपप्रमाणमाह ॥१॥ आज्यभागयोरवश्यकर्तव्यतामाह । पशुविशसनप्रैषमध्ये अस्रा रक्तः संसृज्यतादिति यः प्रैषभागस्तेन रक्षोभ्यः स्वभागप्रदानं कृतं भवतीति लोकदृष्टान्तेन दर्शयति ॥२॥ पञ्चवयवपाकविषयकं विधिविशेषमाह । शुक् मरणजन्यः शोकः ॥३॥ वपावदानस्य पञ्चावत्तत्वप्रकारं सम्पादयति । धानाकरम्भादिपञ्चद्रव्यसाध्यत्वाच्चरुः पाङ्क्तः लोमत्वङ्मांसास्थिमज्ज्ञाख्यपञ्चधातुमयत्वात्पशुः पाङ्क्तः ॥ ४ ॥ ४ ॥ ७ ॥

अग्निहोत्रे कर्मणि मह इत्युपस्थानं तदार्ढ्याय (? र्थय Cod.) कर्तव्यनिमित्तं विधातुमाख्यायिकामाह । यथा लोके रथादिचक्रं आलम्बनकाष्ठादिराहित्येन भूमावस्थितं (!) सद्धलति (? सद्वलति Cod.) ॥१॥ एनमग्निमायतनात्स्थानात् बाधेरन् किंचिदुपद्रवं कुर्युः प्र वा यापयेयुः यजमानादन्यत्र गमयेयुर्वा ॥ ३ ॥ १ ॥ ८ ॥

अथाहवनीयात्प्राक् प्रहृते (? त्प्राकपहृते Cod.) औत्तरवेदिकेऽग्नौ (उत्तर° Cod.) पशुयागः कर्तव्य इति विधातुमग्नेराहितादिभेदेन चातुर्विध्यं दर्शयति ॥ १ ॥ २ ॥ ८ ॥

अयास्य पशोः प्रजापतिः सूर्य इन्द्राग्नी वेति त्रयो देवा विकल्पिता इति दर्शयित क्रमेण तं-तं पक्षं सोपपत्तिकमाह ॥१॥ पशुबन्धस्य (? पशुवस्य Cod.) प्राणात्मकतां तत्परिज्ञातुः पशुनार्तिहेतुतां (?) समर्थयते ॥४॥ विहितस्य पशोरुक्तप्राणरूपतोपपादनाय तस्यैवाग्न्या[श्वा]दित्यान्तषड्देवतामयत्वोपपादनायाख्यायिकामाह । तमुक्तूनं पशुमेताभिः प्रसिद्धाभिः समिद्धोऽग्नेत्यादिभि[राप्रीभि]राप्रीणात् अतर्पयत् ॥५॥ तं निःप्राणत्वेनोक्तूनमादित्यलक्षणं पशुं प्राचो दिक् हे गतप्राण पशो प्राणेत्युक्तानुप्राणात् । नाभिक्षेदादूर्ध्वं पक्ष ब्राह्मणानेनमनुप्राणितेति ब्रूयात् इतिशब्देन दिक्श्रितप्रकारः (? क्षत्रितप्र° Cod.) प्रदर्श्यते पक्ष ब्राह्मणान्पक्षदित्त्ववस्थाप्य प्रागादिक्रमेण प्राणेत्येवमादिकमुक्त्वा शिशोरुपरि सम्प्रक्षिपतेत्यर्थः (?) । अनेन प्राण एव पशुबन्ध इत्यस्य वासना प्रदर्शिता भवति ॥६॥ यद्यत्कामयेथा इति [क° ५.] प्रजापतिना यदुक्तं तस्य स्वीकारं दर्शयति ॥७॥ लेलयतश्चपलस्य ॥८॥ चाकश्यमानाः भृशं पश्यन्त-इव वर्तमाना अपि ॥१०॥३॥८॥

स्पृत्याख्यान्होमान्पशुप्रायश्चित्ततया विधातुमाख्यायिकामाह । सम्राड्डुघां प्रवर्ग्यदोहनार्थी गाम् । तेन च सहसत्रिणं उपेत्यामन्त्रयां चक्रिरे ॥१॥ विकृष्टं विकारं प्राप्तं यज्ञमनु अहमपि विकारं प्राप्स्ये ॥२॥ प्रतिष्ठाय निराकृत्य । हे केशिन् त्वया घर्मडुघाया गोः अजिनं ग्रीवासु धृतम् एतान्येव एतादृशान्येवाजिनानि मृगेषु भवन्ति उपलभ्यन्ते अथैषां मध्ये पृष्टीः अल्पशरीरा मृगीः अपिशीर्य विशरणं कृत्वा पचामहे तदीयं कृष्णाजिनं मे ग्रीवासु आबद्धम् एवं तेन खण्डिकेनोक्ते स राजा नेति होवाच अयमभिप्रायो न भवतीति किंतु हे भगवन् ॥४॥ अमुष्मै (!) केशिने एवेदं सर्वं प्रज्ञा भविष्यति मम न भविष्यति प्रज्ञा[या] विद्यादिरूपाया (? यादृशपाया Cod.) अस्मत्तोऽपगतत्वात् परमहं लोकी विद्याप्रदानसुकृतेन परलोकवान् एवं भविष्यामि ॥५॥ सा तऽइति घर्मधुगिति (!) घर्मः प्रवर्ग्यः तदर्थं या दुह्यते सा घर्मडुघा (!) । एवमुपदिष्टः स केशी ततो देशादुत्ससाद विनष्टो[ऽभूत्त]स्मादेतर्हि इदानीमपि वर्तमानाः प्रज्ञाः केशिनीरेव (!) केशवत्यः एव अथवा केशिसम्बन्धिन्यो ज्ञायन्ते के[शिना] वृद्धिकरविद्याया लब्धवात् ॥६॥४॥८॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनीयशतपथब्राह्मणभाष्येऽएकादशमकाण्डव्याख्या समाप्ता ॥११॥ ॥

VARIOUS READINGS.

What regards the edition of this kâṇḍa and the next following two I am greatly indebted to the liberality of the Imperial Government of France, which enabled me to collate here in Berlin during summer 1854 three mss. belonging to the Imperial library of Paris (= P), viz. D. 146 for the eleventh, D. 159 for the twelfth, and D. 160 for the thirteenth kâṇḍa.

Adhyâya १. २. २ दशत आकृतीः Sây. - ८ तस्यथैकैवं AP. - ibid. लोकांस्तिसृभिराप्नोति AP. - ३. १ यथेष्टि Sây. - ३ यस्मान्नानुनिर्वपेत् AP. - ४. २ अपयंति P. - ५. २ केतडुपतपदा° AP. - ६. २ स इदमेव Sây. - १४ अधिदेवता Sây. as a compound, against the accent. - १६ परमाद्वाऽएष स्थाना° Sây. -

२३ ऽस्या भूयिष्ठं Sây. - २४ Sây. seems to read यदा वृष्टि°, against the accent: he takes अबलीयसः as accus. plur. instead of ablat. singul. - ३. १ अनवानंन्यञ्ञे° A. अनवानंत्यञ्ञे° P. अनवानम् Sây. (°नमिति). - ३. ५ शृणिया° AP. - ८. ६ सर्वतनुरेव Sây. —

Adhyâya २. ३. ४ अभ्वे । स यो AP. - ibid. अभ्वे वेद् मरुद्देवाभ्वं AP. - १ °लवान्धानांतर्वान AP. - ४. ३ क्षीयमसाविव AP. - ५. ४ °मेधमारभन्ते Sây. - ६ °कृद्विषं प्रायश्चित्रं P. °कृद्विषन्प्राशित्रं Sây. - १३ आत्मयाजी श्रेयाञ्दे° AP. - ७. २३ विश्रवन्मि° Sây. - २६ °ञ्जिघांसन् Sây. —

Adhyâya ३. ३. २ सत्रियाः Sây. —

Adhyâya ४. १. १ उदीच्यांन्वृतो AP. - ६ दुर्वीरिणानि Sây. - १४ पलितो भवत्यथ AP. - १५ यदाज्यरुविषा एवानु° A. - २. १ प्रतिप्रति न्वा AP. - ibid. अकृत् Sây. - २ °संसिंञ्च° Sây. - ६ °त्कृपणं न्वा A. °त्कृपणंमन्वा P. कृपणं नु वै Sây. - ibid. अकृत् Sây. - १३ °दनुयुव न्वा AP. Sâyaṇa's explanation is अनुयुयन्निव (instead of °युवन्निव). The Kâṇvaçakhâ reads at १. २. ५. १ अनुयुवमिवासुः instead of the अनुव्यमिवासुः of the Mâdhyandinâs. - ३. १८ विराट्क्रोविराट्क्रियाट् A. - २० Sây. seems to read अङ्गविद्वा°. —

Adhyâya ५. १. ४ तस्यै क्राधि—अक्तेन Sâyaṇa against the accent. - ७ अग्नेव Sây. - ११ °प्रजिग्युः A. - १४ घृतेनाभ्यज्य Sây. - २. ३ गुल्फौ Sây. - ६ कुर्याद्यत्वा AB. यद्वै Sây. - ३. ८ उपाकृतानि Sây. - ibid. (and in the following kâṇḍikâs) पुरा अचिरात् Sâyaṇa against the accent. - ४. ५ समित्स्वात्मानं AP. Sây. - ६ दध्म A. दद्म P. - १३ दद्म A. दध्म P. - १४

बुल्व A. बुल्ब P. Read: बुल्बो. - ५. १ अधीरवत् AP. - १२ सत्रं समतन्वत Sây. - १३ दानवा AP. - ibid. परिशिष्यन्ति Sây. - ६. ७ यदथर्वांगिरसः AP. - ibid. विद्वानथर्वांगिरसो A. prima manu. विद्वानथर्वांगिरसो A. sec. manu. P. - ८ °ह्मसपुराणं गाथा AP. — ७. १ यशोलोकपक्ति° Sây. as a compound, against the accent. - ibid. The accent shows, that पच्यमानः is to be taken as a medium of the fourth class! - २ परमताकाष्ठा Sây. as a compound, against the accent. - १० कुंब्यां A. sec. manu. कुंभ्यां Sây. —

Adhyâya ६. १. ३ भोः पुरुषान्वा AP. thus also in the following kâṇḍikâs, though alternating with °षांन्वा. - ७ चकाराद्यग्वा A. चकाराग्वा P. — २. १ वै वैदहो P. - २ विष्यंदमाना° A. विष्यंदमाना° P. —

Adhyâya ७. २. २ Sây. seems to read उतैनमकृन्नथाः. - ६ वाज्यादृग्यौष्यृ° P. - ८ °ह्मणमुच्यते Sây. — ४. ३ विष्यंदेत P. —

Adhyâya ८. १. १ Sây. seems to read ह्वलति instead of क्रन्देत् - ३ °ग्यस्यैते पशवो भवन्ति Sây. - ३. २ °कान्यथागोष्ठमेक A. °कात्यथागोष्ठमेक P. prima manu. - ५ आप्रियो instead of आप्र्यो! — ४. १ जघान स सत्रिणा A. pr. m. जघान स ह ससत्रिणा A. sec. m. P., but ससत्रिन् is âdyudâtta at १२. १. १. १! Sây. has: तेन च सहसत्रिणा उपेत्यामन्त्रयां चक्रिरे! - ३ मेदमदृषो A. - ५ आमन्त्रणीयान्वाम° AP. - ibid. अमुष्मै एवेदं Sây. - ६ सा ते घर्मदुघा Sây. —

ओम् । अयं वै यज्ञो योऽयं पवते । तमेतऽईप्सन्ति ये संवत्सराय दीक्षन्ते तेषां गृहपतिः प्रथमो दीक्षतेऽयं वै लोको गृहपतिरस्मिन्वै लोकऽइदꣳ सर्वं प्रतिष्ठितं गृहपताऽउ वै सप्तक्षिणः प्रतिष्ठिताः प्रतिष्ठायामेवैतत्प्रतिष्ठाय दीक्षन्ते ॥ १ ॥ अथ ब्रह्माणं दीक्षयति । चन्द्रमा वै ब्रह्मा सोमो वै चन्द्रमाः सौम्या ओषधय ओषधीस्तदनेन लोकेन संदधाति तस्मादेतावत्तरेणान्यो न दीक्षेत स यद्वैतावत्तरेणान्यो दीक्षेतौषधीस्तदनेन लोकेन नानाकुर्यादुक्षोषुका ह स्यस्तस्मादेतावत्तरेणान्यो न दीक्षेत ॥ २ ॥ अथोद्गातारं दीक्षयति । पर्जन्यो वाऽउद्गाता पर्जन्यादु वै वृष्टिर्जायते वृष्टिं तदोषधिभ्यः संदधाति तस्मादेतावत्तरेणान्यो न दीक्षेत स यद्वैतावत्तरेणान्यो दीक्षेत वृष्टिं तदोषधिभिर्नानाकुर्यादवर्षुको ह स्यात्तस्मादेतावत्तरेणान्यो न दीक्षेत ॥ ३ ॥ अथ होतारं दीक्षयति । अग्निर्वै होताधिदेवतं वागध्यात्ममन्नं वृष्टिरग्निं च तद्वाचं चान्नेन संदधाति तस्मादेतावत्तरेणान्यो न दीक्षेत स यद्वैतावत्तरेणान्यो दीक्षेताग्निं च तद्वाचं चान्नेन नानाकुर्यादशनायुका ह स्युस्तस्मादेतावत्तरेणान्यो न दीक्षेतैतांश्चतुरोऽध्वर्युर्दीक्षयति ॥ ४ ॥ अथाध्वर्युं प्रतिप्रस्थाता दीक्षयति । मनो वाऽअध्वर्युर्वाग्घोता मनश्च तद्वाचं च संदधाति तस्मादेतावत्तरेणान्यो न दीक्षेत स यद्वैतावत्तरेणान्यो दीक्षेत मनश्च तद्वाचं च नानाकुर्यात्प्रमायुका ह स्युस्तस्मादेतावत्तरेणान्यो न दीक्षेत ॥ ५ ॥ अथ ब्रह्मणे ब्राह्मणाच्छꣳसिनं दीक्षयति । तꣳ हि सोऽन्वथोद्गात्रे प्रस्तोतारं दीक्षयति तꣳ हि सोऽन्वथ होत्रे मैत्रावरुणं दीक्षयति तꣳ हि सोऽन्वेतांश्चतुरः प्रतिप्रस्था-

ता दीक्षयति ॥ ६॥ अथाधर्यवे प्रतिप्रस्थातारं नेष्टा दीक्षयति । तꣳ हि सोऽन्वेतेषां वै नवानां क्लृप्तिमन्वितरे कल्पन्ते नव वै प्राणाः प्राणानेवैषेतद्दधाति तथा सर्वमायुर्यन्ति तथो ह न पुरायुषोऽस्माल्लोकात्प्रयन्ति ॥ ७॥ अथ ब्रह्मणो पोतारं दीक्षयति । तꣳ हि सोऽन्वथोद्गात्रे प्रतिहर्तारं दीक्षयति तꣳ हि सोऽन्वथ होत्रेऽच्छावाकं दीक्षयति तꣳ हि सोऽन्वेतांश्चतुरो नेष्टा दीक्षयति ॥ ८॥ अथाधर्यवे नेष्टारमुन्नेता दीक्षयति । तꣳ हि सोऽन्वथ ब्रह्मणोऽग्नीध्रं दीक्षयति तꣳ हि सोऽन्वथोद्गात्रे सुब्रह्मण्यां दीक्षयति तꣳ हि सोऽन्वथ होत्रे ग्रावस्तुतं दीक्षयति तꣳ हि सोऽन्वेतांश्चतुर उन्नेता दीक्षयति ॥ ९॥ अथोन्नेतारꣳ । स्नातको वा ब्रह्मचारी वान्यो वादीक्षितो दीक्षयति न पूतः पावयेदिति ह्याहुः सैषानुपूर्वदीक्षा स यत्र हैवं विद्वाꣳसो दीक्षन्ते दीक्षमाणा हैव ते यज्ञं कल्पयन्ति यज्ञस्य क्लृप्तिमनु सत्त्रिणां योगक्षेमः कल्पते सत्त्रिणां योगक्षेमस्य क्लृप्तिमन्वपि तस्यार्धस्य योगक्षेमः कल्पते यस्मिन्नर्धे यज्ञन्ते ॥ १०॥ तेषां वाऽउन्नेतोत्तमो दीक्षते । प्रथमोऽवभृथादुदायतामुदेति प्राणो वाऽउन्नेता प्राणमेवैषेतदुभयतो दधाति तथा सर्वमायुर्यन्ति तथो ह न पुरायुषोऽस्माल्लोकात्प्रयन्ति सैषानुपूर्वदीक्षा स यत्र हैवं विद्वाꣳसो दीक्षेरंस्तदेव दीक्षेत ॥ ११॥ ब्राह्मणम् ॥ १॥

श्रद्धाया वै देवाः । दीक्षां निरमिमतादित्ये प्रायणीयꣳ सोमात्क्रयं विक्रोरातिथ्यमादित्यात्प्रवर्ग्यꣳ स्वधाया उपसदोऽग्नीषोमाभ्यामुपवसथमस्माल्लोकात्प्रायणीयमतिरात्रꣳ ॥ १॥ संवत्सराच्चतुर्विꣳशमक्रः । ब्रह्मणोऽभिप्लवं क्षत्रात्पृष्ठ्यमग्नेरभिजितमह्नः स्वरसान्न आदित्याद्विषुवन्तमुक्ताः स्वरसामान इन्द्राद्विश्वजितमुक्तौ पृष्ठ्याभिप्लवौ मित्रावरुणाभ्यां गोऽआयुषी विश्वेभ्यो देवेभ्यो दशरात्रं दिग्भ्यो दाशरात्रिकं पृष्ठꣳ षडहमेभ्यो लोकेभ्यश्छन्दोमान् ॥ २॥ संवत्सरादृशममक्रः । प्रजापतेर्महाव्रतꣳ स्वर्गाल्लोकादुदयनीयमतिरात्रं तदेतत्संवत्सरस्य जन्म स यो हैवमेत-

त्संवत्सरस्य ज्न्म वेदा ह्यस्माद्भ्रेयान्ज्ञायते सात्मा भवति संवत्सरो भवति संवत्सरो भूत्वा देवान्प्येति ॥ ३ ॥ ब्राह्मणम् ॥ २ ॥ ॥

यद्वै दीक्षन्ते । अग्नाविष्णूऽएव देवते यज्ञन्तेऽग्नाविष्णू देवते भवत्यग्नाविष्ण्वोः सायुज्यꣳ सलोकतां ज्ञयन्ति ॥ १ ॥ अथ यत्प्रायणीयेन यज्ञन्ते । अदितिमेव देवतां यज्ञन्तेऽदितिर्देवता भवत्यदितेः साय्° ॥ २ ॥ अथ यत्क्रयेण चरन्ति । सोममेव देवतां यज्ञन्ते सोमो देवता भवन्ति सोमस्य साय्° ॥ ३ ॥ अथ यदातिथ्येन यज्ञन्ते । विष्णुमेव देवतां यज्ञन्ते विष्णुर्देवता भवन्ति विष्णोः साय्° ॥ ४ ॥ अथ यत्प्रवर्ग्येण यज्ञन्ते । आदित्यमेव देवतां यज्ञन्तऽआदित्यो देवता भवत्यादित्यस्य साय्° ॥ ५ ॥ अथ यदुपसद उपयन्ति । एता एव देवता यज्ञन्ते या एता उपसत्स्वेता देवता भवन्त्येतासां देवतानाꣳ साय्° ॥ ६ ॥ अथ यदग्नीषोमीयेण पशुना यज्ञन्ते । अग्नीषोमावेव देवते यज्ञन्तेऽग्नीषोमौ देवते भवत्यग्नीषोमयोः साय्° ॥ ७ ॥ अथ यत्प्रायणीयमतिरात्रमुपयन्ति । अहोरात्रेऽएव देवते यज्ञन्तेऽहोरात्रे देवते भवत्यहोरात्रयोः साय्° ॥ ८ ॥ अथ यच्चतुर्विꣳशमहरुपयन्ति संवत्सरमेव देवतां यज्ञन्ते संवत्सरो देवता भवन्ति संवत्सरस्य साय्° ॥ ९ ॥ अथ यदभिप्लवꣳ षडहमुपयन्ति । अर्धमासांश्च मासांश्च देवता यज्ञन्तेऽर्धमासाश्च मासाश्च देवता भवत्यर्धमासानां च मासानां च साय्° ॥ १० ॥ अथ यत्पृष्ठꣳ षडहमुपयन्ति । ऋतूनेव देवता यज्ञन्तऽऋतवो देवता भवन्त्यृतूनाꣳ साय्° ॥ ११ ॥ अथ यदभिजितमुपयन्ति । अग्निमेव देवतां यज्ञन्तेऽग्निर्देवता भवत्यग्नेः साय्° ॥ १२ ॥ अथ यत्स्वरसाम्न उपयन्ति । अप एव देवतां यज्ञन्तऽआपो देवता भवन्त्यपाꣳ साय्° ॥ १३ ॥ अथ यद्विषुवन्तमुपयन्ति । आदित्यमेव देवतां यज्ञन्तऽआदित्यो देवता भवन्त्यादित्यस्य सायुज्यꣳ सलोकतां ज्ञयन्त्युक्ताः स्वरसामानः ॥ १४ ॥ अथ यद्विश्वजितमुपयन्ति । इन्द्रमेव देवतां यज्ञन्तऽइन्द्रो देवता भवन्तीन्द्रस्य सायुज्यꣳ सलोकतां ज्ञयन्त्युक्तौ पृष्ठाभिप्लवौ ॥ १५ ॥

अथ यद्गोऽआयुषी उपयन्ति । मित्रावरुणाविव देवते यजन्ते मित्रावरुणौ देवते भवन्ति मित्रावरुणयोः सायु° ॥ १६ ॥ अथ यद्दशरात्रमुपयन्ति । विश्वानेव देवान्देवतां यजन्ते विश्वे देवा देवता भवन्ति विश्वेषां देवानाꣳ सायु° ॥ १७ ॥ अथ यद्दाशरात्रिकं पृष्ठꣳ षडहमुपयन्ति । दिश एव देवता यजन्ते दिशो देवता भवन्ति दिशाꣳ सायु° ॥ १८ ॥ अथ यच्छन्दोमानुपयन्ति । इमानेव लोकान्देवता यजन्त ऽइमे लोका देवता भवन्त्येषां लोकानाꣳ सायु° ॥ १९ ॥ अथ यद्दशममहरुपयन्ति । संवत्सरमेव देवतां यजन्ते संवत्सरो देवता भवन्ति संवत्सरस्य सायु° ॥ २० ॥ अथ यन्महाव्रतमुपयन्ति । प्रजापतिमेव देवतां यजन्ते प्रजापतिर्देवता भवन्ति प्रजापतेः सायु° ॥ २१ ॥ अथ यदुदयनीयमतिरात्रमुपयन्ति । संवत्सरमेव तदाप्त्वा स्वर्गे लोके प्रतितिष्ठन्ति तान्यदि पृच्छेयुः कामय देवतां यजध्वे का देवता स्थ कस्यां देवतायां वसथेत्यत एवैकतमां ब्रूयुर्यस्यै तु नेदिष्टꣳ स्युरेते ह वै सति सद एते हि सतीषु देवतासु सीदन्तो यन्ति सत्त्रसदो हैवेतरे स यो हैवं विदुषां दीक्षितानां पापकꣳ सत्त्रे कीर्तयेदेतेभ्यस्त्वा देवताभ्य आवृश्चाम इत्येनं ब्रूयुः स पापीयान्भवति श्रेयाꣳस आत्मना ॥ २२ ॥ स एष संवत्सरस्त्रिमहाव्रतः । चतुर्विꣳशे महाव्रतं विषुवति महाव्रतं महाव्रतऽएव महाव्रतं तꣳ ह स्मैतं पूर्वऽउपयन्ति त्रिमहाव्रतं ते तेजस्विन आसुः सत्यवादिनः सꣳशितव्रता अथ यऽउ हैनमप्येतर्हि तथोपेयुर्यथामपात्रमुदकऽआसिक्ते विम्रित्येदेवꣳ हैव ते विम्रित्येयुरुपर्युपयन्ति तदेषाꣳ सत्येन श्रमेण तपसा श्रद्धया यज्ञेनाहुतिभिरवरुद्धं भवति ॥ २३ ॥ ब्राह्मणम् ॥ ३ ॥ ॥

पुरुषो वै संवत्सरः । तस्य पादावेव प्रायणीयोऽतिरात्रः पादाभ्याꣳ हि प्रयन्ति तयोर्यत्कुल्कं तदस्थि रूपं यत्कृष्णं तन्नात्रिर्नखान्येवौषधिवनस्पतीनाꣳ रूपमूहू चतुर्विꣳशमहरुरोऽभिप्लवः पृष्ठं पृष्ठ्यः ॥ १ ॥ अयमेव दक्षिणो बाहुरभिजित् । इम

ऽएव दक्षिणे त्रयः प्राणाः स्वरसामानो मूर्धा विषुवानिमऽएवोत्तरे त्रयः प्राणाः स्वरसामानः ॥ २ ॥ अयमेवोत्तरो बाहुर्विश्वजित् । उक्थौ पृथाभिप्लवौ यावेवाश्वौ प्राणौ ते गोऽआयुषीऽअङ्गानि दशरात्रो मुखं महाव्रतꣳ हस्तावेवोदयनीयोऽतिरात्रो हस्ताभ्याꣳ क्युत्यन्ति तयोर्यत्कुल्लं तद्गो रूपं यत्कृष्णं तन्नक्षत्रिर्नखान्येव नक्षत्राणाꣳ रूपꣳ स एष संवत्सरोऽध्यात्मं प्रतिष्ठितः स यो ह्येवमेतꣳ संवत्सरमध्यात्मं प्रतिष्ठितं वेद प्रतितिष्ठति प्रजया पशुभिरस्मिंल्लोकेऽमृतत्वेनामुष्मिन् ॥ ३ ॥ ब्राह्मणम् ॥ ४ ॥ प्रथमोऽध्यायः [७५.] ॥ ॥

समुद्रं वाऽएते प्रतरन्ति । ये संवत्सराय दीक्षन्ते तस्य तीर्थमेव प्रायणीयोऽतिरात्रस्तीर्थेन हि प्रस्नान्ति तद्यत्प्रायणीयमतिरात्रमुपयन्ति यथा तीर्थेन समुद्रं प्रस्नायुस्तादृक्तत् ॥ १ ॥ गाधमेव प्रतिष्ठा चतुर्विꣳशमहः । यथोपपन्नदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नान्ति प्रस्नेयोऽभिप्लवः प्रस्नेयः पृष्ठः ॥ २ ॥ गाधमेव प्रतिष्ठाभिजित् । यथोपपन्नदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्योत्क्रामत्यूरुदघ्न एव प्रथमः स्वरसामा जानुदघ्नो द्वितीयः कुल्फदघ्नस्तृतीयो द्वीपः प्रतिष्ठा विषुवान्कुल्फदघ्न एव प्रथमोऽर्वाक्सामा जानुदघ्नो द्वितीय ऊरुदघ्नस्तृतीयः ॥ ३ ॥ गाधमेव प्रतिष्ठा विश्वजित् । यथोपपन्नदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नान्ति प्रस्नेयः पृष्ठः प्रस्नेयोऽभिप्लवः प्रस्नेये गोऽआयुषी प्रस्नेयो दशरात्रः ॥ ४ ॥ गाधमेव प्रतिष्ठा महाव्रतम् । यथोपपन्नदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्योत्स्नान्ति तीर्थमेवोदयनीयोऽतिरात्रस्तीर्थेन क्युत्स्नान्ति तद्यदुदयनीयमतिरात्रमुपयन्ति यथा तीर्थेन समुद्रं प्रस्नाय तीर्थेनोत्स्नायुस्तादृक्तत् ॥ ५ ॥ तदाहुः । कति संवत्सरस्यातिरात्राः कत्यग्निष्टोमाः कत्युक्थ्याः कति षोडशिनः कति षडहा इति द्वावतिरात्रौ षट्शतमग्निष्टोमा द्वे चत्वारिꣳशे शतेऽउक्थ्यानामिति नु यऽउक्थ्यात्स्वरसाम्न उपयन्ति ॥ ६ ॥ अथ येऽग्निष्टोमान् । द्वादशशतमग्निष्टोमा द्वे चतुस्त्रिꣳशे शतेऽउक्थ्या-

नां द्वादश षोडशिनः षष्टिः षडहा इति नु संवत्सरस्याप्तिः ॥ ७ ॥ द्वादश वै मासाः संवत्सरस्य । तेषामितत्तेन इन्द्रियं यत्पृष्ठानि तद्यन्मासि-मासि पृष्ठान्युपयन्ति मासश एव तत्संवत्सरस्य तेन आप्नुवन्त्यथ कथं त्रयोदशस्य मासस्य तेन आप्नुवन्तीत्युपरिष्टाद्विषुवतो विश्वजितश्च सर्वपृष्ठमग्निष्टोममुपयन्त्येवमु त्रयोदशस्य मासस्य तेन आप्नुवन्ति ॥ ८ ॥ एतद्ध स्म वै तद्विद्वानाह । श्वेतकेतुरारुणेयः संवत्सराय न्वाऽअहं दीक्षिष्यऽइति तꣳ ह पितोपेद्योवाच वेत्थ न्वायुष्मत्संवत्सरस्य गाधप्रतिष्ठा इति वेदेति होवाचैतद्ध तद्विद्वानुवाच ॥ १ ॥ ब्राह्मणम् ॥ ५ [२. १.] ॥

तदाहुः । कस्मादुभयतोज्योतिषोऽभिप्लवा भवत्यन्यतोज्योतिः पृष्ठ्य इतीमे वै लोका अभिप्लवा उभयतोज्योतिषो वाऽइमे लोका अग्निनेत आदित्येनामुत ऋतवः पृष्ठ्योऽन्यतोज्योतिषो वाऽऋतव एष एषां ज्योतिर्य एष तपति ॥ १ ॥ देवचक्रे वाऽएते पृष्ठ्यप्रतिष्ठिते । यज्ञमानस्य पाप्मानं तृꣳहतो परिप्लवेते स यो हैवं विदुषां दीक्षितानां पापकꣳ सत्रे कीर्तयत्येते ह्यस्य देवचक्रे शिरश्छिन्त्तो दशरात्र उद्धिः पृष्ठ्याभिप्लवौ चक्रे ॥ २ ॥ तदाहुः । यत्समेऽएव चक्रे भवतोऽथैते विषमा स्तोमाः कथमस्यैते समा स्तोमा-स्तोमा उ ह्येता भवन्तीति यदेव षडन्यान्यहानि षडन्यानि तेनेति ब्रूयात् ॥ ३ ॥ पृष्ठ्याभिप्लवौ तन्त्रे कुर्वीतेति ह स्माह पैङ्ग्यः । त्रयो स्तोत्राणि च शस्त्राणि च संचारयेदिति स यत्संचारयति तस्मादिमे प्राणा नाना सन्त एकोतयः समानमूतिमनुसंचरन्त्यथ यत्र संचारयेत्प्रमायुको यजमानः स्यादेष ह वै प्रमायुको योऽन्धो वा बधिरो वा ॥ ४ ॥ नवाग्निष्टोमा मासि सम्पद्यन्ते । नव वै प्राणाः प्राणानेवैषेतद्दधाति तथा सर्वमायुर्यन्ति तथो ह न पुरायुषोऽस्माल्लोकात्प्रयन्ति ॥ ५ ॥ एकविꣳशतिरुक्थ्याः । द्वादश वै मासाः संवत्सरस्य पञ्चर्तवस्त्रयो लोकास्तद्विꣳशतिरेष एवैकविꣳशो य एष तपत्येतामभिसम्पदꣳ स एतया सम्पदा मासि-मासि स्वर्गं लोकꣳ रोहति मासशः स्वर्गं

लोकꣳ समश्नुतऽएकविꣳशं च स्तोमं बृहतीं च छन्दः ॥ ६॥ चतुस्त्रिꣳशदग्निष्टोमा मासि सम्पद्यन्ते । त्रयस्त्रिꣳशद्वै देवाः प्रजापतिश्चतुस्त्रिꣳशः सर्वासां देवतानामात्माऽएक उक्थ्यः षोडशिमानन्नं वाऽउक्थ्यो वीर्यꣳ षोडशी ॥ ७॥ एतेन वै देवाः । वीर्येणान्नेन सर्वान्कामानाप्नुवन्त्सर्वान्कामानाश्नुवत तथोऽएवैष एतेन वीर्येणान्नेन सर्वान्कामानाप्नोति सर्वान्कामानश्नुते तस्मात्पृष्ठ्याभिप्लवाऽउपैवेयात्संवत्सराय दीक्षित एतस्मै कामाय ॥ ८॥ अथादित्याश्च ह वाऽअङ्गिरसश्च । उभये प्राजापत्या अस्पर्द्धन्त वयं पूर्वे स्वर्गं लोकमेष्यामो वयं पूर्वऽइति ॥ ९॥ तऽआदित्याः । चतुर्भि स्तोमैश्चतुर्भिः पृष्ठैर्लघुभिः सामभिः स्वर्गं लोकमभ्यप्लवन्त यदभ्यप्लवन्त तस्मादभिप्लवाः ॥ १०॥ अन्वञ्चऽइवाङ्गिरसः । सर्वै स्तोमैः सर्वैः पृष्ठैर्गुरुभिः सामभि स्वर्गं लोकमस्पृशन्यदस्पृशंस्तस्मात्पृष्ठ्याः ॥ ११॥ अभिप्लवः षडहः । षड्ह्यहानि भवन्त्यभिप्लवः पञ्चाहः पञ्च ह्यहानि भवन्ति यज्ञोव प्रथममहस्तदुत्तममभिप्लवश्चतुरहश्चत्वारो हि स्तोमा भवन्ति त्रिवृत्पञ्चदशः सप्तदश एकविꣳश इत्यभिप्लवस्त्र्यहस्त्र्यावृद्धि ज्योतिर्गौरायुरभिप्लवो द्व्यहो द्वे ह्येव सामनी भवतो बृहद्रथन्तरेऽएवाभिप्लव एकाह एकाहस्यो हि स्तोमैस्तायते चतुर्णामुक्थ्यानां द्वादश स्तोत्राणि द्वादश शस्त्राण्यतियन्ति स सप्तमोऽग्निष्टोम एवमु सप्ताग्निष्टोमाः सम्पद्यन्ते ॥ १२॥ प्रोतिर्ह कौशाम्बेयः । कौसुरुबिन्दिरुद्दालकऽआरुणौ ब्रह्मचर्यमुवास तꣳ ह्याचार्यः पप्रच्छ कुमार कति ते पिता संवत्सरस्याहान्यमन्यतेति ॥ १३॥ ॥ शतम्६००० ॥ ॥ दशेति होवाच । दश वाऽइति होवाच दशाक्षरा विराड्विराजो यज्ञः ॥ १४॥ कति त्वेवेति । नवेति होवाच नव वाऽइति होवाच नव वै प्राणाः प्राणैरु यज्ञस्तायते ॥ १५॥ कति त्वेवेति । अष्टेति होवाचाष्टौ वाऽइति होवाचाष्टाक्षरा गायत्री गायत्रो यज्ञः ॥ १६॥ कति त्वेवेति । सप्तेति होवाच सप्त वाऽइति होवाच सप्त छन्दाꣳसि चतुरुत्तराणि छन्दोभिरु यज्ञस्तायते

॥ १७ ॥ कति॒ त्वेवेति । षडिति होवाच षड्वाऽऽइति होवाच षड्ऋतवः संवत्सरः संवत्सरो यज्ञः समानमेतद्कुर्यत्प्रायणीयोदयनीयौ ॥ १८ ॥ कति॒ त्वेवेति । पञ्चेति होवाच पञ्च वाऽऽइति होवाच पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्तवः संवत्सरस्य संवत्सरो यज्ञः समानमेतद्कुर्यच्चतुर्विꣳशमहरुत्तमे ॥ १९ ॥ कति॒ त्वेवेति । चत्वारीति होवाच चत्वारि वाऽऽइति होवाच चतुष्पादाः पशवः पशवो यज्ञः समानमेतद्कुर्यत्पृष्ठ्याभिप्लवौ ॥ २० ॥ कति॒ त्वेवेति । त्रीणीति होवाच त्रीणि वाऽऽइति होवाच त्रीणि छन्दाꣳसि त्रयो लोकास्त्रिसवनो यज्ञः समानमेतद्कुर्यदभिजिद्विश्वजितौ ॥ २१ ॥ कति॒ त्वेवेति । द्वेऽऽइति होवाच द्वे वाऽऽइति होवाच द्विपाद्वै पुरुषः पुरुषो यज्ञः समानमेतद्कुर्यत्स्वरसामानः ॥ २२ ॥ कति॒ त्वेवेति । एकमिति होवाचाहरेवेति तदेतदहरहरिति सर्वꣳ संवत्सरꣳ सैषा संवत्सरस्योपनिषत्स यो हैवमेताꣳ संवत्सरस्योपनिषदं वेदा हास्माद्भियान्नायते सात्मा भवति संवत्सरो भवति संवत्सरो भूत्वा देवानप्येति ॥ २३ ॥ ब्राह्मणम् ॥ ६ [२. २.] ॥ ॥

स वाऽएष संवत्सरो बृहतीमभिसम्पन्नः । द्वावार्द्धमासाꣳ षडृतवो द्वौ पृष्ठ्याभिप्लवौ गोऽआयुषी दशरात्रस्तत्षट्त्रिꣳशत्षट्त्रिꣳशदक्षरा वै बृहती बृहत्या वै देवाः स्वर्गे लोकेऽयतन्त बृहत्या स्वर्गं लोकमाप्नुवंस्तथोऽएवैष एतद्बृहत्यैव स्वर्गे लोके यतते बृहत्या स्वर्गं लोकमाप्नोत्यथ यो बृहत्यां कामस्तमेवैतेनैवं विद्वरुन्द्धे ॥ १ ॥ यद्वै चतुर्विꣳशमहः । दशरात्रस्य वै तत्सप्तमं वा नवमं वाभिप्लवात्पृष्ठ्यो निर्मितः पृष्ठ्यादभिजिदभिजितः स्वरसामानः स्वरसामभ्यो विषुवान्विषुवतः स्वरसामानः स्वरसामभ्यो विश्वजिद्विश्वजितः पृष्ठ्यः पृष्ठ्यादभिप्लवोऽभिप्लवाद्गोऽआयुषी गोऽआयुर्भ्यां दशरात्रः ॥ २ ॥ अथैतदहरार्द्धत् । यन्महाव्रतं पञ्चविꣳशो ह्येतस्य स्तोमो भवति नाद्याच्छन्दो व्येत्येकस्मान्न द्वाभ्यां न स्तीत्रियया स्तोमः ॥ ३ ॥ अभिप्लवं पूर्वं पुरस्ताद्विषुवत उपयन्ति । पृष्ठ्यमुत्तरं पुत्रा वाऽअभि-

प्लवः पिता पृष्ठस्तस्मात्पूर्ववयसे पुत्राः पितरमुपजीवन्ति पृष्ठमुपरिष्टाद्विषुवतः पूर्वमुपयन्त्यभिप्लवमुत्तरं तस्मादुत्तरवयसे पुत्रान्पितोपजीवत्युप ह वाऽएनं पूर्ववयसे पुत्रा जीवन्त्युपोत्तरवयसे पुत्रान्जीवति य एवमेतद्वेद ॥४॥ तदाहुः । यच्चतुर्विꣳशमहरुपेत्य प्रेयात्कथमनागूर्ती भवतीति यद्वेवादः प्रायणीयमतिरात्रमुपयन्ति तेनेति ब्रूयात् ॥५॥ तदाहुः । यद्द्वादश मासाः संवत्सरस्याथैतद्हरत्येति यद्वैषुवतमवरेषामेताꣳत्परेषामित्यवरेषां चैव परेषां चेति ह ब्रूयादात्मा वै संवत्सरस्य विषुवानङ्गानि मासा यत्र वाऽआत्मा तदङ्गानि यत्रोऽअङ्गानि तदात्मा न वाऽआत्माङ्गान्यतिरिच्यते नात्मानमङ्गान्यतिरिच्यन्तऽएवमु हैतदवरेषां चैव परेषां च भवति ॥६॥ अथ ह वाऽएष महासुपर्ण एव यत्संवत्सरः । तस्य यान्पुरस्ताद्विषुवतः षण्मासानुपयन्ति सोऽन्यतरः पक्षोऽथ यान्षडुपरिष्टात्सोऽन्यतर आत्मा विषुवान्यत्र वाऽआत्मा तत्पक्षौ यत्र वा पक्षौ तदात्मा न वाऽआत्मा पक्षावतिरिच्यते नात्मानं पक्षावतिरिच्येते एवमु हैतदवरेषां चैव परेषां च भवति ॥७॥ तदाहुः । यत्पुरस्ताद्विषुवत ऊर्ध्वास्तोमान्षण्मासानुपयन्ति षडुपरिष्टादावृत्तान्कथमस्यैतऽऊर्ध्वा स्तोमा ऽपेता भवन्तीति यमेवामुमूर्ध्वस्तोमं दशरात्रमुपयन्ति तेनेति ब्रूयादृतवेभ्यो ह वै महाव्रतं न तस्थे कथमूर्ध्वै स्तोमैर्विषुवन्तमुपागातावृत्तैर्मामिति ॥८॥ ते ह देवा ऊचुः । उप तं यज्ञक्रतुं ज्ञानीत य ऊर्ध्वस्तोमो येनेदमाप्नवामेति तऽएतमूर्ध्वस्तोमं दशरात्रमपश्यन्त्संवत्सरविधं तस्य यः पृष्ठः षडह ऋतवः स इमे लोकाश्छन्दोमाः संवत्सरो दशममहस्तेनैनदाप्नुवंस्तदेभ्योऽतिष्ठत तिष्ठते ह वाऽअस्मै महाव्रतं य एवमेतद्वेद ॥९॥ अथ वाऽअतोऽङ्गामभ्यारोहः । प्रायणीयेनातिरात्रेणोदयनीयमतिरात्रमभ्यारोहन्ति चतुर्विꣳशेन महाव्रतमभिप्लवेन परमभिप्लवं पृष्ठेन परं पृष्ठमभिजिता विश्वजितꣳ स्वरसामभिः परात्स्वरसाम्नोऽथैतदहरनभ्यारूढं यद्वैषुवतमभि ह वै श्रेयाꣳसꣳ रोहति नैन

पापीयानभ्यारोहति य एवमेतद्वेद ॥ १० ॥ अथ वाऽअतोऽङ्गां निवाहः । प्राय-णीयोऽतिरात्रश्चतुर्विꣳशायाङ्गे निवहति चतुर्विꣳशमहरभिप्लवायाभिप्लवः पृष्ठ्याय पृष्ठ्योऽभिजितेऽभिजित्स्वरसामभ्यः स्वरसामानो विषुवते विषुवान्त्स्वरसामभ्यः स्वरसामानो विश्वजिते विश्वजित्पृष्ठ्याय पृष्ठ्योऽभिप्लवायाभिप्लवो गोऽआयुर्भ्यां गो ऽआयुषी दशरात्राय दशरात्रो महाव्रताय महाव्रतमुदयनीयायातिरात्रायोदयनीयो ऽतिरात्रः स्वर्गाय लोकाय प्रतिष्ठायाऽअन्नाद्याय ॥ ११ ॥ तानि वाऽएतानि । य-ज्ञायज्ञीयानि यज्ञक्षत्राणि तानि शतꣳ-शतꣳ रथाङ्ग्यान्यन्तरेण तानि येऽविद्वाꣳस उपयन्ति यथारण्यान्यां मुग्धांश्चरतोऽशनाया वा पिपासा वा पाप्मानो रक्षाꣳसि सचन्तेऽथ ये विद्वाꣳसो यथा प्रवाहात्प्रवाहमभयाद्भयमेवꣳ ह्येव ते देवतायै दे-वतामुपसंयन्ति ते स्वस्ति स्वर्गं लोकꣳ समश्नुवते ॥ १२ ॥ तदाहुः । कति संवत्स-रस्याहानि परास्त्रि कृत्यर्वाञ्चीति स यानि सकृत्सकृदुपयन्ति तानि पराञ्चि अथ या-नि पुनः-पुनस्तान्यर्वाञ्चि अर्वाञ्चीति ह्रस्वैवैनान्युपासीत षडहयोर्ह्यावृत्तिमन्वाव-र्तते ॥ १३ ॥ ब्राह्मणम् ॥ ७ [२. ३.] ॥

पुरुषो वै संवत्सरः । तस्य प्राण एव प्रायणीयोऽतिरात्रः प्राणेन हि प्रयन्ति वागेवारम्भणीयमहर्वाचा ह्यारभन्ते यद्यदारभन्ते ॥ १ ॥ अयमेव दक्षिणो हस्तो ऽभिप्लवः षडहः । तस्येदमेव प्रथममहस्तस्येदमेव प्रातःसवनमिदं माध्यन्दिनꣳ स-वनमिदं तृतीयसवनं गायत्र्या आयतने तस्मादियमासाꣳ ह्रसिष्ठा ॥ २ ॥ इदमेव द्वितीयमहः । तस्येदमेव प्रातःसवनमिदं माध्यन्दिनꣳ सवनमिदं तृतीयसवनं त्रि-ष्टुभ आयतने तस्मादियमस्यै वर्षीयसी ॥ ३ ॥ इदमेव तृतीयमहः । तस्येदमेव प्रा-तःसवनमिदं माध्यन्दिनꣳ सवनमिदं तृतीयसवनं जगत्या आयतने तस्मादियमा-सां वर्षिष्ठा ॥ ४ ॥ इदमेव चतुर्थमहः । तस्येदमेव प्रातःसवनमिदं माध्यन्दिनꣳ सवनमिदं तृतीयसवनं विराज आयतनेऽन्नं वै विराडन्नादितमा

॥५॥ इदमेव पञ्चममहः । तस्येदमेव प्रातःसवनमिदं माध्यन्दिनꣳ सवनमिदं तृतीयसवनं पङ्क्त्यायतने पृथुरिव वै पङ्क्तिस्तस्माद्यमासां प्रथिष्ठः ॥६॥ इदमेव षष्ठमहः । तस्येदमेव प्रातःसवनमिदं माध्यन्दिनꣳ सवनमिदं तृतीयसवनमतिछन्दस आयतने तस्माद्यमासां वर्षिष्ठो गायत्रमेतदहर्भवति तस्मादिदं फलकꣳ क्रुसिष्ठꣳ स इतोऽभिप्लवः षडहः स इतः स इतः स इत आत्मा पृष्ठः ॥७॥ एतद्ध स्म वै तद्विद्वानाह पैङ्ग्यः । प्लवत्तऽइव वाऽअभिप्लवास्तिष्ठतीव पृष्ठ इति प्लवत ऽइव ह्ययमङ्गैस्तिष्ठतीवात्मनेति ॥८॥ शिर एवास्य त्रिवृत् । तस्मात्तत्त्रिविधं भवति त्रगस्थि मस्तिष्कः ॥९॥ ग्रीवाः पञ्चदशः । चतुर्दश वाऽएतासां कटूकराणि वीर्यं पञ्चदशं तस्मादित्पुमिरण्वीभिः सतीभिर्गुरुं भारꣳ हरति तस्माद्ग्रीवाः पञ्चदशः ॥१०॥ उरः सप्तदशः । अष्टावन्ये जत्रवोऽष्टावन्यऽउरः सप्तदशं तस्मादुरः सप्तदशः ॥११॥ उदरमेकविꣳशः । विꣳशतिर्वा अत्तरुदरे कुल्तापान्युदरमेकविꣳशं तस्मादुदरमेकविꣳशः ॥१२॥ पार्श्वे त्रिणवः । त्रयोदशान्याः पर्शवस्त्रयोदशान्याः पार्श्वे त्रिणवि तस्मात्पार्श्वे त्रिणवः ॥१३॥ अनूकं त्रयस्त्रिꣳशः । द्वात्रिꣳशद्वाऽएतस्य कटूकराण्यनूकं त्रयस्त्रिꣳशं तस्मादनूकं त्रयस्त्रिꣳशः ॥१४॥ अयमेव दक्षिणः कर्णोऽभिजित् । यदिदमद्दणः शुल्कꣳ स प्रथमः स्वरसामा यत्कृष्णꣳ स द्वितीयो यन्मण्डलꣳ स तृतीयो नासिके विषुवान्यदिदमद्दणो मण्डलꣳ स प्रथमोऽर्वाक्सामा यत्कृष्णꣳ स द्वितीयो यत्कुल्कꣳ स तृतीयः ॥१५॥ अयमेवोत्तरः कर्णो विश्वजित् । उक्तौ पृष्ठ्याभिप्लवौ यावत्यौ प्राणौ ते गोऽआयुषीऽअङ्गानि दशरात्रो मुखं महाव्रतमुदान एवोदयनीयोऽतिरात्र उदानेन ह्युद्यन्ति स एष संवत्सरोऽध्यात्मं प्रतिष्ठितः स यो ह्येवमेतꣳ संवत्सरमध्यात्मं प्रतिष्ठितं वेद प्रतितिष्ठति प्रजया पशुभिरस्मिंल्लोकेऽमृतत्वेनामुष्मिन् ॥१६॥ ब्राह्मणम् ॥ ८ [२. ४.] ॥ द्वितीयोऽध्यायः [७६.] ॥ ॥

यद्वालाके । इदं त्रिवृदिति सर्वमन्योऽन्यमभिसम्पद्यमानम् । कथं स्विद्यज्ञः पुरुषः प्रजापतिरन्योऽन्यं नातिरिच्यतऽएते ॥ १ ॥ यद्वूर्धा स्तोमा अनुयन्ति । यज्ञमभ्यावर्तं सामभिः कल्पमानाः । कथं स्वित्ते पुरुषमाविशन्ति कथं प्राणैः सयुजो भवन्ति ॥ २ ॥ प्रायणीयोऽतिरात्रः । चतुर्विंशमुक्थ्यवारोऽभिप्लवाः पृष्ठ्य इत्येते । कथं स्वित्ते पुं° ॥ ३ ॥ अभिजिता स्वरसामानः । अभिक्लप्ता उभयतो विषुवन्तमुपयन्ति । कथं स्वित्ते पुं° ॥ ४ ॥ त्रिवृत्प्रायाः । सप्तदशाभिक्लप्तास्त्रयस्त्रिंशास्तात्श्चतुरुत्तरेण । कथं स्वित्ते पुरुषमाविशन्ति कथं प्राणैः सयुजो भवन्तीति ॥ ५ ॥ शिरस्त्रिवृत् । पञ्चदशोऽस्य ग्रीवा उर आरुः सप्तदशाभिक्लप्तम् । एकविंशमुदरं कल्पयन्ति पार्श्वे पर्शूस्त्रिणवेनाभिक्लृप्ते ॥ ६ ॥ अभिप्लवा उभयतोऽस्य बाहू । पृष्ठं पृष्ठ्य इति धीरा वदन्ति । अनूकमस्य चतुरुत्तरेण संवत्सरे ब्राह्मणाः कल्पयन्ति ॥ ७ ॥ कर्णावस्याभिजिद्विश्वजिच्च । अङ्ग्यावारुः स्वरसामाभिक्लृप्ते । नस्यं प्राणं विषुवन्तमारुर्गोऽआयुषी प्राणावेतावेवास्यौ ॥ ८ ॥ अङ्गान्यस्य दशरात्रमारुः । मुखं महाव्रतं संवत्सरे ब्राह्मणाः कल्पयन्ति । सर्वस्तोमं सर्वसामानमेतं संवत्सरमध्यात्मं प्रविष्टम् । समं धीर आत्मना कल्पयित्वा ब्रध्नस्यास्ते विष्टपेऽज्ञातशोकः ॥ १ ॥ ब्राह्मणम् ॥ १ [३. १.] ॥

पुरुषो वै संवत्सरः । पुरुष इत्येकं संवत्सर इत्येकमत्र तत्समं द्वे वै संवत्सरस्याहोरात्रे द्वाविमौ पुरुषे प्राणावत्र तत्समं त्रय ऋतवः संवत्सरस्य त्रय इमे पुरुषे प्राणा अत्र तत्समं चतुरक्षरो वै संवत्सरश्चतुरक्षरोऽयं यजमानोऽत्र तत्समं पञ्चर्तवः संवत्सरस्य पञ्चेमे पुरुषे प्राणा अत्र तत्समं षडृतवः संवत्सरस्य षडिमे पुरुषे प्राणा अत्र तत्समं सप्तर्तवः संवत्सरस्य सप्तेमे पुरुषे प्राणा अत्र तत्समम् ॥ १ ॥ द्वादश वै मासाः संवत्सरस्य । द्वादशेमे पुरुषे प्राणा अत्र तत्समं त्रयोदश वै मासाः संवत्सरस्य त्रयोदशेमे पुरुषे प्राणा नाभिस्त्रयोदश्यत्र तत्समं

चतुर्विꣳशतिर्वै संवत्सरस्यार्धमासाश्चतुर्विꣳशोऽयं पुरुषो विꣳशत्यङ्गुलिश्चतुरङ्गोऽत्र तत्समꣳ षड्विꣳशतिर्वै संवत्सरस्यार्धमासाः षड्विꣳशोऽयं पुरुषः प्रतिष्ठे षड्विꣳश्यावत्र तत्समम् ॥२॥ त्रीणि च वै शतानि षष्टिश्च । संवत्सरस्य रात्रयस्त्रीणि च शतानि षष्टिश्च पुरुषस्यास्थीन्यत्र तत्समं त्रीणि च शतानि षष्टिश्च संवत्सरस्याह्नानि त्रीणि च शतानि षष्टिश्च पुरुषस्य मज्ञानोऽत्र तत्समꣳ ॥३॥ सप्त च वै शतानि विꣳशतिश्च । संवत्सरस्याहोरात्राणि सप्त च शतानि विꣳशतिश्च पुरुषस्यास्थीनि च मज्ञानश्चात्र तत्समम् ॥४॥ दश च वै सहस्राण्यष्टौ च शतानि । संवत्सरस्य मुहूर्ता यावन्तो मुहूर्तास्तावन्ति पञ्चदश कृत्वः क्षिप्राणि यावन्ति क्षिप्राणि तावन्ति पञ्चदश कृत्व एतर्हीणि यावत्येतर्हीणि तावन्ति पञ्चदश कृत्व इदानीनि यावतीदानीनि तावन्तः पञ्चदश कृत्वः प्राणा यावन्तः प्राणास्तावतोऽना यावतोऽनास्तावन्तो निमेषा यावन्तो निमेषास्तावन्तो लोमगर्ता यावन्तो लोमगर्तास्तावन्ति स्वेदायनानि यावन्ति स्वेदायनानि तावन्त एते स्तोका वर्षन्ति ॥५॥ एतद्ध स्म वै तद्विद्वानाहु र्वार्कलिः । सार्वभौमं मेघं वर्षन्तं वेदाहमस्य वर्षस्य स्तोकानिति ॥६॥ तदेष श्लोकोऽभ्युक्तः । श्रमादन्यत्र परिवर्तमानस्तिष्ठन्नासीनो यदि वा स्वपन्नपि । अहोरात्राभ्यां पुरुषः समेन कति कृत्वः प्राणिति चाप चानितीति ॥७॥ तदेष श्लोकः प्रत्युक्तः । शतꣳ शतानि पुरुषः समेनाष्टौ शता यन्मितं तद्वदन्ति । अहोरात्राभ्यां पुरुषः समेन तावत्कृत्वः प्राणिति चाप चानितीति ॥८॥ ब्राह्मणम् ॥१० [३. २.] ॥

देवा ह वै सहस्रसंवत्सराय दिदीक्षिरे । तेषां पञ्च शतानि संवत्सराणां पर्यवेतान्यासुरेदꣳ सर्वमेव शश्राम ये स्तोमा यानि पृष्ठानि यानि छन्दाꣳसि ॥१॥ ततो देवाः । एतद्यज्ञस्यायातयामापश्यंस्तेनायातयाम्ना या वेदे व्यष्टिरासीत्तां व्याश्नुवतायातयामा वाऽअस्य वेदा अयातयाम्ना ह्यस्य त्रय्या विद्यया वर्विज्यं कृतं भ-

वति य एवमेतद्वेद ॥२॥ तदेतद्यज्ञस्यायातयाम । ओ श्रावयास्तु औषड्यज्ञ ये य-
ज्ञामहे वौषडिति तासां वाऽएतासां पञ्चानां व्याकृतीनाꣳ सप्तदशाक्षराण्यो श्रा-
वयेति चतुरक्षरमस्तु औषडिति चतुरक्षरं यजेति द्यक्षरं ये यज्ञामहऽइति पञ्चा-
क्षरम् ॥३॥ द्यक्षरो वषट्कारः । स एष सप्तदशः प्रजापतिरधिदेवतं चाध्यात्मं च
प्रतिष्ठितः स यो हैवमेतꣳ सप्तदशं प्रजापतिमधिदेवतं चाध्यात्मं च प्रतिष्ठितं
वेद प्रतितिष्ठति प्रजया पशुभिरस्मिंल्लोकेऽमृतत्वेनामुष्मिन् ॥४॥ ते ह देवा ऊ-
चुः । उप तं यज्ञक्रतुं जानीत यः सहस्रसंवत्सरस्य प्रतिमा को हि तस्मै मनुष्यो
यः सहस्रसंवत्सरेण समाप्नुयादिति ॥५॥ ते विश्वजितमेव सर्वपृष्ठम् । पृष्ठ्यस्य ष-
डहस्याङ्गःसवमपश्यंस्ते हि स्तोमा भवन्ति तानि पृष्ठानि तानि छन्दाꣳसि ॥६॥
पृष्ठ्यमेव षडहम् । द्वादशाहस्याङ्गःसवमपश्यंस्ते हि स्तोमा भ° ॥७॥ द्वादशाह-
मेव । संवत्सरस्याङ्गःसवमप° ॥८॥ संवत्सरमेव । तापश्चितस्याङ्गःसवमप° ॥९॥
तापश्चितमेव । सहस्रसंवत्सरस्याङ्गःसवमप° ॥१०॥ स वै संवत्सरं दीक्षाभिरिति
। संवत्सरमुपसद्भिः संवत्सरꣳ सुत्याभिः ॥११॥ स यत्संवत्सरं दीक्षाभिरिति । पू-
र्वार्धमेव तेन सहस्रसंवत्सरस्यावरुन्द्धेऽथ यत्संवत्सरमुपसद्भिर्मध्यमेव तेन सहस्र-
संवत्सरस्यावरुन्द्धेऽथ यत्संवत्सरꣳ सुत्याभिरुत्तमार्धमेव तेन सहस्रसंवत्सरस्या-
वरुन्द्धे ॥१२॥ स वै द्वादश मासान्दीक्षाभिरिति । द्वादशोपसद्भिर्द्वादश सुत्याभि-
स्तत्षट्त्रिꣳशत्षट्त्रिꣳशदक्षरा वै बृहती बृहत्या वै देवाः स्वर्गे लोकेऽयतन्त
बृहत्या स्वर्गं लोकमाप्नुवंस्तथोऽएवैष एतद्बृहत्यैव स्वर्गे लोके यतते बृहत्या
स्वर्गं लोकमाप्नोत्यथ यो बृहत्यां कामस्तमेवैतेनैवंविद्वरुन्द्धे ॥१३॥ तद्वाऽए-
तत् । त्रयꣳ सहꣳ क्रियतेऽग्निरुक्थꣳ सहꣳ स यत्संवत्सरं दीक्षाभिरिति संवत्स-
रमुपसद्भिस्तेनास्याग्न्यर्कावाप्तौ भवतोऽथ यत्संवत्सरꣳ सुत्याभिरिति तेनोऽएवास्य
सहꣳ उक्थमाप्तं भवति स वाऽएष एव सहस्रसंवत्सरस्य प्रतिमा यत्तापश्चित एष

प्रज्ञानां प्रज्ञात्यै यत्तापश्चितः ॥ १४ ॥ ब्राह्मणम् ॥ ११ [३. ३.] ॥ प्रथमः प्रपाठकः ॥ कण्डिकासंख्या १३२ ॥ ॥

पुरुषꣳ ह नारायणं प्रजापतिरुवाच । यज्ञस्व-यज्ञस्वेति स ह्येवाच यज्ञस्व-यज्ञस्वेति वाव त्वं मामात्थ त्रिरयज्ञि वसवः प्रातःसवनेनागू रुद्रा माध्यन्दिनेन सवनेनादित्यास्तृतीयसवनेनाथ मम यज्ञवास्त्वेव यज्ञवास्तावेवाहमासꣳइति ॥ १ ॥ स ह्येवाच । यज्ञस्वैवाहं वै ते तद्वक्ष्यामि यथा तऽइकथानि मणिरिव सूत्रऽओतानि भविष्यन्ति सूत्रमिव वा मणाविति ॥ २ ॥ तस्माऽउ हैतदुवाच । प्रातःसवने बर्हिष्यवमानऽउद्गातारमन्वारभसे श्येनोऽसि गायत्रछन्दा अनु त्वारभे स्वस्ति मा सम्पारयेति ॥ ३ ॥ अथ माध्यन्दिने पवमाने । उद्गातारमन्वारभसे सुपर्णोऽसि त्रिष्टुप्छन्दा अनु त्वारभे स्वस्ति मा स पारयेति ॥ ४ ॥ अथ तृतीयसवन ऽआर्भवे पवमाने । उद्गातारमन्वारभसाऽऋभुरसि जगच्छन्दा अनु त्वारभे स्वस्ति मा सम्पारयेति ॥ ५ ॥ अथ सꣳस्थितेषु-सꣳस्थितेषु सवनेषु जपेः । मयि भर्गो मयि महो मयि यशो मयि सर्वमिति ॥ ६ ॥ अयं वै लोका भर्गः । अन्तरिक्षलोको महो द्यौर्यशो येऽन्ये लोकास्तत्सर्वम् ॥ ७ ॥ अग्निर्वै भर्गः । वायुर्महऽआदित्यो यशो येऽन्ये देवास्तत्सर्वम् ॥ ८ ॥ ऋग्वेदो वै भर्गः । यजुर्वेदो महः सामवेदो यशो येऽन्ये वेदास्तत्सर्वम् ॥ ९ ॥ वाग्वै भर्गः । प्राणो महश्चक्षुर्यशो येऽन्ये प्राणास्तत्सर्वम् ॥ १० ॥ तद्विद्यात् । सर्वाल्लोकानात्मन्नधिषि सर्वेषु लोकेष्वात्मानमधाꣳ सर्वान्देवानात्मन्नधिषि सर्वेषु देवेष्वात्मानमधाꣳ सर्वान्वेदानात्मन्नधिषि सर्वेषु वेदेष्वात्मानमधाꣳ सर्वान्प्राणानात्मन्नधिषि सर्वेषु प्राणेष्वात्माननधामित्यद्मिता वै लोका अद्मिता देवा अद्मिता वेदा अद्मिताः प्राणा अद्मितꣳ सर्वमद्मिताद्ध वाऽअद्मितमुपसक्रामत्यप पुनर्मृत्युं जयति सर्वमायुरेति य एवमेतद्वेद ॥ ११ ॥ ब्राह्मणम् ॥ १ [३. ४.] ॥

सावित्रꣳ ह स्मैतं पूर्वे पशुमालभन्ते । अथैतर्हि प्राजापत्यं यो ह्येव सविता स प्रजापतिरिति वदन्तस्तस्मात्संन्युप्याग्नींस्तेन यजेरन्गृहपतेरेवाग्निषु यथेदं ज्ञाघन्या पत्नीः संयाजयन्ति तस्यां नोऽप्यसदिति ते ततो यदानिकामं दीक्षन्ते ॥ १॥ तदु वाऽआहुः । नानाधिष्ण्या एव स्युर्यदि दीक्षितस्योपतपेत्पार्श्वतोऽग्निहोत्रं जुह्वदसेत्स यज्ञगदो भवति सꣳसृज्यैनं पुनरुपह्वयन्ते यद्यु म्रियते स्वैरेव तमग्निभिर्दहत्यशवाग्निभिरितरे यजमाना आसतऽइति तदहैवाहिताग्निः कर्म समानधिष्ण्यास्त्वेव भवन्ति तस्य तदेव ब्राह्मणं यत्पुरश्चरणे ॥ २॥ तदाहुः । यत्संवत्सराय संवत्सरसदो दीक्षन्ते कथमेषामग्निहोत्रमनन्तरितं भवतीति व्रतेनेति ब्रूयात् ॥ ३॥ तदाहुः । यत्सं° कथमेषां पौर्णमासꣳ हविरनन्तर्हितं भवतीत्याज्येन च पुरोडाशेन चेति ब्रूयात् ॥ ४॥ तदाहुः । यत्सं° कथमेषां पितृयज्ञोऽनन्तरितो भवतीत्यौपासनेरिति ब्रूयात् ॥ ५॥ तदाहुः । यत्सं° कथमेषामामावास्यꣳ हविरनन्तरितं भवतीति दध्ना च पुरोडाशेन चेति ब्रूयात् ॥ ६॥ तदाहुः । यत्सं° कथमेषामाग्रयणेष्टिरनन्तरिता भवतीति सौम्येन चरुणेति ब्रूयात् ॥ ७॥ तदाहुः । यत्सं° कथमेषां चातुर्मास्यान्यनन्तरितानि भवन्तीति पयस्येति ब्रूयात् ॥ ८॥ तदाहुः । यत्सं° कथमेषां पशुबन्धोऽनन्तरितो भवतीति पशुना च पुरोडाशेन चेति ब्रूयात् ॥ ९॥ तदाहुः । यत्सं° कथमेषाꣳ सोमोऽनन्तरितो भवतीति सवनैरिति ब्रूयात् ॥ १०॥ ते वाऽएवमेते यज्ञक्रतवः । संवत्सरमपियन्ति स यो ह्येवमेतां यज्ञक्रतूनाꣳ संवत्सरेऽपीतिं वेदाप्यस्य स्वर्गे लोके भवति ॥ ११॥ संवत्सरस्य समता वेदितव्या । एकं पुरस्ताद्विषुवतोऽतिरात्रमुपयन्त्येकमुपरिष्टात्त्रयःपञ्चाशतं पुरस्ताद्विषुवतोऽग्निष्टोमानुपयन्ति त्रयःपञ्चाशतमुपरिष्टाद्विꣳशतिशतं पुरस्ताद्विषुवत उक्थ्यान्यहान्युपयन्ति विꣳशतिशतमुपरिष्टादिति नु यऽउक्थ्यास्त्वरसाम्न उपयन्ति ॥ १२॥ अथ येऽग्निष्टोमान् । षट्पञ्चाशतं पुरस्ताद्विषुवतोऽग्निष्टोमानुपयन्ति षट्-

पञ्चाशतमुपरिष्टात्सप्तदशꣳ शतं पुरस्ताद्विषुवत उक्थ्यान्यह्नान्युपयन्ति सप्तदशमुपरिष्टात्षट् पुरस्ताद्विषुवतः षोडशिन उपयन्ति षडुपरिष्टात्त्रिꣳशतं पुरस्ताद्विषुवतः षडह्नानुपयन्ति त्रिꣳशतमुपरिष्टादेषा ह्यस्य समता समेन ह वाऽह्नास्याव्यूढेनान्यूनेनानतिरिक्तेनायनेनेतं भवति य एवमेतद्वेद ॥ १३ ॥ ब्राह्मणम् ॥ २ [३. ५.] ॥ तृतीयोऽध्यायः [७७.] ॥ ॥

दीर्घसत्त्रꣳ ह वाऽऋतऽउपयन्ति । येऽग्निहोत्रं जुह्वत्येतद्वै जरामर्यꣳ सत्त्रं यदग्निहोत्रं जरया वा ह्येवास्मान्मुच्यन्ते मृत्युना वा ॥ १ ॥ तदाहुः । यदेतस्य दीर्घसत्त्रिणोऽग्निहोत्रं जुह्वतोऽन्तरेणाग्नी युक्तं वा वियायात्सं वा चरेयुः किं तत्र कर्म का प्रायश्चित्तिरिति कुर्वीत ह्यैव निष्कृतिमपीष्ट्वा यजेत तदु तन्नाद्रियेतेमान्वाऽएष लोकाननुवितनुते योऽग्नीऽआधत्ते ॥ २ ॥ तस्यायमेव लोको गार्हपत्यः । अन्तरिक्षलोकोऽन्वाहार्यपचनोऽसौ लोक आहवनीयः कामं न्वाऽएषु लोकेषु वयाꣳसि युक्तं चायुक्तं च सं चरन्ति स यदि ह्यस्याप्यन्तरेण ग्रामोऽग्नीन्वियायान्नैव मे का चनार्तिरस्ति न रिष्टिरिति ह्यैव विद्यात् ॥ ३ ॥ त्रयो ह वाव पशवोऽमेध्याः । दुर्वराह ऐडकः श्वा तेषां यद्यधिश्रितेऽग्निहोत्रेऽन्तरेण कश्चित्संचरेत्किं तत्र कर्म का प्रायश्चित्तिरिति तद्वैके गार्हपत्यादङ्गारमुपकृत्याहवनीयान्निवपन्तो यन्तीदं विष्णुर्विचक्रमऽइत्येतयर्चा यज्ञो वै विष्णुस्तद्यज्ञेनैव यज्ञमनुसंतन्मो भस्मनास्य पदमपिवपाम इति वदन्तस्तदु तथा न कुर्याद्यो ह्यैनं तत्र ब्रूयादासान्वाऽअयं यजमानस्यावाप्सीत्तिप्रे परमासानावप्स्यते ज्येष्ठगृक्ꣳ रोत्स्यतीतीश्वरो ह तथैव स्यात् ॥ ४ ॥ इत्थमेव कुर्यात् । उदस्थालीं वैवोदकमण्डलु वादाय गार्हपत्यादग्नयऽआहवनीयान्निनयन्नियादिदं विष्णुर्विचक्रमऽइत्येतयैवर्चा यज्ञो वै विष्णुस्तद्यज्ञेनैव यज्ञमनुसंतनोति यद्वै यज्ञस्य रिष्टं यदशान्तमापो वै तस्य सर्वस्य शान्तिरद्भिरेवैनत्तद्ध्यात्या शमयत्यतदेव तत्र कर्म ॥ ५ ॥ तदाहुः । यस्याग्निहोत्रं

दोक्ष्यमानꣳ स्कन्देत्किं तत्र कर्म का प्रायश्चित्तिरिति स्कन्नप्रायश्चित्तेनाभिमृश्याद्विरुपनिनीय परिशिष्टेन जुहुयाच्चमु नोची स्थाली स्याद्यदि वा भिद्येत स्कन्नप्रायश्चित्तेनैवाभिमृश्याद्विरुपनिनीय यदन्यद्विन्देत्तेन जुहुयात् ॥ ६ ॥ ॥ शतम् ६१०० ॥ ॥ अथ यत्र स्कन्नꣳ स्यात् । तदभिमृशेद्स्कन्नधित प्राजनीति यदा वै स्कन्दत्यथ धीयते यदा धीयतेऽथ प्रजायते योनिर्वाऽएषꣳ रेतः पयस्तदस्यां योनौ रेतो दधात्यनुष्ठा ह्यस्य रेतः सिक्तं प्रजायते य एवमेतद्वेदामुतो वै दिवो वर्षतीह्यौषधयो वनस्पतयः प्रजायन्ते पुरुषाद्रेत स्कन्दति पशुभ्यस्तत इदꣳ सर्वं प्रजायते तद्विद्वाङ्श्रेयसी मे प्रजातिरभूद्बहुः प्रजया पशुभिर्भविष्यामि श्रेयान्भविष्यामीति ॥ ७ ॥ अथ यत्रावभिन्नꣳ स्यात् । तदुदस्थाल्यां वैवोदकमण्डलुं वा निनयेद्यद्वै यज्ञस्य रिष्टं यदशान्तमापो वै तस्य सर्वस्य शान्तिरद्भिरेवैनत्तच्छान्त्या शमयति भूर्भुवः स्वरित्येताभिर्व्याकृतिभिरेता वै व्याकृतयः सर्वप्रायश्चित्तीस्तदनेन सर्वेण प्रायश्चित्तिं कुरुते तानि कपालानि संचित्य यत्र भस्मोद्धृतꣳ स्यात्तन्निवपेदेतदेव तत्र कर्म ॥ ८ ॥ तदाहुः । यस्याग्निहोत्री दोक्ष्यमानोपविशेत्किं तत्र कर्म का प्रायश्चित्तिरिति ताꣳ ह्येके यजुषोत्थापयन्त्युदस्थाद्द्यौरदितिरितीयं वाऽअदितिरिमामेवास्माऽएतदुत्थापयाम इति वदन्त आयुर्यज्ञपतावधादित्यायुरेवास्मिंस्तद्दध्म इति वदन्त इन्द्राय कृण्वतो भागमितीन्द्रियमेवास्मिंस्तद्दध्म इति वदन्तो मित्राय वरुणाय चेति प्राणोदानौ वै मित्रावरुणौ प्राणोदानावेवास्मिंस्तद्दध्म इति वदन्तस्तां तस्यामाकुत्यां ब्राह्मणाय दध्याध्मनभ्यागमिष्यन्मन्येतार्तिं वाऽएषा पाप्मानं यजमानस्य प्रतिदृश्योपाविक्षदार्तिमेवास्मिंस्तत्पाप्मानं प्रतिमुञ्चाम इति वदन्तः ॥ १ ॥ तदु होवाच याज्ञवल्क्यः । अश्रद्दधानेभ्यो ह्येभ्यो गौरपक्रामत्यार्त्यो वाऽआकुतिं विध्यतीत्यमेव कुर्याद्एउनैवैनां विपिष्योत्थापयेदिति तथ्यथैवादो धावयतोऽश्वो वाश्वतरो वा गद्यायेत बलीवर्दो वा युक्तस्तेन दण्डप्रजितेन तोत्रप्रजितेन यमधानꣳ

समीप्सति तꣳ समश्नुतऽएवमेवैतया दण्डप्रज्ञितया तोत्रप्रज्ञितया यꣳ स्वर्गं लोकꣳ समीप्सति तꣳ समश्नुते ॥ १० ॥ अथ कोवाचारुणिः । द्यौर्वाऽएतस्याग्निहोत्रस्याग्निहोत्र्ययमेव वत्सो योऽयं पवतऽइयमेवाग्निहोत्रस्थाली न वाऽएवं विदुषोऽग्निहोत्री नश्यति क्व क्वासौ नश्येन्नैवं विदुषोऽग्निहोत्रीवत्सो नश्यति क्व क्वेष नश्येन्नैवं विदुषोऽग्निहोत्रस्थाली भिद्यते क्व क्वेयं भिद्येत श्रियो वै पर्जन्यो वर्षति तद्विद्याङ्क्रेमाणं मे महिमानमधारयमाणोपाविद्धक्ष्येयान्भविष्यामीति तामात्मन्येव कुर्वीतात्मन्येव तक्ष्रियं धत्तऽइति ह स्माहारुणिरेतदेव तत्र कर्म ॥ ११ ॥ तदाहुः । यस्याग्निहोत्री दोह्यमाना वाश्येत किं तत्र कर्म का प्रायश्चित्तिरिति स्तम्बमाहृत्य ग्रासयेदेतदेव तत्र कर्म ॥ १२ ॥ ब्राह्मणम् ॥ ३ [8. १.] ॥ ॥

तदाहुः । यस्याग्निहोत्री लोहितं दुहीत किं तत्र कर्म का प्रायश्चित्तिरिति व्युत्क्रामतेत्युक्त्वा मेक्षणं कृत्वान्वाहार्यपचनं परिश्रयितवै ब्रूयात्तस्मिन्नेनक्रपयित्वा तस्मिंस्तूष्णीं जुहुयादनिरुक्तमनिरुक्तो वै प्रजापतिः प्राजापत्यमग्निहोत्रꣳ सर्वं वाऽअनिरुक्तं तदनेन सर्वेण प्रायश्चित्तिं कुरुते तां तस्यामाकृत्यां ब्राह्मणाय दद्याद्यमनभ्यागमिष्यन्मन्येतार्तिं वाऽएषा पाप्मानं यजमानस्य प्रतिदृश्य दुहे या लोहितं दुहेऽआर्तिमेवास्मिंस्तत्पाप्मानं प्रतिमुञ्चत्यथ यदन्यद्विन्देत्तेन जुहुयादनार्तिमेव तदार्तं यज्ञस्य निष्करोत्येतदेव तत्र कर्म ॥ १ ॥ तदाहुः । यस्याग्निहोत्रं दोह्यमानममेध्यमापद्येत किं तत्र कर्म का प्रायश्चित्तिरिति तद्वैके कोतव्यं मन्यन्ते प्रयतमेतन्नैतस्याकोमोऽवकल्पते न वै देवाः कस्माच्चन बीभत्सन्ते बीभत्सन्ताꣳ३ इ तु देवा इत्यमेव कुर्याद्गार्हपत्याद्दुग्धं भस्म निरुह्य तस्मिन्नेनदुग्धे भस्मंस्तूष्णीं निनयेदद्भिरुपनिनयत्यद्भिरेनदाप्नोत्यथ यदन्यद्विन्देत्तेन जुहुयादेतदेव तत्र कर्म ॥ २ ॥ तदाहुः । यस्याग्निहोत्रं दोहितममेध्यमापद्येत किं तत्र कर्म का प्रायश्चित्तिरिति यऽएवैतेऽङ्गारा निवृता येष्वधिश्रयिष्यन्भवति तान्प्रत्युह्य तस्मिन्नेनदुग्धे भस्मंस्तूष्णीं

निनयेद्द्विरुपनिनयत्यद्विरेनदाप्नोत्यथ यदन्य° ॥ ३ ॥ तदाहुः । यस्याग्निहोत्रमधिश्रितममेध्यमापद्येत किं तत्र कर्म का प्रायश्चित्तिरिति यऽएवैतेऽङ्गारा निर्वृहा येष्वधिश्रितं भवति तेष्वेनत्तूष्णीं जुहुयात्तद्धुतमकृतं यद्धैनत्तेषु जुहोति तेन कृतं यद्धैनांस्तेनैवानुगमयति तेनाकृतमद्भिरुपनिनयत्यद्भिरेनदाप्नोत्यथ यदन्य° ॥ ४ ॥ तदाहुः । यदधिश्रितेऽग्निहोत्रे यजमानो म्रियेत किं तत्र कर्म का प्रायश्चित्तिरिति तदेवैनदभिपर्याधाय विष्यन्द्येदथो खल्वाहुरेतावती सर्वस्य हविर्यज्ञस्य प्रायश्चित्तिरित्येतदेव तत्र कर्म ॥ ५ ॥ तदाहुः । यस्याग्निहोत्रꣳ स्रुच्युन्नीतꣳ स्कन्देत्किं तत्र कर्म का प्रायश्चित्तिरिति स्कन्नप्रायश्चित्तेनाभिमृश्याद्भिरुपनिनीय परिशिष्टेन जुहुयाद्यद्यु नीची स्रुक्स्याद्यदि वा भिद्येत स्कन्नप्रायश्चित्तेनैवाभिमृश्याद्भिरुपनिनीय यत्स्थाल्यां परिशिष्टꣳ स्यात्तेन जुहुयात् ॥ ६ ॥ तद्धैके । प्रतिपरेत्य यत्स्थाल्यां परिशिष्टं भवति तेन जुह्वति तदु तथा न कुर्यात्स्वर्ग्यं वाऽएतद्यदग्निहोत्रं यो हैनं तत्र ब्रूयात्प्रति न्वाऽअयꣳ स्वर्गाल्लोकादवारुक्षन्नास्येदꣳ स्वर्ग्यमिव भविष्यतीतीश्वरो ह तथैव स्यात् ॥ ७ ॥ इत्यमेव कुर्यात् । तदेवोपविशेद्यत्स्थाल्यां परिशिष्टꣳ स्यात्तदस्माऽउन्नीयाहरेयुस्तद्धैकऽउपवल्हते हुतोहिष्टं वाऽएतद्यातयाम वाऽएतन्नैतस्य होतव्यमिति तदु तन्नाद्रियेत यदा वाऽएतद्यातयामाथैनद्धविरातञ्चनं कुर्वते तस्माद्यत्स्थाल्यां परिशिष्टꣳ स्यात्तदस्माऽउन्नीयाहरेयुर्यद्यु तत्र न स्याद्यदन्यद्विन्देत्तदग्नावधिश्रित्यावद्योत्यापः प्रत्यानीयोद्वास्य तद्दो हैवोन्नेष्यामीत्युक्तं भवत्यथात्र यथोन्नीतमेवास्माऽउन्नीयाहरेयुस्तेन कामं जुहुयादेतदेव तत्र कर्म ॥ ८ ॥ तदाहुः । यस्याग्निहोत्रꣳ स्रुच्युन्नीतममेध्यमापद्येत किं तत्र कर्म का प्रायश्चित्तिरिति तद्धैके होतव्यं मन्यन्ते प्रयतमेतन्नैतस्याहोमोऽवकल्पते न वै देवाः कस्माच्चन बीभत्सन्तऽइति तद्धैकऽउत्सिच्य ह्रदयन्ति तदु तथा न कुर्याद्यो हैनं तत्र ब्रूयात्परासिञ्चत न्वाऽअयमग्निहोत्रं क्षिप्रेऽयं यजमानः परासि-

द्यतऽइतीश्वरो ह तथैव स्यादित्यमेव कुर्यादाहवनीये समिधमभ्याधायाहवनीयादेवोल्मं भस्म निरुह्य तस्मिन्नेनडुल्मे भस्मस्तूष्णीं निनयेदद्विरुपनिनयत्यद्भिरेनदाप्नोत्यथ यदन्यद्विन्देत्तेन जुहुयादेतदेव तत्र कर्म ॥ १ ॥ तदाहुः । यस्याग्निहोत्रꣳ स्रुच्युन्नीतमुपरिष्टादववर्षेत्किं तत्र कर्म का प्रायश्चित्तिरिति तद्विद्याडुपरिष्टान्मा शुक्रमागन्नुप मां देवाः प्राभूवञ्छ्रेयान्भविष्यामीति तेन कामं जुहुयादेतदेव तत्र कर्म ॥ १० ॥ ब्राह्मणम् ॥ ४ [४. २.] ॥ ॥

तदाहुः । यत्पूर्वस्यामाहुत्याꣳ हुतायामथाग्निरनुगच्छेत्किं तत्र कर्म का प्रायश्चित्तिरिति यं प्रतिवेशꣳ शकलं विन्देत्तमभ्यस्याभिजुहुयाद्दारौ-दारावग्निरिति वदन्दारौ-दारौ ह्येवाग्निर्यद्यꣳ अस्य हृदयं व्येव लिखेद्धिरण्यमभिजुहुयाद्ग्नेर्वाऽएतद्रेतो यद्धिरण्यं य उ वै पुत्रः स पिता यः पिता स पुत्रस्तस्माद्धिरण्यमभिजुहुयादेतदेव तत्र कर्म ॥ १ ॥ तदाहुः । यस्याहवनीय उद्धृतः पुराग्निहोत्रादनुगच्छेत्किं तत्र कर्म का प्रायश्चित्तिरिति गार्हपत्यादेवैनं प्राञ्चमुद्धृत्योपसमाधायाग्निहोत्रं जुहुयात्स यद्यपि शतमेव कृत्वः पुनः पुनरुद्धृतोऽनुगच्छेद्गार्हपत्यादेवैनं प्राञ्चमुद्धृत्योपसमाधायाग्निहोत्रं जुहुयादेतदेव तत्र कर्म ॥ २ ॥ तदाहुः । यस्य गार्हपत्योऽनुगच्छेत्किं तत्र कर्म का प्रायश्चित्तिरिति तꣳ ह्येकऽउल्मुकादेव निर्मन्थन्ति यतो वै पुरुषस्यान्ततो नश्यति ततो वै स तस्य प्रायश्चित्तिमिच्छतऽइति वदन्तस्तदु तथा न कुर्याडुल्मुकꣳ ह वै वादाय चरेयुरुल्मुकस्य वावत्रश्चमित्यमेव कुर्याडुल्मुकादङ्गारमादाय तमरण्योरभिविमथ्नीयाडुप ह तं काममाप्नोति य उल्मुकमथ्यऽउपो तं योऽरण्योरेतदेव तत्र कर्म ॥ ३ ॥ तदाहुः । यस्याग्नावग्निमभ्युद्धरेयुः किं तत्र कर्म का प्रायश्चित्तिरिनीश्वरौ वाऽएतौ सम्पद्याशान्तौ यजमानस्य प्रजां च पशूंश्च निर्दहस्तदभिमन्त्रयेत समितꣳ संकल्पेथाꣳ सम्प्रियौ रोचिष्णू सुमनस्यमानौ इषमूर्जमभि संवसानौ ॥ सं वां मनाꣳसि सं व्रता समु चित्तान्याकरम् अग्ने पुरीष्या-

धिपा भव त्वं न इषमूर्ज यजमानाय धेहीति शान्तिमेवाभ्यामेतद्वदति यजमानस्य प्रजायै पशूनामक्षितये ॥४॥ यद्युऽअस्य कृदयं व्येव लिखेत् । अग्नयेऽग्निमते ऽष्टाकपालं पुरोडाशं निर्वपेत्तस्यावृत्सप्तदश सामिधेनीरनुब्रूयाद्वार्त्रघ्नावाज्यभागौ विराजौ संयाज्येऽअथैते याज्यानुवाक्येऽअग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा कव्यवाड्नुक्वास्य इत्यथ याज्या त्वꣳ ह्यग्नेऽअग्निना विप्रो विप्रेण सत्त्सता सखा सख्या समिध्यसऽइति शान्तिमेवाभ्यामेतद्वदति यजमानस्य प्रजायै पशूनामक्षितयाऽएतदेव तत्र कर्म ॥५॥ तदाहुः । यस्याहवनीयेऽननुगते गार्हपत्योऽनुगच्छेत्किं तत्र कर्म का प्रायश्चित्तिरिति तꣳ हैके तत एव प्राञ्चमुद्धरन्ति प्राणा वाऽअग्नयः प्राणानेवास्माऽएतद्धरामऽइति वदन्तस्तद्धु तथा न कुर्याद्यो हैनं तत्र ब्रूयात्प्राचो न्वाऽअयं यजमानस्य प्राणान्प्रारौत्सीन्मरिष्यत्ययं यजमान इतीश्वरो ह तथैव स्यात् ॥६॥ अथ हैके प्रत्यञ्चमाहरन्ति । प्राणोदानाविमाविति वदन्तस्तद्धु तथा न कुर्यात्स्वर्ग्यं वाऽएतद्यदग्निहोत्रं यो हैनं तत्र ब्रूयात्प्रति न्वाऽअयꣳ स्वर्गाल्लोकाद्वारुन्नास्येदꣳ स्वर्ग्यमिव भविष्यतीतीश्वरो ह तथैव स्यात् ॥७॥ अथ हैकेऽन्यं गार्हपत्यं मन्यन्ति । तद्धु तथा न कुर्याद्यो हैनं तत्र ब्रूयादग्नेर्न्वाऽअयमधि द्विषन्तं भ्रातृव्यमजीजनत त्विप्रेऽस्य द्विषन्भ्रातृव्यो जनिष्यते प्रियतमꣳ रोत्स्यतीतीश्वरो ह तथैव स्यात् ॥८॥ अथ हैकेऽनुगमध्यान्यं मन्यन्ति । तस्याशां नेयादपि यत्परिशिष्टमभूत्तदजीजसत नास्य दायादश्चन परिशेक्ष्यतऽइतीश्वरो ह तथैव स्यात् ॥९॥ इत्थमेव कुर्यात् । अरण्योरग्नी समारोक्योदङ्डुदवसाय निर्मथ्य नुक्वदसेत्तथा ह न कां चन परिचक्षां करोति नवावसानऽउऽअस्याभितोरात्रꣳ हुतं भवति ॥१०॥ ब्राह्मणम् ॥ ५ [४. ३.] ॥ ॥

अथ प्रातर्भस्मान्युद्धृत्य । गोमयेनालिप्यारण्योरेवाग्नी समारोक्य प्रत्यवस्यति मथित्वा गार्हपत्यमुद्धृत्याहवनीयमाहृत्यान्वाहार्यपचनमग्नये पथिकृतेऽष्टाकपालं

पुरोडाशं निर्वपेत्तस्यावृत्ता एव सप्तदश सामिधेनीरनुब्रूयाद्वार्त्रघ्नावाज्यभागौ विराजौ संयाज्येऽग्नेते याज्यानुवाक्ये वेत्था हि वेधोऽग्रधनः पथश्च देवाञ्जसा अग्ने यज्ञेषु सुक्रतवित्यथ याज्या देवानामपि पन्थामगन्म यच्छक्वाम तदनुप्रवोढुम् अग्निर्विद्वान्त्स यज्ञात्सेदु होता सोऽअधरात्स ऋतून्कल्पयातीत्यग्निर्वै पथिकृत्पथामपिनेता स एवैनं यज्ञपथमपिनयत्येतदेव तत्र कर्म ॥१॥ तदाहुः । यस्याग्नयः सꣳसृज्येरन्किं तत्र कर्म का प्रायश्चित्तिरिति स यदि परस्ताद्दक्षन्नभीयात्तद्विद्यात्परस्तान्मा शुक्रमागन्नुप मां देवाः प्राभूवञ्छ्रेयान्भविष्यामीति यद्युऽअस्य हृदयं व्येव लिखेदग्नये विविचयेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्यावृत्ता एव सप्तदश सामिधेनीरनुब्रूयाद्वार्त्रघ्नावाज्यभागौ विराजौ संयाज्येऽग्नेते याज्यानुवाक्ये वि ते विष्वग्वातजूतासोऽअग्ने भामासः शुचे शुचयश्चरन्ति तुविम्रक्षासो दिव्या नवग्वा वनावनन्ति धृषता रुजन्त इत्यथ याज्या त्वामग्ने मानुषीरीडते विशो होत्राविदं विविचिꣳ रत्नधातमम् गुहा सन्तꣳ सुभग विश्वदर्शतं तुविष्वणसꣳ सुयजं घृतश्रियमित्यथो खलु यो द्विषतो भ्रातृव्याद्याविवृत्सेत तत्काम एतया यजेत वि खल्वेवास्माद्वर्तत एतदेव तत्र कर्म ॥२॥ यद्वयमितो दक्षन्नभीयात् । तद्विद्याद्भिद्विषन्तं भ्रातृव्यं भविष्यामि श्रेयान्भविष्यामीति यद्युऽअस्य हृदयं व्येव लिखेदग्नये संवर्गायाष्टाकपालं पुरोडाशं निर्वपेत्तस्यावृत्ता एव सप्तऽऽग्नेते याज्यानुवाक्ये परस्याऽअधि संवतोऽवराँ२॥ऽअभ्यानर यत्राहमस्मि ताँ२॥ऽअवेत्यथ याज्या मा नोऽअस्मिन्महाधने परावर्भारभृद्यथा सं वर्गꣳ सꣳ रयिं जयेत्यथो खलु यो द्विषतो भ्रातृव्यात्संविवृत्सेत तत्काम एतया यजेत सꣳ खल्वेवास्माद्वृङ्क्तऽएतदेव तत्र कर्म ॥३॥ तदाहुः । यस्य वैद्युतो दक्षेत्किं तत्र कर्म का प्रायश्चित्तिरिति तद्विद्याद्उपरिष्टान्मा शुक्रमागन्नुप मां देवाः प्राभूवञ्छ्रेयान्भविष्यामीति यद्युऽअस्य हृदयं व्येव लिखेदग्नयेऽप्सुमतेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्यावृत्ता एव सप्त॰

ऽग्नयेऽन्ते याज्यानुवाक्येऽग्नऽस्वग्ने सधिष्टव सौषधीरनुरुध्यसे गर्भे सञ्जायसे पुनरित्यथ याज्या गर्भोऽस्योषधीनां गर्भो वनस्पतीनाम् गर्भा विश्वस्य भूतस्याग्ने गर्भोऽअपामसीति शान्तिमेवाभ्यासेतद्वदति यजमानस्य प्रजायै पशूनामक्षुसाया ऽएतदेव तत्र कर्म ॥४॥ तदाहुः । यस्याग्नयोऽमेध्यैरग्निभिः संऽसृज्येरन्किं तत्र कर्म का प्रायश्चित्तिरित्यग्नये शुचयेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्यावृत्ता एव सप्त॰ ऽग्नयेऽन्ते याज्यानुवाक्येऽग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः शुची रोचतऽआहुत इत्यथ याज्योद्ये शुचयस्तव शुक्रा भ्राजन्त ईरते तव ज्योतीऽष्यर्चय इति शान्तिमेवा॰ ॥५॥ तदाहुः । यस्याहवनीयमनुद्धृतमादित्योऽभ्यस्तमियात्किं तत्र कर्म का प्रायश्चित्तिरित्येते वै रश्मयो विश्वे देवास्तेऽस्मादपप्रयन्ति तदस्मै व्यृध्यते यस्माद्देवा अपप्रयन्ति तामनु व्यृद्धिं यश्च वेद यश्च न ताऽउभावाहुतुरनुद्धृतमस्याभ्यस्तमगादिति तत्रेत्थं कुर्याद्धरितऽ हिरण्यं दर्भे प्रबध्य पश्चाद्धर्तवै ब्रूयात्तदेतस्य रूपं क्रियते य एष तपत्यहर्वाऽएतद्धरो रूपं क्रियते पवित्रं दर्भाः पवयत्येवैनं तद्येध्ममादीप्य प्राञ्चऽ हर्तवै ब्रूयाद्ब्राह्मणा आर्षेय उद्धरेद्ब्राह्मणो वाऽआर्षेयः सर्वा देवताः सर्वाभिरेवैनं तद्देवताभिः समर्धयति तमुपसमाधाय प्रतिपरेत्य गार्हपत्यऽआज्यमधिश्रित्योद्वास्योत्पूयावेक्ष्य चतुर्गृहीतमाज्यं गृहीत्वा समिधमुपसंगृह्य प्राङुदाद्रवत्यथाहवनीये समिधमभ्याधाय दक्षिणं ज्ञान्वाच्य जुहोति विश्वेभ्यो देवेभ्यः स्वाहेति स यथा ब्राह्मणमावसथवासिनं क्रुद्धं यत्तमुद्धवेहुतोपमन्त्रयेतैवमेवैतद्विश्वान्देवानुपमन्त्रयते जानन्ति हैनमुप हैनमावर्तन्तऽएतदेव तत्र कर्म ॥६॥ तदाहुः । यस्याहवनीयमनुद्धृतमादित्योऽभ्युदियात्किं तत्र कर्म का प्रायश्चित्तिरित्येते वै रश्मयो विश्वे देवास्तेऽस्मादृषिवाऽसोऽपप्रयन्ति तदस्मै व्यृध्यते यस्माद्देवा अपप्रयन्ति तामनु व्यृद्धिं यश्च वेद यश्च न ताऽउभावाहुतुरनुद्धृतमस्याभ्युदगादिति तत्रेत्थं कुर्याद्रजतऽ हिरण्यं दर्भे प्रबध्य पुरस्ताद्धर्तवै ब्रूयात्तच्चन्द्रमसो

ऽपं क्रियते रात्रिर्वै चन्द्रमास्तद्रात्रे ऽपं क्रियते पवित्रं दर्भाः पवयत्येवैनं तद्ये-ध्ममादीप्यान्वश्च कर्तवै ब्रूयाद्ब्राह्मण आर्षेय उद्धरेद्ब्राह्मणो वाऽआर्षेयः सर्वा देवताः सर्वाभिरेवैनं तद्देवताभिः समर्धयति तमुपसमाधाय प्रतिपरेत्य गार्हपत्य ऽआज्यमधिश्रित्योद्वास्योत्पूयावेक्ष्य यथागृहीतमाज्यं गृह्णीत्वा समिधमुपसंगृह्य प्रा-ङुदाद्रवत्यथाहवनीये समिधमभ्याधाय दक्षिणं ज्ञान्वाच्य जुहोति विश्वेभ्यो देवे-भ्यः स्वाहेति सोऽसावेव बन्धुर्न हु वै तत्र का चनार्तिर्न रिष्टिर्भवति यत्रैषा प्रायश्चित्तिः क्रियतऽएतदेव तत्र कर्म ॥७॥ ब्राह्मणम् ॥६ [४. ४.] ॥ चतुर्थो ऽध्यायः [७८.] ॥ ॥

तदाहुः । यदेष दीर्घसत्त्र्यग्निहोत्रं जुहुत्प्रवसन्म्रियेत जुहुयुरस्माइ३ नाइ३ऽइति तद्वै के होतव्यं मन्यन्तऽआगन्तोरिति तदु तथा न कुर्यादुतस्थानो वाऽएष तस्मै यदेनꣳ शवदक्ष्यायाऽइव जुहुयुर्यज्ञाय वाऽएष आकृतिभ्यस्तस्थानः स हैनममृष्य-माणास्तृप्रꣳ सचते ॥१॥ अथ हैकऽआहुः । एवमेवान्वाहिता अक्ष्यमानाः शयी-रन्निति तदु तथा न कुर्यादुतस्थानो वाऽएष तस्मै यदेनꣳ शवदक्ष्यायाऽइवेन्धी-रन्यज्ञाय वाऽएष आकृतिभ्यस्तस्थानः स हैनममृष्यमाणास्तृप्रꣳ सचते ॥२॥ अथ हैकेऽरण्योः । अग्नी समारोप्य निदधति तमाहृते निर्मन्थन्ति तदु तथा न कुर्या-दुतस्थानो वाऽएष तस्मै यदेनꣳ शवदक्ष्यायाऽइव निर्मन्थेयुर्यज्ञाय वाऽएष आ-कृतिभ्यस्तस्थानः स हैनममृष्यमाणास्तृप्रꣳ सचते ॥३॥ इत्थमेव कुर्यात् । निवा-न्यवत्सामेष्टवै ब्रूयात्तस्यै पयसा जुहुयादार्ति वाऽएतत्पयो यन्निवान्यवत्सायाऽआ-र्तिमेतदग्निहोत्रं यन्मृतस्य तदार्तिनैव तदार्तिं निष्कृत्य श्रेयान्भवति ॥४॥ तदप्युप-मास्ति । यद्वौ रथौ मृदितौ समागच्छेताꣳ स्यादेवान्यतरः स्यदायेति ॥५॥ तस्य वा ऽएतस्याग्निहोत्रस्योपचारः । प्राचीनावीती दोहयति यज्ञोपवीती वै देवेभ्यो दो-हयत्यथैवं पितृणाम् ॥६॥ नाङ्गारेषधिश्रयति । यद्वाङ्गारेषधिश्रयेदेवत्रा कुर्याद्गार्ह-

पत्याडुप्तं भस्म दक्षिणा निरुप्य तस्मिन्नेनदधिश्रयति पितृदेवत्यमेवैनत्तत्करोति ॥७॥ नावद्योतयति नापः प्रत्यानयति । यद्धावद्योतयेद्यदपः प्रत्यानयेद्देवत्रा कुर्यान्न त्रिः प्रतिष्ठापयꣳ हरति यत्त्रिः प्रतिष्ठापयꣳ हरेद्देवत्रा कुर्यात्सकृदेव निकर्षन्हरति पितृदेवत्यमेवैनत्तत्करोति ॥८॥ नोन्नेष्यामीत्याह । न चतुरुन्नयति यद्धोन्नेष्यामीति ब्रूयाच्चतुरुन्नयेद्देवत्रा कुर्यात्सकृदेव तूष्णीं न्यक्पर्यस्यति पितृदेवत्यमेवैनत्तत्करोति ॥९॥ नोपरिष्टात्समिधमभ्यस्य हरति । यद्धोपरिष्टात्समिधमभ्यस्य हरेद्देवत्रा कुर्यादधस्ताडुपास्य हरति पितृदेव॰ ॥१०॥ नोत्तरेण गार्हपत्यमेति । यद्धोत्तरेण गार्हपत्यमियाद्देवत्रा कुर्याद्दक्षिणेन गार्हपत्यमेति पितृदेव॰ ॥११॥ अथ यान्यमून्युदीचीनाग्राणि तृणानि भवन्ति । दक्षिणाग्राणि तानि करोति पितृदेवत्यमेवैनत्तत्करोत्यथाहवनीये समिधमभ्याधाय सव्यं जान्वाच्य सकृदेव तूष्णीं न्यक्पर्यस्यति पितृदेव॰ नोदिङ्ङ्यति नोपमृष्टे न प्राश्नाति नोडुह्यति पितृदेव॰ ॥१२॥ तदाहुः । यदेष दीर्घसत्त्र्यग्निहोत्रं जुह्वत्प्रवसन्म्रियेत कथमेनमग्निभिः कुर्युरिति तꣳ हैके दग्धाहरन्ति तमाहृतमग्निभिः संग्रापयन्ति तदु तथा न कुर्याद्यथान्यस्यां योनौ रेतः सिक्त तदन्यस्या प्रजननविषेत्तादृक्तदस्थीन्येतान्याहृत्य कृष्णाजिने न्युप्य पुरुषविधि विधायोर्णाभिः प्रहाव्याख्येनाभिघार्य तमग्निभिः समुपोषेत्तदेनꣳ स्वाद्योनेः प्रजनयतीति ॥१३॥ तꣳ हैके ग्रामाग्निना दहन्ति । तदु तथा न कुर्यादेष वै विश्वात्क्रव्यादग्निः स हैनमीश्वरः सपुत्रꣳ सपशुꣳ समत्तोः ॥१४॥ अथ हैके प्रदव्येन दहन्ति । तदु तथा न कुर्यादेष वाऽअशान्तोऽग्निः स हैनमीश्वरः सपुत्रꣳ सपशुं प्रदग्धोः ॥१५॥ अथ हैकऽउल्मुकेन दहन्ति । तदु तथा न कुर्यादेष वै रुद्रियोऽग्निः स हैनमीश्वरः सपुत्रꣳ सपशुमभिमत्तोः ॥१६॥ अथ हैकेऽन्तरेणाग्नीꣳश्चितिं चित्वा । तमग्निभिः समुपोषन्त्येतद्वै यजमानस्यायतनं यदन्तरेणाग्नीनिति तदु तथा न कुर्याद्यो हैनं तत्र ब्रूयान्मध्ये न्वाऽअयं ग्रामस्या-

शासनमजीजनत क्षिप्रेऽस्याशासनं जनिष्यते प्रियतमꣳ रोत्स्यतीतीश्वरो ह तथैव स्यात् ॥१७॥ ब्राह्मणम् ॥७ [५. १.] ॥ ॥

अथ ह स्माह नाको मौद्गल्यः । मरिष्यन्तं चेद्यजमानं मन्येत यत्रैवास्माऽआशासनं जोषितꣳ स्यात्तद्रण्योरग्नी समारोप्य निर्मथ्य जुहुयादसेत्स यदास्माल्लोकाद्यजमानः प्रेयात् ॥१॥ अथैनमन्तरेणाग्नीꣳस्थितिं चित्वा । तमग्निभिः समुपोषेदिति तदु तथा न कुर्यादतस्थानो वाऽएष तस्मै यदेनꣳ शवदक्ष्यायाऽइव जुहुयुर्यज्ञाय वाऽएष आहुतिभ्यस्तस्थानः स ह्येनममृष्यमाणास्तृप्रꣳ सचते ॥२॥ इत्यमेव कुर्यात् । तिस्र एव स्थालीरेष्टवे ब्रूयात्तासु गोमयानि च शुम्बलानि वावधाय नाना त्रिषग्निषु प्रवृह्यात्ते ये ततः संतापादग्नयो ज्ञायेरंस्तैरेनं दहेयुस्तथाह तैरेव दग्धो भवति नो प्रत्यक्षमिव ॥३॥ तस्माद्प्येतदृषिणाभ्यनूक्तम् । यो अग्निरग्नेरध्यजायत शोकात्पृथिव्या उत वा दिवस्परि येन प्रजा विश्वकर्मा जजान तमग्ने केडः परि ते वृणक्तिति यथऽर्क्तथा ब्राह्मणम् ॥४॥ अथैनं विपुरीषं कृत्वा । अस्यां पुरीषं प्रतिष्ठापयति पुरीषं वाऽइयं तत्पुरीषऽएवैतत्पुरीषं दधाति या ह वाऽअस्यैषा वृकला सपुरीषा तस्यै ह विदग्धायै सृगालः सम्भवति नेत्सृगालः सम्भवदिति तदु तथा न कुर्यात्क्षोधुका ह्यस्य प्रजा भवति तमक्षरतः प्रक्षाल्याज्येनान्वनक्ति मेध्यमेवैनत्तत्करोति ॥५॥ अथास्य सप्तसु प्राणायतनेषु । सप्त हिरण्यशकलान्प्रत्यस्यति ज्योतिर्वाऽअमृतꣳ हिरण्यं ज्योतिरेवास्मिंस्तदमृतं दधाति ॥६॥ अथैनमन्तरेणाग्नीꣳस्थितिं चित्वा । कृष्णाजिनमुत्तरलोम प्राचीनग्रीवं प्रस्तीर्य तस्मिन्नेनमुत्तानं निपाद्य जुहूं घृतेन पूर्णां दक्षिणे पाणावादधाति सव्यऽऽज्यभृतमुरसि ध्रुवां मुखेऽग्निहोत्रहवणीं नासिकयोः स्रुवौ कर्णयोः प्राशित्रहरणे शीर्षञ्चमसं प्रणीताप्रणयनं पार्श्वयोः शूर्पेऽउदरे पात्रीꣳ समवत्तधानौ पृषदाज्यवतीꣳ शिश्नस्यान्ते शम्यामाण्डयोरन्ते वृषारावावन्वगुलूखलं च मुसलं चान्तरे-

णोदूऽअन्यानि यज्ञपात्राणि दक्षिणे पाणौ स्फ्यम् ॥७॥ स एष यज्ञायुधी यज्ञमानः । यथा बिभ्यदामोषमतीयादेवमेव योऽस्य स्वर्गे लोको ज्ञितो भवति तमभ्यत्येति तमेते संताप्या अग्नयो यथा पुत्राः पितरं प्रोषुषमागतꣳ शिवमुपस्पृशन्त्येवꣳ शिवꣳ क्रैवैतमुपस्पृशन्ति प्र क्रैवैनं कल्पयन्ति ॥८॥ तं यदि गार्हपत्यः पूर्वः प्राप्नुयात् । तद्विद्यात्प्रतिष्ठ एनमग्निः पूर्वः प्रापत्प्रतिष्ठास्यति प्रत्येव तेऽस्मिंल्लोके स्थास्यन्ति येऽस्मात्प्रत्यञ्च इति ॥९॥ अथ यद्याहवनीयः । तद्विद्यान्मुख्य एनमग्निः पूर्वः प्रापन्मुखतो लोकानज्ञैषीन्मुखमेव तेऽस्मिंल्लोके भविष्यन्ति येऽस्मात्प्रत्यञ्च इति ॥१०॥ अथ यद्यन्वाहार्यपचनः । तद्विद्यादन्नाद एनमग्निः पूर्वः प्रापदन्नमत्स्यत्यन्नमेव तेऽस्मिंल्लोकेऽत्स्यन्ति येऽस्मात्प्रत्यञ्च इति ॥११॥ अथ यदि सर्वे सकृत् । तद्विद्यात्कल्याणं लोकमज्ञैषीदित्येतान्यस्मिन्विज्ञानानि ॥१२॥ तां वाऽएताम् । यज्ञमानात्माकृतिमत्ततो जुहोति स योऽस्य स्वर्गे लोको ज्ञितो भवति तत आकृतिमयोऽमृतः सम्भवति ॥१३॥ अथ यान्यश्ममयानि च मृन्मयानि च भवन्ति । तानि ब्राह्मणाय दद्याद्ध्वोदकमु ह तं मन्यन्ते यस्तानि प्रतिगृह्णात्यप एवैनान्यभ्यवहरेयुरापो वाऽअस्य सर्वस्य प्रतिष्ठा तदेनमप्स्वेव प्रतिष्ठापयति ॥१४॥ अथैतामाकृतिं जुहोति । पुत्रो वा भ्राता वा यो वान्यो ब्राह्मणः स्यादस्मात्त्वमधि ज्ञातोऽसि त्वदयं ज्ञायतां पुनः असौ स्वर्गाय लोकाय स्वाहेत्यनपेक्षमेत्याप उपस्पृशन्ति ॥१५॥ ब्राह्मणम् ॥८ [५. २.] ॥ द्वितीयः प्रपाठकः ॥ कण्डिकासंख्या१५ ॥ पञ्चमोऽध्यायः [७१.] ॥ ॥

सोमो वै राजा यज्ञः प्रजापतिः । तस्यैतास्तन्वो या एता देवता या एता आकृतीर्जुहोति ॥१॥ स यद्यज्ञस्यार्हेत् । यां तत्प्रति देवतां मन्येत तामनुसमीक्ष्य जुहुयाद्यदि दीक्षोपसत्स्वाहवनीये यदि प्रसुतऽआग्नीध्रे वि वाऽएतद्यज्ञस्य पर्व स्रꣳसते यद्व्रुलति सा यैव तर्हि तत्र देवता भवति तयैवैतद्देवतया यज्ञं भिषज्यति

तया देवतया यज्ञं प्रतिसंदधाति ॥२॥ स यद्येनं मनसाभिध्यातः । यज्ञो नोपनमेत्परमेष्ठिने स्वाहेति जुहुयात्परमेष्ठी हि स तर्हि भवत्यप पाप्मानꣳ हतꣳ हैवैनं यज्ञो नमति ॥३॥ अथ यद्येनं वाचाभिव्याहृतः । यज्ञो नोपनमेत्प्रजापतये स्वाहेति जुहुयात्प्रजापतिर्हि स तर्हि भवत्यप पा° ॥४॥ अथ यस्य राजानमह्वेवा । नाहरन्त एयुरन्धसे स्वाहेति जुहुयादन्धो हि स तर्हि भ° ॥५॥ अथ यदि सातः । किंचिदापद्येत सवित्रे स्वाहेति जुहुयात्सविता हि स तर्हि भ° ॥६॥ अथ यदि दीक्षासु । किंचिदापद्येत विश्वकर्मणे स्वाहेति जुहुयाद्विश्वकर्मा हि स तर्हि भ° ॥७॥ अथ यदि सोमक्रयणयाम् । किंचिदापद्येत पूष्ण स्वाहेति जुहुयात्पूषा हि स तर्हि भ° ॥८॥ अथ यदि क्रयायोपोत्थितः । किंचिदापद्येतेन्द्राय च मरुद्भ्यश्च स्वाहेति जुहुयादिन्द्रश्च हि स तर्हि मरुतश्च भ° ॥९॥ अथ यदि पण्यमानः । किंचिदापद्येतासुराय स्वाहेति जुहुयादसुरो हि स तर्हि भ° ॥१०॥ अथ यदि क्रीतः । किंचिदापद्येत मित्राय स्वाहेति जुहुयान्मित्रो हि स तर्हि भ° ॥११॥ अथ यद्यूरावासन्नः । किंचिदापद्येत विष्णवे शिपिविष्टाय स्वाहेति जुहुयाद्विष्णुर्हि स तर्हि शिपिविष्टो भ° ॥१२॥ अथ यदि पर्युह्यमाणः । किंचिदापद्येत विष्णवे नरंधिषाय स्वाहेति जुहुयाद्विष्णुर्हि स तर्हि नरंधिषो भ° ॥१३॥ अथ यद्यागतः । किंचिदापद्येत सोमाय स्वाहेति जुहुयात्सोमो हि स तर्हि भ° ॥१४॥ अथ यद्यासन्द्यामासन्नः । किंचिदापद्येत वरुणाय स्वाहेति जुहुयाद्वरुणो हि स तर्हि भ° ॥१५॥ अथ यद्याग्नीध्रगतः । किंचिदापद्येताग्नये स्वाहेति जुहुयादग्निर्हि स तर्हि भ° ॥१६॥ अथ यदि हविर्धानगतः । किंचिदापद्येतेन्द्राय स्वाहेति जुहुयादिन्द्रो हि स तर्हि भ° ॥१७॥ अथ यद्युपावह्रियमाणः । किंचिदापद्येताथर्वणे स्वाहेति जुहुयादथर्वा हि स तर्हि भ° ॥१८॥ अथ यद्यꣳशुषु न्युप्तः । किंचिदापद्येत विश्वेभ्यो देवेभ्यः स्वाहेति जुहुयाद्विश्वे हि स तर्हि देवा भ° ॥१९॥ अथ यद्याप्याय्यमानः । किंचि-

दापयेत विष्णवऽआप्रीतपाय स्वाहेति जुहुयाद्विष्णुर्हि स तर्ह्याप्रीतपा भ° ॥२०॥ अथ यद्यभिषूयमाणः । किंचिदापयेत यमाय स्वाहेति जुहुयाद्यमो हि स तर्हि भ° ॥२१॥ अथ यदि सम्भ्रियमाणः । किंचिदापयेत विष्णवे स्वाहेति जुहुयाद्विष्णुर्हि स तर्हि भ° ॥२२॥ अथ यदि पूयमानः किंचिदापयेत वायवे स्वाहेति जुहुयाद्वायुर्हि स तर्हि भ° ॥२३॥ अथ यदि पूतः । किंचिदापयेत शुक्राय स्वाहेति जुहुयाच्छुक्रो हि स तर्हि भ° ॥२४॥ अथ यदि क्षीरश्रीः । किंचिदापयेत शुक्राय स्वाहेति जुहुयाच्छुक्रो हि स तर्हि भ° ॥२५॥ अथ यदि सक्तुश्रीः । किंचिदापयेत मन्थिने स्वाहेति जुहुयान्मन्थी हि स तर्हि भ° ॥२६॥ अथ यदि चमसेषून्नीतः । किंचिदापयेत विश्वेभ्यो देवेभ्यः स्वाहेति जुहुयाद्विश्वे हि स तर्हि देवा भ° ॥२७॥ अथ यदि क्रोमायोद्यतः । किंचिदापयेतासवे स्वाहेति जुहुयादसुर्हि स तर्हि भ ॥२८॥ अथ यदि क्रूयमानः । किंचिदापयेत रुद्राय स्वाहेति जुहुयाद्रुद्रो हि स तर्हि भ° ॥२९॥ अथ यद्यभ्यावृत्तः । किंचिदापयेत वाताय स्वाहेति जुहुयाद्वातो हि स तर्हि भ° ॥३०॥ अथ यदि प्रतिख्यातः । किंचिदापयेत नृचक्षसे स्वाहेति जुहुयान्नृचक्षा हि स तर्हि भ° ॥३१॥ अथ यदि भक्ष्यमाणः । किंचिदापयेत भक्षाय स्वाहेति जुहुयाद्भक्षो हि स तर्हि भ° ॥३२॥ अथ यदि नाराशꣳसेषु सन्नः । किंचिदापयेत पितृभ्यो नाराशꣳसेभ्यः स्वाहेति जुहुयात्पितरो हि स तर्हि नाराशꣳसा भ° ॥३३॥ अथ यद्यवभृथायोद्यतः । किंचिदापयेत सिन्धवे स्वाहेति जुहुयात्सिन्धुर्हि स तर्हि भ° ॥३४॥ अथ यद्यभ्यवक्रियमाणः । किंचिदापयेत समुद्राय स्वाहेति जुहुयात्समुद्रो हि स तर्हि भ° ॥३५॥ ॥ शतम् ६२०० ॥ ॥ अथ यदि प्रप्लुतः । किंचिदापयेत सलिलाय स्वाहेति जुहुयात्सलिलो हि स तर्हि भवत्यप पाप्मानꣳ हतऽएनं यज्ञो नमति ॥३६॥ ता वाऽएताः । चतुस्त्रिꣳशतमाज्याहुतीर्जुहोति त्रयस्त्रिꣳशद्वै देवाः प्रजापतिश्चतुस्त्रिꣳश एतदु सर्वैर्देवैर्यज्ञं भिषज्यति

सर्वैर्दैर्वैर्यज्ञं प्रतिसंदधाति ॥३७॥ ता ब्रह्मैव जुहुयात् । नाब्रह्मा ब्रह्मा वै यज्ञस्य दक्षिणतः आस्ते ब्रह्मा यज्ञं दक्षिणतो गोपायति यदि तु ब्रह्मा न विद्यादपि य एव कश्च विद्यात्स जुहुयाद्ब्रह्माणं वामदेव्य ब्रह्मणातिसृष्टस्तासां वाऽऽहुतासां व्याहृतीनां बन्धुता वसिष्ठो ह विराजं विदां चकार ताꣳ हेन्द्रोऽभिदध्यौ ॥३८॥ स होवाच । ऋषे विराजꣳ ह वै वेत्थ तां मे ब्रूहीति स होवाच किं मम ततः स्यादिति सर्वस्य च ते यज्ञस्य प्रायश्चित्तिं ब्रूयाꣳ रूपं च वा दर्शयेयेति स होवाच यन्नु मे सर्वस्य यज्ञस्य प्रायश्चित्तिं ब्रूयाः किमु स स्याद्यꣳ वꣳ रूपं दर्शयेया इति जीवस्वर्ग एवास्माल्लोकात्प्रेयादिति ॥३९॥ ततो हैतामृषिरिन्द्राय विराजमुवाच । इयं वै विराडिति तस्माद्योऽस्यै भूयिष्ठं लभते स एव श्रेष्ठो भवति ॥४०॥ अथ हैतामिन्द्र ऋषये । प्रायश्चित्तिमुवाचाग्निर्होत्रादुयज्ञा मरुत उक्थात्ता ह स्मैताः पुरा व्याहृतीर्वसिष्ठा एव विदुस्तस्माद्ध स्म पुरा वासिष्ठ एव ब्रह्मा भवति यत्स्वेना अथैतर्हि य एव कश्चाधीते ततोऽप्येतर्हि य एव कश्च ब्रह्मा भवति स ह वै ब्रह्मा भवितुमर्हति स वा ब्रह्मन्नित्यामन्त्रितः प्रतिशृणुयाद्य एवमेता व्याहृतीर्वेद ॥४१॥ ब्राह्मणम् ॥ १ [६. १.] ॥ षष्ठोऽध्यायः [८०.] ॥ ॥

विश्वरूपं वै त्वाष्ट्रमिन्द्रोऽहन् । तं त्वष्टा हतपुत्रोऽभ्यचरत्सोऽभिचरणीयमपेन्द्रꣳ सोममाहरत्तस्येन्द्रो यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्स विष्वङ् व्याहृत्तस्येन्द्रियं वीर्यमङ्गादङ्गादस्रवत् ॥१॥ तस्यान्निभ्यामेव तेजोऽस्रवत् । सोऽग्निः पशुरभवद्भ्रोऽथ यत्पद्भ्यस्ते गोधूमा यदस्रुभ्यस्तत्कुवलम् ॥२॥ नासिकाभ्यामेवास्य वीर्यमस्रवत् । सोऽविः पशुरभवन्मेषोऽथ यल्लेष्मणास्ता उपवाका यत्स्नीहा तद्वदरं ॥३॥ मुखादेवास्य बलमस्रवत् । स गौः पशुरभवदृषभोऽथ ये फेनास्ते यवा यत्स्नेहस्तत्कर्कन्धु ॥४॥ श्रोत्रादेवास्य यशोऽस्रवत् । तदेकशफमभ-

वद्श्वोऽश्वतरो गर्दभः ॥५॥ स्तनाभ्यामेवास्य शुक्रमस्रवत् । तत्पयोऽभवत्पशूनां ज्योतिरुरस एवास्य हृदयाद्विषिरस्रवत्स श्येनोऽपाष्ठिहाभवद्यसाᳬ राज्ञा ॥६॥ नाभ्या एवास्य शूषोऽस्रवत् । तत्सोसमभवन्नायो न हिरण्यᳬ रेतस एवास्य द्रुपमस्रवत्तत्सुवर्णᳬ हिरण्यमभवद्विश्नादेवास्य रसोऽस्रवत्सा परिस्रुदभवत्स्फिगीभ्यामेवास्य भासोऽस्रवत्सा सुराभवद्वस्य रसः ॥७॥ मूत्रादेवास्यौज्ञोऽस्रवत् । स वृकोऽभवदारण्याणां पशूनां जूतिर्वधादेवास्य मन्युरस्रवत्स व्याघ्रोऽभवदारण्याणां पशूनाᳬ राज्ञा लोहितादेवास्य सहोऽस्रवत्स सिᳬहोऽभवदारण्यानां पशूनामीशः ॥८॥ लोमभ्य एवास्य चित्तमस्रवत् । ते श्यामाका अभवंस्तच एवास्यापचितिरस्रवत्सोऽश्वत्थो वनस्पतिरभवन्माᳬसेभ्य एवास्योर्गस्रवत्स उडुम्बरोऽभवदस्थिभ्य एवास्य स्वधास्रवत्स न्यग्रोधोऽभवन्मज्ज्ञभ्य एवास्य भक्तः सोमपीथो ऽस्रवत्ते व्रीह्योऽभवन्नेवमस्येन्द्रियाणि वीर्याणि व्युद्क्रामन् ॥९॥ अथ ह वै तर्हि । नमुचिनैवासुरेण सह चचार स ऐक्षत नमुचिरपुनर्वाऽअयमभूद्धन्तास्येन्द्रियं वीर्यᳬ सोमपीथमन्नाद्यᳬ हराणीति तस्यैतयैव सुरयेन्द्रियं वीर्यᳬ सोमपीथमन्नाद्यमहरत्स ह न्यर्णाः शिश्ये तं देवा उपसंनमिरे श्रेष्ठो वै नोऽयमभूत्तमिमं पाप्माविदद्धन्त्वेमं भिषज्यामेति ॥१०॥ तेऽश्विनावब्रुवन् । युवं वै ब्रह्माणौ भिषजौ स्थो युवमिमं भिषज्यतमिति तावब्रूतामस्तु नौ भाग इति तेऽब्रुवन्य एषोऽज्ञः स वां भाग इति तथेति तस्मादाश्विनो धूम्रो भवति ॥११॥ ते सरस्वतीमब्रुवन् । त्वं वै भेषज्यमसि त्वमिमं भिषज्येति साब्रवीदस्तु मे भाग इति तेऽब्रुवन्य एषोऽविः स ते भाग इति तथेति तस्मात्सारस्वतो मेषो भवति ॥१२॥ अथाब्रुवन् । एतावद्वाऽअस्मिन्नेतर्हि यावदयमृषभोऽस्यैवायमस्त्विति तथेति तस्मादैन्द्र ऋषभो भवति ॥१३॥ तावश्विनौ च सरस्वती च । इन्द्रियं वीर्यं नमुचेराहृत्य तदस्मिन्पुनरदधुस्तं पाप्मनोऽत्रायन्त सुत्रातं बतैनं पाप्मनोऽत्रास्महीति

तद्वाव सौत्रामण्यभवत्तत्सौत्रामण्यै सौत्रामणीत्वं त्रायते मृत्योरात्मानमप पाप्मानꣳ हते य एवमेतत्सौत्रामण्यै सौत्रामणीत्वं वेद त्रयस्त्रिꣳशद्दक्षिणा भवन्ति त्रयस्त्रिꣳशद्वै तं देवता अभिषज्यंस्तस्मादाङ्गर्भेषजं दक्षिणा इति ॥१४॥ ब्राह्मणम् ॥ २ [७. १.] ॥ ॥

अप वाऽएतस्मात् । तेज इन्द्रियं वीर्यं क्रामति यꣳ सोमोऽतिपवतऽऊर्ध्वं चावाञ्चं वा ॥१॥ तदाङ्गः । अन्नं वाऽएतद्ब्राह्मणस्य यत्सोमो न वै सोमेन ब्राह्मणः सोमवामी स यो वाऽअलं भूत्यै सन्भूतिं न प्राप्नोति यो वालं पशुभ्यः सन्यशून्न विन्दते स सोमवामी पशवो हि सोम इति ॥२॥ स एतमाश्विनं धूम्रमालभेत । सारस्वतं मेषमैन्द्रमृषभमश्विनौ वै देवानां भिषजौ ताभ्यामेवैनं भिषज्यति सरस्वती भेषजं तयैवास्मै भेषजं करोतीन्द्र इन्द्रियं वीर्यं तेनैवास्मिन्निन्द्रियं वीर्यं दधाति ॥३॥ चक्षुर्वाऽअश्विनौ तेजः । यदाश्विनो भवति चक्षुरेवास्मिंस्तत्तेजो दधात्यथो श्रोत्रꣳ समानꣳ हि चक्षुश्च श्रोत्रं च ॥४॥ प्राणः सरस्वती वीर्यम् । यत्सारस्वतो भवति प्राणमेवास्मिंस्तद्वीर्यं दधात्यथोऽअपानꣳ समानꣳ हि प्राणश्चापानश्च ॥५॥ वागिन्द्रो बलम् । यदैन्द्रो भवति वाचमेवास्मिंस्तद्बलं दधात्यथो मनः समानꣳ हि वाक् मनश्च ॥६॥ आश्विनोरजाः । सारस्वतीरवीरिन्द्रीर्गाव इत्याऽऽर्ष्यदेते पशव आलभ्यन्तऽएताभिरेव देवताभिरेतान्यशून्यवरुन्द्धे ॥७॥ वडबानुशिशुर्भवति । यश एवैकशफमवरुन्द्धऽआरण्यानां पशूनां लोमानि भवन्त्यारण्यानां पशूनामवरुद्ध्यै वृकलोमानि भवन्त्योज एव क्षत्रमारण्याणां पशूनामवरुन्द्धे व्याघ्रलोमानि भवन्ति मन्युमेव राज्यमारण्यानां पशूनामवरुन्द्धे सिꣳहलोमानि भवन्ति सह एवेशामारण्यानां पशूनामवरुन्द्धे ॥८॥ व्रीहयश्च श्यामाकाश्च भवन्ति । गोधूमाश्च कुवलानि चोपवाकाश्च बदराणि च यवाश्च कर्कन्धूनि शष्पाणि च तोकानि चोभयमेव ग्राम्यं चान्नमारण्यं चावरुन्द्धे

ऽथोऽउभयेनैवान्नेन यथारूपमिन्द्रियं वीर्यमात्मन्धत्ते ॥ ९ ॥ सीसेन शष्पाणि क्रीणाति । ऊर्णाभिस्तोकानि सूत्रैर्व्रीहीनुभयोर्वाऽएतद्रूपमयसश्च हिरण्यस्य च यत्सीसमुभयꣳ सौत्रामणीष्टिश्च पशुबन्धश्चोभयस्यावरुद्ध्यै ॥ १० ॥ ऊर्णासूत्रेण क्रीणाति । तद्वाऽएतत्स्त्रीणां कर्म यदूर्णासूत्रं कर्म वाऽइन्द्रियं वीर्यं तदेतदुत्सन्नꣳ स्त्रीषु तथ्यदेवेन्द्रियं वीर्यमुत्सन्नꣳ स्त्रीषु तदेवावरुन्द्धे ॥ ११ ॥ तद्धैतदन्येऽध्वर्यवः । सीसेन क्लीबाञ्छष्पाणि क्रीणन्ति तत्तदिति न वाऽएष स्त्री न पुमान्यत्क्लीबो नेष्टिर्न पशुबन्धः सौत्रामणीति वदन्तस्तु तथा न कुर्यादुभयं वै सौत्रामणीष्टिश्च पशुबन्धश्च व्यृद्धमु वाऽएतन्मनुष्येषु यत्क्लीबो यज्ञमुखऽएव ते यज्ञस्य व्यृद्धिं दधति ये तथा कुर्वन्ति सोमविक्रयिण एव क्रीणीयात्सोमो वै सौत्रामणी यज्ञमुखऽएव तत्सोमरूपं करोति यज्ञस्य समृद्ध्यै ॥ १२ ॥ शतातृण्णा कुम्भी भवति । बह्वधेव हि स व्यस्रवदथो शतोन्मानो वै यज्ञो यज्ञमेवावरुन्द्धे सतं भवति सदेवावरुन्द्धे चषं भवत्यन्नाद्यस्यैवावरुद्ध्यै पवित्रं भवति पुनन्ति क्रोनं वालो भवति पाप्मनो व्यावृत्त्यै सुवर्णꣳ हिरण्यं भवति रूपस्यैवावरुद्ध्यै शतमानं भवति शतायुर्वै पुरुषः शतेन्द्रिय आयुरेवेन्द्रियं वीर्यमात्मन्धत्ते ॥ १३ ॥ आश्वत्थं पात्रं भवति । अपचितिमेवावरुन्द्धऽऔदुम्बरं भवत्यूर्जमेवावरुन्द्धे नैयग्रोधं भवति स्वधामेवावरुन्द्धे स्याल्यो भवन्ति पृथिव्याऽएवान्नाद्यमवरुन्द्धे ॥ १४ ॥ पालाशान्युपशयानि भवन्ति । ब्रह्म वै पलाशो ब्रह्मणैव स्वर्गं लोकं जयत्यपाष्ठिकस्य पत्रे भवतस्त्विषिमेव राज्यं वयसामवरुन्द्धे पञ्चत्रिꣳशदेतानि भवन्ति षट्त्रिꣳशदक्षरा वै बृहती बार्हताः पशवो बृहत्यैवास्मै पशूनवरुन्द्धे ॥ १५ ॥ तदाहुः । अन्यदेवत्याः पशवो भवन्त्यन्यदेवत्याः पुरोडाशा विलोमैतत्क्रियते कथमेतत्सलोम भवतीत्यैन्द्रः पशूनामुत्तमो भवत्यैन्द्रः पुरोडाशानां प्रथम इन्द्रियं वै वीर्यमिन्द्र इन्द्रियेणैवास्माऽइन्द्रियं वीर्यꣳ संदधातीन्द्रियेणेन्द्रियं वीर्यमवरुन्द्धे ॥ १६ ॥ सा-

वित्रः पुरोडाशो भवति । सवितृप्रसूतत्वायै वारुणो भवति वरुणो वाऽएतं गृह्णाति यः पाप्मना गृहीतो भवति वरुणेनैवैनं वरुणपाशान्मुञ्चत्यक्त्यो भवत्यक्तत एवैनं वरुणपाशात्प्रमुञ्चति ॥१७॥ एकादशकपाल ऐन्द्रो भवति । एकादशाक्षरा वै त्रिष्टुबिन्द्रियमु वै वीर्यं त्रिष्टुबिन्द्रियस्यैव वीर्यस्यावरुद्ध्यै ॥१८॥ द्वादशकपालः सावित्रो भवति। द्वादश वै मासाः संवत्सरस्य संवत्सरं वाऽअन्नाद्यमन्वायत्तꣳ संवत्सरादेवास्माऽअन्नाद्यमवरुन्द्धे ॥११॥ दशकपालो वारुणो भवति । दशाक्षरा वै विराडन्नं विराड्वरुणोऽन्नपतिर्वरुणेनैवास्माऽअन्नमवरुन्द्धे मध्यत एतैः पुरोडाशैः प्रचरति मध्यं वाऽएतेषां योनिः स्वादेवैनान्योनेः प्रजनयति ॥२०॥ वडवानुशिशुर्दक्षिणा भवति । उभयं वाऽएषा जनयत्यश्वं चाश्वतरं चोभयꣳ सौत्रामणीष्टिश्च पशुबन्धश्चोभयस्यैवावरुद्ध्यै ॥२१॥ ब्राह्मणम् ॥ ३ [७. २.] ॥ ॥

इन्द्रस्येन्द्रियमन्नस्य रसꣳ । सोमस्य भक्षꣳ सुरयासुरो नमुचिरक्रुत्सोऽश्विनौ च सरस्वतीं चोपाधावद्भेषानोऽस्मि नमुचये न वा दिवा न नक्तꣳ कृनानि न दण्डेन न धन्वना न पृथेन न मुष्टिना न शुष्केण नार्द्रेणाथ मऽइदमब्रुवन्नदिदं मऽआभिरीर्षयेति ॥१॥ तेऽब्रुवन् । अस्तु नोऽत्राप्यथाब्रूतामेति सकृ न एतदथाब्रूतेत्यब्रवीदिति ॥२॥ तावश्विनौ च सरस्वती च अपां फेनं वज्रमसिञ्चन्न शुष्को नार्द्र इति तेनेन्द्रो नमुचेरासुरस्य व्युष्टायाꣳ रात्रावनुदितऽआदित्ये न दिवा न नक्तमिति शिर उदवासयत् ॥३॥ तस्मादेतदृषिणाभ्यनूक्तम् । अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः विश्वा यदजय स्पृध इति पाप्मा वै नमुचिः पाप्मानं वाव तद्विषन्तं भ्रातृव्यꣳ रुक्वेन्द्रियं वीर्यमस्यावृङ्क्त स यो भ्रातृव्यवान्स्यात्स सौत्रामण्या यजेत पाप्मानमेव तद्विषन्तं भ्रातृव्यꣳ रुक्वेन्द्रियं वीर्यमस्य वृङ्क्ते तस्य शीर्षंश्छिन्ने लोहितमिश्रः सोमोऽतिष्ठत्तस्मादबीभत्सत तऽएतदन्धसोर्विपानमपश्यत्सोमो राजामृतꣳ सुत इति तेनैनꣳ स्वदयित्वात्मन्नदधत ॥४॥ स्वाद्वीं

वा स्वादुनेति सुराꣳ संदधाति । स्वदयत्येवैनां तीव्रां तीव्रेणेतीन्द्रियमेवास्मिन्द्धात्यमृताममृतेनेत्यायुरेवास्मिन्द्धाति मधुमतीं मधुमतेति रसमेवास्यां दधाति सृज्ञामि सꣳ सोमेनेति सोमरूपमेवैनां करोति ॥५॥ सोमोऽस्यश्विभ्यां पच्यस्व । सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्वेत्येता वाऽएतं देवता अग्रे यज्ञꣳ समभरंस्ताभिरेवैनꣳ सम्भरत्यथोऽएता एवैतद्देवता भागधेयेन समर्धयत्यासुनोति सुत्यायै तिस्रो रात्रीर्वसति तिस्रो हि रात्रीः सोमः क्रीतो वसति सोमरूपमेवैनां करोति ॥६॥ द्वे वेदी भवतः । द्वौ वाव लोकावित्याऽऊर्देवलोकश्चैव पितृलोकश्चेत्युत्तरान्या भवति दक्षिणान्योत्तरो वै देवलोको दक्षिणः पितृलोक उत्तरयैव देवलोकमवरुन्द्धे दक्षिणया पितृलोकम् ॥७॥ पयश्च सुरा च भवतः । सोमो वै पयोऽन्नꣳ सुरा पयसैव सोमपीथमवरुन्द्धे सुरयान्नाद्यं क्षत्रं वै पयो विट् सुरा सुरां पूत्वा पयः पुनाति विश एव तत्क्षत्रं जनयति विशो हि क्षत्रं ज्ञायते ॥८॥ वायोः पूतः पवित्रेण । प्रत्यङ्क्सोमो अतिद्रुत इति सोमातिपूतस्य पुनाति यथारूपमेवैनं पुनातीन्द्रस्य युज्यः सखेति यद्वेवास्य तेनेन्द्रियं वीर्यमतिक्रान्तं भवति तदस्मिन्पुनर्दधाति ॥९॥ वायोः पूतः पवित्रेण । प्राङ्क्सोमोऽअतिद्रुत इति सोमवामिनः पुनाति यथारूपमेवैनं पुनातीन्द्रस्य युज्यः सखेति यद्वेवास्य तेनेꣳ ॥१०॥ पुनाति ते परिस्रुतमिति । समृद्धिकामस्य पुनाति समृद्ध्यै सोमꣳ सूर्यस्य दुहितेति श्रद्धा वै सूर्यस्य दुहिता श्रद्धयैष सोमो भवति श्रद्धयैवैनꣳ सोमं करोति वारेण शश्वता तनेति वालेन ह्येषा पूयते ॥११॥ ब्रह्म क्षत्रं पवत इति पयः पुनाति । ब्रह्मण एव तत्क्षत्रं जनयति ब्रह्मणो हि क्षत्रं ज्ञायते तेज इन्द्रियमिति तेज एवास्मिन्निन्द्रियं वीर्यं दधाति सुरया सोम इति सुरया हि सोमः सुत आसुत इत्यासुताद्धि सूयते मदायेति मदाय वाव सोमो मदाय सुरोभावेव सोममदं च सुरामदं चावरुन्द्धे शुक्रेण देव देवताः पिपृग्धीति शुक्रेण देव देवताः

प्रीणीहीत्येवैतदाह रसेनान्नं यजमानाय धेहीति रसमेवान्नं यजमाने दधाति पूर्वे पयोग्रहा गृह्यन्तेऽपरे सुराग्रहा विशं तत्क्षत्रस्यानुवर्त्मानं करोति ॥ १२ ॥ कुविद्ग यवमन्तो यवं चिदिति । पयोग्रहान्गृह्णाति सोमाऽशवो वै यवाः सोमः पयः सोमेनैवैनꣳ सोमं करोत्येकया गृह्णात्येकधैव यजमाने श्रियं दधाति श्रीर्हि पयः ॥ १३ ॥ नाना हि वां देवहितꣳ सदस्कृतमिति । सुराग्रहान्गृह्णाति नाना हि सोमश्च सुरा च देवहितमिति देवहिते क्षेते नाना सदस्कृतमिति द्वे हि वेदी भवतो मा सꣳसृक्षाथां परमे व्योमन्निति पाप्मनैवैनं व्यावर्तयति सुरा त्वमसि शुष्मिणीति सुरामेव सुरां करोति सोम एष इति सोममेव सोमं करोति मा मा हिꣳसीः स्वां योनिमाविशन्तीति यथायोन्येवैनां व्यावर्तयत्यात्मनोऽहिꣳसायाऽएकया गृह्णात्येकधैव यजमाने यशो दधाति यशो हि सुरा ॥ १४ ॥ क्षत्रं वै पयोग्रहाः । विट् सुराग्रहा यद्व्यतिषक्तान्गृह्णीयाद्विशं क्षत्राद्यवरुन्ध्यात्क्षत्रं विशः पापवस्यसं कुर्याद्यज्ञस्य व्यृद्धिं व्यतिषक्तान्गृह्णाति विशमेव क्षत्रेण संदधाति क्षत्रं विशा पापवस्यसस्य व्यावृत्त्यै यज्ञस्य समृद्ध्यै ॥ १५ ॥ प्राणा वै पयोग्रहाः । शरीरꣳ सुराग्रहा यद्व्यतिषक्तान्गृह्णीयाच्छरीरं प्राणेभ्यो व्यवरुन्ध्यात्प्राणांश्छरीरात्प्रमायुको यजमानः स्याद्व्यतिषक्तान्गृह्णाति शरीरमेव प्राणैः संदधाति प्राणाञ्छरीरेणाथोऽआयुरेवास्मिन्दधाति तस्मात्सौत्रामण्येज्ञानः सर्वमायुरेत्यथो य एवमेतद्वेद ॥ १६ ॥ सोमो वै पयोग्रहाः । अन्नꣳ सुराग्रहा यत्पयोग्रहाश्च सुराग्रहाश्च गृह्यन्ते सोमपीथं चैवान्नाद्यं चावरुन्द्धे ॥ १७ ॥ पशवो वै पयोग्रहाः । अन्नꣳ सुराग्रहा यत्पयोग्रहाश्च सुराग्रहाश्च गृह्यन्ते पशूंश्चैवान्नाद्यं चावरुन्द्धे ॥ १८ ॥ ग्राम्या वै पशवः पयोग्रहाः । आरण्याः सुराग्रहा यत्पयोग्रहाश्च सुराग्रहाश्च गृह्यन्ते ग्राम्यांश्चैव पशूनारण्यांश्चावरुन्द्धे ग्राम्येण चान्नेनारण्येन च पयोग्रहाञ्क्षीणाति तस्माद्ग्राम्याणां पशूनां ग्राम्यं चैवान्नाद्यमारण्यं चावरुद्धम् ॥ १९ ॥ तदाहुः । एतस्यै वा

ऽएतद्घलायै देवतायै रूपं यदेते घोरा आरण्याः पशवो यदेतेषां पशूनां लोमभिः पयोग्रहाञ्छ्रीणीयाद्रुद्रस्यास्ये पशूनपिदध्यादपशुर्यज्ञमानः स्याद्यन्न श्रीणीयादनवरुद्धा अस्य पशवः स्यू रुद्रो हि पशूनामीष्टऽइति सुराग्रहानेवैतेषां पशूनां लोमभिः श्रीणाति सुरायामेव तद्रौद्रं दधाति तस्मात्सुरां पीत्वा रौद्रमना अथो ऽआरण्येष्वेव पशुषु रुद्रस्य हेतिं दधाति ग्राम्याणां पशूनामक्षिऽसायाऽअवरुद्धा अस्य पशवो भवन्ति न रुद्रस्यास्ये पशूनपिदधाति ॥२०॥ या व्याघ्रे विषूचिका । उभौ वृकं च रक्षति श्येनं पतत्रिणꣳ सिꣳहꣳ सेमं पात्वꣳहसः ॥ यदापिपेष मातरं पुत्रः प्रमुदितो धयन् एतत्तदग्रेऽअनृणो भवाम्यहतौ पितरौ मयेति ॥२१॥ अधर्युश्च प्रतिप्रस्थाता च । जघनेन वेदिं प्राञ्चमावृत्तं यजमानꣳ श्येनपत्त्राभ्यामूर्ध्वं चावाञ्चं च पावयतः प्राणोदानयोस्तद्रूपं प्राणोदानाविवावरुन्द्धऽऊर्ध्वश्च ह्ययमवाङ् च प्राण आत्मानमनुसंचरति सम्पृच स्थ सं मा भद्रेण पृङ्क्तेति पयोग्रहान्त्संमृशति श्रियैवैनं यशसा समर्धयति विपृच स्थ वि मा पाप्मना पृङ्क्तेति सुराग्रहान्पाप्मनैवैनं व्यावर्तयति ॥२२॥ ब्राह्मणम् ॥४ [७. ३.] ॥ सप्तमोऽध्यायः [८१.] ॥ ॥

इन्द्रस्य वै यत्र । इन्द्रियाणि वीर्याणि व्युद्क्रामंस्तानि देवा एतेनैव यज्ञेन पुनः समदधुर्यत्पयोग्रहाश्च सुराग्रहाश्च गृह्यन्तऽइन्द्रियाण्येवास्मिंस्तद्वीर्याणि पुनः संदधत्युत्तरेऽग्नौ पयोग्रहान्जुहोति शुक्रेणैवैनं तत्सोमपीथेन समर्धयति ॥१॥ स जुहोति । सुरावन्तं बर्हिषदꣳ सुवीरमिति सुरावान्वाऽएष बर्हिषद्यज्ञो यत्सौत्रामणी बर्हिषैवैनं यज्ञेन समर्धयति यज्ञꣳ हिन्वन्ति महिषा नमोभिरित्यृत्विजो वै महिषा यज्ञो नम ऋत्विग्भिरेव यज्ञꣳ समर्धयति यज्ञेन यजमानं दधानाः सोममिति सोमपीथमेवास्मिन्दधति दिवि देवतास्विति दिव्येवैनं देवतासु दधति मदेमेन्द्रमिति मदाय वाव सोमो मदाय सुरोभावेव सोममदं च सुरामदं चावरुन्द्धे

ccc ccc*

यज्ञमानाः स्वर्का इत्यर्को वै देवानामन्नमन्नं यज्ञो यज्ञेनैवैनमन्नाद्येन समर्धयति कृत्वा भक्षयन्ति समृद्ध्यै वास्य तद्धर्धयन्ति ॥२॥ स भक्षयति । यमश्विना नमुचेरासुरादधीत्यश्विनौ क्षेतं नमुचेरध्याहरताꣳ सरस्वत्यसुनोदिन्द्रियायेति सरस्वती क्षेतमसुनोदिन्द्रियायेमं तꣳ शुक्रं मधुमन्तमिन्दुमिति शुक्रो वाऽएष मधुमानिन्दुर्यत्सोमः सोमꣳ राजानमिह भक्षयामीति सोम एवास्य राज्ञा भक्षितो भवति दक्षिणेऽग्नौ सुराग्रहान्जुहोति पाप्मनैवैनं तद्भावर्तयन्ति ॥३॥ स जुहोति । यस्ते रसः सम्भृत ओषधीष्वित्यपां च वाऽएष ओषधीनां च रसो यत्सुरापां चैनमेतदोषधीनां च रसेन समर्धयति सोमस्य शुष्मः सुरया सुतस्येति य एव सोमे शुष्मो यः सुरायां तमेवावरुन्द्धे तेन जिन्व यज्ञमानं मदेनेति तेन प्रीणीहि यज्ञमानं मदेनेत्येवैतदाह सरस्वतीमश्विनाविन्द्रमग्निमिति देवताभिरेव यज्ञꣳ समर्धयति देवताभिर्यज्ञेन यज्ञमानꣳ कृत्वा भक्षयन्ति व्यृद्ध्यै वास्य तत्समर्धयति ॥४॥ स भक्षयति । यदत्र रिप्तꣳ रसिनः सुतस्येति सुतासुतयोरेव रसमवरुन्द्धे यदिन्द्रोऽपिबद्ध्रुचीभिरितीन्द्रो क्षेतदपिबद्ध्रुचीभिरꣳ तदस्य मनसा शिवेनेत्यशिव-इव वाऽएष भक्षो यत्सुरा ब्राह्मणस्य शिवमेवैनमेतत्कृत्वात्मन्धत्ते सोमꣳ राजानमिह भक्षयामीति सोम एवास्य राज्ञा भक्षितो भवति ॥५॥ तद्धैतदन्येऽध्वर्यवः । राजन्यं वा वैश्यं वा परिक्रीणन्ति स एतद्भक्षयिष्यतीति तꣳ तथा न कुर्याद्यो ह वाऽएतद्भक्षयति तस्य क्षैवं पितृन्पितामहान्प्रपितामहानेष सोमपीथोऽन्वेति दक्षिणस्यैवाग्नेस्त्रीनङ्गारान्निर्वर्त्य बर्हिष्यरिधि तदेताभिर्व्याहृतिभिर्जुहुयात् ॥६॥ पितृभ्यः स्वधायिभ्यः स्वधा नम इति । पितृनेव पितृलोके स्वधायां दधाति पितामहेभ्यः स्वधायिभ्यः स्वधा नम इति पितामहानेव पितामहलोके स्वधायां दधाति प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नम इति प्रपितामहानेव प्रपितामहलोके स्वधायां दधाति ॥७॥ अप आनीय निनयति । अक्षन्पितर इत्यन्नाद्यमेवैषु दधात्यमीमदन्त पितर

इति मदयत्येवैनानतीतृपत्त पितर इति तर्पयत्येवैनान्पितरः शुन्धधमित्यनुपूर्वमेवैनान्त्सर्वान्पावयति पवित्रं वै सौत्रामणी ॥ ८॥ त्रिभिः पवित्रैः पावयन्ति । त्रयो वाऽइमे लोका एभिरेवैनं लोकैः पुनन्ति ॥ ९॥ पावमानीभिः पावयन्ति । पवित्रं वै पावमान्यः पवित्रेणैवैनं पुनन्ति ॥ १०॥ तिसृभिस्तिसृभिः पावयन्ति । त्रयो वै प्राणाः प्राण उदानो व्यानस्तैरेवैनं पुनन्ति ॥ ११॥ नवभिः पावयन्ति । नव वै प्राणाः प्राणैरेवैनं पुनन्ति प्राणेषु पुनः पूतं प्रतिष्ठापयन्ति ॥ १२॥ पवित्रेण पावयन्ति । अजाविकस्य वाऽएतद्रूपं यत्पवित्रमजाविकेनैवैनं पुनन्ति ॥ १३॥ वालेन पावयन्ति । गोऽश्वस्य वाऽएतद्रूपं यद्वालो गोऽश्वेनैवैनं पुनन्ति ॥ १४॥ हिरण्येन पावयन्ति । देवानां वाऽएतद्रूपं यद्धिरण्यं देवानामेवैनं द्रूपेण पुनन्ति ॥ १५॥ सुरया पावयन्ति । सुरा हि पूता पूतयैवैनं पुनन्ति तद्यथा सुरा पूयमाना बल्कसेन विविच्यतऽएवमेवैतद्यजमानः सर्वस्मात्पाप्मनो निर्मुच्यते य एवं विद्वान्त्सौत्रामण्या यजते यो वैतदेवं वेद ॥ १६॥ तदाहुः । याजयितव्यꣳ सौत्रामण्याऽ न याजयितव्याऽमित्यनन्तरायꣳ ह्येवास्मात्सर्वं पाप्मानमपघ्नन्तीति तदु ह स्माह रैवोत्तरा स्थपतिः पाठवश्चाक्रोऽपि प्रदानं प्रदाय याजयितव्यमेवात्मा वै यज्ञस्य यजमानोऽङ्गान्यृत्विजो यत्र वाऽआत्मा पूतः पूतानि तत्राङ्गान्युभयऽएव पुनतऽउभये पाप्मानमपघ्नते तस्मादपि प्रदानं प्रदाय याजयितव्यमेवेति ॥ १७॥ पितृलोकं वाऽएतेऽन्ववयन्ति । ये दक्षिणेऽग्नौ चरन्त्याज्याहुतिं जुहोति यज्ञो वाऽआज्यं यज्ञादेव यज्ञे प्रतितिष्ठन्ति ॥ १८॥ स जुहोति । ये समानाः समनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतामिति पितृनेव यमे परिददात्यथो पितृलोकमेव जयति सर्वे यज्ञोपवीतानि कृत्वोत्तरमग्निमुपसमायन्त्यं वै लोक उत्तरोऽग्निरस्मिन्नेव लोके प्रतितिष्ठन्त्याज्याहुतिं जुहोति यज्ञो वाऽआज्यं यज्ञादेव यज्ञे प्रतितिष्ठन्ति ॥ १९॥ स जुहोति । ये समानाः समन-

सो ज्ञीवा ज्ञीवेषु मामकाः तेषाꣳ श्रीर्मयि कल्पतामस्मिंल्लोके शतꣳ समा इति स्वानामेव श्रियमवरुन्द्धेऽथो ऽयोग्ज्ञीवातुमेवैषु दधाति पयः समन्वारब्धेषु जुहोति प्राणो वाऽअन्नं पयः प्राणऽएवान्नाद्येऽत्तितः प्रतितिष्ठन्ति ॥२०॥ स जुहोति । द्वे सृतीऽअशृणवं पितृणामहमिति द्वे वाव सृतीऽइत्याहुर्देवानां चैव पितृणां चेति ताभ्यामिदं विश्वमेज्जत्समेतीति ताभ्याꣳ ह्येदꣳ सर्वमेज्जत्समेति यद्वत्रा पितरं मातरं चेत्यसौ वै पितेयं माताभ्यामेव पितुन्देवलोकमपिनयत्येकाकी ह्युतोद्दिष्टं भक्षयत्येकधैव श्रियमात्मन्धत्ते श्रीर्हि पयः ॥२१॥ स भक्षयति । इदꣳ ह्यविः प्रजननं मेऽस्त्विति प्रजननꣳ हि यदि पयो यदि सोमो दशवीरमिति प्राणा वै दश वीराः प्राणानेवात्मन्धत्ते सर्वगणमित्यङ्गानि वै सर्वे गणा अङ्गान्येवात्मन्धत्ते स्वस्तयऽआत्मसनीत्यात्मानमेव सनोति प्रजासनीति प्रजामेव सनोति पशुसनीति पशूनेव सनोति लोकसनीति लोकाय वै यज्ञते नमेव ज्ञयत्यभयसनीति स्वर्गो वै लोकोऽभयꣳ स्वर्गऽएव लोकेऽत्तितः प्रतितिष्ठत्यग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतोऽस्मासु धत्तेति तद्यऽएवैनमेते याज्ञयन्ति तानेतदाहैतन्मयि सर्वं धत्तेति हिरण्येन मार्ज्जयन्तेऽमृतं वै हिरण्यममृतऽएवात्तितः प्रतितिष्ठन्ति ॥२२॥ ब्राह्मणम् ॥५॥ [८. १.] ॥ तृतीयः प्रपाठकः ॥ कण्डिकासंख्या१२० ॥.॥

प्रजापतिर्यज्ञमसृजत । तमाहरत्तेनायजत तेनेष्ट्वा रिरिचान-इवामन्यत स एतं यज्ञक्रतुमपश्यत्सौत्रामणीं तेनायजत ततो वै स पुनराप्यायत रिच्यतऽइव वाऽएष यः सोमेन यजते वीव ह्यस्य वित्तं वेदो हरन्ति ॥१॥ सोमेनेष्ट्वा सौत्रामण्या यजेत । यथा धेनुर्दुग्ध्वा पुनराप्यायेतैवꣳ हैव पुनराप्यायतऽआ प्रजया पशुभिः प्यायते प्रत्यस्मिंल्लोके तिष्ठत्यभि स्वर्गं लोकं जयति य एवं विद्वान्सौत्रामण्या यजते यो वैतदेवं वेद ॥२॥ तद्धैतत्पप्रच्छ । सुप्रा सार्ञ्जयः प्रतीदर्शमिभावतं यन्न दीक्षयेव दीक्षते न सोमाꣳश्व-इव न्युप्यन्तेऽथ कथꣳ सौत्रामणी सोमयज्ञो

भवतीति ॥३॥ स होवाच । शिरो वाऽएतद्यज्ञस्य यद्व्रतमात्मा दीक्षैतत्खलु वै व्रतस्य रूपं यत्सत्यमेतद्दीक्षायै यद्धूता मनो यजमानस्य रूपं वाग्यज्ञस्येति ॥४॥ स यद्वाचा व्रतमुपैति । आत्मन्येवैतद्यज्ञस्य शिरः प्रतिदधाति सत्यꣳ श्रद्धायां दधाति यजमानं यज्ञे ॥५॥ तस्मादेतस्य यज्ञस्य । व्रतमेव दीक्षा वृषो वै व्रतं योषा दीक्षा वृषा सत्यं योषा श्रद्धा वृषा मनो योषा वाग्वृषा पत्न्यै यजमानस्तस्माद्यत्रैव पतिस्तत्र जायाथो यज्ञमुखऽएव तन्मिथुनानि करोति प्रजात्यै ॥६॥ एते खलु वाऽएतस्य यज्ञस्य । सोमाꣳशव इत्याहुर्यद्धूष्याणि लोकानि लाजा इति ॥७॥ प्रातःसवनस्यैतद्रूपम् । यद्धूष्याण्ययं वै लोकः प्रातःसवनꣳ स आश्विन आश्विनेन पयसा प्रथमाꣳ रात्रिं परिषिञ्चति स्वेनैवैनमेतल्लोकेन स्वया देवतया स्वेन रूपेणा प्रातःसवनेन समर्धयति ॥८॥ माध्यन्दिनस्यैतत्सवनस्य रूपम् । यत्तोक्मान्यन्तरिक्षं वै माध्यन्दिनꣳ सवनं तत्सारस्वतꣳ सारस्वतेन पयसा द्वितीयाꣳ रात्रिं परिषिञ्चति स्वेनैवैनमेतल्लोकेन स्वया देवतया स्वेन रूपेणा माध्यन्दिनेन सवनेन समर्धयति ॥९॥ तृतीयसवनस्यैतद्रूपम् । यल्लाजा द्यौर्वै तृतीयसवनꣳ सैन्द्रैन्द्रेण पयसा तृतीयाꣳ रात्रिं परिषिञ्चति स्वेनैवैनमेतल्लोकेन स्वया देवतया स्वेन रूपेण तृतीयसवनेन समर्धयति ॥१०॥ एकस्यै दुग्धेन । प्रथमाꣳ रात्रिं परिषिञ्चति द्वयोर्दुग्धेन द्वितीयां तिसृणां दुग्धेन तृतीयां यथारूपमेवैनं यथादेवतꣳ सवनैः समर्धयति ॥११॥ परीतो षिञ्चता सुतमिति । परिषिञ्चति सुत्यायै सोमो य उत्तमꣳ हविरित्युत्तमं वाऽएतद्धविर्यत्सोम उत्तममेवैनꣳ हविष्करोति दधन्वा यो नर्योऽअप्स्वन्तरित्यद्भिश्च क्षेपोऽन्तरेण च सूयते सुषाव सोममद्रिभिरित्यद्रिभिर्वै सोमः सूयतेऽद्रिभिरेवैनꣳ सुनोति सोमसुत्यायै ॥१२॥ तदाहुः । उभयोर्वाऽएतद्रूपꣳ सुतस्य चासुतस्य च यत्सौत्रामण्यपामेष ओषधीनाꣳ रसो यत्पयस्तत्सुतस्य रूपमन्नस्यैष रसो यत्परिस्रुत्तदासुतस्य रूपमुभाभ्यामेवैनꣳ सवाभ्याꣳ सु-

नोत्युभाभ्याꣳ सवाभ्यामवरुन्द्धे ॥ १३ ॥ तदाहुः । यद्गवभिः सोमः सूयतेऽथ कथꣳ सौत्रामणीति प्रैषाग्रोभिरिति ब्रूयाद्बार्हता वै प्रैषा बार्हता ग्रावाणो ग्रावभिर्वै सोमः सूयते ग्रावभिरेवैनꣳ सुनोति सोमसुत्यायै ॥ १४ ॥ सर्वे पयस्वन्तो भवन्ति । पयसा हि सूयते सर्वे सोमवन्तो भवन्ति सोमरूपतायै सर्वे परिस्रुन्मन्तो भवन्ति परिस्रुता हि सूयते सर्वे घृतवन्तो भवन्त्येतद्वै प्रत्यक्षाय्यज्ञरूपं यद्घृतं प्रत्यक्षादेवैनं यज्ञरूपं करोति सर्वे मधुमन्तो भवन्त्येतद्वै प्रत्यक्षात्सोमरूपं यन्मधु प्रत्यक्षादेवैनꣳ सोमरूपं करोति ॥ १५ ॥ ॥ शतम् ६३०० ॥ ॥ सर्वऽआश्विना भवन्ति । भैषज्याय सर्वे सारस्वता अन्नाद्यस्येवावरुद्धै सर्वऽऐन्द्रा इन्द्रियस्यैव वीर्यस्यावरुद्धै ॥ १६ ॥ यद्वै सर्वऽआश्विना भवन्ति । सर्वे सारस्वताः सर्वऽऐन्द्रा एता वाऽएतं देवता अग्रे यज्ञꣳ समभरꣳस्ताभिरेवैनꣳ सम्भरत्यथोऽएता एवैतद्देवता भागधेयेन समर्धयति ॥ १७ ॥ संतता याज्यापुरोऽनुवाक्या भवन्ति । समानदेवत्याः प्रज्ञानाꣳ संतत्याऽअव्यवच्छेदाय सर्वा आश्विन्यो भवन्ति सर्वाः सारस्वत्यः सर्वा ऐन्द्र्यः समानी बन्धुता ॥ १८ ॥ अनुष्टुभ आप्रियो भवन्ति वाग्वाऽअनुष्टुब्वाचो वै सोमः सूयते वाचैवैनꣳ सुनोति सोमसुत्यायै सर्वा आश्विन्यो भवन्ति सर्वाः सारस्वत्यः सर्वा ऐन्द्र्यः समानी बन्धुता ॥ ११ ॥ जागता अनुप्रैषा भवन्ति । इयं वै जगत्यनया वै सोमः सूयतेऽनयैवैनꣳ सुनोति सोमसुत्यायै सर्वऽआश्विना भवन्ति सर्वे सारस्वताः सर्वऽऐन्द्राः समानी बन्धुता ॥ २० ॥ स वाऽएष प्रत्यक्षात्सोमयज्ञ एव यत्सौत्रामणी । तं यद्येकाकी यजमानो भक्षयेदतिष्टिर्वैव स्यात्पशुबन्धो वा सर्वऽऋत्विजो भक्षयन्ति सर्वे वाऽऋत्विजः सोमं भक्षयन्ति सोमरूपतायै ॥ २१ ॥ आश्विनमध्वर्यवो भक्षयन्ति । अश्विनौ वै देवानामध्वर्यू स्वमेवैतद्भागधेयꣳ स्वऽआयतने भक्षयन्ति ॥ २२ ॥ सारस्वतꣳ होता ब्रह्मा मैत्रावरुणाः । वाग्वै यज्ञस्य होता हृदयं ब्रह्मा मनो मैत्रावरुणाः स्वमेवै° ॥ २३ ॥ ऐन्द्रं यजमानो भक्षयति । ऐन्द्रो

वाऽएष यज्ञो यत्सौत्रामणीन्द्रायतन एष एतर्हि यो यजते स्वमेवैतद्भागधेयꣳ स्व ऽआयतने भक्षयति ॥ २४ ॥ चक्षुर्वाऽआश्विनो ग्रहः । प्राणः सारस्वतो वागैन्द्र आश्विनात्सारस्वतेऽवनयति चक्षुरेवास्य तत्प्राणैः संदधाति सारस्वतादैन्द्रे प्राणानेवास्य तद्वाचा संदधात्यथो प्राणानेवास्य तद्वाचि प्रतिष्ठापयति तस्मात्सर्वे प्राणा वाचि प्रतिष्ठिताः ॥ २५ ॥ त्रय आश्विनं भक्षयन्ति । अध्वर्युः प्रतिप्रस्थाताग्नीध्स्त्रिवृद्वाऽइदं चक्षुः शुक्लं कृष्णं कनीनका यथारूपमेवास्मिंश्चक्षुर्दधाति ॥ २६ ॥ त्रयः सारस्वतꣳ । होता ब्रह्मा मैत्रावरुणस्त्रिधाविहितो वाऽअयं प्राणः प्राण उदानो व्यान इति यथारूपमेवास्मिन्प्राणं दधाति ॥ २७ ॥ एकाक्षैन्द्रं यजमानो भक्षयति । एकधा वाऽएषा प्राणानाꣳ श्रीर्यद्वागेकधैव वाचꣳ श्रियमात्मन्धत्ते तस्मात्सौत्रामण्येऽन्नान् एकधा स्वानाꣳ श्रेष्ठो भवत्यथो य एवमेतद्वेद ॥ २८ ॥ ऋतवो वाऽऋविजः । मासा भक्षाः षड्विजो भक्षयन्ति षड्वाऽऋतव ऋविग्भिरेवर्तूनवरुन्द्धे ॥ २९ ॥ द्वादश भक्षा भवन्ति । द्वादश मासा भक्षैरेव मासानवरुन्द्धे पुनःपुनरभिनिवर्तमृत्विजो भक्षयन्ति तस्मादृतवश्च मासाश्चान्योऽन्यमभिनिवर्तन्ते ॥ ३० ॥ त्रयोदशं यजमानो भक्षयति । यो ह वाऽएष त्रयोदशो मास एष एव प्रत्यक्षात्संवत्सर एतमेवाप्त्वावरुन्द्धे स वाऽएष संवत्सर एव यत्सौत्रामणी तेन सर्वं जयति सर्वमवरुन्द्धे ॥ ३१ ॥ त्रयः पशवो भवन्ति । त्रयो वा इमे लोका इमानेव तैर्लोकानवरुन्द्धऽइममेव लोकमाश्विनेनान्तरिक्षꣳ सारस्वतेन दिवमैन्द्रेण यथारूपमेव यथादेवतमिमांल्लोकान्जयति चाव च रुन्द्धे ॥ ३२ ॥ त्रयः पुरोडाशा भवन्ति । त्रयो वाऽऋतव ऋतूनेवैतैरवरुन्द्धे ग्रीष्ममेवैन्द्रेण वर्षाः सावित्रेण हेमन्तं त्वारुणेन यथारूपमेव यथादेवतमृतून्जयति चाव च रुन्द्धे ॥ ३३ ॥ षड्हा भवन्ति । षड्वाऽऋतव ऋतूनेवैतैरवरुन्द्धे वसन्तग्रीष्मावेवाश्विनाभ्यां वर्षाशरदौ सारस्वताभ्याꣳ हेमन्तशिशिरावैन्द्राभ्यां यथारूपमेव यथादेवतमृतून्जयति चाव च रुन्द्धे ॥ ३४ ॥

संतता याज्यापुरोऽनुवाक्या भवन्ति । समानदेवत्या ऋतूनाꣳ संतत्याऽव्यवच्छेदाय सर्वाः पुरोऽनुवाक्या भवन्ति सर्वा याज्यास्तस्मादृतवः सर्वे पराञ्चः सर्वे प्रत्यञ्चः सर्वाः प्रथमा भवन्ति सर्वा मध्यमाः सर्वा उत्तमास्तस्मादृतवः सर्वे प्रथमाः सर्वे मध्यमाः सर्वऽउत्तमाः सर्वेषां ग्रहाणां द्वे याज्यापुरोऽनुवाक्ये भवतोऽहोरात्रयोस्तद्रूपमहोरात्रिऽएवावरुन्द्धे तस्मादृतवश्च मासाश्चाहोरात्रयोरेव प्रतिष्ठिताः ॥३५॥ स वाऽएष संवत्सर एव यत्सौत्रामणी । चन्द्रमा एव प्रत्यङ्ङादित्यो यज्ञमानस्तस्येयमेव पृथिवी वेदिरन्तरिक्षमुत्तरवेदिर्द्यौर्बर्हिर्दिश ऋत्विजो वनस्पतय इध्म आप आज्यमोषधय आकुतयोऽग्निरेवाग्निः संवत्सरः सꣳस्था तद्वाऽइदꣳ सर्वꣳ संवत्सर एव यदिदं किं च तस्मात्सौत्रामण्येज्ञानः सर्वं ज्ञयति सर्वमवरुन्द्धे ॥३६॥ ब्राह्मणम् ॥ १ [८. २.] ॥ ॥

त्वष्टा कृतपुत्रः । अभिचरणीयमपेन्द्रꣳ सोममाहरत्तस्येन्द्रो यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्स विष्वङ् व्यार्हत्तस्य मुखात्प्राणेभ्यः श्रीयशसान्यूर्ध्वान्युदक्रामंस्तानि पशून्प्राविशंस्तस्मात्पशवो यशो यशो ह भवति य एवं विद्वान्त्सौत्रामण्याभिषिच्यते ॥१॥ ततोऽस्माऽएतमश्विनौ च सरस्वती च । यज्ञꣳ समभरन्त्सौत्रामणीं भैषज्याय तयैनमभ्यषिञ्चंस्ततो वै स देवानाꣳ श्रेष्ठोऽभवद्भ्रेष्ठः स्वानां भवति य एनयाभिषिच्यते ॥२॥ कृष्णाजिनेऽभिषिञ्चति । यज्ञो वै कृष्णाजिनं यज्ञऽएवैनमेतदभिषिञ्चति लोमतश्छन्दाꣳसि वै लोमानि छन्दःस्वेवैनमेतदभिषिञ्चति ॥३॥ आसन्द्यामभिषिञ्चति । आसन्दीसद्वै साम्राज्यꣳ साम्राज्येनैवैनꣳ साम्राज्यं गमयति ॥४॥ औदुम्बरी भवति । ऊर्वाऽउदुम्बर ऊर्ज्येवाध्यभिषिच्यते ज्ञानुसंमिता भवति ज्ञानुसंमितो वाऽअयं लोकोऽस्माऽउ वै लोकाय क्षत्रियोऽभिषिच्यते क्षत्रमु वाऽएष भवति यः सौत्रामण्याभिषिच्यते तस्माज्ज्ञानुसंमितापरिमिता तिरश्ची ॥५॥ राष्ट्रं वाऽआसन्दी । अपरिमितसमृद्धमु वै राष्ट्रं मुञ्जविवयना भवति

यन्नियो हि मुञ्जा द्वाऽउत्तरस्यां वेद्यां पादौ भवतो द्वौ दक्षिणास्यामयं वै लोक उत्तरा वेदिर्दक्षिणा पितृलोकस्तदेनमुभयोर्लोकयोरध्यभिषिञ्चति ॥ ६ ॥ एतद्ध स्म वै तद्विद्वानाह । गौरीवितिः शाक्त्यः क्षत्रमिवाह किल वयममुष्मिंलोके भविता स्म इति शश्वद्वास्माऽऋषभो याज्ञतुरः प्रोवाच श्विक्कानाञ्च राजा ॥ ७ ॥ स आसन्दीमास्तृणाति । क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसीति क्षत्रस्य वाऽएषा योनिः क्षत्रस्य नाभिः ॥ ८ ॥ अथैनां कृष्णाजिनेनास्तृणाति । मा त्वा हिꣳसीन्मा मा हिꣳसीरिति यज्ञो वै कृष्णाजिनं यज्ञस्य चैवात्मनश्चाहिꣳसायै ॥ ९ ॥ अथाधिरोहति । वारुण्यर्चा वरुणो वै देवानाञ्च राजा स्वयैवैनमेतद्देवतयाभिषिञ्चति निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुरिति ॥ १० ॥ अथ सुवर्णरजतौ रुक्मौ व्युपास्यति । मृत्योः पाहि विद्योत्पाहीति वृष्टिर्वै विराट् तस्या एते घोरे तन्वौ विद्युच्च क्रोडुनिश्च ततः सुवर्ण एव रुक्मो विद्युतो रूपꣳ रजतो क्रोडुनेस्ताभ्यामेवास्मै देवताभ्यां शर्म यच्छति तस्मात्सौत्रामण्येज्ञानस्यैताभ्यां देवताभ्यां न शङ्का भवत्यथो य एवमेतद्वेद ॥ ११ ॥ पशूनां वसयाभिषिञ्चति । श्रीर्वै पशूनां वसा श्रियैवैनमेतत्पशूनाꣳ रसेनाभिषिञ्चत्यथो परमं वाऽएतदन्नाद्यं यद्वसा परमेणैवैनमेतदन्नाद्येनाभिषिञ्चति ॥ १२ ॥ शफयद्धा भवन्ति । शफैर्वै पशवः प्रतितिष्ठन्ति प्रतिष्ठामेवैनं गमयति त्रयस्त्रिꣳशद्धा भवन्ति त्रयस्त्रिꣳशद्वै सर्वा देवताः सर्वाभिरेवैनमेतद्देवताभिरभिषिञ्चति जगतीभिर्नुदोति जागता वै पशवो जगत्यैवास्मै पशूनवरुन्द्धे षोडशभिर्ऋग्भिर्नुदोति षोडशकला वै पशवोऽनुकलमेवास्मिञ्छ्रियं दधति ॥ १३ ॥ सीसेन तल्लं मनसा मनीषिण इति । द्वौ-द्वौ समासꣳ कृत्वा सते सꣳस्रवाल्समवनयत्यहोरात्राण्येवैतदर्धमासान्मासानृतून्त्संवत्सरे प्रतिष्ठापयति तानीमान्यहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरे प्रतिष्ठिताः ॥ १४ ॥ वैतसः सतो भवति । अप्सुयोनिर्वै वेतस आपो वै सर्वा देवताः सर्वाभिरेवैन-

मेतद्देवताभिरभिषिञ्चति ॥ १५ ॥ सर्वसुरभ्युन्मर्दनं भवति । परमो वाऽएष गन्धो यत्सर्वसुरभ्युन्मर्दनं गन्धेनैवैनमेतदभिषिञ्चति ॥ १६ ॥ पुरस्तात्प्रत्यङ्भिषिञ्चति । पुरस्ताद्धि प्रत्यगन्नमद्यते शीर्षतः शीर्षतो ह्यन्नमद्यतऽआ मुखादन्ववस्रावयति मुखेन ह्यन्नमद्यते सर्वतः परिक्रामꣳ सर्वाभ्य एवास्मिन्नेतद्दिग्भ्योऽन्नाद्यं दधाति तस्मात्सौत्रामण्येज्ञानस्य सर्वासु दिक्ष्वन्नाद्यमवरुद्धं भवत्यथो य एवमेतद्वेद ॥ १७ ॥ आश्विनेन प्रथमेन यजुषाभिषिञ्चति । अथ सारस्वतेनाथेन्द्रेणैताभिरेवैनमेतद्देवताभिरभिषिञ्चति तꣳ हैकऽएताभिश्चैवताभिरभिषिञ्चन्ति भूर्भुवः स्वरित्येताभिरु च व्याहृतिभिरेता वै व्याहृतय इदꣳ सर्वं तदेनमनेन सर्वेणाभिषिञ्चाम इति न तथा कुर्यादेताभिरेवैनं देवताभिरभिषिञ्चेदेता ऽउ ह्येव देवता इदꣳ सर्वम् ॥ १८ ॥ पुरस्तात्स्विष्टकृतोऽभिषिञ्चति । क्षत्रं वै स्विष्टकृत्क्षत्रेणैवैनमेतदभिषिञ्चत्यक्तरा वनस्पतिं च स्विष्टकृतं चाभिषिञ्चति सोमो वै वनस्पतिरग्निः स्विष्टकृदग्नीषोमाभ्यामेवैनमेतत्परिगृह्याभिषिञ्चति तस्माद्ये चैतद्विदुर्ये च न तऽआहुः क्षत्रियो वाव क्षत्रियस्याभिषेक्तेति ॥ ११ ॥ अथैनं ज्ञानुमात्रे धारयन्ति । अथ नाभिमात्रेऽथ मुखमात्रऽएष्वेवास्माऽएतल्लोकेष्वायतनानि कल्पयत्यभिषेको वाऽएष यद्वाजपेयमभिषेकः सौत्रामणी तद्यथैवादो वाजपेये यूपꣳ रोहति तदेवैतद्रूपं क्रियते ॥ २० ॥ तदाहुः । प्रेव वाऽएषोऽस्माल्लोकाच्च्यवते यः सौत्रामण्याभिषिच्यतऽइति कृष्णाजिने प्रत्यवरोहति यज्ञो वै कृष्णाजिनं यज्ञऽएवात्मतः प्रतितिष्ठति ॥ २१ ॥ प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रऽइति । क्षत्रऽएव राष्ट्रे प्रतितिष्ठति क्षत्राद्राष्ट्राद्प्रभ्रꣳशाय प्रत्यश्वेषु प्रति तिष्ठामि गोष्विति गोऽश्वऽएव प्रतितिष्ठति गोऽश्वाद्प्रभ्रꣳशाय प्रत्यङ्गेषु प्रति तिष्ठाम्यात्मन्नित्यङ्गेष्वेवात्मन्प्रतितिष्ठत्यङ्गेभ्य आत्मनोऽप्रभ्रꣳशाय प्रति प्राणेषु प्रतितिष्ठामि पुष्टऽइति प्राणेष्वेव पुष्टे प्रतितिष्ठति प्राणेभ्यः पुष्टाद्प्रभ्रꣳशाय प्रति द्यावापृथिव्योः प्रतितिष्ठामि यज्ञऽइति तदनयोर्द्यावापृथि-

व्योः प्रतितिष्ठति यथोरिदꣳ सर्वमधि ॥ २२ ॥ अथ साम गायति । क्षत्रं वै साम क्षत्रेणैवैनमेतदभिषिञ्चत्यथो साम्राज्यं वै साम साम्राज्येनैवैनꣳ साम्राज्यं गमयति सर्वेषां वाऽएष वेदानाꣳ रसो यत्साम सर्वेषामेवैनमेतद्वेदानाꣳ रसेनाभिषिञ्चति ॥ २३ ॥ बृहत्यां गायति । बृहत्यां वाऽअसावादित्यः श्रियां प्रतिष्ठायां प्रतिष्ठितस्तपति बृहत्यामेवैनमेतच्छ्रियां प्रतिष्ठायां प्रतिष्ठापयति ॥ २४ ॥ ऐन्द्र्यां बृहत्यां गायति । ऐन्द्रो वाऽएष यज्ञो यत्सौत्रामणीन्द्रायतन एष एतर्हि यो यजते स्वऽएवैनमेतदायतनेऽभिषिञ्चति ॥ २५ ॥ अथ यस्मात्सꣳशानानि नाम । एतैर्वै सामभिर्देवा इन्द्रमिन्द्रियाय वीर्याय समश्यंस्तथोऽएवैतमृत्विजो यजमानमेतैरेव सामभिरिन्द्रियाय वीर्याय सꣳश्यन्ति सꣳश्रवसे विश्रवसे सत्यश्रवसे श्रवसऽइति सामानि भवन्त्येष्वेवैनमेतल्लोकेषु श्रावयन्ति चतुर्निधनं भवति चतस्रो वै दिशः सर्वास्वेवैनमेतद्दिक्षु प्रतिष्ठापयन्ति सर्वे निधनमुपावयन्ति संविदाना एवास्मिञ्श्रियं दधति ॥ २६ ॥ तदाहुः । यदेतत्साम गीयतेऽथ क्वैतस्य साम्न उक्थं का प्रतिष्ठा व्यृद्धꣳ हि तद्यत्स्तुतमननुशस्तमिति ॥ २७ ॥ त्रया देवा एकादशेति । एतद्वाऽएतस्य साम्न उक्थमेषा प्रतिष्ठा ॥ २८ ॥ अथो त्रया देवा एकादशेति त्रयस्त्रिꣳशं ग्रहं नुहोति त्रया हि देवा एकादश त्रयस्त्रिꣳशाः सुराधस इति त्रयस्त्रिꣳशद्धि देवा बृहस्पतिपुरोहिता इति ब्रह्म वै बृहस्पतिर्ब्रह्मपुरोहिता इत्येवैतदाह देवस्य सवितुः सवऽइति देवेन सवित्रा प्रसूता इत्येवैतदाह देवा देवैरवतु मेति देवा ह्येतं देवैरभिषिञ्चन्ति ॥ २९ ॥ प्रथमा द्वितीयैरिति प्रथमा ह्येतं द्वितीयैरभिषिञ्चन्ति द्वितीयास्तृतीयैरिति द्वितीया ह्येतं तृतीयैरभिषिञ्चन्ति तृतीयाः सत्येनेति तृतीया ह्येतꣳ सत्येनाभिषिञ्चन्ति सत्यं यज्ञेनेति सत्यꣳ ह्येतं यज्ञेनाभिषिञ्चति यज्ञो यजुर्भिरिति यज्ञो ह्येतं यजुर्भिरभिषिञ्चति यजूꣳषि सामभिरिति यजूꣳषि ह्येतꣳ सामभिरभिषिञ्चन्ति सामान्यृग्भिरिति सामानि ह्येतमृग्भिर-

भिषिञ्चत्यृचः पुरोऽनुवाक्याभिरित्यृचो क्षेतं पुरोऽनुवाक्याभिरभिषिञ्चन्ति पुरोऽनुवाक्या याज्याभिरिति पुरोऽनुवाक्या क्षेतं याज्याभिरभिषिञ्चन्ति याज्या वषट्कारैरिति याज्या क्षेतं वषट्कारैरभिषिञ्चन्ति वषट्कारा आकूतिभिरिति वषट्कारा क्षेतमाकूतिभिरभिषिञ्चत्याकूतयो मे कामान्त्समर्धयन्तु भूः स्वाहेति तदेनमेताभिर्देवताभिः परोऽवरमभिषिच्याथास्माऽआकूतिभिः सर्वान्कामान्त्समर्धयत्ययऽर्त्विजूपकृवमिष्ट्वा भक्षयत्यृतवो वाऽऋत्विज ऋतूष्वेवैतदुपकृवमिष्टे ॥ ३० ॥ स भक्षयति । लोमानि प्रयतिर्मम ब्रह्मऽआनतिरागतिः माꣳसं मऽउपनतिर्वस्वस्थि मज्ज्ञा मऽआनतिरिति प्रेव वाऽएष लोकांश्च देवताश्च विशति य सौत्रामण्याभिषिच्यते तदेतद्वात्तरामात्मानमुपकृवयते तथा कृत्स्न एव सर्वतनूः साङ्गः सम्भवति ॥ ३१ ॥ ब्राह्मणम् ॥ २ [८. ३.] ॥ अष्टमोऽध्यायः [८२.] ॥ ॥

एतस्माद्वै यज्ञात्पुरुषो ज्ञायते । स यद्ध वाऽअस्मिंल्लोके पुरुषोऽन्नमत्ति तदेनममुष्मिंल्लोके प्रत्यत्ति स वाऽएष परिसुतो यज्ञस्तायतेऽनाद्या वै ब्राह्मणेन परिसुत्स एतस्मादनाद्याज्ज्ञायते तꣳ ह्यमुष्मिंल्लोकेऽन्नं न प्रत्यत्ति तस्मादेष ब्राह्मणायज्ञ एव यत्सौत्रामणी ॥ १ ॥ तस्य लोमान्येव शष्पाणि । त्वक्लोमानि माꣳसं लाज्ञा अस्थि कारोतरो मज्ज्ञा मासरꣳ रसः परिसुन्नग्रुर्लोहितꣳ रेतः पयो मूत्रꣳ सुरोवध्यं बल्कसम् ॥ २ ॥ हृदयमेवास्येन्द्रः पुरोडाशः । यकृत्सावित्रः क्लोमा वारुणो मतस्नेऽएवास्याश्वत्थं च पात्रमौदुम्बरं च पित्तं नैयग्रोधमान्त्राणि स्थाल्यो गुदा उपशयानि श्येनपत्त्रे प्लीहासन्दी नाभिः कुम्भो वनिष्ठुः प्लाशिः शतातृष्णा तथ्यत्सा बकुधा वितृष्णा भवति तस्मात्प्लाशिर्बकुधा विकृत्तो मुखꣳ सतं जिह्वा पवित्रं चप्यं पायुर्वस्तिर्वालः ॥ ३ ॥ अङ्गान्येवास्याश्विनः पशुः । आत्मा सारस्वतो ऽपमेन्द्र ऋषभस्तस्मादाकुर्गावः पुरुषस्य ऽपमित्यायुर्ह्रिण्यं तक्षतमानं भवति तस्माक्षतायुः पुरुषः ॥ ४ ॥ चक्षुषीऽएवास्याश्विनौ ग्रहौ । पक्ष्माणि गोधू-

मसक्तवश्च कुवलसक्तवश्च नासिकेऽएवास्य सारस्वतौ ग्रहावथ यानि नासिकयोर्लोमानि तान्युपवाकसक्तवश्च बदरसक्तवश्च श्रोत्रेऽएवास्यैन्द्रौ ग्रहावथ यानि कर्णयोर्लोमानि यानि च भ्रुवोस्तानि यवसक्तवश्च कर्कन्धुसक्तवश्च ॥५॥ अथ यान्युपस्थे लोमानि । यानि चाधस्तात्तानि वृकलोमान्यथ यान्युरसि लोमानि यानि च निकक्षयोस्तानि व्याघ्रलोमानि केशाश्च श्मश्रूणि च सिꣳहलोमानि ॥६॥ त्रयः पशवो भवन्ति । त्रेधाविहितो वाऽअयं पुरुषस्यात्मात्मानमेवास्य तै स्पृणोति यद्वाङ्नाभिस्तद्वाग्निनेन यद्ऊर्ध्वं नाभेरवाचीनꣳ शीर्षंस्तत्सारस्वतेन शिर ऐन्द्रेण यथारूपमेव यथादेवतमात्मानं मृत्यो स्पृत्वामृतं कुरुते ॥७॥ त्रयः पुरोडाशा भवन्ति । त्रेधाविहितं वाऽइदं पुरुषस्य वयो वय एवास्य तै स्पृणोति पूर्ववयसमेवैन्द्रेण मध्यमवयसꣳ सावित्रेणोत्तमवयसं वारुणेन यथारूपमेव यथादेवतं वयो मृत्यो स्पृत्वामृतं कुरुते ॥८॥ षड्धा भवन्ति । षड्वाऽइमे शीर्षन्प्राणाः प्राणानेवास्य तै स्पृणोति चक्षुषीऽएवाश्विनाभ्यां नासिके सारस्वताभ्याꣳ श्रोत्रेऽऐन्द्राभ्यां यथारूपमेव यथादेवतमात्मानं मृत्यो स्पृत्वामृतं कुरुते ॥९॥ संतता याज्यापुरोऽनुवाक्या भवन्ति । समानदेवत्याः प्राणानाꣳ संतत्याऽअव्यवच्छेदाय सर्वाः पुरोऽनुवाक्या भवन्ति सर्वा याज्यास्तस्मात्प्राणाः सर्वे पराञ्चः सर्वे प्रत्यञ्चः सर्वाः प्रथमा भवन्ति सर्वा मध्यमाः सर्वा उत्तमास्तस्मात्प्राणाः सर्वे प्रथमाः सर्वे मध्यमाः सर्वऽउत्तमाः सर्वेषां ग्रहाणां द्वे याज्यापुरोऽनुवाक्ये भवतः प्राणोदानयोस्तद्रूपं प्राणोदानावेवावरुन्द्धे तस्मात्सर्वे प्राणाः प्राणोदानयोरेव प्रतिष्ठिताः ॥१०॥ स वाऽएष आत्मैव यत्सौत्रामणी । मन एव प्रत्यक्षाद्भाग्यज्ञमानस्तस्यात्मेव वेदिः प्रज्ञोत्तरवेदिः पशवो बर्हिरङ्गान्यृत्विजोऽस्थीनीध्म आज्यं मज्जा मुखमग्निरन्नमाकृतिर्वयः सꣳस्था तस्मात्सौत्रामण्येज्ञानो वय उपगच्छति ॥११॥ तद्यौ ह वाऽइमौ पुरुषाविवाद्यौ । एतावेवाश्विनावथ यत्कृष्णं तत्सारस्वतं यच्छुक्लं तदैन्द्रं तद्यदा-

श्विने पशौ सत्यथैता देवताः सꣳ यज्ञत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते ॥ १२ ॥ मन एवेन्द्रः । वाक्सरस्वती श्रोत्रेऽश्विनौ यद्वै मनसा ध्यायति तद्वाचा वदति यद्वाचा वदति तत्कर्णाभ्याꣳ शृणोति तद्यत्सारस्वते पशौ सत्यथैता देवताः सꣳ यज्ञत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते ॥ १३ ॥ प्राण एवेन्द्रः । जिह्वा सरस्वती नासिकेऽश्विनौ यद्वै प्राणेनान्नमात्मन्प्रणयते तत्प्राणस्य प्राणत्वं जिह्वया वाऽअन्नस्य रसं विजानाति नासिकेऽउ वै प्राणस्य पन्थास्तद्यदैन्द्रे पशौ सत्यथैता देवताः सꣳ यज्ञत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते ॥ १४ ॥ हृदयमेवेन्द्रः । यकृत्सविता क्लोमा वरुणस्तद्यदैन्द्रे पुरोडाशे सत्यथैता देवताः सꣳ यज्ञत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते ॥ १५ ॥ प्राण एव सविता । व्यानो वरुणः शिश्नमिन्द्रो यद्वै प्राणेनान्नमत्ति तद्व्यानेन व्यनिति शिश्नेन वाऽअन्नस्य रसꣳ रेतः सिञ्चति तद्यत्सावित्रे पुरोडाशे सत्यथैता देवताः सꣳ यज्ञत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते ॥ १६ ॥ योनिरेव वरुणः । रेत इन्द्रः सवितैव रेतसः प्रजननयिता तद्यद्वारुणे पुरोडाशे सत्यथैता देवताः सꣳ यज्ञत्येतान्येवैतत्सार्धं कृत्वात्मन्धत्ते स य एवमेतद्देवता एव देवता अनुसम्भवत्येता देवता अनु प्रजायतऽआ प्रजया पशुभिः प्रायते प्रत्यस्मिंल्लोके तिष्ठत्यभि स्वर्गं लोकं जयति य एवं विद्वान्त्सौत्रामण्या यजते यो वैतदेवं वेद ॥ १७ ॥ ब्राह्मणम् ॥ ३ [१. १.] ॥ ॥

अवभृथमिष्ट्वा यन्ति । अवभृथं वै सोमेनेष्ट्वा यन्ति सोम एष यत्सौत्रामणी ॥ १ ॥ यद्दिवा देवक्रेऽनमिति । देवकृतादेवैनमेनसो मुञ्चति यदि दिवा यदि नक्तमिति यद्दिवाहोरात्राभ्यामेनः करोति तस्मादेवैनं मुञ्चति यदि जाग्रद्यदि स्वप्नऽइति मनुष्या वै जागरितं पितरः सुप्तं मनुष्यकिल्बिषाच्चैवैनं पितृकिल्बिषाच्च मुञ्चति ॥ २ ॥ यद्ग्रामे यदरण्येऽइति । ग्रामे वा ह्यरण्ये वैनः क्रियते तस्मादेवैनं मुञ्चति यत्सभायामिति सभ्यादेवैनमेनसो मुञ्चति यदिन्द्रियऽइति दैवादेवैनमेनसो

मुञ्चति यद्भूद्रे यदार्ये यदेनश्चकमा वयं यदेकस्याधि धर्मणि तस्यावयजनमसीति सर्वस्मादेवैनमेतत्स्मादेनसो मुञ्चति ॥३॥ यदापो अघ्न्या इति । वरुणेति शपामहे ततो वरुणा नो मुञ्चेति वरुणादेवैनमेनसो मुञ्चत्यवभृथ निचुम्पुण निचेरुरसि निचुम्पुणा इति यो ह वाऽअयमपामावर्तः स ह्यावभृथः स ह्येष वरुणस्य पुत्रो वा भ्राता वा तमेवैतत्स्तौत्यव देवैर्देवकृतमेनो यन्नीति देवकृतमेवैनोऽवयजते ऽव मर्त्यैर्मर्त्यकृतमिति मर्त्यकृतमेवैनोऽवयजते पुरुराव्णो देव रिषस्याहीति सर्वाभ्यो मार्तिभ्यो गोपायेत्येवैतदाह ॥४॥ समुद्रे ते हृदयमप्स्वन्तरिति । आपो वै समुद्रो रसो वाऽआपस्तदेनमेतेन रसेन सꣳसृजति सं त्वा विशन्त्वोषधीरुतापइति तदेनमेतेनोभयेन रसेन सꣳसृजति यश्चौषधिषु यश्चाप्सु द्वौ विक्रमाऽउदङ्ङुत्क्रामत्येतावती वै मनुष्ये ज्रूतिर्यावान्विक्रमस्तस्यावत्येवास्मिन्ज्रूतिस्तयैव पाप्मानं विस्रंसयति ॥५॥ सुमित्रिया न आप ओषधयः सन्त्विति । अञ्जलिनाप उपाचति वज्रो वाऽआपो वज्रेणैवैतन्मित्रधेयं कुरुते दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति यामस्य दिशं द्वेष्यः स्यात्तां दिशं परासिञ्चेत्तेनैव तं पराभावयति ॥६॥ द्रुपदादिव मुमुचानः । स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनस इति वासोऽपप्लावयति यथेषीकां मुञ्जाद्विवृहेदेवमेनꣳ सर्वस्मात्पाप्मनो विवृहति स्नाति तम एवापहते ॥७॥ उद्वयं तमसस्परीति । पाप्मा वै तमः पाप्मानमेव तमोऽपहते स्वः पश्यन्त उत्तरमित्ययं वै लोकोऽद्य उत्तरोऽस्मिन्नेव लोके प्रतितिष्ठति देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति स्वर्गो वै लोकः सूर्यो ज्योतिरुत्तमꣳ स्वर्गꣳएव लोकेऽन्ततः प्रतितिष्ठत्यनपेक्षमित्याहवनीयमुपतिष्ठते ॥८॥ अपोऽअघ्न्यान्वचारिषमिति । अपामेव रसमवरुन्द्धे रसेन समसृक्ष्महीत्यपामेव रसमात्मन्धत्ते पयस्वानग्नऽआगमं तं मा सꣳसृज वर्चसा प्रजया च धनेन चेत्याशिषमेवैतदाशास्ते ॥९॥ एधोऽस्येधिषीमहीति समिध-

मादत्ते । एधो ह वाऽग्नेः समित्समिदसि तेजोऽसि तेजो मयि धेहीत्याहवनीये समिधमभ्यादधात्यग्निमेवैतया समिन्द्धे स एनꣳ समिद्धस्तेजसा समिन्द्धे ॥१०॥ आदित्यं चरुं यज्यमाणो निर्वपति । आदित्यमीज्ञान इयं वाऽअदितिरस्यामेव यज्ञं तनुतेऽस्यामिष्ट्वा प्रतितिष्ठति धेनुर्दक्षिणेयं वै धेनुरिमामेव सर्वान्कामान्दुहे वत्सं पूर्वस्यां ददाति मातरमुत्तरस्यां यदा वै वत्सो मातरं धयत्यथ सा प्रत्ता दुहे प्रत्तामेवेमाꣳ सर्वान्कामान्दुहे ॥११॥ तदाहुः । प्रेव वाऽएषोऽस्माल्लोकाच्च्यवते योऽपोऽवभृथमभ्यवैतीत्यवभृथादुदेत्य मैत्रावरुण्या पयस्यया यजतेऽयं वै लोको मित्रोऽसौ वरुणो यदेवेदमन्तरेण तत्पयस्या तद्यन्मैत्रावरुण्या पयस्यया यजत ऽएष्वेवैतल्लोकेषु प्रतितिष्ठति प्राणो वै मित्रोऽपानो वरुणोऽन्नमेव पयस्या तद्यन्मैत्रावरुण्या पयस्यया यजते प्राणऽएवान्नाद्येऽत्तः प्रतितिष्ठति ॥१२॥ ब्राह्मणम् ॥ ४ [१. २.] ॥ ॥

डुष्टरीतुर्ह पौꣳसायनः । दशपुरुषꣳराज्यादपरुद्ध आस रेवोत्तरसमु ह पाठवं चाक्रꣳ स्थपतिꣳ सृञ्जया अपरुरुधुः ॥१॥ स होवाच । डुष्टरीतुं पौꣳसायनꣳ सौत्रामण्या त्वा याजयानि यदिदꣳ सृञ्जयेषु राष्ट्रं तत्वयि धास्यामीति तथेति तयैनमयाजयत् ॥२॥ तदु ह बल्हिकः प्रातिपीयः शुश्राव । कौरव्यो राज्ञा यो ह वाऽअयं डुष्टरीतुः पौꣳसायनो दशपुरुषꣳराज्यादपरुद्धोऽभूत्तमयं चाक्र स्थपतिः सौत्रामण्या याजयिष्यति यदिदꣳ सृञ्जयेषु राष्ट्रं तद्वास्मिन्धास्यतीति ॥३॥ स होवाच । तन्वाऽअहं तं वेदिष्यामि यदि स तस्मिन्राष्ट्रं धास्यति बहिर्धा वैनꣳ राष्ट्राद्धास्यतीति स आजगाम यस्यां वेलायां ग्रहा गृह्यन्ते ॥४॥ स होवाच । स्थपते चाक्र नाहवनीये सुरा होतव्येत्याहुर्नान्यत्राहवनीयाद्यद्याहवनीये सुराꣳ होष्यसि पापवस्यसं करिष्यसि जानि यज्ञस्य यद्यन्यत्राहवनीयाद्बर्हिर्धैनꣳ राष्ट्राद्धास्यसि नैनꣳ राष्ट्रे धास्यसि नास्मिन्राष्ट्र धास्यसीति ॥५॥ स होवाच । नाहव-

नीये सुराꣳ होष्यामि नान्यत्राहवनीयान्न पापवस्यसं करिष्यामि न ज्ञामि यज्ञस्य नैनं बहिर्धा राष्ट्राद्धास्यामि राष्ट्रꣳ एनं धास्यामि राष्ट्रमस्मिन्धास्यामीति ॥ ६ ॥ स होवाच । कथꣳ हि करिष्यसीꣳ इति स हैतदुवाचासुरेषु वाꣳ एषोऽग्रे यज्ञ आसीत्सौत्रामणी स देवानुपप्रैत्सोऽप आगछत्तमापः प्रत्यनन्दंस्तस्माद्ध श्रेयाꣳसमागतं प्रत्येव नन्दन्ति तꣳ होचुरेखेव भगव इति ॥ ७ ॥ स होवाच । बिभेमि वै प्रणायत मेति कस्माद्भगवो बिभेषीत्यसुरेभ्य इति तथेति तमापः प्राणायंस्तस्माद्यो वधत्रो भवति स बिभ्यतं प्रणयति यदापः प्राणायंस्तस्मादापः प्रणीतास्तत्प्रणीतानां प्रणीतावं प्रति ह तिष्ठति य एवमेतत्प्रणीतानां प्रणीतावं वेद ॥ ८ ॥ तदिष्टाः प्रयाजा आसुः । अपर्यग्निकृतमथासुरा अन्वाजग्मुस्ते देवाः पर्यग्निनैवासुरान्त्सपत्नान्भ्रातृव्यान्यज्ञादन्तरायंस्तथोऽएवैष एतत्पर्यग्निनैव द्विषन्तं भ्रातृव्यं यज्ञादन्तरेति ॥ ९ ॥ देवयोनिर्वाऽएष यदाहवनीयः । तस्यैतावमृतपक्षौ यावेतावभितोऽग्नी तद्यदाहवनीये यज्ञं तन्वते देवयोनावेवैतद्देवेभ्यो यज्ञं तन्वतऽउप हैनं पुनर्यज्ञो नमति नास्माद्यज्ञो व्यवछिद्यते य एवमेतद्वेद यस्य वैवं विदुष एतत्कर्म क्रियते ॥ १० ॥ उत्तरेऽग्नौ पयोग्रहान्जुह्वति । उत्तरेऽग्नौ पशूञ्छ्रपयन्ति पशूनेव तन्मर्त्यात्सतोऽमृतयोनौ दधाति मर्त्यात्सतोऽमृतयोनेः प्रजनयत्यप ह वै पशूनां पुनर्मृत्युं जयति नास्माद्यज्ञो व्यवछिद्यते य एवमेतद्वेद यस्य वैवं विदुष एतत्कर्म क्रियते ॥ ११ ॥ दक्षिणेऽग्नौ सुराग्रहान्जुह्वति । दक्षिणेऽग्नौ पावयन्ति पवित्राभिस्त्रिषंयुक्ताभिः पितृनेव तन्मर्त्यात्सतोऽमृतयोनौ दधाति मर्त्यात्सतोऽमृतयोनेः प्रजनयत्यप ह वै पितॄणां पुनर्मृत्युं जयति नास्माद्यज्ञो व्यवछिद्यते य एवमेतद्वेद यस्य वैवं विदुष एतत्कर्म क्रियते ॥ १२ ॥ तद्यदेतावग्नीऽआहवनीयाद्विछियेते । तेनाहवनीयावथ यदाहवनीयं पुनर्नाश्नुवाते तेनानाहवनीयौ तेनोभौ होमाऽउपाप्नोति यश्चाहवनीये यश्चानाहवनीये यच्च हुतं यच्चाहुतम् पु-

EEE EEE*

नर्क्षायमित्वोवाच न तदस्ति यत्सूज्ञयानाꣳ राष्ट्रं दुष्टरीतोस्तदद्य तथायं चाक्र स्यपतिर्यज्ञेऽकरिति ॥ १३ ॥ उत्तरेऽग्नौ पशुभिः पुरोडाशैः पयोग्रहैरिति चरन्ति । यदु चान्यत्तेन देवानेव तद्देवलोके प्रीणाति तꣳ एनं प्रीताः प्रीणात्यथो देवलोकमेव जयति ॥ १४ ॥ दक्षिणेऽग्नौ सुराग्रहान्जुह्वति । दक्षिणेऽग्नौ पावयन्ति पवित्राभिस्त्रिषंयुक्ताभिः पितृनेव तत्पितृलोके प्रीणाति तꣳ एनं प्रीताः प्रीणात्यथो पितृलोकमेव जयति ॥ १५ ॥ स वाऽएष आत्मैव यत्सौत्रामणी । तस्मात्सा निरुक्ता निरुक्तो ह्यात्मा लोको वयोधास्तस्मात्सोऽनिरुक्तोऽनिरुक्तो हि लोक आत्मा वै यज्ञस्य सौत्रामणी बाह्वꣳ ऐन्द्रश्च वयोधाश्च तद्यदेतावभितः पशू भवतस्तस्मादिमावात्मानमभितो बाह्व यथो वै पशुरेवं यूपस्तद्यदेतꣳ सौत्रामणिकं यूपमेतौ यूपावभितो भवतस्तस्माद्विमावात्मानमभितो बाह्व ॥ १६ ॥ ब्राह्मणम् ॥ ५ [१. ३.] ॥ चतुर्थः प्रपाठकः ॥ कण्डिकासंख्या११२ ॥ नवमोऽध्यायः [८३.] ॥ ॥ अस्मिन्काण्डे कण्डिकासंख्या४५१ ॥ ॥

इति माध्यन्दिनीये शतपथब्राह्मणे मध्यमनाम द्वादशं काण्डं समाप्तम् ॥ १२ ॥ ॥

VARIOUS READINGS.

Adhyâya १. १. १ सत्रिणः A. P. M (*). - २ नानाकुर्याद्धोबुका A. - ३ Read: तद्ओषधिभिः संदधाति. - ६ ब्राह्मणाद्धꣳसिनं A. - १ ऽन्वथोद्गात्रे सुब्रह्मण्यां दीक्षयति तꣳ हि सो wanting in A. - २. १ ऽग्नीषोमाभ्याशुवसथम°

(*) Collated for me by my learned friend Dr. W. Pertsch, during his temporary stay in Oxford.

A. - २ आयुबी A. - ३. ३ अथत्क्रयेण A. - १८ यज्ञते शो देवता A. - २३ ते तेजस्विन A.P. ते ते तेजस्विन M. - ४. २ दक्षिणो क्रुरभि° A. —

Adhyâya २. १. १ संवत्सरायं न्या A. - ibid. तद्विनुवाच A. - २. ७ °शद्वै चाः A. - १४ क्षिराड्वै यज्ञः A. - १७ सप्त वा इति AP. - ३. १ (and ३) द्वावार्द्धतामङ्काः A.P.M. The Aitareya-Brâhmaṇa omits the र्, see Böhtlingk-Roth Sanskrit-Wörterbuch, under आर्द्धयत् - ७ य वा पत्नौ A. - ibid. एवमु क्रैतद्परेषां च A. - १२ ?यज्ञत्रत्राणि is my conjecture. यज्ञतं-तत्राणि A. M. यज्ञकृंतत्राणि P. - ४. १ धगस्थि A. —

Adhyâya ३. १. ३ इत्येते । AP. - ३. १ दीक्षिरे A. - २ °स्तिनायातयाम्ना-यातययाम्ना वेदे A. - ५. २ समानधिष्ण्यास्त्वेव AP. Read: °स्त्वेव. —

Adhyâya ४. १. ३ युक्तं चायुक्तं चरंति A. Read: संचरन्ति. - १० °त्यार्त्यो वा A. - ibid. °प्रज्ञितेन. °प्रज्ञितया A.P.M. - ३. ८ अयमधि AP. - ४. २ तुविं-ग्रद्वासो A.P. - ३ऽवरां३ऽ A. ऽवरां । २॥ P. - ibid. तां३ऽ A. तां२ऽ P. —

Adhyâya ५. १. ३ निर्मथंति तथा A. - १२ नोल्किंगति A. - १३ प्रज्ञिन्नयि-षेत्ता° A. P. M. - १४ दक्षंति A. - ibid. समतोः A. समंतोः P. समत्तोः M. - १७ क्षिप्रे ऽस्याशन A. - २. १ प्रेयात् AP. - ५ कुर्यात्त्वाधुका A. - ७ ?वृषारवा-वन्व° A.P.M. - ८ योऽस्य स्वर्गो M. - ibid. तमक्त्यत्येति A. - १० तद्विद्यान्मु-ख्य A. P. M. - १३ एतां । यज्ञमा° A. P. —

Adhyâya ६. १. ३१ जुह्वयान्नृचत्ता A. P. - ४१ स वा ब्रह्म° A.P.M. Are we to read स वा or स वाव? —

Adhyâya ७. १.४ यत्स्नेक्षोस्त° A.P. - ५ and ६ गर्दभः ॥५॥ तनाभ्या° A.M.: see १३. २. २. ४. - १० नमुचिरमुनर्वा M. - २ विंदते स सोम इति A. - ११ स्त्रोषु

तथ्यदेवेन्द्रियं वीर्यमुत्सन्नꣳ स्त्रीषु A.P.M. Read both times स्त्रीषु. - १३ व्यावृत्यै A. P. - ३. ३ फेनं वज्रम° A. - ८ विश एव तत्क्षत्रं जनयति विशो A.P. - १७. १८ °पीथं चै° — सुराग्रहा ग्र° is wanting in A. - २० पशूनपिदपशुर्य° A. Read: °दपशुर्य°. —

Adhyâya ८. १. ११ व्यानस्तैरेवैनंति A. - १७ यत्र वा आत्मा पूतानि त° A. - २. १६ भेषज्याय A. M. भैष° P. - ११ आप्रियो instead of आप्र्यो! - गोरीवितिः A. - ibid. श्वित्कानाꣳ A. - १५ वेतसः सतो A. - २७ उत्थं A. - २८ उत्थमे° A. —

Adhyâya १. १. १० अव्यवत्सेदाय A. - ३. ३ कोरव्यो A. —